हस्तस्रस्तशरासनो विजयते देवो दयार्द्रेक्षणः ॥३॥

मयूरस्य ।

74 वाणीभूतपुराणपूरुषधृतिप्रत्याशया धाविते
Ar. VII. 114 निद्रातीक्षणजाशुशुक्षणिकणक्रान्ते शकुन्तेश्वरे ।
Srk31. नम्रोन्नम्रभुजङ्गपुङ्गवगुणव्याकृष्टबाणासन-
शार्दूलविक्रीडित क्षिप्तास्त्रस्य पुरद्रुहो विजयते सन्धानसीमाश्रम ॥४॥

मुरारेः ।

75 दृष्टः सप्रेम देव्या किमिदमिति भयात्
Vs. I. 3 संभ्रमाच्चासुरीभिः
स्रग्धरा शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना
सस्मितेन ।

72 (c) Ed., A जूट for लम्बि.

73 (a) Srk. स्थिरं for स्थितं.

74 (a) A, Ed. धारिते for धाविते

(b) Ar. विद्राति (Srk. निद्राति) स्फुरदा for निद्रातीक्षणजा

75 (b) A, Sp. सत्त्व for तत्त्व

आकृष्यास्त्रं सगर्वरुपशमितवधूसंभ्रमैर्दैत्यवीरैः
सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु
युष्मान् ॥५॥
भट्टनारायणस्य ।

१६ हरबाणः ।

76 क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याद-
दानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण । Srk. 49
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः As 2
साश्रुनेत्रोत्पलाभिः स्रग्धरा
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः
शराग्निः ॥१॥
अमरुकस्य ।

77 सिन्दूरश्रीर्ललाटे कनकरसमयः कर्णपाशावतंसो Srk. 67
वक्त्रे ताम्बूलरागः पृथुकुचकलसे कुङ्कुमस्यानुलेपः । स्रग्धरा
दैत्याधीशाङ्गनानां जघनपरिसरे लाक्षिकक्षौमलक्ष्मी-
रश्रेयांसि क्षिणोतु त्रिपुरहरशरोद्गारजन्मानलो वः ॥२॥
मङ्गलस्य ।

78 विष्वग्वराधूय धूमप्रचययवनिकां स्फायमानस्फुलिङ्ग-
व्याजादवकीर्य पुष्पाञ्जलिमुपरि पदं न्यस्यतो स्रग्धरा
मन्दिराणाम् ।
स्वच्छन्दाभोगसीमा महति मयपुरे दत्तरौद्राङ्गराग-
व्याप्ताशेषस्य विश्वेश्वरशरशिखिनस्ताण्डवं नः
पुनातु ॥३॥
वैद्यगदाधरस्य ।

76 (c) A, S आश्लिष्यन् for आलिङ्गन्
(d) Srk. हरतु for दहतु. Srk. बाणस्य for अमरुकस्य.
77 (a) Srk. पार्श्वे for पाश. 78 (a) Sp. यमनिकां for यवनिकां.

79 वाष्पैर्वीताङ्गरागच्छविषु विरचयन्नच्छधूमच्छटाभिः
कस्तूरीपत्रमायां मथनगरवधूवर्गवक्षोरुहेषु ।
स्रग्धरा आसामम्लानपुष्पस्तवकनवकलामंशुभिः कुन्तलेषु
व्याकुर्वन्नन्धकारं हरतु हरशरोद्गारजन्मानलो
वः ॥४॥

जलचन्द्रस्य ।

80 चापं मुष्टिर्भवान्याः सरसिजमुकुलश्रीः कथं वा विधत्ते
स्रग्धरा प्रत्यालीढं कथं वा रचयतु मणिमन्नूपुरो वामपादः ।
इत्थं यावद्वितर्कं विदधति विबुधास्तावदग्रे य आसी-
द्बाणाग्निः प्लुष्टदैत्यो मयपुरमथने धूर्जटेः
सोऽवताद्वः ॥५॥

कस्यचित् ।

१७ अष्टमूर्तिः ।

81 पयोदानां पन्थाः कवलविषयो वा परिमलं
शिखरिणी वहन् विश्राणो वा सुहृदपसुहृद्वा जलरुहाम् ।
ददद्दृह्वानो वा हविरिति मुहुर्यस्य विबुधाः
स्तुवन्त्यष्टौ मूर्तीः स जगदवतादन्धकरिपुः ॥१॥

श्रीहनूमतः ।

Kuval. 105-6 82 दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते
शार्दूलविक्रीडित यत्रामुष्य सुधीभवन्ति किरणा राशेः स यासामभूत्

79 (c) I.O. कुण्डलेषु for कुन्तलेषु
80 (b) I.O. Sp. रचयति for ०तु.
(c) I.O., S यदासीत् for य आसीत्
(d) Ed. दहने for मथने.
82 (b) Ed., A राशे for राशेः.

यस्तत्पित्तमुषःसु योऽस्य विधये यस्तस्य जीवातवे
वोढा यद्गुणमेष मन्मथरिपोस्ताः पान्तु वो
मूर्तयः ॥२॥
चित्तपस्य ।

83 मौलिं नेनेक्ति भालं तिलकयति तनोरङ्गरागं विधत्ते
धम्मिल्लं संदधाति प्रथयति शिरसि व्यक्तमुत्तं-
सलक्ष्मीम् । स्रग्धरा
संप्रीणीते भुजङ्गानपनयति रसं वेत्ति संमोदमुद्रां
याभिः शृङ्गारबन्धस्तनुभिरिव शिवस्ताभिरस्तु
श्रिये वः ॥३॥
जलचन्द्रस्य ।

84 यां धम्मिल्लपदेऽभिषिञ्चति यया सन्ध्यासु बद्धाञ्जलि
र्यामायस्य यदात्मकानि नयनान्यामील्य यां ध्यायति ।
यां च स्यन्दनतां निनाय सहितस्ताभिः स्वयं मूर्तिभि शार्दूलविक्रीडित
र्देवो विश्वतनुः पुनातु स जगच्चन्द्रार्ध-
चूडामणिः ॥४॥
सुधाकरस्य ।

85 या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हवि र्या
च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता स्रग्धरा
व्याप्य विश्वम् । Śak. I. 1
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभि-
रीश ॥५॥
कालिदासस्य ।

82 (c) Kuval. हविषे for विधये
Sp. छित्तपस्य for चित्तपस्य.
83 (b) S, I.O. संददाति for संदधाति. (c) S मुद्राः for मुद्रां.
84 (d) I.O. चन्द्रार्क for चन्द्रार्ध. 85 (d) S प्रसन्न for प्रपन्न.

१८ भैरवः ।

86 खट्वाङ्गीकृतधूमकेतुघटितप्रेताधिराट्पञ्जर-
शार्दूलविक्रीडित प्रोतब्रह्मशिरः कपालवलयं बिभ्रज्जटामण्डलम् ।
कण्ठे सप्तमहर्षिवक्त्ररचितामेकावलीमुद्वहन्
पायाद्वः सुलभव्रतोपकरणः कल्पान्तकापा-
लिकः ॥१॥

कस्यचित् ।

87 सद्यः प्रध्वस्तदेवासुरसरसशिरःश्रेणिशोणारविन्द-
स्रग्धरा स्रग्दामानद्धमूर्तेर्घनरुधिरकणक्लिन्नचर्मांशुकस्य ।
निष्पर्यायत्रिलोकीभवकवलरसव्यात्तवक्त्रस्य जीया-
दानन्दः कालरात्रीकुचकलसपरीरम्भिणो भैरवस्य ॥२॥

उमापतिधरस्य ।

88 वैकुण्ठस्य करङ्कमङ्कनिहितं स्रष्टुः कपालं करे
शार्दूलविक्रीडित प्रत्यङ्गं च विभूषणं विरचितं नाकौकसां कीकसैः ।
भस्म स्थावरजङ्गमस्य जगतः शुभ्रं तनौ बिभ्रतः
कल्पान्तेषु कपालिनो विजयते रौद्रं कपालव्रतम् ॥३॥

भवभूतेः ।

89 एकाम्भोधीकृतायां भुवि जगदखिलं निर्जनीकृत्य खेल
स्रग्धरा न्देवः कालीसहायः प्रसभविहरणोन्मुक्तलीला-
ट्टहासः ।
सद्यो दंष्ट्राशुभिन्ने तमसि निजवपुर्विम्बमालोक्य
कस्त्वं
कस्त्वं ब्रूहीति कोपादभिदधदभयं
भैरवश्चेष्टता वः ॥४॥

वैद्यगदाधरस्य ।

87 (b) A, I. O. छिन्न for क्लिन्न.

90 कल्पान्ते शयितत्रिविक्रममहाकङ्कालदन्ती स्फुर-
च्छेषस्यूतनृसिंहपाणिनखरप्रोतादिकोलामिषः । Smv. 2. 24
विश्वैकार्णवतानितान्तमुदितौ तौ मत्स्यकूर्मावुभौ शार्दूलविक्रीडित
कर्षन् धीवरतां गतोऽस्यतु महामोहं महाभैरवः ॥५॥
चित्तपस्य ।

१९ हरनृत्यारम्भः ।

91 आर्द्रां कण्ठे मुखाब्जस्रजमवनमयत्यम्बिका जानुलम्बां
स्थाने कृत्वेन्दुलेखां निबिडयति जटापन्नगेन्द्रेण
नन्दी । Srk. 76
कालः कृत्तिं निबध्नात्युपनयति करे कालरात्रिः Smv. 2.29
कपालं स्रग्धरा
शम्भोर्नृत्यावतारे परिषदिति पृथग्व्यापृता वः
पुनातु ॥१॥
शतानन्दस्य ।

92 नन्दिन् खञ्जनमञ्जुनादमुरजं संगृह्य सज्जीभव
कुष्माण्डानथ भस्मभाजनमितो लम्बोदरागम्यताम् ।
स्कन्दं नन्दय मन्दिरोदरगतं देवीति रङ्गाङ्गणे शार्दूलविक्रीडित
शम्भोस्ताण्डवमण्डनैकमनसः संजल्पितं पातु वः ॥२॥
योगेश्वरस्य ।

90 (a) Ed., I.O., Smv. शमित for शयित. Smv. बद्धः for दन्ती.
(c) Smv विशेष for नितान्त.
(d) Smv. सतां for महा.
Smv., Sp. छित्तपस्य (I.O., S शित्तिपस्य) for चित्तपस्य.
91 (a) Smv. उपनयति for अवनमयति.
(b) Srk., Smv. जटा for जटा. Smv.—anonymous.
92 S योगीश्वरस्य for योगेश्वरस्य.

Srk. 74
Smv. 2.30
शार्दूलविक्रीडित

93 भो भो दिक्पतयः प्रयात परतः खं मुञ्चताम्भोमुचः
पातालं व्रज मेदिनि प्रविशत क्षोणीतलं क्ष्माभृतः ।
ब्रह्मन्नुन्नय दूरमात्मसदनं देवस्य नो नृत्यतः
शम्भोः संकटमेतदित्यवतु वः प्रोत्सारणा
नन्दिनः ॥३॥
तस्यैव ।

S.K. II 235
Smv. 2.27
मन्दाक्रान्ता

94 अस्थीन्यस्थीन्यजिनमजिन भस्म भस्मेन्दुरिन्दु-
र्गङ्गा गङ्गोरग उरग इत्याकुलाः संभ्रमेण ।
भूपादानोपकरणगणप्रापणव्यापृतानां
नृत्यारम्भप्रणयिनि शिवे पान्तु वाचो
गणानाम् ॥४॥
धनपालस्य ।

स्रग्धरा

95 क्षोणि क्षोभं क्षमस्व त्वमपि कुरु महाकूर्म कर्म स्वकीयं
भो भोः कैलासमेरुप्रभृतिकुलधराधारिणो
गच्छताधः ।
ब्रह्मन्नुद्गच्छ दूरं कुरुत जलधयः स्थैर्यमित्यष्टमूर्ते-
र्भर्तुर्नृत्यावतारे सरभसगदिताः पान्तु
वो नन्दिवाचः ॥५॥
द्वैपायनस्य ।

93 (b) Smv. भूधराः for क्ष्माभृतः.
(c) Smv. भवनं for सदनं, नाथस्य for देवस्य. Srk. मे for नो,
Smv. महानाटकात् for तस्यैव.
94 (b) Smv. इत्युल्लसत्संभ्रमाणाम् for इत्या…मेण.
(c) S.K. वेषो for दानो. Smv. reads the line thus—
भूषावेषोपकरणकरणप्रापणव्यापृतानाम्.
95 (a) Ed. transposes क्षोणि (Sp. क्षौणि) and क्षोभं.

२० हरनृत्यम् ।

96 भ्राम्यद्विश्वंभराणि भ्रमिचलननमत्कूर्मकुम्भीनसानि
त्रुष्यत्ताराणि रिङ्गद्धरिणधरशिरःश्रेणीशीर्यद्-
दृषन्ति । स्रग्धरा
दिक्कीर्णोदञ्चदम्पि द्रवदमरचमूचक्रचञ्चद्वियन्ति
व्यस्यन्तु व्यापदं वस्त्रिपुरविजयिनस्ताण्ड-
वारम्भणानि ॥१॥
राजशेखरस्य ।

97 हेलापादप्रपातान्नमदवनिभराक्रान्तकूर्मेशशेष-
प्रोद्भूतश्वासवातोच्छलदुदधिपयोधौत-
सूर्येन्दुतारम् । स्रग्धरा
भ्राम्यद्दोःसंघवेगापतदचलकुलध्वानसंत्रस्तविश्वं
त्रैलोक्यैश्वर्यकारि द्यतु तव दुरितं ताण्डवं चन्द्र-
मौलेः ॥२॥
वाच्छोकस्य ।

98 उत्तानाः कति वेल्लिताः कति रयादाभुग्नमध्याः कति
क्षिप्तोत्क्षिप्तविकुञ्चिताः कति भुजास्तौर्यत्रिकानु-
क्रमात् । शार्दूलविक्रीडित
कल्पान्तेषु महानटस्य झटिति प्रक्रान्तचक्रभ्रमि-
भ्रान्तौ केवलमग्निहासगरलैर्लेखात्रयं पातु वः ॥३॥
सागरधरस्य ।

96 (a) Sp. महत् for नमत्, गम्भीरसारि for कुम्भीनसानि.
(b) A धरणि for हरिण.
(c) Ed., A चन्द्र for चक्र
(d) Sp., I. O. आडम्बराणि for आरम्भणानि.

97 (b) S. भाव for तारं.

99 पायाद्वः सुरदीर्घिकाजलरयभ्राम्यज्जटामण्डली-
Sık. 68 वेगव्याकुलनागनाथकफणाफूत्कारवातोच्छलत् ।
सप्ताम्भोनिधिजन्मचण्डलहरीमज्जन्नभोमण्डल-
शार्दूलविक्रीडित ग्रासत्रस्तसुराङ्गनाकलकलक्रीडाविलक्षो हरः ॥४॥

ब्रह्महरेः ।

100 सन्ध्याताण्डवडम्बरव्यसनिनो भीमस्य चण्डभ्रमि-
Srk. 50 व्यावृत्यद्भुजदण्डमण्डलभुवो झञ्झानिलाः पान्तु वः ।
Smv 2.31 येषामुच्छलतां जवेन झगिति व्यूहेषु भूमीभृता-
शार्दूलविक्रीडित मुड्डीनेषु विडौजसा पुनरसौ दम्भोलिरालोकितः ॥५॥

कस्यचित् ।

२१ हरप्रसादनम् ।

101 निःशङ्क शङ्कर करग्रथिताहिभोग
भोगप्रद प्रदलितामरवैरिवृन्द ।
वसन्ततिलक वृन्दारकार्चित चिताभसिताङ्गराग
रागातिदूर दुरितापहर प्रसीद ॥१॥

वाणस्य ।

102 करकलितपिनाक नाकनाथ द्विषदुरुमानसशूल
शूलपाणे ।
पुष्पिताग्रा भव वृषभविमान मानशौण्ड त्रिजगदकारणतारक
प्रसीद ॥२॥

सञ्चाधरस्य ।

99 (a) Srk. जाह्नवी for दीर्घिका
(d) S, Sp., Srk. त्रास for ग्रास, व्रीडा for क्रीडा.
Srk. ascribes it to कर्कराज.

100 (a) Smv. प्रणयिनो for व्यसनिनो, भर्गस्य for भीमस्य, भ्रम for भ्रमि.
(b) Smv. व्यावृत्तोद् for व्यावृत्यद्.
(c) Smv. उज्वलता for उच्छलता. S, Smv. झटिति for झगिति.
Smv. सोमनाथप्रशस्ते : for कस्यचित्.

101 (d) Sp. रागाभि॰ for रागाति॰

103 कटुविशिखशिखिप्रपञ्च पञ्चानन धनदप्रियमित्र
मित्रनेत्र । पुष्पिताग्रा
धृतसकलविकल्प कल्पशेषप्रकटमहानट नाट्य
प्रसादम् ॥३॥
तस्यैव ।

104 भव शिव शवभस्मगौर गौरीग्रथितशरीर
सरीसृपोत्तरीय । पुष्पिताग्रा
स्मरहर हर भीम भीमभूतप्रकरभयंकर शङ्कर
प्रसीद ॥४॥
तस्यैव ।

105 धृतनिधनधनुः प्रचण्ड चण्डीमुखकमल-
भ्रमरामराधिनाथ । पुष्पिताग्रा
हर रणरणकान्त कान्तमूर्ते गगनदुकूल विकूलयापदं
नः ॥५॥
तस्यैव ।

२२ गौरी ।

106 यानुद्धूलयतीश्वरः सिकतिला यैर्मौलिमन्दाकिनी शार्दूलविक्रीडित
यैर्बालेन्दुकणार्द्रकेतकदलोत्सङ्गे परागायितम् ।
यैः कैलासविलासकाननतटीकङ्केल्लिपुष्पोद्गम-
क्रीडाकार्मणमद्रिजाचरणयोस्ते रेणवः पान्तु वः ॥१॥
उमापतिधरस्य ।

107 लाक्षारागं हरति शिखराज्जाह्नवीवारि येषां Srk. 81
ये तन्वन्ति स्रजमधिजटामण्डलं मालतीनाम् । मन्दाक्रान्ता
प्रत्युत्सर्पद्विमलकिरणैर्यैस्तिरोधानमिन्दो-
र्देव्याः स्थाणौ चरणपतिते ते नखाः पान्तु विश्वम् ॥२॥
कस्यचित् ।

107 (c) Srk. यात्युत्सर्पत् for प्रत्युत्सर्पत्, इन्दुः for इन्दो .
Srk. ascribes the verse to दत्त.

108 भवजलधिजलावलम्बयष्टिर्महिषमहासुरशैल-
वज्रधारा ।
Srk. 86
पुष्पिताग्रा
हरहृदयतडागराजहंसी दिशतु शिवं भवतश्चिरं
भवानी ॥३॥
भगीरथदत्तस्य ।

109 कां तपस्वी गतोवस्थामिति स्मेराविव स्तनौ ।
अनुष्टुप्
वन्दे गौरीघनाश्लेषभवभूतिसितानना ॥४॥
भवभूतेः ।

110 अभिमतफलसिद्धिसिद्धमन्त्रावलि बलिजित्-
परमेष्ठिनोरुपास्ये ।
पुष्पिताग्रा
भगवति मदनारिनारि वन्दे निखिलनगाधिप-
भर्तृदारिके त्वाम् ॥५॥
वामदेवस्य ।

२३ विवाहसमयगौरी ।

111 गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः
Vsb I. 3
Srk. 102
Smv. 2.36
शार्दूलविक्रीडित
कण्ठस्थाय विषाय वीर्यमहतः पाणौ मणीन् बिभ्रती ।
भर्तुर्भूतगणाय गोत्रजरतीर्निर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता
च वः ॥१॥
राजशेखरस्य ।

108 (b) Srk. जगतः for भवत.
Srk. भगीरथस्य for भगीरथदत्तस्य.
111 (a) Vsb. गोनासा विनियोजितायतजरत् for गो…रजा..
(b) Srk. पाणि for कण्ठ. Srk., Vsb. महते for महत..
Srk. कण्ठे for पाणौ, मणिं for मणीन्.
(c) Smv. संदिष्ट for निर्दिष्ट.
(d) Vsb. होता for प्रीता.

112 प्रत्यासन्नविवाहमङ्गलविधौ देवार्चनव्यस्तया
दृष्ट्वाग्रे परिणेतुरेव लिखितां गङ्गाधरस्याकृतिम् ।
उन्मादस्मितरोषलज्जितरसैर्गौर्या कथंचिच्चिराद्
वृद्धस्त्रीवचनात् प्रिये विनिहितः पुष्पाञ्जलिः
पातु वः ॥२॥
भासस्य ।

Srk. 88
Spd. 102
Smv. 2.37
शार्दूलविक्रीडित

113 ब्रह्मायं विष्णुरेष त्रिदशपतिरसौ लोकपालास्तथैते
जामाता कोत्र योसौ भुजगपरिवृतो भस्मरूक्षः
कपाली ।
हा वत्से वञ्चितासीत्यनभिमतवरप्रार्थनाव्रीडिताभि-
र्देवीभिः शोच्यमानाप्युपचितपुलका श्रेयसे वोस्तु
गौरी ॥३॥
कस्यचित् ।

स्रग्धरा

114 धूमव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वरमुत्सुका नतमुखी भूयो ह्रिया ब्रह्मणः ।
सेर्ष्या पादनखाच्छदर्पणगतां गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु
वः ॥४॥
श्रीहर्षदेवस्य ।

Pd. I. 1
शार्दूलविक्रीडित

115 पादाग्रे स्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।

R I. 1
Smv. 2.38

112 (a) Smv. मण्डन for मङ्गल, व्यग्रया for व्यस्तया.
(c) S बोध for रोष. Spd., Smv. धिया for रसैः.
Srk लज्जितमसौ for लज्जितरसैः.
S भीमस्य for भासस्य Spd., Smv.—anonymous.

114 (b) I O. पश्यन्तीव समुत्सुका for पश्यन्ती वरमुत्सुका.
(c) S सर्वा for सेर्ष्या. Pd. पादनखेन्दुदर्पणगते for पाद...गताम्.

115 (a) Sp, R, Smv. पादाग्र for पादाग्रे.

शार्दूलविक्रीडित

ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया क्षिप्तोन्तरे
पातु वः ॥५॥

तस्यैव ।

२४ गौरीशृङ्गार ।

Srk· 75
Spd. 104
शार्दूलविक्रीडित

116 स्वेदस्ते कथमीदृशः प्रियतमे त्वन्नेत्रवह्नेर्विभो
कस्मात्कम्पितमेतदिन्दुवदने भोगीन्द्रभीतेर्भव ।
रोमाञ्चः कथमेष देवि भगवन् गङ्गाम्भसां शीकरै-
रित्थं भर्तरि भावगोपनपरा गौरी चिरं पातु वः॥१॥

लक्ष्मीधरस्य ।

शार्दूलविक्रीडित

117 शम्भो सत्यमिदं पयोधिमथने लक्ष्म्या वृते केशवे
वैलक्ष्यात्किल कालकूटमशितं पीतं विषं यत्त्वया।
सत्यं पार्वति नास्ति नः सुभगता साक्षी तथा च स्मरो
देवेनेति कृतस्मृतिः स्मितमुखी गौरी चिरं
पातु व ॥२॥

श्रीहर्षदेवस्य ।

शार्दूलविक्रीडित

118 चर्मालम्बिदुकूलवल्लरिचिताभस्मावधूतस्तनो-
न्मीलच्चन्दनमुत्तरीयभुजगव्यासक्तमुक्तावलि ।
मुग्धाया अपि शैलराजदुहितुर्गङ्गाधारालिङ्गनं
गाढप्रेमरसानुबन्धनिकषग्रावा शिवायास्तु वः ॥३॥

जलचन्द्रस्य ।

हरिणी

119 शिरसि कुटिला सिन्धुर्दोषाकरस्तव भूषणं
सह विषधरैः प्रत्यासन्ना पिशाचपरंपरा ।
हरसि न हर प्राणानेवं न वेद कथं न्विति
प्रणयकुपितक्ष्माभृत्पुत्रीवचांसि पुनन्तु वः ॥४॥

भगवद्गोविन्दस्य ।

116 (b) Spd. वेपित for कम्पित, तव for भव.

117 (b) A असितं for अशितं.

120 नादत्ते फणिकङ्कणप्रणयिनं नीवीनिवेशे करं
नो चूर्णै रुपहन्ति भालनयनज्योतिर्मयीं दीपिकाम् ।
धत्ते चर्म हरेण मुक्तमपि न द्वैपं भयादित्यसौ
पायाद्वो नवमोहनव्यतिकरव्रीडावती पार्वती ॥५॥
आचार्यगोपीकस्य ।

शार्दूलविक्रीडित

२५ दुर्गा ।

121 एकं महिषशिरःस्थितमपरं सानन्दं सुरगणप्रणतम् ।
गिरिदुहितुः पदयुगलं शोणितमणिरागरञ्जितं
जयति ॥१॥
जलचन्द्रस्य ।

वैतालीय

122 त्रिभुवनशुभपञ्जिकाञ्जिकेव
स्फुरति भवानि तवाङ्कुशः कराग्रे ।
डमरुरपि बिभर्ति देवि तत्तद्
विपदवसानविसर्जनीयलक्ष्मीम् ॥२॥
हरेः ।

पुष्पिताग्रा

123 ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥३॥
अमरोः ।

Srk 100
As 1
वसन्ततिलक

124 पादावष्टम्भनम्रीकृतमहिषतनोरुल्लसद्बाहुमूलं
शूलं प्रोल्लासयन्त्याः सरलितवपुषो मध्यभागस्य
देव्याः ।
विश्लिष्टस्पष्टदृष्टोन्नतविरलबहुव्यक्तगौरान्तराला-
स्तिस्रो वः पान्तु रेखाः क्रमवशविकसत्कञ्चुक-
प्रान्तमुक्ताः ॥४॥
बाणस्य ।

स्रग्धरा

123 Srk अचलसिंहस्य for अमरोः.

124 (d) Sp. मुक्ता. for मुक्ताः.

125 विद्राणे रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
Spd. 112 जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुबेरे ।
स्रग्धरा वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषं पौरुषोपघ्नविघ्नं
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा
भवानी ॥५॥
तस्यैव ।

२६ काली ।

126 यद्वक्त्राकाशशेषो नभसि न सुलभो यद्भुजानां
सहस्रैः
प्रेङ्खद्भिः कीर्यमाणास्वनुरपि विदितो नावकाशो
स्रग्धरा दिशासु ।
पञ्च ग्रासा न यस्यास्त्रिभुवनमभवत्पूरणार्थं समस्तं
क्षुत्क्षामाऽकाण्डचण्डी चिरमवतुतरां भैरवी
कालरात्रिः ॥१॥
भासोकस्य ।

127 शिखण्डे खण्डेन्दुः शशिदिनकरौ कर्णयुगले
शिखरिणी गले ताराहारस्तरलमुडुचक्रं च कुचयोः ।
तडित्काञ्ची सन्ध्यासिचयरचिता कालि तदयं
तवाकल्पः कल्पव्युपरमविधेयो विजयते ॥२॥
कस्यचित् ।

128 निर्मांसप्रकटास्थिजालविकटां पातालनिम्नोदरीं
शार्दूलविक्रीडित कूपक्रोडगभीरनेत्रकुहरामुन्नद्धजूटाटवीम् ।
दन्तान्तर्गतदैत्यकीकसकणव्याकर्षणव्यापृत-
क्रूरैकाग्रनखामखण्डितरुचं त्वां चण्डि वन्दामहे ॥३॥
कस्यचित् ।

125 (b) Sp., I. O. जातातङ्के for जाताशङ्के
(c) Spd., S, I. O. निघ्नं for विघ्नं.
127 (b) I. O. तारो for तारा.
(c) A निचय for सिचय.

129 तारान्तर्ज्वलदग्निलक्षनयनश्वभ्रान्तकूपान्तरां
क्रुद्धागस्त्यनिरस्तवारिधिपथःपातालनिम्नोदरीम्।
वन्दे त्वामजिनावृतोत्कटसिरापृष्ठास्थिसाराकृतिं — शार्दूलविक्रीडित
दष्ट्राकोटितटोत्पतिष्णुदितिजासृक्चर्चितां
चर्चिकाम् ॥४॥

उमापतिधरस्य।

130 जयति तव कूणितेक्षणमश्नत्या दशनपेषमसुरास्थि। — आर्या
कल्पशिखिस्फुटदद्रिक्काणकरालः कडत्कारः ॥५॥

शतानन्दस्य।

२७ अर्धनारीशः।

131 स जयति गिरिकन्यामिश्रिताश्चर्यमूर्ति-
स्त्रिपुरयुवतिलीलाविभ्रमभ्रंशहेतुः। — मालिनी
उपचयवति यस्य प्रोन्नतैकस्तनत्वा-
दुपरि भुजगहारः स्थानवैषम्यमेति ॥१॥

माघस्य।

132 आश्लेषाधरविम्बचुम्बनसुखालापस्मितान्यासतां
दूरे तावदिदं मिथो न सुलभं जातं मुखालोकनम्। — Sv. 68
इत्थं व्यर्थकृतैकदेहघटनाविन्यासयोरावयोः — शार्दूलविक्रीडित
केयं प्रीतिविडम्बनेत्यवतु वः स्मेरोऽर्धनारीश्वरः ॥२॥

कस्यचित्।

133 चन्द्रालोकय पश्य पन्नगपते वीक्षध्वमेतद्गणाः
कामारेः स्तनभारमन्थरमुरो लाक्षारुणाङ्घ्रिश्रियः। — शार्दूलविक्रीडित

130 (b) Ed. ध्वान for क्काण.
132 (a) I. O. निम्ब for विम्ब.
(b) I O. सुखा for मुखा.
(c) Sv. घटनोपन्यासयो for घटनाविन्यासयो.
(d) Sv. प्रेम for प्रीति.
Sv. शूरवर्मणः for कस्यचित्.

आकर्ण्य त्रिदशापगागिरमिमां सोल्लासमाभाषितां
व्रीडास्मेरनताननो विजयते कान्तार्धहारीश्वर ॥३॥

योगेश्वरस्य ।

134 स्वच्छन्दैकस्तनश्रीरुभयगतमिलन्मौलिचन्द्रः फणीन्द्र-
Ar. VII. 38 प्राचीनावीतवाही सुखयतु भगवानर्धनारीश्वरो वः ।
Smv. 2.21 यस्यार्धे विश्वदाहव्यसनविसृमरज्योतिरर्धं कृपोद्य-
स्रग्धरा द्बाष्पं चान्योन्यवेगप्रहतिसिमसिमाकारि
चक्षुस्तृतीयम् ॥४॥

मुरारेः ।

135 धम्मिल्लं च जटां च मौक्तिकसरं चाहिं च रत्नानि च
शार्दूलविक्रीडित ब्रह्मास्थीनि च कुङ्कुमं च नृशिरश्चूर्णोत्तरं भस्म च ।
क्षौमं च द्विपचर्म चैकवपुषा बिभ्रद्दिशन्नेकतां
भावानामिव योगिनां दिशतु वः श्रेयोऽर्धनारीश्वरः ॥५॥

शङ्करदेवस्य ।

२८ शृङ्गारात्मकार्धनारीश्वरः ।

136 अर्धं दन्तच्छदस्य स्फुरति जपवशादर्धमप्युत्प्रकोपा-
स्रग्धरा देकः पाणिः प्रणन्तुं शिरसि कृतपदः क्षेप्तुमन्यस्तमेव ।
एकं ध्यानान्निमीलत्यपरमविकसद्वीक्षते नेत्रमित्थं
तुल्यानिच्छाविधित्सा तनुरवतु स वो यस्य
सन्ध्याविधाने ॥१॥

कस्यचित् ।

137 अच्छिन्नमेखलमलब्धदृढोपगूढ-
वसन्ततिलक मप्राप्तचुम्बनमवीक्षितवक्त्रकान्ति ।

133 (c) Ed. सोत्प्रास for सोल्लास.
(d) S क्रीडा for व्रीडा.
134 (a) Smv. गत for मत.
(c) Ar. विसृमरं for विसृमर, अर्धे (also Smv.) for अर्धम्.
(d) Smv. सिमिसिमा for सिमसिमा.

कान्ताविमिश्रवपुषः कृतविप्रलम्भ-
संभोगसख्यमिव पातु वपुः स्मरारेः ॥२॥

छित्तिपस्य ।

138 प्रौढप्रेमरसादभेदघटितामङ्के दधानः प्रियां
देवः पातु जगन्ति केलिकलहे तस्याः प्रसादाय यः । शार्दूलविक्रीडित
व्याहर्तुं प्रणयोचितं नमयितुं मूर्धानमप्यक्षमो
धत्ते केवलमेव वामचरणाम्भोजे करं दक्षिणम् ॥३॥

गदाधरस्य ।

139 मिश्रीभूतां तव तनुलतां बिभ्रतो गौरि कामं
देवस्य स्यादविरलपरीरम्भजन्मा प्रमोदः । Srk 82
किन्तु प्रेमस्तिमितमधुरस्निग्धमुग्धा न दृष्टि-
र्दृष्टेत्यन्तःकरणमसकृत्ताम्यति त्र्यम्बकस्य ॥४॥ मन्दाक्रान्ता

भगीरथस्य ।

140 अन्यस्मै संप्रतीमं कुरु मदनरिपो स्वाङ्गदानप्रसादं
नाहं सोढुं समर्था शिरसि सुरनदीं नापि
सन्ध्यां प्रणन्तुम् । स्रग्धरा
इत्युक्त्वा कोपविद्धां विघटयितुमुमामात्मदेहं प्रवृत्तां
रुन्धानः पातु शम्भोः कुचकलसहठस्पर्शकृष्टो
भुजो वः ॥५॥

मयूरस्य ।

२९ गणेशः ।

141 एकः स एव परिपालयताज्जगन्ति Srk. 94
गौरीगिरीशचरितानुकृतिं दधानः । वसन्ततिलक

137 Ed. छित्तपस्य for छित्तिपस्य.
138 (a) Sp. अर्धे for अङ्के.
139 (b) Srk. देवस्यासीत् for देवस्य स्यात्.
140 (b) S सुरधुनीं for सुरनदीं.
(d) Sp. हृष्टो for कृष्टो.
141 A. does not give the name of the poet.

आभाति यो दशनशून्यमुखैकदेश-
देहार्धहारितवधूक इवैकदन्तः ॥१॥

वसुकल्पस्य ।

142 कपोलादुड्डीनैर्भयवशविलोलैर्मधुकरै-
Srk. 93 र्मदाम्भःसंलोभादुपरि पतितुं बद्धपटलैः ।
शिखरिणी चलद्बर्हच्छत्रश्रियमिव दधानोऽतिरुचिरा-
मविघ्नं हेरम्बो जगदघविघातं घटयतु ॥२॥

तस्यैव ।

143 सन्ध्यासिन्दूररागारुणगगनतलासङ्गिगङ्गोत्तमाङ्ग-
त्वङ्गन्नक्षत्रमालाकृतरुचिररुचि कर्णशंखीकृतेन्दुः ।
स्रग्धरा निस्तोयाम्भोदवृन्दैः श्रुतियुगलचलच्चामराडम्बरश्री-
रव्याजालंकृतिर्वः प्रवितरतु गणग्रामणीर्मङ्गलानि ॥३॥

दक्षस्य ।

144 गर्जद्गभीरघनघर्घरघोरघोष-
दिग्दन्तिभीतिजननोद्गतकण्ठनादः ।
वसन्ततिलक धुन्वन् मुखं तव निरस्यतु सर्वविघ्नं
लम्बोदरः सहजनाठ्यरसप्रवृत्तः ॥४॥

पापाकस्य ।

145 देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
अनुष्टुप् विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥५॥

उमापतिधरस्य ।

३० कार्तिकेयः ।

Srk. 91 146 स्वेच्छारम्यं लुठित्वा पितुरुरसि चिरं भस्मधूली-
Smv. 2 43 चिताङ्गो
स्रग्धरा गङ्गावारिण्यगाधे झटिति हरजटाजूटतो दत्तझम्पः ।

144 (d) Ed. प्रमत्तः for प्रवृत्त'.

146 (a) Srk., Smv. चिता for चिरं. Smv. सिताङ्गो for चिताङ्गो.

(b) Smv. पृथु for हर.

सद्यः सीत्कारकारी जलजडिमरणद्दन्तपंक्तिर्गुहो वः
कम्पी पायादपायाज्ज्वलितशिखिशिखे चक्षुषि
न्यस्तहस्तः ॥१॥

वाणस्य ।

147 अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासृक्कतो वासुके-
स्तर्जन्या विषकर्वुरान् गणयतः संस्पृश्य दन्ताङ्कुरान् । Sık. 95
एकं त्रीणि नवाष्ट सप्त षडितिव्यस्तास्तसंख्याक्रमा Spd 105
वाचः शक्तिधरस्य शैशवकलाः कुर्वन्तु वो मङ्गलम् ॥२॥ शार्दूलविक्रीडित

कस्यचित् ।

148 सुप्तं पक्षपुटे निलीनशिरसं दृष्ट्वा मयूरं पुरः
कृत्तं केन शिरोऽस्य तात कथमित्याक्रन्दतः शैशवात् । Srk. 96
अन्तर्हासपिनाकिपाणियुगलस्फालोल्लसच्चेतस- शार्दूलविक्रीडित
स्तन्मूर्धेक्षणहर्षितस्य हसितं पायात्कुमारस्य वः ॥३॥

कस्यचित् ।

149 हंसश्रेणिकुतूहलेन कलयन् भूषाकपालावलीं
बालामिन्दुकलां मृणालरभसादान्दोलयन् पाणिना । Sık. 92
रक्ताम्भोजधिया च लोचनपुटं लालाटमुद्घाटयन् शार्दूलविक्रीडित
पायाद्वः पितुरङ्कभाक् शिशुजनक्रीडोन्मुखः
षण्मुखः ॥४॥

बलभद्रस्य ।

147 (a) Srk. आसृक्कणो (Spd. आसृक्कितो) for आसृक्कतो.
(b) Spd. अङ्गुल्या for तर्जन्या.
(c) Spd. च सप्तपञ्च for नवाष्टसप्त, प्रध्वस्त for व्यस्तास्त.
(d) Spd क्रौञ्चरिपो for शक्तिधरस्य, शिशुत्वविकलाः श्रेयांसि पुष्णन्तु व· for शैशव .... मङ्गलम्

148 (a) S, I. O विलीन for निलीन
(d) Srk. तर्पितस्य for हर्षितस्य

149 (c) Ed. युगं for पुटं

150 नालैर्नीलोत्पलानां रचितगुरुजटाजूटविन्यासशोभः
स्रग्धरा कृत्वा संभुग्नकोटिद्वयमथ विसिनीकन्दमिन्दोः प्रदेशे।
मातुश्छिन्नांशुकेन त्वचमुचितपदे पौण्डरीकीं विधाय
क्रीडारुद्रायमाणो जगदवतु गुहो वीक्ष्यमाणः
पितृभ्याम् ॥५॥
हलायुधस्य।

२१ भृङ्गी।

Srk. 103
Sv. 2399
शार्दूलविक्रीडित

151 दिग्वासा यदि तत्किमस्य धनुषा सास्त्रश्च किं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं प्रति
द्वेष्टि किम्।
इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गी सान्द्रसिरावनद्धवपुषं धत्तेऽस्थिशेषं वपु ॥१॥
योगेश्वरस्य।

152 कस्मात् त्वं तातगेहादपरमभिनवा ब्रूहि का तत्र वार्ता
Srk. 98 देव्या देवो जितः किं वृषडमरुचिताभस्मभोगीन्द्र-
स्रग्धरा चन्द्रान्।
इत्येवं बर्हिनाथे कथयति सहसा भर्तृभिक्षा विभूषा
वैगुण्योद्वेगजन्मा जगदवतु चिरं हारवो भृङ्गिरीटेः ॥२॥
तुङ्गोकस्य।

150 (c) I. O. पौण्ड्रवीथी' for पौण्डरीकी'.
This verse is quoted by Aufrecht in ZDMG, xxxvi. p. 529.

151 (c) Sv. वसनैश्चेत्तस्य for धनुषा सास्त्रश्च Sp. शस्त्र' च (Srk. सास्त्रस्य) for सास्त्रश्च.
(b) Srk. भस्माङ्गस्य for भस्माथास्य Sv भस्माथाङ्गनया for भस्मा… अङ्गना. Sv असौ for इदं. Ed, S., Sp. तत· (Srk, Sv. परि) for प्रति.
(c) Ed. विरोधि for विरुद्ध.
(d) Sv., Sp. परुष' for वपुष'.

152 A तुङ्गकस्य (Srk. तुङ्गस्य) for तुङ्गोकस्य.

153 चर्चेयं क्षुधिता सदैव गृहिणी पुत्रोऽप्ययं षण्मुखो
दुष्पूरोदरभारमन्थरवपुर्लम्बोदरोऽपि स्वयम् ।
इत्येवं स्वकुटुम्बमेकवृषभो देवः कथं पोक्ष्यती-
त्यालोचयेव विशुष्कपञ्जरतनुर्भृङ्गी चिरं पातु व· ॥३॥ — शार्दूलविक्रीडित
नीलाङ्गस्य ।

154 भिक्षाभोजिनि कृत्तिवाससि वसुप्राप्तिः कुतः स्यादिति
प्रागर्धं वपुषः स्वयं व्यसनिनो यस्याहरत्पार्वती ।
तस्यार्धं कुपिता हठाद्यदि हरेन्मूर्ध्नि स्थिता जाह्नवी
हा नाथ क्व तदेति दुःस्थहृदयो भृङ्गी भृशं शुष्यति ॥४॥ — शार्दूलविक्रीडित
भवानन्दस्य ।

155 सेवां नो कुरुते करोति न कृषिं वाणिज्यमस्यास्ति नो
पैत्र्यं नास्ति धनं न वान्धवबलं नैवास्ति कश्चिद्गुणः ।
द्यूतस्त्रीव्यसनं न मुञ्चति तथापीशस्तदस्मात्फलं
किं मे स्यादिति चिन्तयन्निव कृशो भृङ्गी चिरं
पातु वः ॥५॥ — शार्दूलविक्रीडित
कस्यचित् ।

३२ गणोच्चावचम् ।

156 स्थूलो दूरमयं न यास्यति कृशो नैष प्रयाणक्षम-
स्तेनैकस्य ममैव तत्र कशिपुप्राप्तिः परं दृश्यते ।
इत्यादौ परिचिन्तितं प्रतिमुहुस्तद्भृङ्गिकूष्माण्डयो-
रन्योन्यप्रतिकूलमीशशिवयोः पाणिग्रहे पातु वः ॥१॥ — Srk. 99; शार्दूलविक्रीडित
कस्यचित् ।

153 (c) Ed., S इत्येव for इत्येवम्.
(d) A, S आलोच्यैष for आलोक्यैव (I O आलोक्यैष).
A, S शुष्यति for पातु वः.
154 (d) Ed. नाथ. for नाथ, चिरं for भृशम्
156 (a) Ed. प्रयातुं for प्रयाण A, I.O., S. क्रम for क्षम.
(b) Srk. परा for परं. Ed. तुङ्गोकस्य for कस्यचित्.

Srk. 97
शार्दूलविक्रीडित

157 चर्चायाः कथमेव रक्षति सदा सद्यो नृमुण्डस्रजं
चण्डीकेशरिणो वृषं च भुजगान् सूनोर्मयूरादपि ।
इत्यन्तःपरिभावयन् भगवतो दीर्घं धियः कौशलं
कूष्माण्डो धृतिसंभृतामनुदिनं पुष्णाति तुन्दश्रियम् ॥२॥

कस्यचित् ।

Srk. 71
Smv. 2.55
शार्दूलविक्रीडित

158 देवी सूनुमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे
हर्षाद्भृङ्गरिटावयाचितगिरा चामुण्डयालिङ्गिते ।
अव्याद्वो हतदुन्दुभिस्वनघनध्वानातिरिक्तस्तयो-
रन्योन्यप्रचलास्थिपञ्जररणत्कङ्कालजन्मा रवः ॥३॥

योगेश्वरस्य ।

Srk 77
स्रग्धरा

159 शृङ्गं भृङ्गिन् विमुञ्च त्यज गजवदन त्वं च लाङ्गूलमूलं
मन्दानन्दोसि नन्दिन्नलमबल महाकाल कण्ठग्रहेण ।
इत्युक्त्वा नीयमानः सुखयतु वृषभः पार्वतीपादमूले
पश्यन्नक्षैर्विलक्षं बलितगलचलत्कम्बलं

त्र्यम्बकं वः ॥४॥

अभिनन्दस्य ।

160 दिग्वासा वृषवाहनो नरशिरोधारी दधानोऽजिनं
भिक्षुर्भस्मभुजङ्गभूषिततनुर्भूतैर्भ्रमन् काननम् ।

157 (a) Srk. एष for एव.
158 (b) Srk. भृङ्गिरिट for भृङ्गरिट Smv. भृङ्गिरिटावबन्धित for भृङ्गरिटावयाचित.
(c) I. O., A ध्वनि for स्वन.
Smv., Srk. देवदुन्दुभिघनध्वाना॰ for दुन्दुभि……ध्वाना॰
(d) Smv. जरत् for रणत्
159 (a) A भृङ्गं for शृङ्गं.
(d) Ed., A गति for गल.

स्मर्तॄणां शिवकृत्तथापि जगति ज्येष्ठोऽस्मदोयः प्रभु- — शार्दूलविक्रीडित
र्धन्योस्मीत्यतितोषपुष्टजठरः कूष्माण्डकोऽव्याज्जगत् ॥५॥
महानिधेः ।

३२ हरिहरौ ।

161 यद्बद्धार्धजटं यदर्धमुकुटं यच्चन्द्रमन्दारयो- — Srk. 1639
र्धत्ते धाम च दाम च स्मितलसत्कुन्देन्द्र-नीलश्रियोः । — शार्दूलविक्रीडित
तत्खट्वाङ्गरथाङ्गसङ्गविकटं श्रीकण्ठवैकुण्ठयो-
र्वन्दे नन्दिमहोक्षताक्ष्र्यपरिषन्नामाङ्कमेक वपुः ॥१॥
राजशेखरस्य ।

162 नियमितजटावल्लीलीलाप्रसुप्तमहोरगं
चरणकमलप्रान्ते मुक्तस्वविक्रमगोवृषम् ।
विततफणिभुक्पत्रच्छत्र गदालगुडश्रियं — हरिणो
हरिहरवपुर्व्ह्योपास्यं पुनातु जगत्त्रयम् ॥२॥
भवानन्दस्य ।

163 येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।

160 (c) Ed. स्वेच्छो for ज्येष्ठो.
161 (a) Srk. बद्धोर्ध्व for बद्धार्ध, यदस्थि for यदर्ध.
(c) I. O चक्रं for छत्र.
(d) Srk. नानाङ्क for नामाङ्क.
Srk.-anonymous.
163 (b) Sv., Smv. read the line thus—यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योधारयत् ।

Sv. 44 यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः
Smv. 2. 104 सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदो माधवः ॥३॥
शार्दूलविक्रीडित भारवेः ।

164 एकावस्थितिरस्तु वः पुरमुरप्रद्वेषिणोर्दैवयोः
प्रालेयाञ्जनशैलशृङ्गसुभगच्छायाङ्गयोः श्रेयसे ।
शार्दूलविक्रीडित ताक्ष्यंत्रासविहस्तपन्नगफटा यस्यां जटापालयो
बालेन्दुद्युतिकोशसुप्तजलजो यस्यां च नाभीह्रदः ॥४॥
तुङ्गोकस्य ।

165 यज्ञम्बूकम्बुरोचिः फणधरपरिषद्भोजिभोगीन्द्रकान्तं
नन्दच्चन्द्रारविन्दद्युतिचरणशिरःस्यन्दि-
स्रग्धरा मन्दाकिनीकम् ।
रक्षासंहारदक्षं मदनसमुदयोद्दीपनं शश्वदव्या-
दव्याघात विबोधेऽप्युदधिगिरिसुताकान्तयोर्देह-
मेकम् ॥५॥
जलचन्द्रस्य ।

३४ कान्तासहितहरिहरौ ।

166 संभोगस्पृहयालुमन्मथपुनर्जन्मास्पदं भूर्भुवः
स्वः पायात्पुरुषोत्तमक्रतुभिदोरर्धार्धपूर्णं वपुः ।
शार्दूलविक्रीडित यल्लक्ष्मीगिरिजाकटाक्षकुटिलक्रीडाहठाकृष्टिभिः
स्यादेव त्रुटितं परस्परगुणस्यूतं न चेदन्तरा ॥१॥
त्रिपुरारिपालस्य ।

163 (d) Sv., Smv. पायात् म स्वयमन्धकक्षयकर for सो·· वलय·.
Sv. quotes the verse anonymously.
Smv. attributes it to चन्द्रक.
This verse is quoted by Aufrecht in ZDMG, xxxvi, p. 540

164 (b) S, l. O. सङ्ग for शृङ्ग.
(d) Ed., A transpose कोश and सुप्त.

166 (b) Ed. अर्धाङ्ग for अर्धार्ध.

167 वपुरवतु जटाकिरीटमिश्रं, पुरमुरसूदनयो-

विमिश्रितं वः । पुष्पिताग्रा

गिरिजलधिसुतास्वभर्तृकण्ठ, ग्रहचलिताहृतवाहु-

वल्लरीकम् ॥२॥

तस्यैव ।

168 स्फटिकमरकतश्रीहारिणो प्रीतियोगा-

त्तदवतु वपुरेकं कामकंसद्विषोर्वः । Spd. 110

न विरमति भवान्याः सार्धमब्धेर्दुहिता Smv. 2. 103

सदृशमहसि कण्ठे यत्र सीमाविवादः ॥३॥ मालिनी

योगेश्वरस्य।

169 देवस्यैकतमालपत्रमुकुटस्यार्धं पुरद्वेषिणो

देहार्धेन समस्यमानमसमं श्वःश्रेयसायास्तु वः ।

यस्मिन् भूधरकन्यकाब्धिसुतयोरप्राप्तसंभोगयो- शार्दूलविक्रीडित

रन्योन्यप्रतिकर्मनर्मभिदुरो भूयाननङ्गज्वरः ॥४॥

हरेः ।

170 धाता सौहृदसीमविस्मितमुखं भेदभ्रमापासना-

त्सानन्दं मुनिभिः सनिर्वृति सुरैरेकत्र सेवासुखात् । शार्दूलविक्रीडित

पार्वत्या स्वपदावकृष्टिकुटिलभ्रूभङ्गमालोकितः

पायाद्वो भगवांश्चराचरगुरुर्देहार्धहारी हरिः ॥५॥

आर्याविलासस्य ।

167 (a) Ed. repeats वपुरवतु once.

168 (c) Spd, Smv भवति गिरिसुतायाः for न.... भवान्याः, अम्भोधिपुत्र्या for अब्धेर्दुहिता.

Spd.-anonymous. Smv. कविरत्नस्य.

169 (a) S, I. O. मुर for पुर.

(c) I. O. अद्रि for अब्धि.

170 (c) Ed. स्वपदापकृष्टि for ०वकृष्टि.

३५ गङ्गा ।

171 ब्राह्मं तेजो द्विजानां ज्वलयति जडिमप्रक्रमं हन्ति
बुद्धे-
स्रग्धरा वृद्धिं सेकेन सद्यः शमयति बलिनो
दुष्कृतानोकहस्य ।
ऊर्ध्वं चैवात्र लोकादपि नयतितरां जन्मिनो
मग्नमूर्ती-
स्त्वद्धारावारि काशीप्रणयिनि परित· प्रक्रिया
कीदृशीयम् ॥१॥
कोलाहलस्य ।

172 दुर्वारदोषतिमिरागमत्रासरश्रीः, कैवल्यकैरव-
विकाससितांशुलेखा ।
वसन्ततिलक जीयात् त्रिविष्टपधुनी कलिकालभग्न, गीर्वाण-
राजनगराकरवैजयन्ती ।।२॥
ग्रहेश्वरस्य ।

173 तीर्थाटनैः किमधिकं क्षणमीक्षिता चे-
त्पीतं त्वदम्बु यदि देवि मुधा सुधापि ।
वसन्ततिलक स्नातं यदि त्वयि विरिञ्चिपदं न दूरे
मुक्तिः करे यदि च सा समुपासितासि ॥३॥
विरिञ्चेः ।

174 तीरं तवावतरतीह यथा यथैव
देहेन देवि जरता मनुजो मुमूर्षुः ।
वसन्ततिलक अम्ब स्वयंवरवशंवदनाकनारी
दोर्वेल्लिपल्लवि नभोऽपि तथा तथैव ॥४॥
तस्यैव ।

172 (b) A, S, I. O. पिष्टप for विष्टप
173 (a) I. O. क्षणमीक्ष्यसे for ०मीक्षिता.
(b) A. transposes मुधा and सुधा.

175 तप्तं यन्न तपो हुतं च न हविर्यज्जातवेदोमुखे
दत्तं यच्च न किंचिदेव न कृतो यत्तीर्थयात्रादरः। शार्दूलविक्रीडित
काकेनेव शुनेव केवलमयं यत्पूरितः पुद्गलो
मातस्त्वां परिरभ्य जाह्नवि स मे
शान्तोऽयमन्तर्ज्वरः ॥५॥
सेन्तुतस्य।

३६ गङ्गाप्रशंसा।

176 धर्मस्योत्सववैजयन्ति मुकुटस्रग्वेणिगौरीपते-
स्त्वां रत्नाकरपत्नि जह्नुतनये भागीरथि प्रार्थये। SK IV. 183
त्वत्तोयान्तशिलानिषण्णवपुषस्त्वद्वीचिभिः प्रेङ्खत- Srk 1613
स्त्वन्नाम स्मरतस्त्वदर्पितदृशः प्राणाः शार्दूलविक्रीडित
प्रयास्यन्ति मे ॥१॥
लक्ष्मीधरस्य।

177 शत्रौ मे सुहृदीव काप्युपकृतिर्भूयादसूया न तु
स्वाच्छंद्रं सत्सु मतिर्जनेषु करुणा हीना न दीनात्मसु। शार्दूलविक्रीडित
प्रक्षीणा कलिकल्मषक्षयकरी तृष्णा न कृष्णार्चने
देवि श्रद्दधतां गतिस्त्वयि मुदा मन्दा न
मन्दाकिनि ॥२॥
तस्यैव।

178 प्रसीद श्रीगङ्गे मृडमुकुटचूडाग्रसुभगे
तवोल्लोलोन्मूलः स्खलतु मम संसारविटपी। शिखरिणी

175 (a) S, I. O. transpose च and न
Sp. सेन्हतस्य (S सेन्दुडस्य) for सेन्तुतस्य.

176 Lines b-c appear to have been inspired by the गङ्गास्तोत्र, attributed to Vālmīki, which begins as मातः शैलसुता etc. Srk—वाक्कूटस्य for लक्ष्मीधरस्य.

177 (b) I. O स्वच्छा for स्वाच्छ्यं.

अथोत्पत्स्ये भूयस्त्रिजगदधिराजोऽपि न तदा
श्वपाकः काको वा भगवति भवेयं तव तटे ॥३॥

पादुकस्य ।

179 कदा ते सानन्द विततनवदूर्वाश्चिततटी-
कुटीरे तीरे वा सवनमनु मन्वादिकथितैः ।
शिखरिणी कथावन्धैरन्धङ्करणकरणग्रामनियमा-
द्यमादुज्झन् भीतिं भगवति भवेयं प्रमुदितः ॥४॥

गोपीचन्द्रस्य ।

180 बद्धाञ्जलिर्नौमि कुरु प्रसादम्
अपूर्वमाता भव देवि गङ्गे ।
उपजाति अन्ते वयस्यङ्कगताय मह्यम्
अदेहबन्धाय पयः प्रयच्छ ॥५॥

केवट्टपपीपस्य ।

३७ हरेर्मत्स्यावतारः ।

181 मत्स्यः पुनातु जगदोङ्कृतिकुञ्चितास्यो
ब्रह्माद्वयप्रणयपीवरमध्यभागः ।
क्रीडन्नसौ जलधिवीचिभिरेव नेति
वसन्ततिलक नेत्यादराद्दिव विभावितपुच्छकम्पः ॥१॥

आवन्त्यकृष्णस्य ।

182 देव्याः श्रुतेर्दनुजदुर्णयदूषिताया
भूयःसमुद्गमविधाववलम्बभूमिः ।
एकार्णवीभवदशेषपयोधिमध्य-
वसन्ततिलक द्वीपं वपुर्जयति मीनतनोर्मुरारेः ॥२॥

उमापतिधरस्य ।

178 (c) I. O. अथोत्पाद्ये for अ...स्ये.
The verse is omitted by A.

179 This verse is quoted by Aufrecht in ZDMG, xxxvi, p. 532.

180 (a) A, I. O. स्तौमि for नौमि.

181 (c) S, I. O. एष for एव.

183 ब्रह्माण्डोदरदर्पणे भ्रमिरयोत्क्षिप्ताम्बुधिक्षालिते
संक्रान्तामनिमेषलोचनयुगेनोत्पश्यतः स्वां तनुम्।
शौरेर्मीनतनोः कृशानुकपिशं पार्श्वद्वयं प्रोल्लस- शार्दूलविक्रीडित
च्चन्द्रार्काङ्कितकाञ्चनाद्रिशिखराकारं शिरः
पातु वः ॥३॥
वसन्तदेवस्य।

184 पातु त्रीणि जगन्ति पार्श्वकषणप्रक्षुण्णदिङ्मण्डलो
नैकाब्धिस्तिमितोदरः स भगवान् क्रीडाझषः
केशवः। Srk 135
त्वङ्क्निष्ठुरपृष्ठरोमखचितब्रह्माण्डभाण्डावधे- शार्दूलविक्रीडित
र्यस्योत्फालकुतूहलेन कथमप्यङ्गेषु
जीर्णायितम् ॥४॥
रघुनन्दनस्य।

185 मत्स्यः पुच्छाभिघातेन तुच्छीकृतमहोदधिः। अनुष्टुप्
अपर्याप्तजलक्रीडारसो दिशतु वः शिवम् ॥५॥
कस्यचित्।

३८ कूर्मः।

186 पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना- Srk. 105
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः Sv. 36
पान्तु वः। शार्दूलविक्रीडित

184 (c) Srk. भाण्डस्थिते for भाण्डावधे
(d) Srk. उत्स्फाल for उत्फाल.
S, I. O. read वपुनन्दनस्य (?) instead of रघुनन्दनस्य.

185 S, I. O. omit कस्यचित्.

यत्संस्कारकलानुवर्तनवशाद्वेलाच्छलेनाम्भसां
याताயातमयन्त्रितं जलनिधेर्नाद्यापि
विश्राम्यति ॥१॥
केशटाचार्यस्य ।

187 क्षीराब्धौ मथ्यमाने त्रिदशदनुसुतोन्मुक्तकोलाहलौघे
ब्रह्माण्डकाण्डखण्डस्फुटनगुरुरवभ्रान्तिभाजि
त्रिलोक्याम् ।
स्रग्धरा
सद्यो निद्रावबोधादुपरि रयवशक्षिप्तदीर्घक्षितिध्रा-
लग्नग्रीवाप्रकाण्डो जयति कमठराट्
चण्डविष्कम्भतुल्यः ॥२॥
वसुसेनस्य ।

188 पाथाब्धो मन्दराद्रिभ्रमणनिकषणाकृष्टपृष्ठाग्रकण्डू-
स्रग्धरा
लीनानिद्रालुरब्धेः क्षुभितमगणयन्नद्भुतः कूर्मराजः ।
यस्याङ्गमर्दहेलावशचलितमहाशैलकीला धरित्री
त्वङ्गत्कल्लोलरत्नाकरवलयचलन्मेखला
नृत्यतीव ॥३॥
सूरेः ।

186 (c) Sv. निभेनाम्भसो for छलेनाम्भसां.
(d) Sv. अतन्द्रितं for अयन्त्रितं
Srk. ascribes the verse to Vākpatirāja.
Sv.—anonymous
This verse occurs in the *Bhāgavata-purāna*, xii. 13.2 (Ed. Vasu, Calcutta, 1345 B.S.) with पृष्ठे for पृष्ठ, निभेन for छलेन, अतन्द्रितं for अयन्त्रितम्.
187 (a) Ed. त्रिदशदनुसुतोद्भूतकोलाहलौघद् for ०सुतोन्मुक्तकोलाहलौघे.
Ed. बन्धसेनस्य for वसु०.

189 पार्श्वास्फालातिवेगाज्झगिति च विरहादुच्छलद्भिः
पतद्भि-
र्भूयोभूयः समुद्रैर्मिहिरमतिरयादापिबद्भि- स्रग्धरा
र्वैमद्भिः ।
कोटीरस्तोयदानां क्षणमिव गगने दर्शयन् वः पुनीता-
दीपद्गात्रावहेलाचलितवसुमतीमण्डलः
कूर्मराजः ॥४॥
धरणीधरस्य ।

190 कुर्मः कूर्माकृतये हरये मुक्तावलम्बनाय नमः ।
पृष्ठे यस्य निषण्णं शैवलवल्लीसमं विश्वम् ।।५॥ आर्या
भवानन्दस्य ।

३९ वराहः ।

191 दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरविशत्तोयतुच्छेषु नाप्तः । Srk. 134
प्राप्ताः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते स्रग्धरा
येनोद्धारे धरित्र्याः स जयति विभुताबृंहितेच्छो
वराहः ॥१॥
वराहमिहिरस्य ।

192 अस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरःस्थली
देवः सर्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः । Srk. 104
क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू- शार्दूलविक्रीडित
र्भाति स्म प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः ॥२॥
नग्नस्य ।

189 (a) Before this line S, I. O, Sp. add यत्. Sp. स्फालवेगात् for स्फालाति०.
(c) Sp. क्षणमपि for ०मिव.

191 (c) Ed. ननु चन for न लुठन.
(d) Srk. विघ्नितेच्छो for बृंहितेच्छो.

192 Srk. ascribes the verse to Vākpatirāja.

193 सेयं चन्द्रकलेति नागवनितानेत्रोत्पलैरर्चिता
मञ्जीरापगमक्षमेति फणिना सानन्दमालोकिता ।
शार्दूलविक्रीडित दिङ्नागैः सरलीकृतायतकरैः स्पृष्टा मृणालाशया
भित्त्वोर्वीमभिनि सृता मधुरिपोर्दंष्ट्रा
चिरं पातु वः ॥३॥
केशवस्य ।

194 घोणाघोराभिघातोच्छलदुदधिजलासारसिक्ता-
ग्ररोमा
स्रग्धरा रोमाग्रप्रोततारानिकर इति सुरैर्धीरमालोकितो वः ।
श्वासाकृष्टावकृष्टप्रविशदपसरद्भूधविम्बानुबन्धा-
दाविर्व्यक्तं दिनश्रीः स दिशतु दुरितध्वंसमाद्यो
वराहः ॥४॥
नरसिंहस्य ।

195 येनाधोमुखपद्मिनीदलधिया कूर्मश्चिरं वीक्षितो
घ्रातो येन मृणालमुग्धलतिकाबुद्ध्या फणिग्रामणीः ।
शार्दूलविक्रीडित यः शालूकमिवोद्दधार धरणीबिम्बं पुनीतादसौ
त्वामेकार्णवपल्वलैकरसिकः क्रीडावराहो हरिः ॥५॥
कस्यचित् ।

४० नरसिंहः ।

196 सोमार्धायितनिष्पिधानदशनः सन्ध्यायितान्तर्मुखो
शार्दूलविक्रीडित बालार्कायितलोचनः सुरधनुर्लेखायितभ्रूलतः ।
अन्तर्नादगभीरपल्वलगलत्वग्रूपनिर्यत्तडित्
तारस्फारसटावरुद्धगगनः पायान्नृसिंहो जगत् ॥१॥
मुरारेः ।

193 (a) Ed. नाक for नाग.
194 (a) S, I. O., Sp. ०जलधि for उदधि
(d) Sp. दहतु for दिशतु
195. (b) Sp. प्रीतो for घ्रातो.
196 (b) S भ्रूतलः for ०लतः.

197 चटच्चटिति चर्मणि च्छमिति चोच्छलच्छोणिते
धगद्धगिति मेदसि स्फुटतरोऽस्थिषु ष्ठादिति।
पुनातु भवतो हरेरमरवैरिनाथोरसि
क्वणत्करजपञ्जरक्रकचकाषजन्मा रवः ॥२॥
वाक्पतिराजस्य।

Srk 116
Spd 126
Smv 2.77
पृथ्वी

198 प्रेङ्खद्भास्वरकेशरौघरचितत्रैलोक्यसन्ध्यातपो
ब्रह्माण्डोदररोधिघर्घरसघूत्कारप्रचण्डध्वनिः।
स्फूर्जद्वज्रकठोरनखरक्षुण्णासुरोरःस्थली
रक्तास्वादविदीर्णदीर्घरसनः पायान्नृसिंहो
जगत् ॥३॥
तस्यैव।

शार्दूलविक्रीडित

199 चक्र ब्रूहि विभो गदे जय हरे कम्बो समाज्ञापय
भो भो नन्दक जीव पन्नगरिपो किं नाथ
भिन्नो मया।

Sv. 87
शार्दूलविक्रीडित

197 (a) I. O. छटच्छटिति for चट.... ति. Smv. चोच्चलच्छोणिते for चोच्छल०

(b) Smv. धगि for धग. S inserts वाचो bet. स्फुटतरो and अस्थिषु. Spd. स्फुटरव (Smv. ०रवे) for स्फुटतरो. Sp., Spd, Smv. अस्थिनि for अस्थिषु. Spd. ष्ठागिति for ष्ठादिति.

(c) Spd. वक्ष स्थल for नाथोरसि

(d) Smv. कोप for काप. Srk., Spd. ०जन्मानल· for ०जन्मा रवः
Smv. वाक्पतिनाथस्य for ०राजस्य.

198 (a) I. O. भासुर for भास्वर.

(b) A, I. O., Sp. प्रगल्भ for प्रचण्ड.

(c) I. O. स्थूलोरः for सुरोर.

199 (a) Sp. विभा (?) for विभो.

(b) Ed. पन्नगपते for ० रिपो.

को दैत्यः कतमो हिरण्यकशिपुः सत्यं भवद्भ्रः शपे
केनास्त्रेण नखैरिति प्रवदतः शौरेर्गिरः पान्तु वः ॥४॥

केशटस्य ।

200 किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो
Srk. 128 नैवं धिक् कोत्र जीव द्रुतमुपनय तं सोपि संप्राप्त एव ।
Smv 2. 76 चापं चापं न खड्गं झटिति हहह हा
स्रग्धरा कर्कशत्वं नखाना-
मित्येवं दैत्यराजं निजनखकुलिशैर्जघ्निवान्
सोऽवताद्वः ॥५॥

श्रीव्यासपादानाम् ।

४१ नरसिंहनखा ।

201 दंष्ट्रासंकटवक्त्रघर्घरललज्जिह्वाभृतो हव्यभुग्-
ज्वालाभास्वरभूरिकेशरसटाभारस्य दैत्यद्रुहः ।
Srk. 141 व्यावल्गद्बलवद्धिरण्यकशिपुक्रोडस्थलीपाटन-
शार्दूलविक्रीडित स्पष्टप्रस्फुटदस्थिपञ्जरखक्रूरा नखाः पान्तु वः ॥१॥

दक्षस्य ।

199 (d) Sv. विष्णोर्मुखं पातु व· for शौरे ·· व..

200 (b) Srk. तत् for धिक्. Sp. द्रुहमपनय for द्रुतमुपनय. Srk नन्वयं for सोपिसं Smv. reads the line thus—नैवाद्यापि प्रचण्डो द्रुत-मुपनयतायं ननु प्राप्त एव.

(c) Ed. मज्ज (Sp. खड्गकं) for खड्गं. Smv. नखाग्रं for नखड्ग. Srk. त्वरिततरमहो (Smv. त्वरितमहहहा) for झटिति . .. हा

(d) Srk इत्थं for इत्येवं, दैत्याधिराजं for दैत्यराज, य· स वोऽव्यात् (also Smv) for सो····· वः.

Smv. attributes it to वाक्पतिनाथ.

201 (a) Sp. कंकट for संकट. Srk. कन्दरतरत् for घर्घरललत्.

(b) Srk भासुर for भास्वर, केशरि for केशर.

Srk. ascribes the verse to वाक्पति.

202 ये बालेन्दुकलार्धविभ्रमभृतो मायानृसिंहाकृते-
र्निर्याता इव ये सिरासरणिभिर्नाभ्यब्जकन्दाङ्कुराः । शार्दूलविक्रीडित
ते वक्षःस्थलदारितासुरसरित्कीलालधारारुणाः
पायासुर्नवकिंशुकाग्रमुकुलश्रीसाक्षिणः
पाणिजाः ॥२॥

वराहस्य ।

203 अस्रस्रोतस्तरङ्गभ्रमिषु तरलिता मांसपङ्के लुठन्तः
स्थूलास्थिभङ्गैर्धवलविसलताग्रासमाकल्पयन्तः । स्रग्धरा
मायासिंहस्य शौरेः स्फुरदरुणहृदम्भोजसंश्लेषभाजः
पायासुर्दैत्यवक्षःस्थलकुहरसरोराजहंसा
नखा वः ॥३॥

मयूरस्य ।

204 पुनन्तु भुवनत्रय दलितदैत्यवक्षःस्थल-
प्रसर्पिरुधिरच्छटाच्छुरणबालसूर्यत्विषः । पृथ्वी
दृढास्थिचयचूर्णनाघटितशब्दसारा हरे-
र्नृसिंहवपुषश्चिरं पिशितपिण्डगर्भा नखाः ॥४॥

धूर्जटिराजस्य ।

205 जयन्ति निर्दारितदैत्यवक्षसो
नृसिंहरूपस्य हरेर्नखाङ्कुराः । Srk. 130
विचिन्त्य येषां चरितं सुरारयः वंशस्थविल
प्रियानखेभ्योऽपि रतेषु विभ्यति ॥५॥

कस्यचित् ।

४२ शृङ्गारिनरसिंहः ।

206 लक्ष्मीमुरःपरिसरे वहतः सलीलं
योगासनं च चरतो नृहरेर्जयन्ति । वसन्ततिलक

203 (a) I. O. ऽभ्यटन्त॰ for लुठन्त.
(b) S, I. O. ॰भङ्गे धवल for ॰भङ्गैर्धवल.

एकक्षणोपनतमान्मथभावमुग्ध-
स्वात्मावबोधमसृणानि विलोकितानि ॥१॥

कस्यचित् ।

207 न्यञ्चत्केसरमुत्तरङ्गपुलकस्रङ्लद्धमर्धस्खल-
द्दुन्द्वालापमपास्तगर्जनमटद्भ्रूभङ्गमार्द्रेक्षणम् ।
शार्दूलविक्रीडित
स्विद्यत्पाणि विनीतहस्तिकरजं पायान्नृसिंहाकृते-
र्देवस्य श्रियमङ्कसीम्नि दधतो विश्रान्तरौद्रं वपुः ॥२॥

वैद्यगदाधरस्य ।

208 स्वच्छन्दं वैरिवक्षःस्थलकुलिशभिदो वीक्ष्य
कन्दर्पचाप-
क्रीडाभाजो नखाग्रान् समसमयभयानन्दलोला-
स्रग्धरा
यताक्ष्याः ।
लक्ष्म्या वक्षोजकुम्भं करिकलभशिरःशङ्कया
वीक्ष्यमाणः
स्वैरं शान्ताक्षिरागो जयति नरहरि-
र्जातचित्तानुरागः ॥३॥

जलचन्द्रस्य ।

209 अव्याद्वो वज्रसारस्फुरदुरुनखरक्रूरचक्रक्रमाग्र-
स्रग्धरा
प्रोद्भिन्नेन्द्रारिवक्षःस्थलगलदसृगासारकाश्मीरगौरः ।
प्रस्फूर्जत्केशराग्रग्रथितजलधरश्रेणीनीलाब्जमाल्यः
सूर्याचन्द्रावतंसो नरहरिरसमाबद्धशृङ्गारलीलः ॥४॥

प्रजापतेः ।

210 आनन्दमुग्धनयनां श्रियमङ्कभित्तौ
वसन्ततिलक
बिभ्रत्पुनातु भवतो भगवान् नृसिंहः ।
यस्यावलोकनविलासवशादिवासी
दुत्सन्नलाञ्छनमृगः कमलामुखेन्दुः ॥५॥

उमापतिधरस्य ।

209 (d) Sp. समारब्ध for समाबद्ध.

४३ वामनः।

211 इदं प्रायो लोके न परिचितपूर्वं नयनयो-
र्न याच्ञा यत्पुंसः सुगुणपरिमाणं लघयति। शिखरिणी
विशङ्किर्विश्वात्मा स्ववपुषि वलिप्रार्थनकृते
त्रपालीनैरङ्गैर्यदयमभवद्वामनतनुः ॥१॥

वङ्कस्य।

212 अपसर पृथिवि समुद्राः संवृणुताम्बूनि
भूभृतो नमत। आर्या
वामनहरिलघुतुन्दे जगतीकलहः स वः पातु ॥२॥

भवानन्दस्य।

213 कुतस्त्वमणुकः स्वतः स्वमिति किं न यत्कस्यचि-
त्किमिच्छसि पदत्रयं ननु भुवा किमित्यल्पया। Srk. 114
द्विजस्य शमिनो मम त्रिभुवनं तदित्याशयो पृथ्वी
हरेर्जयति निह्नुतः प्रकटितश्च वक्रोक्तिभिः ॥३॥

वाक्पतेः।

214 पूज्यो ब्रह्मविदां त्वमेव विमलज्ञानैकपात्रं भवा-
न्मद्भाग्येन गतोऽतिथिस्त्वमधुना किं ते त्रिभिर्भूपदैः। शार्दूलविक्रीडित
त्रैलोक्यं भवतः स्वमित्युपगतो दैत्येश्वरेणादरा-
ज्ज्ञातोस्मीति सलज्जनम्रवदनः पायाज्जगद्वामनः ॥४॥

वसुसेनस्य।

215 लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितो हरेः। Spd. 278
बलिरेष स येनास्य भिक्षापात्रीकृतः करः ॥५॥ अनुष्टुप्

गणाध्यक्षस्य।

211 (b) I. O. स्व for सु
(d) A, I. O. हीणै for लीनै.
213 (a) Ed. अनुकं (Sp. अमुकः) for अणुक.
215 (b) Sp., S, I. O. एव for एष. Spd. धन्यो बलिः for बलिरेष.
Spd.-anonymous.

४४ त्रिविक्रमः।

216 किं छत्रं किं नु रत्नं तिलकमथ तथा कुण्डलं
Smv. 2.85 कौस्तुभो वा
स्रग्धरा चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्बलिध्वंसि देहे।
ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं
पायात्तद्वोऽर्कबिम्बं स च दनुजरिपुर्वर्धमानः
क्रमेण ॥१॥

श्रीहनूमतः।

217 ज्योतिश्चक्राक्षदण्डः क्षरदमरसरित्पट्टिका केतुदण्डः
स्रग्धरा क्षोणीनौकूपदण्डः शतधृतिभवनाम्भोरुहो
नालदण्डः।
ब्रह्माण्डच्छत्रदण्डस्त्रिभुवनस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां
कालदण्डः ॥२॥

दण्डिनः।

218 चञ्चत्पादनखाग्रमण्डलरुचिप्रस्यन्दिगङ्गाजलो
शार्दूलविक्रीडित विस्फूर्जद्बलिराज्यनाशपिशुनोत्पाताम्बुवाहद्युतिः।
पातु त्वां चरणो हरेः क्रमविधौ यस्याधिकं द्योतते
दूरादङ्गुलिमुद्रिकामणिरिव स्फारांशुजालो
रविः ॥३॥

विक्रमादित्यस्य।

216 (a) Smv. उत for अथ
(b) Smv. किं for वा, द्वेषि for ध्वंसि
217 (a) I. O. धुनी for सरित्.
218 (a) Sp., I. O. मण्डन for मण्डल.
(b) I. O. नाशादिगुणो for नाशपिशुनो.

219 यत्काण्डं गगनद्रुमस्य यदपि क्षोणीतडागोदरे
देवस्यैव यशोम्बुशोभिनि महायष्टिः प्रतिष्ठाकरी।
तद्विष्णोः पदमन्तरालजलधेराधारतो भूतला- शार्दूलविक्रीडित
त्पारं द्यामुपगन्तुमुद्यमवतां सेतूभवत्पातु वः ॥४॥
चक्रपाणेः।

220 खर्वग्रन्थिविमुक्तसन्धिविकसद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकुटीगम्भीरसामध्वनि। Srk. 124
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं शार्दूलविक्रीडित
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥५॥
वाक्पतिराजस्य।

४५ परशुरामः।

221 दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं
रोमाञ्चिताः पश्यत। शार्दूलविक्रीडित
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मैवाविरभूत्कथाद्भुतमिदं यत्रैव चास्तंगतम् ॥१॥
केशटस्य।

222 हा तातेति न जल्पितं न रुदितं न स्वीकृत तद्धनं
न स्नातं न च वीक्षितः परिजनः पित्रे न दत्तं जलम्। शार्दूलविक्रीडित
यावन्न क्रकचाभिघातविगलद्राजन्यमर्माणामसृ-
ग्गण्डूषैर्घनघोरघर्घररवाः सन्तर्पिताः फेरवः ॥२॥
तस्यैव।

223 शौर्यं शत्रुकुलक्षयावधि यशो ब्रह्माण्डखण्डावधि
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः। शार्दूलविक्रीडित

219 (d) Sp. सिन्धू for सेतू.

221 Ed. attributes the verse to केशव

222 (b) A, I. O. निरीक्षितः for च वीक्षितः.

वीर्यं यन्तु गिरां न तत्पथि ननु व्यक्तं
हि तत्कर्मभिः
सत्यं ब्रह्मतपोनिधेर्भगवतः किं किं न लोकोत्तरम् ॥३॥
भवमूतेः ।

224 गोत्राचारविशेषपारगतया वृद्धाभिरादिष्टया
शार्दूलविक्रीडित माता वस्तुषु तेषु तेषु विशदन्यस्तेषु दृष्टे. पुरः ।
अन्नप्राशनवासरे सरभसं वक्षोभरोत्सर्पिणा
येनात्तं धनुरीक्षिताश्च झटिति क्षत्रावतंसा
दिशः ॥४॥
केशटस्य ।

225 त्रिःसप्तावधि वाधिता क्षितिभुजामाजन्म वैखानस-
शार्दूलविक्रीडित कर्ता मातृवधैनसः स सकलश्रुत्यर्थवीथीगुरुः ।
विश्वस्याश्च भुवः क्रतौ वितरिता श्यामाकमुष्टिंपचो
रामः सोऽयमुदग्रगेयमहिमा कासां गिरां
गोचरः ॥५॥
कस्यचित् ।

४६ श्रीरामः ।

226 शौर्योत्कर्षतृणीकृतत्रिभुवनो लङ्कापतिः सोऽभव-
शार्दूलविक्रीडित त्कारायामुपवासयन् विजयते तं हेलया हैहयः ।
लीलालूनविशालतद्भुजवनोऽभूज्जामदग्न्यस्तत-
स्तज्जेता जनकात्मजापरिवृढो रामः कथं
वर्ण्यताम् ॥१॥
सुरभे ।

223 (c) I. O. यत् for तत्.
(d) S, A वा न for किं न.

224 Ed. attributes the verse to केशव.

226 Ed.-anonymous.

227 रामः कस्य न विस्मयाय मनसो निःशङ्कलङ्केश्वर-
त्रुट्यन्मौलिसिरासमुच्छलदसृग्धारानुबन्धेन यः । शार्दूलविक्रीडित
तद्दोर्विक्रमविद्रुता दशदिशो भोगाय भूमण्डले
सम्यग्वासयितुं प्रवालघटिता
यष्टीरुदस्तम्भयत् ॥२॥
दक्षस्य ।

228 मार्तण्डैककुलप्रकाण्डतिलकस्त्रैलोक्यरक्षामणि-
र्विश्वामित्रमहामुनेर्निरुपधिः शिष्यो रघुग्रामणीः । शार्दूलविक्रीडित
रामस्ताडितताडकः किमपरं प्रत्यक्षनारायणः
कौशल्यानयनोत्सवो विजयते
भूकश्यपस्यात्मजः ॥३॥
राजशेखरस्य ।

229 रामो नूनमयं निशाचरचमूकालाग्निरुद्रोपमो
निःसन्देहमयं च विक्रमनिधिः सौमित्रिरस्यानुजः । शार्दूलविक्रीडित
वारं वारमपाङ्गभागचलितैर्यद्दृष्टिपातैरियं
लङ्काभर्तुरनीकिनी पितृपतेः पाशैरिवाबध्यते ॥४॥
श्रीमित्रस्य ।

230 रामोऽसौ भुवनेषु विक्रमगुणैर्यातः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि पुनः देवो
न जानाति तम् । शार्दूलविक्रीडित
वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालसालविवरोद्गीर्णैः शरैः
सप्तभिः ॥५॥
विशाखदत्तस्य ।

227 (c) S, I. O., Sp. भूमण्डलीः for °ले.
Ed. attributes the verse to दक्ष.

230 (a) S, I. O. जगतीह for भुवनेषु.
(b) Ed. परं for पुनः.
(c) A बाणातति for बाणाहति

४७ विरहिश्रीरामः।

231 सरसि विरसः प्रस्थे दुःस्थो लतासु गतादरः
हरिणी
प्रति परिसरं भ्रान्तोद्भ्रान्तः सरित्सु निरुत्सुकः।
ददपि दृशौ कुञ्जे कुञ्जे रुदन्नुपनिर्झरं
सुचिरविरहक्षामो रामो न कैरनुरुध्यते ॥१॥

वासुदेवज्योतिष ।

232 निष्पन्दं गिरिकन्दरेषु विपिनच्छायासु मूर्च्छालसं
सास्रं पञ्चवटीतटीषु तटिनीतीरेषु तीव्रव्यथम्।
शार्दूलविक्रीडित
काकुत्स्थं तदवस्थमाधिविधुरं दृष्ट्वा तडिद्भ्राजतो
मन्ये मन्युभरैरभेदि हृदयं गाढं घनानामपि ॥२॥

वसुरथस्य ।

233 अनुवनमनुशैलं तामनालोक्य सीतां
मालिनी
प्रतिदिनमतिदीनं वीक्ष्य रामं विरामम्।
गिरिरशनिमयोऽयं यस्तदा न द्विधाभूत्
क्षितिरपि न विदीर्णा सापि सर्वंसहैव ॥३॥

शोभाकस्य ।

234 कोऽहं वत्स स आर्य एव भगवानार्यः स को राघवः
के यूयं वत नाथ नाथ किमिदं भृत्योऽस्मि ते

लक्ष्मणः।

शार्दूलविक्रीडित

कान्तारे किमिहास्महे वत वृथा देव्या गतिर्मृग्यते
का देवी जनकाधिराजतनया हा जानकि क्वासि मे ॥४॥

कस्यचित्।

232 Quoted by Aufrecht in ZDMG, 36, p. 547

233 (a) Ed., S दिनम् for वनम्.
This verse has been quoted by Aufrecht in ZDMG, 36, p 547.

234 (a) Sp. एष आय for आय एव.

235 कूजन् कुञ्जे किमपि करुणं कन्दरे कान्दिशीकः
सानौ शून्यप्रणिहितमना. कानने ध्याननेत्रः ।
गच्छन् मूर्च्छां कुसुमशयने वीतरागस्तडागे मन्दाक्रान्ता
जीयाज्जायाविरहविदुषां ग्रामणी रामभद्रः ॥५॥
आचार्यगोपीकस्य ।

४८ हलधरः* ।

236 सुरापीतो गोत्रस्खलनपरिवृद्धाधिकरुषः शिखरिणी
प्रसादं रेवत्या जनयितुमनीशः कथमपि ।
विचुम्बन् संश्लिष्यन् स्तनवसनमस्यन्नविरतं
मधून्मादाविष्टः स किल बलभद्रो विजयते ॥१॥
लक्ष्मीधरस्य ।

237 आघूर्णद्वपुषः स्खलन्मृदुगिरः किञ्चिल्लसद्वाससो
रेवत्यं सनिषण्णनिःसहभुजस्याताम्रनेत्रद्युतेः । शार्दूलविक्रीडित
श्वासामोदमदान्धषट्पदकुलव्यादष्टकण्ठस्रजः
पायासुः परिमन्थराणि हलिनो मत्तस्य यातानि वः ॥२॥
कोकस्य ।

238 भभभ्रमति मेदिनी लल ललम्बते चन्द्रमाः
कृकृष्ण ववद द्रुतं हहहसन्ति किं वृष्णयः । Srk. 127
शिशीधु मुमुमुञ्च मे पपपपानपात्रस्थितं पृथ्वी
मदस्खलितमालपन् हलधर श्रियं वः क्रियात् ॥३॥
पुरुषोत्तमदेवस्य ।

* S, I. O अथ हलिराम (Sp बलिराम).
236 (d) Ed. बलरामो for बलभद्रो
237 (b) S निमग्न for निषण्ण.
(d) Ed. बलिनो for हलिनो.
(a) Srk. किं मही for मेदिनी. Ed , ललम्बते for लललम्बते
(c) Ed., A पात्रे for पात्र. Srk. ववववक्रमित्यादि for पप॰ स्थितं.

S.K. 11. 61
अनुष्टुप्
239 रेवतीदशनोच्छिष्टपरिपूतपुटे दृशौ ।
वहन् हली मदक्षीवः पानगोष्ठ्यां पुनातु वः ॥४॥

माघभोजदेवयोः ।

हरिणी
240 भ्रमति धरणीचक्रं चक्रे नभस्तलयन्त्रणात्
प्रभवति न मे गात्रं किंचित्क्रियासु विघूर्णते ।
जलधिसलिले मग्नं विश्वं विलोक्य रेवति
त्रिजगदवताज्जल्पन्नेवं हली मदविह्वलः ॥५॥

माधवस्य ।

४९ बुद्धः ।

Srk. 4
मन्दाक्रान्ता
241 कामक्रोधौ द्वयमपि यदि प्रत्यनीकं प्रसिद्धं
हत्वानङ्गं किमिव हि रुषा साधितं त्र्यम्बकेन ।
यस्तु क्षान्त्या शमयति शतं मन्मथादीनरातीन्
कल्याणं वो दिशतु स मुनिग्रामणीरर्कबन्धुः ॥१॥

सङ्घश्रियः ।

Srk. 15
शार्दूलविक्रीडित
242 पादाम्भोजसमीपसन्निपतितस्वर्णाथदेहस्फुर-
न्नेत्रस्तोमतया परिस्फुटमिलन्नीलाब्जपूजाविधिः ।
वन्दारुत्रिदशौघरत्नमुकुटोत्सर्पत्प्रभापल्लव-
प्रत्युन्मीलदपूर्वचीवरपटः शाक्यो मुनिः पातु वः । २॥

वसुकल्पस्य ।

Srk. 7
शार्दूलविक्रीडित
243 कारुण्यामृतकन्दलीसुमनसः प्रज्ञावधूमौक्तिक-
ग्रीवालङ्करणश्रियः शमसरित्पूरोच्छलच्छीकराः ।
ते मौलौ भवतां मिलन्तु जगतीराज्याभिषेकोचित-
स्रग्भेदा अभयप्रदानचरणप्रेङ्खन्नखाग्रांशवः ॥३॥

श्रीधरनन्दिनः ।

239 (a) Ed. वदन for दशन
241 (a) Srk. पदं for यदि, वशित्वे for प्रसिद्धम्
(b) I O. कामुकेन for त्र्यम्बकेन
(c) Srk. मन्मथाद्यान् for मन्मथादीन्.
242 (c) Srk. उद्भूत for उत्सर्पत्.
243 (c) Ed., S भवन्तु for मिलन्तु.

244 शीलाम्भःपरिषेकशीतलदृढध्यानालवालस्फुर-
द्दानस्कन्धमहोन्नतिः पृथुतरप्रज्ञोल्लसत्पल्लव । Srk 8
देयात्तुभ्यमवार्यवीर्यविटपः क्षान्तिप्रसूनोद्गमः शार्दूलविक्रीडित
सुच्छायः षडभिज्ञकल्पविटपीसम्बोधबीजं
फलम् ॥४॥
तस्यैव ।

245 यदाख्यानासङ्गादुषसि पुनते वाचमृषयो
यदीयः सकल्पो हृदि सुकृतिनामेव रमते । शिखरिणी
स सार्वः सर्वज्ञः पथि निरपवादे कृतपदो
जिनो जन्तूनुच्चैर्दमयतु भवावर्तपतितान् ॥५॥
मङ्गलस्य ।

५० कल्की ।

246 भ्रान्त्वा महीं तत इतस्तुरगाधिरूढो
वेदद्विषो विदलयन् दलिताखिलाशः । वसन्ततिलक
देवो निवर्तितकलिः कृतमार्गदर्शी
कल्कं स ते हरतु कल्किकुले भविष्यन् ॥१॥
कस्यचित् ।

247 वामनादणुतमादनु जीया
स्त्वं त्रिविक्रम तनूभृतदिक्कः । Nc. XXI. 96
वीतहिंसनपथादथ बुद्धात् स्वागता
कल्किताहतसमस्त नमस्ते ॥२॥
श्रीहर्षस्य ।

248 कल्की कल्कं हरतु जगतः स्फूर्जदूर्जस्वितेजा
वेदोच्छेदस्फुरितदुरितध्वंसने धूमकेतुः ।

244 (d) Srk. संबोधि for सबोध.
246 (b) I. O. दलितात्मनाश. for दलिताखिलाशः.
247 (c) Nc. कथात् for पथात्. (d) कल्किना for कल्किता.

मन्दाक्रान्ता

येनोत्क्षिप्य क्षणमसिलतां धूमवत्कल्मषेच्छान्
म्लेच्छान् हत्वा दलितकलिनाकारि सत्यावतारः ॥३॥

जयदेवस्य ।

शार्दूलविक्रीडित

249 आघ्राणश्रवणावलोकनरसास्वादादयश्चम्बन-
श्रद्धा वाग्विषवर्षणं च शिरसो दोषा इमे यैर्जनः ।
मूढो लङ्घित सत्पथोऽयमिति संक्रुद्धः शठानां हठाद्यः
शीर्षाणि कृपाणपाणिरलुनात्तस्मै नमः कल्किने ॥४॥

कुलदेवस्य ।

शार्दूलविक्रीडित

250 तीर्थानां शतमस्ति किंतु फलति श्रद्धाभरादित्यसे-
र्धारातीर्थमपूर्वमेव कलयन् कल्की शिवायास्तु व ।
यत्प्राप्याखिलवेदभेदकधियः श्रद्धातिरस्कारिणः
शाक्यातिथयो भवन्ति भवनेष्वेनस्विनो जन्तवः ॥५॥

कस्यचित् ।

५१ कृष्णशैशवम् ।

S. K. V. 23
Spd. 4016
शार्दूलविक्रीडित

251 कृष्णेनाद्य गतेन रन्तुमनसा मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब

पश्याननम् ।

व्यादेहीति विदारिते शिशुमुखे दृष्ट्वा समस्तं जग-
न्माता यस्य जगाम विस्मयपदं पायात्

स वः केशवः ॥१॥

कस्यचित् ।

शार्दूलविक्रीडित

252 लीलोत्तानशयोऽपि गोपनिवहैरुद्गीयमानेष्वति-
प्रौढप्रौढमुरारिविक्रमकथागीतेषु दत्तश्रवाः ।

251 (a) Spd., S. K. अम्ब for अद्य, रन्तुमसकृत् for रन्तुमनसा.
(c) Spd. च्ववदने for शिशुमुखे, समग्रे for समस्तं. S. K. विकासिते च वदने for विदारिते शिशुमुखे.
A omits कस्यचित् under the verse.

कस्मिंश्चित्क्षुभितः कुतोऽपि चलितः
कुत्रापि रोमाञ्चितः
क्वापि प्रस्फुरितः कुतोऽपि हसित प्राप्तो
हरिः पातु वः ॥२॥
महीधरस्य ।

253 न्यञ्चन्नुदञ्चन् बहुशः कथंचि-
दुदञ्चितो वेपथुमान् हरिर्वः । उपजाति
देवोऽसि देवोऽसि सपाणितालं
यशोदयोक्तः प्रहसन् पुनातु ॥३।
कस्यचित् ।

254 अधरमधरे कण्ठे कण्ठं सचाटुदृशोर्दृशा-
वलिकमलिके कृत्वा गोपीजनेन ससम्भ्रमम् । Pv. 135
शिशुरिति रुदन् कृष्णो वक्षःस्थले निहितोऽचिरा- हरिणी
न्निभृतपुलकः स्मेरः पायात्स्मरालसविग्रहः ॥४॥
दिवाकरदत्तस्य ।

255 ब्रूमस्त्वच्चरितं तवाधिजननि च्छद्मोपजाताकृते
त्वं यादृग्गिरिकन्दरेषु नयनानन्दः कुरङ्गीदृशाम् । Pv. 136
इत्युक्तोऽमृतलेहनच्छलतया न्यस्ताङ्गुलिः स्वानने शार्दूलविक्रीडित
गोपीभिः पुरतः पुनातु जगतीमुत्तानसुप्तो हरि ॥५॥
वनमालिनः ।

254 (a) Pv. transposes कण्ठे and कण्ठं, दृशौ दृशोः for दृशोर्दृशौ.
(c) Pv. निहितश्चिरात् for निहितोऽचिरात्
(d) Pv. निहित for निभृत.
Pv. दिवाकरस्य for दिवाकरदत्तस्य.
Aufrecht quotes the verse in ZDMG, xxxvi, p. 533.

255 (a) Pv. च्छद्मातिबाल्याकृते for च्छद्मोपजाताकृते.
(c) Pv. परि for अमृत. S, I. O. हेलन for लेहन.
(d) I. O. परितः for पुरतः.

५२　कृष्णकौमारम्।

Pv. 149
Srk. 144
शार्दूलविक्रीडित

256 वत्स स्थावरकन्दरेषु विचरंश्चारप्रचारे गवां
हिंस्रान् वीक्ष्य पुरः पुराणपुरुषं नारायणं ध्यास्यसि।
इत्युक्तस्य यशोदया मुररिपोरव्याज्जगन्ति स्फुरद्
बिम्बोष्ठद्वयगाढपीडनवशादव्यक्तभावं स्मितम् ॥१॥

अभिनन्दस्य।

Pv. 151
Srk. 123
मन्दाक्रान्ता

257 श्यामोच्चन्द्रा स्वपिषि न शिशो नैति मामम्ब निद्रा
निद्राहेतोः शृणु सुत कथां कामपूर्वां कुरुष्व।
रामो नाम क्षितिपतिरभून्माननीयो रघूणा-
मित्युक्तस्य स्मितमवतु वो देवकीनन्दनस्य ॥२॥

शतानन्दस्य।

शार्दूलविक्रीडित

258 मा दूरं व्रज वत्स तिष्ठति पुरस्ते लूनकर्णो वृकः
पोतानत्ति इति प्रपञ्चचतुरोदारा यशोदागिरः।
आकर्ण्योच्छलदच्छहासविकसद्बिम्बाभदन्तच्छद-
द्वन्द्वोदीरितदन्तमौक्तिकमणिः कृष्णः स
पुष्णातु वः ॥३॥

कस्यचित्।

Pv. 148
शार्दूलविक्रीडित

259 कालिन्दीपुलिने मया न न मया शैलोपशल्ये न न
न्यग्रोधस्य तले मया न न मया राधापितुः प्राङ्गणे।
दृष्टः कृष्ण इतीरितस्य सभयं गोपैर्यशोदापते-
र्विस्मेरस्य पुरो हसन्निजगृहान्निर्यन् हरिः पातु वः ॥४॥

उमापतिधरस्य।

256 (a) Srk. क्ष्माधरगह्वरेषु for स्थावरकन्दरेषु. Pv दूर for चार.
257 (c) Pv. reads thus—व्यक्त. स्तम्भान्नरहरिरभूद्दानवं दारयिष्यन्.
(d) Pv. स्मितमुदयते for स्मितमवतु वो.
Pv. सर्वानन्दस्य for शतानन्दस्य.
258 (a) A तिष्ठ for वत्स
259 (c) Pv., I. O. इतीरिते (Sp. इतीरिता) सनियमं for इती…सभयम्.

260 मन्थानमुज्झ मथितुं दधि न क्षमस्त्वं
बालोऽसि वत्स विरमेति यशोदयोक्त ।
क्षीराब्धिमन्थनविधिस्मृतिजातहासो वसन्ततिलक
वाञ्छास्पदं दिशतु वो वासुदेवसूनुः ॥५॥

कस्यचित् ।

५३ कृष्णस्वप्नायितम् ।

261 शम्भो स्वागतमास्यतामित इतो वामेन पद्मोद्भव
क्रौञ्चारे कुशलं सुखं सुरपते वित्तेश नो दृश्यसे । Pv. 146
इत्थं स्वप्नगतस्य कैटभरिपोः श्रुत्वा यशोदागिरः शार्दूलविक्रीडित
किं किं बालक जल्पसीत्यनुचितं थूथूकृतं
पातु वः ॥१॥

मयूरस्य ।

262 धीरा धरित्रि भव भारमवेहि शान्तं Pv. 147
नन्वेष कंसहतकं विनिपातयामि । वसन्ततिलक
इत्यद्भुतस्तिमितगोपवधूश्रुतानि
स्वप्नायितानि वसुदेवशिशोर्जयन्ति ॥२॥

अभिनन्दस्य ।

263 एते लक्ष्मणजानकीविरहिणं मां खेदयन्त्यम्बुदा Pv. 252
मर्माणीव च खण्डयन्त्यलममी क्रूराः कदम्बानिलाः । Srk. 131
इत्थं व्याहृतपूर्वजन्मविरहो यो राधया वीक्षितः शार्दूलविक्रीडित
सेर्ष्यं शङ्कितया स वः सुखयतु
स्वप्नायमानो हरिः ॥३॥

शुभंकरस्य ।

261 (c) Pv जनन्या for यशोदा.
262 Pv सुदेवस्य for अभिनन्दस्य.
263 (b) I O , ZDMG, Srk, Sp. घट्टयन्ति for खण्डयन्ति.
(d) S सर्वं for सेर्ष्यम्.
Ed., Pv ascribe the verse to शुभाङ्क instead of शुभंकर.
The verse has been quoted by Aufrecht in ZDMG, xxxvi, p. 546.

शार्दूलविक्रीडित

264 कालिन्दीपुलिनान्तवञ्जुललता कुञ्ज कुतश्चित्क्रमा-
त्सुप्तस्यैव मिथः कथाजुषि शनैः संवाहिकामण्डले ।
वैदेहीं दशकन्धरोऽपहरतीत्याकर्ण्य कंसद्विपो
हुं हुं वत्स धनुर्धनुरिति व्यग्रा गिरः पान्तु वः ॥४॥

विरिञ्चेः ।

Dr. under IV. 60
Pv. 372
शार्दूलविक्रीडित

265 निर्मग्नेन मयाम्भसि स्मरभयादाली समालिङ्गिता
केनालीकमिदं तवाद्य कथितं राधे मुधा ताम्यसि ।
इत्थं स्वप्नपरम्परासु शयने श्रुत्वा गिरं शार्ङ्गिणः
सव्याजं शिथिलीकृतः कमलया कण्ठग्रहः
पातु वः ॥५॥

कस्यचित् ।

५४ कृष्णयौवनम् ।

शार्दूलविक्रीडित

266 सोत्तापं जरतीभिरस्फुटरसं बालाभिरुन्मीलित-
श्वासं वेश्म सुवासिनीभिरधिकाकूतं भुजिष्याजनैः ।
प्रत्यग्रप्रकटीकृतार्ति कुलटासार्थेन दृष्टं हरे-
रव्याद्वो नवयौवनोत्सवदशानिर्व्याजमुग्धं वपुः ॥१॥

भट्टशालीयपीताम्बरस्य ।

शार्दूलविक्रीडित

267 राधायामनुबद्धनर्मनिभृताकारं यशोदाभया-
दभ्यर्णेष्वतिनिर्जनेषु यमुनारोधोलतावेश्मसु ।

264 (d) A, I. O. व्यक्ता for व्यग्रा.
265 (a) Dr. स्मरभरात् for ०भयात्. Pv. प्रणयत पाली for स्मरभयादाली
(b) Dr. नाम्यसि for ताम्यसि
(c) Dr., Pv. इत्युत्स्वप्न for इत्थं स्वप्न., वचः for गिरम्.
(d) Pv. रुक्मिण्या for सव्याज, सकपटं for कमलया.
Ed., S omit कस्यचित्
Dr. ascribes the verse to रुद्र and Pv. to उमापतिधर.
266 Ed. भट्टपालीय० for भट्टशालीय०.

मन्दाक्षश्लथवल्लवानुकरणक्रीडस्य कंसद्विषो
लब्धं यौवनमात्रया विजयते गम्भीरशोभं वपु ॥२॥
अभिनन्दस्य ।

268 वत्स त्वं नवयौवनोऽसि चपलाः प्रायेण गोपस्त्रियः
कंसो भूपतिरब्जनालभिदुरग्रीवा वयं गोदुहः । शार्दूलविक्रीडित
सैषानर्थपरंपरेति भगवत्याशङ्किततातिक्रमे
कृष्णे तद्विनयाय नन्दगृहिणीशिक्षोक्तयः
पान्तु वः ॥३॥
वर्धमानस्य ।

269 आरूढान्तरयौवनस्य परितो गोष्ठीरनुभ्राम्यत-
स्तत्तत्तासु मनोगतं सुनिभृतं संव्याचिकीर्षोर्हरेः । शार्दूलविक्रीडित
वेगादुच्छलितास्फुटाक्षरदशा गर्भत्रपागौरवा-
त्प्रत्यञ्चो वलिता भवन्तु भवतां कृत्याय वागूर्मयः ॥४॥
चक्रपाणेः ।

270 आहूताद्य मयोत्सवे निशि गृह शून्यं विमुच्यागता
क्षीबः प्रेष्यजनः कथं कुलवधूरेकाकिनी यास्यति । Pv. 206
वत्स त्वं तदिमां नयालयमिति श्रुत्वा यशोदागिरो शार्दूलविक्रीडित
राधामाधवयोर्जयन्ति मधुरस्मेरालसा दृष्टयः ॥५॥
श्रीमत्केशवसेनदेवस्य ।

५५ हरिक्रीडा ।

271 इह निचुलनिकुञ्जे मध्यमध्येऽस्य रन्तु- Pv. 201
र्विजनमजनि शय्या कस्या बालप्रबालैः । मालिनी

269 (a) A गोपीवल्लभास्यतः (?) for गोष्ठी……त. Sp. गोपी for गोष्ठी.
(c) A, Sp. रागात् for वेगात्. Sp. उच्छलता for उच्छलिता.
(d) S, I. O. हृद्याय for कृत्याय.

270 (a) Pv. महोत्सवे for मयोत्सवे
Pv. श्रीलक्ष्मणसेनदेवस्य for श्रीमत्……देवस्य.
Ed. ०सेनस्य for ०सेनदेवस्य.

271 (a) Pv. मध्यमध्यास्य for मध्यमध्येऽस्य.

इति कथयति वृन्दे योषितां पान्तु युष्मान्
स्मितशबलितराधामाधवालोकितानि ॥१॥

272 कृष्ण त्वद्वनमालया सह कृतं केनापि कुञ्जान्तरे
Pv. 202 गोपीकुन्तलबर्हदाम तदिदं प्राप्तं मया गृह्यताम् ।
शार्दूलविक्रीडित इत्थं दुग्धमुखेन गोपशिशुनाऽऽख्याते त्रपानम्रयो
राधामाधवयो र्जयन्ति वलितस्मेरालसा
दृष्टयः ॥२॥

श्रीमल्लक्ष्मणसेनस्य ।

273 भ्रूवल्लीचलनैः कयापि नयनोन्मेषैः कयापि स्मित-
Pv. 259 ज्योत्स्नाविच्छुरितैः कयापि निभृतं
शार्दूलविक्रीडित संभावितस्याध्वनि ।
गर्वोद्भेदकृतावहेलविनयश्रीभाजि राधानने
सातङ्कानुनयं जयन्ति पतिताः कंसद्विषो दृष्टयः ॥३॥

उमापतिधरस्य ।

274 व्यालाः सन्ति तमालवल्लिषु वृतं वृन्दावनं वानरै-
शार्दूलविक्रीडित रुन्नकं यमुनाम्बु घोरवदनव्याघ्रा गिरेः सन्धयः ।
इत्थं गोपकुमारकेषु वदतः कृष्णस्य तृष्णोत्तर-
स्मेराभीरवधूनिषेधिनयनस्याकुञ्चनं पातु वः ॥४॥

तस्यैव ।

Pv. 205 275 सकेतीकृतकोकिलादिनिनदं कंसद्विषः कुर्वतो
शार्दूलविक्रीडित द्वारोन्मोचनलोलशङ्खवलयश्रेणिस्वनं शृण्वतः ।

271 (c) Pv. निगदति for कथयति.
272 (a) Pv. कुञ्जोदरे for कुञ्जान्तरे.
Ed. सेनदत्तस्य for ०सेनस्य
273 (c) Pv. ललित for विनय.
274 (b) I. O. ०रुन्नद्धं for ०रुन्नकम्.
275 (a) Sp. केकिनादि for कोकिलादि.
(b) Pv. क्काणं मुहुः for श्रेणिस्वनं

केयं केयमिति प्रगल्भजरतीनादेन दूनात्मनो
राधाप्राङ्गणकोणकेलिविटपिक्रोडे गता शर्वरी ॥५॥
आचार्यगोपीकस्य ।

५६ प्रश्नोत्तरम् ।

276 देवि त्वं कुपिता त्वमेव कुपिता कोऽन्यः
पृथिव्या गुरु- Srk. 108
र्माता त्वं जगतां त्वमेव जगतां माता न विज्ञोऽपरः । शार्दूलविक्रीडित
देवि त्वं परिहासकेलिकलहेनन्ता त्वमेवेत्यथ
ज्ञातानन्दपदो नमञ्जलधिजां शौरिश्चिरं पातु वः ॥१॥
वाक्पतेः ।

277 कोऽयं द्वारि हरिः प्रयाह्युपवनं शाखामृगेणात्र किं Srk. 109
कृष्णोऽहं दयिते बिभेमि सुतरां कृष्णः कथं वानरः । Sv. 104
मुग्धेऽहं मधुसूदनो व्रज लतां तामेव पुष्पान्विता- Spd. 122
मित्थं निर्वचनीकृतो दयितया ह्रीणो शार्दूलविक्रीडित
हरिः पातु वः ॥२॥
शुभंकरस्य ।

275 (c) Pv. वाक्येन for नादेन.
(d) Sp. कृता for गता.
Pv. हरस्य for आचार्यगोपीकस्य

276 (b) Ed. वित्तो for विज्ञो
(d) Srk. ज्ञातानन्त्यपदो for ज्ञातानन्दपदो.

277 (a) Sv., Spd. ०मृगस्य for ०मृगेण.
(b) Sv., Spd. कृष्णादहं वानरात् for कृष्णः……वानरः.
(c) Spd. राधे for मुग्धे. Sv पिब for व्रज. Srk. पुष्पासवां for पुष्पान्विता (Sv तन्वीमले).
(d) Sv. ह्रीतो for ह्रीणो.
Ed. शुभाङ्कस्य for शुभंकरस्य. Spd.-anonymous.
Aufrecht quotes the verse in ZDMG, xxxvi, p.546.

278 कस्त्वं भो निशि केशवः शिरसिजैः किं नाम गर्वायसे
Pv. 282
शार्दूलविक्रीडित
भद्रे शौरिरहं गुणैः पितृगतैः पुत्रस्य किं स्यादिह ।
चक्री चन्द्रमुखि प्रयच्छसि न मे कुण्डीं घटीं दोहिनी-
मित्थं गोपवधूहृतोत्तरतया दुःस्थो हरिः पातु वः ॥३॥

कस्यचित् ।

279 वासः संप्रति केशव क्व भवतो मुग्धेक्षणे नन्विदं
Pv. 283
शार्दूलविक्रीडित
वासं ब्रूहि शठ प्रकामसुभगे त्वद्गात्रसंश्लेषतः ।
यामिन्यामुषितः क्व धूर्त वितनुर्मुष्णाति किं यामिनी
शौरिर्गोपवधूं छलैः परिहसन्नेवंविधैः पातु वः ॥४॥

कस्यचित् ।

S. K. II. 351
उपगीति
280 कुशलं राधे सुखितोऽसि कंस कंस क्व नु सा राधा ।
इति पालीप्रतिवचनैर्विलक्षहासो हरिर्जयति ॥५॥

कस्यचित् ।

५७ वेणुनादः ।

281 कृष्णः पातु स यस्य संसदि गवां वेणुप्रणादोर्मयो
शार्दूलविक्रीडित
गोपीनामनुवासरं नवनवा घूर्णन्ति कर्णोदरे ।
तद्वक्त्रासववासिता इव तदाकूतिप्रपञ्चा इव
भ्राम्यत्तत्करपल्लवांगुलिगलल्लावण्यलिप्ता इव ॥१॥

लक्ष्मीधरस्य ।

278 (d) A, S जितोत्तरतया for हृतो…या
A om. कस्यचित्. Pv. चक्रपाणेः for कस्यचित्.
279 (b) Pv. संसर्गत. for संश्लेषतः.
280 (a) S. K. कंस. for second कंस Ed. om. नु
(b) S. K. पारी for पाली.
281 (c) Ed. तदाकूत for ०ति. S, I.O. प्रपञ्च for प्रपञ्चा.

282 तिर्यक्कन्धरमंसदेशमिलितश्रोत्रावतंसं स्फुरद्-
बर्होत्तंसितकेशपाशमनृजु भ्रूवल्लरीविभ्रमम्। Pv. 260
गुञ्जद्वेणुनिवेशिताधरपुटं साकूतराधानन- शार्दूलविक्रीडित
न्यस्तामीलितदृष्टिगोपवपुषो विष्णोर्मुखं पातु वः ॥२॥
श्रीमल्लक्ष्मणसेनदेवस्य।

283 सायं व्यावर्तमानाखिलसुरभिकुलाह्वानसंकेतनामा- Pv. 5
न्याभीरीवृन्दचेतो हठहरणकलासिद्धमन्त्राक्षराणि। स्रग्धरा
सौभाग्यं वः समन्ताद्दधतु मधुभिदः केलिगोपालमूर्तेः
सानन्दाकृष्टवृन्दावनरसिकमृगश्रेणयो वेणुनादाः ॥३॥
उमापतिधरस्य।

284 मन्द्रक्वाणितवेणुरह्नि शिथिले व्यावर्तयन् गोकुलं
बर्हापीडकमुत्तमाङ्गरचितं गोधूलिधूम्रं दधत्। Srk. 110
म्लायन्त्या वनमालया परिगतः श्रान्तोऽपि शार्दूलविक्रीडित
रम्याकृति-
र्गोपस्त्रीनयनोत्सवो वितरतु श्रेयांसि वः केशवः ॥४॥
कस्यचित्।

285 अंसासक्तकपोलवंशवदनव्यासक्तबिम्बाधर-
द्वन्द्वोदीरितमन्दमन्दपवनप्रारब्धमुग्धध्वनिः। Pv. 261
ईषद्वक्रिमलोलहारनिकरः प्रत्येकरोकानन- शार्दूलविक्रीडित
न्तश्चञ्चच्चदुदञ्चदङ्गुलिचयस्त्वां पातु राधाधवः ॥५॥
केशरकोलीयनाथोकस्य।

282 (b) Pv. उत्तम्भित for उत्तंसित.
Ed., A omit देव in श्रीमल्लक्ष्मणसेनदेवस्य Pv. om. श्रीमत्.
283 (d) A drops वेणुनादाः. There is no ascription in A.
Pv हरस्य for उमापतिधरस्य.
284 (a) Ed. वक्र (Srk. मन्द, Sp मन्त्र) for मन्द्र.
a-d) A omits मन्द्र···वितरतु.
285 S, I.O. केशरकोणीय० for केशरकोलीय.
Pv. om. केशरकोलीय.

५८ गीतम् ।

286 संजाते विरहे कयापि हृदये सन्दानिते चिन्तया
Pv. 240 कालिन्दीतटवेतसीवनघनच्छायानिषण्णात्मनः ।
शार्दूलविक्रीडित पायासुः कलकण्ठकूजितकला गोपस्य कंसद्विपो
जिह्वावर्जिततालुमूर्छितमरुद्विस्फारिता गीतयः ॥१॥

कस्यचित् ।

287 कालिन्दीजलकुञ्जवञ्जुलवनच्छायानिषण्णात्मनो
शार्दूलविक्रीडित राधाबद्धनवानुरागरसिकस्योत्कण्ठितं गायतः ।
तत्पायादपरिस्खलज्जलरुहापीडं कलस्पृङ्नत-
ग्रीवोत्तानितकर्णतर्णककुलैराकर्ण्यमानं हरेः ॥२॥

उद्भटस्य ।

288 देवस्त्वामेकजङ्घावलयितलगुडो मूर्ध्नि विन्यस्तबाहु-
स्रग्धरा गायन् गोयुद्धगीतीरुपरचितशिरःशेखरः प्रग्रहेण ।
दर्पस्फूर्जन्महोक्षद्वयसमररसाबद्धदीर्घानुबन्धः
क्रीडागोपालमूर्तिर्मुररिपुरवतादात्तगोरक्षलीलः ॥३॥

योगेश्वरस्य ।

289 याते द्वारवतीं पुरं मधुरिपौ तद्वस्त्रसंव्यानया
कालिन्दीतटकुञ्जवञ्जुललतामालम्ब्य सोत्कण्ठया ।
Pv. 373 उद्गीता गुरुबाष्पगद्गदगलत्तारस्वरं राधया
शार्दूलविक्रीडित येनान्तर्जलचारिभिर्जलचरैरुत्कण्ठमाकूजितम् ॥४॥

कस्यचित् ।

286 (c) S, I. O., A ०कलं for कला.

287 (a) Sp. मञ्जुल for वञ्जुल.

(d) I. O. आवर्त्यमानं for आकर्ण्यमानम्

289 (a) Sp, Pv द्वारवतीपुरं for ०वतीं पुरम्. Pv. मुर for मधु

(c) A तद्गीतं (I. O., Pv. उद्गीत) for उद्गीता.

(d) Pv. ०रप्युत्कमुत्कूजितम् for ०रुत्......तम्.

Pv. अपराजितस्य for कस्यचित्

290 यानि त्वच्चरितामृतानि रशनालेह्यानि धन्यात्मनां
ये वा शैशवचापलव्यतिकरा राधावरोधोन्मुखाः ।
या वा भावितवेणुगीतगतयो लीलामुखाम्भोरुहे — शार्दूलविक्रीडित
धारावाहिकया हरन्तु हृदये तान्येव तान्येव मे ॥५॥

कस्यचित् ।

५२ कृष्णभुजः ।

291 भ्राम्यद्भास्वरमन्दराद्रिशिखरव्याघट्टनाद्विस्फुरत्-
केयूराः पुरुहूतकुञ्जरकरप्राग्भारसंवर्धिनः । — Pv. 386
दैत्येन्द्रप्रमदाकपोलविलसत्पत्राङ्कुरच्छेदिनो — शार्दूलविक्रीडित
दोर्दण्डाः कलिकालकल्मषमुषः कंसद्विषः पान्तु वः ॥१॥

कस्यचित् ।

292 लक्ष्म्याः केशप्रसवरजसां बिन्दुभिः सान्द्रपातै-
रुद्वर्णश्रीर्घननिधुवनक्लान्तिनिद्रान्तरेषु । — Srk. 142
दोर्दण्डोऽसौ जयति जयिनः शार्ङ्गिणो मन्दराद्रि- — मन्दाक्रान्ता
ग्रावश्रेणीनिकषमसृणक्षुण्णकेयूरपत्रः ॥२॥

भगीरथस्य ।

293 ये गोवर्धनमूलकर्दमरसव्यादष्टबर्हच्छदा — Pv. 4
ये वृन्दावनकुक्षिषु व्रजवधूलीलोपधानानि च । — शार्दूलविक्रीडित

290 (a) S, I. O. धन्यात्मना for धन्यात्मनाम्
(b) Ed. राधानुबन्धोन्मुखा for राधा···· मुखा.
(d) Sp. धारवाहतया (Ed. धारावाहितया, A वाहिकतया) for धारावाहिकया Ed. वहन्तु for हरन्तु

291 (a) Sp. भ्रान्ता for भ्राम्यत्. I. O. भासुर for भास्वर.
Pv. योगेश्वरस्य for कस्यचित्.

292 (a) I O. प्रसर for प्रसव.
(b) I O. उद्गूर्ण (Srk. अभ्यर्ण) for उद्वर्ण

293 (a) Pv. बर्हाञ्चदा for बर्हच्छदा.
(b) Sp. साक्षिषु for कुक्षिषु.

ये चाभ्यङ्गसुगन्धयः कुवलयापीडस्य दानाम्भसा
ते वो मङ्गलमादिशन्तु सततं कंसद्विषो बाहवः ॥३॥

शुभाङ्कस्य ।

294 जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
Gg. xi. 11 स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
शिखरिणी भुजामर्दक्रीडाहतकुवलयापीडकरिण
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥४॥

जयदेवस्य ।

Spd. 113 295 पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
अनुष्टुप् त्रैलोक्यनगरस्तम्भाश्चत्वारो हरिबाहवः ॥५॥

श्रीव्यासपादानाम् ।

६० गोवर्धनोद्धारः ।

296 सत्रासार्ति यशोदया प्रियगुणप्रीतेक्षणं राधया
Pv. 264 नग्नैर्वल्लवसूनुभिः सरभसं संभावितात्मोर्जितैः ।
Srk. 140 भीतानन्दितविस्मितेन विषमं नन्देन चालोकितः
शार्दूलविक्रीडित पायाद्वः करपद्मसुस्थितमहाशैलः सलीलो हरिः ॥१॥

सोल्लोकस्य ।

297 एकेनैव चिराय कृष्ण भवता गोवर्धनोऽयं धृतः
श्रान्तोऽसि क्षणमास्स्व सांप्रतममी सर्वे वयं दध्महे ।
Pv. 265 इत्युल्लासितदोष्णि गोपनिवहे किंचिद्भुजाकुञ्चन-
शार्दूलविक्रीडित न्यञ्चच्छैलभरार्दिते विरमति स्मेरो हरिः पातु वः ॥२॥

कस्यचित् ।

293 S, I. O. शुभंकरस्य for शुभाङ्कस्य.
295 (b) Spd. मण्डप for नगर. Spd. anonymous.
296 (b) Pv., Sp. लग्नै. for नग्नैः.
(c) Sp. विस्मयेन for विस्मितेन.
(d) Srk. मूर्ध for पद्म.
Srk. सोन्नोकस्य (Pv. सोह्लोकस्य) for सोल्लोकस्य.
297 (d) Pv. विरुवति for विरमति. Pv. शरणस्य for कस्यचित्.

298 स्नेहार्द्रांसतटेऽवलम्ब्य चरणावारोप्य तत्पादयो-
र्दूरोदस्तमहीधरस्य तनुतामाशङ्कय दोष्णो हरेः। शार्दूलविक्रीडित
शैलोद्धारसहायतां जिगमिषोरप्राप्तगोवर्धना
राधाया सुचिरं जयन्ति गगने वन्ध्याः

करभ्रान्तय ॥३॥

शतानन्दस्य।

299 दूरं दृष्टिपथात्तिरोभव हरेर्गोवर्धनं बिभ्रत-
स्तुथ्यासक्तदृशः कृशोदरि करः स्रस्तोस्य माभूदिति। Pv 267
गोपिनामिति जल्पितं कलयतो राधानिरोधाश्रयं शार्दूलविक्रीडित
श्वासाः शैलभरश्रमभ्रमकराः कृष्णस्य पुष्णन्तु व ॥४॥

कस्यचित्।

300 मुग्धे नाथ किमात्थ तन्वि शिखरिप्राग्भारभुग्नो भुजः
साहाय्यं प्रिय किं भजामि सुभगे दोर्वल्लिमायासय। शार्दूलविक्रीडित
इत्युल्लासितबाहुमूलविचलच्चेलाञ्चलव्यक्तयो
राधायाः कुचयोर्जयन्ति चलिताः कंसद्विषो

दृष्टयः ॥५॥

शङ्करस्य।

६१ उत्कण्ठा।

301 रत्नच्छायाच्छुरितजलधौ मन्दिरे द्वारकाया Pv. 371
रुक्मिण्यापि प्रततपुलकोद्भेदमालिङ्गितस्य। मन्दाक्रान्ता

299 (b) Pv. करस्रस्तो for कर स्रस्तो, अयम् for इति.
(d) Pv. कंसद्विष' पान्तु for कृष्णस्य पुष्णन्तु
Pv. शुभाङ्कस्य for कस्यचित्.

300 (a) Sp भग्नो for भुग्नो
(b) Sp. आयामय for आयासय
Ed जयदेवस्य for शङ्करस्य. Sp. does not give the name of the poet.

301 (a) Pv. द्वारकाया. for द्वारकाया.
(b) Pv. प्रबल for प्रतत.

विश्वं पायान्मसृणयमुनातीरवानीरकुञ्जे-
ष्वाभीरस्त्रीनिभृतरचितध्यानमूर्छा मुरारेः ॥१॥

उमापतिधरस्य ।

Pv. 369
शार्दूलविक्रीडित

302 कालिन्दीमनुकूलकोमलरयामिन्दीवरश्यामलाः
शैलोपान्तभुवः कदम्बकुसुमैरामोदिनः कन्दरान् ।
राधां च प्रथमाभिसारमधुरां जातानुतापः स्मर-
न्नस्तु द्वारवतीपतिस्त्रिभुवनामोदाय दामोदरः ॥२॥

शरणस्य ।

Pv. 370
शार्दूलविक्रीडित

303 कामं कामयते न केलिनलिनीं नामोदते कौमुदी-
निस्यन्दैर्न समीहते मृगदृशा मालापलीलामपि ।
सीदन्नेष निशासु दुःसहतनुर्भोगाभिलाषालसै-
रङ्गैस्ताम्यति चेतसि व्रजवधूमाधाय
मुग्धो हरिः ॥३॥

तस्यैव ।

S K. V. 448
शार्दूलविक्रीडित

304 प्रत्यग्रोज्झितगोकुलस्य शयनादुत्स्वप्नमूढस्य मां
मा गोत्रस्खलितादुपैतु च दिवा राधेति भीरोरति ।
रात्रावस्वपतो दिवा च विजने लक्ष्मीति चाभ्यस्यतो
राधां संस्मरतः श्रियं रमयतः खेदो हरेः पातु वः ॥४॥

कस्यचित् ।

वसन्ततिलक

305 तल्पीकृतस्य भुजगाधिपतेः फणायां
रत्नेषु संवलितविम्बतयाचलायाः ।

301 (c) Pv. कुञ्ज for कुञ्जेषु
(d) Pv. राधाकेलीपरिमलभर for ०ष्वाभीर……रचित. Ed., A चरित for रचित.

304 (a) S. K. मे for माम्.
(b) S. K. सा for मा, स्खलनात् for स्खलितात्, इति for भ्रति.
(c) Sp., A, S दिने for दिवा.
(d) S. K. प्रस्मरतः for सं०.

305 (b) Ed. विम्बतया रमायाः for ०विम्ब……या .

कृष्णावतारकृतगोपवधूसहस्र-
सङ्गस्मृतिर्जयति सोत्कलिकस्य विष्णोः ॥५॥

कस्यचित् ।

६२ गोपीसन्देशः† ।

306 ते गोवर्धनकन्दराः स यमुनाकच्छः स चेष्टारसो
भाण्डीरः स वनस्पतिः सहचरास्ते तच्च गोष्ठाङ्गनम् । Pv 375
किं ते द्वारवतीभुजङ्ग हृदयं नायान्ति दोषैरपी- शार्दूलविक्रीडित
त्यव्याद्वो हृदि दुःसह व्रजवधूसन्देशशल्यं हरेः ॥१॥

नीलस्य ।

307 पान्थ द्वारवतीं प्रयासि यदि हे तद्देवकीनन्दनो
वक्तव्यः स्मरमोहमन्त्रविवशा गोप्योऽपि Pv. 374
नामोज्झिताः । शार्दूलविक्रीडित
एताः केतकगर्भधूलिपटलैरालोक्य शून्या दिशः
कालिन्दीतटभूमयोऽपि तरवो नायान्ति
चिन्तास्पदम् ॥२॥

कस्यचित् ।

308 उपनय मसिं पत्रं चेदं लिखामि किमत्र वा
त्वमिति विनयभ्रंशो यूय त्विति प्रणयक्षतिः ।
सुहृदिति मृषा नाथेत्यूनं नृपेति तटस्थता हरिणी
कथमिति ततः सन्देष्टव्यो मया यदुनन्दनः ॥३॥

पुंसोकस्य ।

† A कृष्णगोपीसन्देश .

306 (c) Pv. नायाति for नायान्ति. Ed.-anonymous.
307 (c) Pv. केलिकदम्ब for केतकगर्भ, आलोक for आलोक्य
(d) Pv. भवतो for तरवो., चित्त for चिन्ता.
Pv. गोवर्धनाचार्यस्य for कस्यचित्.
308 (d) Ed. इव for इति.

309 कालिन्द्याः पुलिनं प्रदोषमरुतो रम्याः शशाङ्कांशवः
सन्तापं न हरन्तु नाम नितरां कुर्वन्ति कस्मात्पुनः ।
Pv. 376 सन्दिष्टं व्रजयोषितामिह हरेः संशृण्वतोऽन्तःपुरे
शार्दूलविक्रीडित निःश्वासाः प्रसृता जयन्ति रमणी-
सौभाग्यगर्वच्छिदः ॥४॥
पञ्चतन्त्रकृतः ।

Pv. 368 310 मथुरापथिक मुरारेरुपगेयं द्वारि वल्लवीवचनम् ।
आर्या पुनरपि यमुनासलिले कालियगरलानलो
ज्वलति ॥५॥
वीरसरस्वत्या ।

६३ सामान्यहरिः ।

311 सेयं द्यौस्तदिदं शशाङ्कदिनकृच्चिह्नं नभः सा क्षिति-
स्तत्पातालतलं त एव गिरयस्तेऽम्भोधरास्ता दिशः ।
Srk. 137 इत्थं नाभिविनिर्गतेन सशिरःकम्पाद्भुतं वेधसा
शार्दूलविक्रीडित यस्यान्तश्च बहिश्च दृष्टमखिलं
त्रैलोक्यमव्यात्स वः ॥१॥
वाक्पतिराजस्य ।

312 लक्ष्मीं यत्परिचारिकेति नयनं यस्येति यासां पतिं
यत्पादार्घभवेति नाकसरितं येनोद्धृतेति श्रुतिम् ।
शार्दूलविक्रीडित ईशं यत्तनुभागभागिति जनः शुश्रूषते सादरं
भूयाद्विश्वनमस्यमानमहिमा भूत्यै स वः केशव ॥२॥
समन्तभद्रस्य ।

309 (c) Ed., Pv. इति for इह.
A पञ्चतन्त्रधृतः for ०कृतः.
310 (a) Ed. उद्गेयं for उपगेयं.
311 (b) Srk. अम्भोधयः for अम्भोधराः.

313 संसारार्तिपरिश्रमाध्वविटपी क्षीरोदवापीपयः
क्रीडानाटकनायको विजयते सत्कर्मबीजाङ्कुर । शार्दूलविक्रीडित
दैत्यस्त्रीस्तनपालिपाणिजपदव्यालोपिशिल्पीत्तरी
देवः श्रीवदनेन्दुविम्बलडहज्योत्स्नाचकोरो हरिः ॥३॥
भानीः ।

314 बीजं ब्रह्मैव देवो मधुजलनिधयः कर्णिका स्वर्णशैलः
कन्दो नागाधिराजो वियदपि विपुलः Srk. 146
पत्रकोशावकाशः । स्रग्धरा
द्वीपाः पत्राणि मेघा मधुपकुलमभूत्तारकागर्भधूलि-
र्यस्यैतन्नाभिपद्मं भुवनमिति स वः शर्म
देवो दधातु ॥४॥
हलायुधस्य ।

315 यं लक्ष्मीरुपजीवति स भजते यं भारती संभ्रमा-
देतस्मै किमु दीयतां कथमसावस्मादृशैः स्तूयताम् । शार्दूलविक्रीडित
सेव्यो वा कथमेष यस्य शिरसा धत्ते पदार्घ्यं शिव-
स्तस्मात्कृत्यमजानतो मम मनोवृत्तेः प्रमाणं हरिः ॥५॥
तिलचन्द्रस्य ।

६४ हरिभक्तिः ।

316 बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनेनोदीर्णवाष्पाम्बुना । शार्दूलविक्रीडित

313 Quoted by Aufrecht in ZDMG, 36, p 519.
314 (b) Srk. अति for अपि.
(c) Ed., Srk. मधुपकुलममूत्तारका for मधुप ·…का.
(d) Srk. ददातु for दधातु.
Srk. ascribes the verse to मालायुध.
The verse has been quoted by Aufrecht in ZDMG, 36, P. 530.
315 (c) Sp अस्य for एष, पदार्घं for पदार्घ्यम्

नित्यत्वच्चरणारविन्दयुगलध्यानामृतास्वादिना-
मस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥१॥

श्रीकुलशेखरस्य ।

317 नास्था धर्मे न वसुनिचये नैव कामोपभोगे
मन्दाक्रान्ता यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥२॥

तस्यैव ।

318 मज्जन्मनः फलमिदं मधुकैटभारे
वसन्ततिलक मत्प्रार्थनैव मदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिवारकभृत्यभृत्य-
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥३॥

तस्यैव ।

319 नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
मन्दाक्रान्ता रम्या रामा मृदुतनुलता नन्दने नाभिरन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥४॥

तस्यैव ।

320 मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
उपेन्द्रवज्रा अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवेऽस्तु भवत्प्रसादात् ॥५॥

कस्यचित् ।

317 (d) Ed. युगलके for युगगता
318 (a) Sp. यज्जन्मन for मज्जन्मन·
(d) S, I.O भृत्यमिति for भृत्य इति
320 (d) Ed. तव for भवत्.

६५ समुद्रमथने हरिः।

321 श्रेयोऽस्याश्चिरमस्तु मन्दरगिरेर्माग्रानि पार्श्वै रियं
मावष्टम्भि महोर्मिभिः फणिपतेर्मौलेपि लालाविषैः। Srk. 115
इत्याकूतजुषः श्रियं जलनिधेरर्धोत्थितां पश्यतो शार्दूलविक्रीडित
वाचोन्तःस्फुरिता बहिर्विकृतिभिर्व्यक्ता
हरेः पान्तु वः ॥१॥
वाक्पतिराजस्य।

322 पाण्डुलक्ष्मीकुचाभोगे नर्तिता हरिणा दृशः।
औत्सुक्यादिव तेनादौ निहिता वरणस्रजः ॥२॥ अनुष्टुप्
श्रीमत्केशवसेनदेवस्य।

323 पातु त्रिलोकीं हरिरम्बुराशौ
प्रमथ्यमाने कमलां विलोक्य। उपजाति
अज्ञातहस्तच्युतभोगिनेत्रः
कुर्वन् वृथा बाहुगतागतानि ॥३॥
त्रिभुवनसरस्वत्याः।

324 ग्राव्णा नासि गिरेः क्षता न पयसाप्यार्तासि
न म्लापिता
निःश्वासैः फणिनोऽसि न त्वदनुगा SK I 96
नाथासिता कापि न। शार्दूलविक्रीडित
स्वं वेश्म प्रतिगच्छतोरितो मुहुः श्रीशार्ङ्गिणोः सस्पृहं
सा प्रश्नोत्तरयुग्मपंक्तिरुभयोरत्यायता पातु वः ॥४॥
कस्यचित्।

322 (a) S, I. O. पान्तु for पाण्डु
323 S त्रिगुण for त्रिभुवन in the poet's name.
324 (a) S. K. पयसा नार्तासि for पयसाप्यार्तासि, म्लायिता for म्लापिता.
(b) S. K. न श्वासैः for निःश्वासैः, क्वापि for कापि.

325 पाथोधेः परिमथ्यमानसलिलादर्धोत्थितायाः श्रियः
शार्दूलविक्रीडित सानन्दोल्लसितभुवः कुटिलया दृष्ट्यैव पीताननः ।
अज्ञातस्वकरद्वयीविगलितव्यालोलमन्थोरगः
शून्ये बाहुगतागतानि रचयन्नारायणः पातु वः ॥५॥

सागरस्य ।

६६ समुद्रोत्थितलक्ष्मीः ।

326 सपूर्णः पुनरभ्युदेति किरणैरिन्दुस्ततो दन्तिनः
कुम्भद्वन्द्वमिदं पुनः सुरतरोरग्रोल्लसन्मञ्जरी ।
Srk 126 इत्थं यद्वदनस्तनद्वयवलद्रोमावलीषु भ्रमः
शार्दूलविक्रीडित क्षीराब्धेर्मथने भवद्विविषदां लक्ष्मीरसावस्तु
वः ॥१॥

कस्यचित् ।

327 सानन्दं त्रिदशैः सविस्मयमविश्वस्तैः सुरद्वेषिभि
शार्दूलविक्रीडित साश्चर्यं सुरसुन्दरीपरिजनैः सेर्ष्यं च रम्भादिभिः ।
साकूतं च सकौतुकं च समनोह्लादं च कंसद्विषा
दृष्टा दुग्धमहोदधिप्रमथने लक्ष्मीः
शिवायास्तु वः ॥२॥

शङ्करदेवस्य ।

328 जयति महोदधिमथने मुररिपुपरिरम्भसंभृता
लक्ष्मीः ।
आर्या सत्वरसत्रपसरभससपुलकसोत्कम्पसस्वेदा ॥३॥

कस्यचित् ।

325 (b) S, I. O. भुवा for भुव I O दृष्ट्येव for दृष्ट्यैव.

326 (d) I. O. क्षीराब्धिमथने for क्षीरा……ने.

327 (c) A कंसद्विषः for ०षा.

(d) S पृष्टा for दृष्टा. S, A महोदधेः for महोदधि.

328 (a) S, Sp. संभूता for संभृता.

329 मन्थानोल्लासलीलाचलचिकुरमिलत्कुण्डलां
कर्णपालि
मिथ्यैवोन्मोचयन्त्याः कृतकपटपरावृत्तयस्ते
कटाक्षाः । स्रग्धरा
लक्ष्म्याः पायासुरन्तः स्मरभरविकस-
त्स्मेरगण्डस्थलाया
लज्जालोलं बलन्तो मधुरिपुवदनाम्भोज-
भृङ्गाश्चिरं वः ॥४॥
भोजदेवस्य ।

330 श्रियः क्षीराम्भोधेर्निजविनयनम्रेण वपुषा
शनैरुत्तिष्ठन्त्याः पवनचलितेन्दीवरदृशः । शिखरिणी
कटाक्षो मन्दाक्षस्तिमितलुलितभ्रू हरिमनु
प्रकीर्णः कालिन्दीलघुलहरिवृत्तिर्विजयते ॥५॥
कस्यचित् ।

६७ लक्ष्मीस्वयंवरः ।

331 सोद्वेगं करिकृत्तिवाससि भवद्व्रीडान्वितं ब्रह्मणि
त्रैलोक्यैकगुरावनादरबलत्तारं शचीभर्तरि ।
त्रासामीलितपक्ष्म भास्वति लसत्प्रेमप्रसन्नं हरौ शार्दूलविक्रीडित
क्षीरोदोत्थितया श्रिया विनिहितं चक्षुः
शिवायास्तु वः ॥१॥
भारवेः ।

332 समुद्रमथनव्यग्रसुरसन्दोहनिस्पृहाः ।
लग्नाः कृष्णस्य वक्त्रेन्दौ पान्तु नो दृष्टयः श्रियः ॥२॥ अनुष्टुप्
उमापतिधरस्य ।

329 (a) S, I. O. मन्थानोल्लोल for म .... स.
(d) Sp. वरं for चिरं
330 (b) Sp. लुलिते॰ for चलिते॰.
(c) Sp. बलित for लुलित
331 (c) Sp. रोम for प्रेम.

333 सोत्साहं दधति स्वयंवरमहारङ्गे मिथः स्पर्धया
शार्दूलविक्रीडित
नेपथ्यप्रतिपन्नचित्तकलनाश्चर्यं सुराणां गणे ।
उद्यान्त्या मकरालयात्कमलया संभावितः केन-
चिद्दृक्पातेन विरूढगूढहसितानन्दो
हरिः पातु वः ॥३॥
महादेवस्य ।

334 आख्याते हसितं पितामह इति त्रस्तं कपालीति च
शार्दूलविक्रीडित
व्यावृत्तं गुरुरित्यसौ दहन इत्याविष्कृता भीरुता ।
पौलोमीपतिरित्यसूयितमथ व्रीडावनम्रं श्रिया
पायाद्वः पुरुषोत्तमोऽयमिति च न्यस्तः स
पुष्पाञ्जलिः ॥४॥
क्षेमेश्वरस्य ।

335 मुग्धे मुञ्च विषादमत्र बलभित्कम्पो गुरुस्त्यज्यतां
Pv. 384
Sv. 84
शार्दूलविक्रीडित
सद्भावं भज पुण्डरीक नयने मान्यानिमान्मानय ।
लक्ष्मीं शिक्षयतः स्वयंवरविधौ धन्वन्तरेर्वाक्छला-
दित्यन्यप्रतिषेधमात्मनि विधिं शृण्वन् हरिः
पातु वः ॥५॥
पुण्डरीकस्य ।

६८ लक्ष्मीशृङ्गारः ।

336 शान्तं शेते न शेषः स्थगयति तिमिरं कौस्तुभीनापि
भासः
स्रग्धरा
साम ब्रह्मापि गीत्वा मुकुलितनयनो
निद्रया ध्यायतीव ।

333 (b) I. O. प्रतियत्न (S कर्म) for प्रतिपन्न
The verse is omitted by Sp.
334 (b) Ed. अथो (Sp. अहो) for असौ
335 (a) Sv. बलजित् for ०भित्
(c) Sv. बोधयत for शिक्षयत
Sv. दाक्षिणात्यस्य कस्यापि (Pv. कस्यचित्) for पुण्डरीकस्य

लक्ष्म्या कर्णे गदित्वा मृदुकमिति हरे व्रींडया
हारि हास्यं
हस्तो हस्तेन नीवीवसनविघटनाद्वारितो
वः पुनातु ॥१॥
कस्यचित् ।

337 तिर्यक्त्वादवुधः फणीमणिरुचोप्यस्योपधानीकृतै-
र्मन्दारैः स्थगितांशवः स्तनघनस्वेदास्पदं कौस्तुभः । शार्दूलविक्रीडित
नाभीपद्मरजोन्ध एव सततं वेधा मुधा लज्जसे
लक्ष्मीमित्यवबोधयन्निधुवनारम्भे हरिः पातु
वः ॥२॥
गणपतेः ।

338 मिथ्याकण्डूतिसाचीकृतगलसरणिर्येषु
जातो गरुत्मा-
न्ये निद्रां नाटयद्भिः शयनफणिफणैर्लक्षिता Srk. 132
न श्रुताश्च । स्रग्धरा
ये च ध्यानानुबन्धच्छलमुकुलदृशा वेधसा नैव दृष्टा-
स्ते लक्ष्मीं नर्मयन्तो निधुवनविधयः पान्तु वो
माधवस्य ॥३॥
राजशेखरस्य ।

339 उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा S. K. II. 33,
धृत्वा चान्येन वासो विगलितकबरीभारमंसे V 165
वहन्त्याः । Vs. I. 3

338 (a) S, I. O यातो for जातो
(b) I. O., S नेक्षिता for लक्षिता
(d) S, Sp. लक्ष्मीनर्मयन्तो for लक्ष्मीं नर्मयन्तो

339 (a) Vs. रसान्ते for रतान्ते
(b) Sv. अंसं for अंसे.

Srk. 125 भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना
Sv. 79 शौरिणा वः
Spd. 135 शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः
स्रग्धरा पुनातु ॥४॥

वररुचेः ।

340 कचचिबुककुचाग्रे पाणिषु व्यापृतेषु
प्रथमजलधिपुत्रीसङ्गमे रङ्गधाम्नि ।
मालिनी ग्रथितनिविडनीवीग्रन्थिनिर्मोचनेच्छो
श्चतुरधिकभुजाशा शार्ङ्गिणो वः पुनातु ॥५॥

दाक्षिणात्यस्य ।

६९ लक्ष्मीः ।

341 प्रवीरहठभोग्यापि जयति श्रीर्महासती ।
अनुष्टुप् कृत्स्नत्रैलोक्यवासापि कृष्णोरःस्थलशायिनी ॥१॥

राजशेखरस्य ।

342 विद्वानक्षरनष्टधीरिति शुचिर्धर्मध्वजीति स्थिर-
शार्दूलविक्रीडित स्तब्धः क्रुद्ध इति ग्रहीति सुदृढः क्षन्ता लघीयानिति ।
मायावीति च नीतिशास्त्रकुशलो यामन्तरेणेश्वरै-
र्गण्यन्ते गुणिनोऽपि दूषणपदं तस्यै नमस्ते श्रिये ॥२॥

सोलुकस्य ।

343 विष्णुवक्षोगृहे लक्ष्मीरस्ति कौस्तुभदीपिके ।
अनुष्टुप् पुनातु निवसन्ती वो दृढदोःस्तम्भतोरणे ॥३॥

राजशेखरस्य ।

(d) A, I. O., Srk. आलम्ब्य for आलिङ्ग्य.
Sv. भट्टनारायणस्य (Spd. निशानारायणस्य) for वररुचेः.
342 (b) I. O, क्षान्तुर्लघीयानिति for क्षन्ता...निति
(d) Sp. नमोस्तु for नमस्ते.
343 (a) Ed., A वक्षःस्थले for वक्षोगृहे. Ed. दीपिते for दीपिके.

344 जयति श्रीमुख कान्तं कौस्तुभप्रतिविम्बितम् ।
चन्द्रमा मनसो जात इति यद्गायति श्रुतिः ॥४॥ अनुष्टुप्
आचार्यगोपीकस्य ।

345 वृत्ते साङ्गविवाहमङ्गलविधौ लब्धापि दैत्यद्रुहः
सौहार्दे विमनाः पुनातु भवतो लक्ष्मीः शार्दूलविक्रीडित
स्मरन्ती पितुः ।
यामाश्वासयतीव सोदरतया प्रत्यग्रविम्बग्रह-
व्याजादङ्कगतामनंकुशनिजस्नेहो मुहुः कौस्तुभ ॥५॥
शरणदेवस्य ।

७० लक्ष्म्युपालम्भः ।

346 कोपस्तेज इति ग्रहः स्थितिरिति क्रीडेति दुश्चेष्टता
माया च व्यवहारकौशलमिति स्वच्छत्वमित्यज्ञता ।
दौर्जन्यं स्फुटवादितेति धनिनामग्रे बुधैर्यद्वशा- शार्दूलविक्रीडित
द्दोषोऽपि व्यपदिश्यते गुणतया तस्यै नमोऽस्तु
श्रिये ॥१॥
शालूकस्य ।

347 रत्नाकरस्तव पिता स्थितिरम्बुजेषु
भ्राता तुषारकिरणः पतिरादिदेवः । Srk 1516
केनापरेण कमले बत शिक्षितासि वसन्ततिलक
सारङ्गशृङ्गकुटिलानि विचेष्टितानि ॥२॥
कस्यचित् ।

348 कस्मैचित्कपटाय कैटभरिपूरःपीठदीर्घालयां
देवि त्वमभिवाद्य कुप्यसि न चेत्तत्किंचिदाचक्ष्महे । Ar. vii. 43
यत्ते मन्दिरमम्बुजन्म किमिदं विद्यागृहं यच्च ते शार्दूलविक्रीडित
नीचान्नीचतरोपसर्पणमपामेतत्किमाचार्य कम् ॥३॥
मुरारेः ।

344 (b) I. O, यन्म्लायति for यद्गायति Ed. —anonymous.
345 (a) Sp. साङ्गे for साङ्ग
347 (b) Srk. सुधारसमयः for तुषारकिरणः, आद्य for आदि.
S, I. O omit कस्यचित्

349 अस्मान्मा भज कालकूटभगिनि स्वप्नेऽपि पद्मालये
व्याधीभूय कदर्थयन्ति बहुशो मातर्विकारा इमे ।
शार्दूलविक्रीडित यच्चक्षुर्न निरीक्षतेच्छविषयं नैवं शृणोति श्रुतिः
प्राणा एव वरं प्रयान्ति न पुनर्निर्यान्ति वाचो
बहिः ॥४॥

भवग्रामीणवाथोकस्य ।

अनुष्टुप् 350 लक्ष्मि नीचानुरक्तासि पुनरब्धिबिलं विश ।
क्व मन्दरः क्व ते देवाः कस्त्वामुत्तोलयिष्यति ॥५॥

कस्यचित् ।

७१ सरस्वती ।

अनुष्टुप् 351 वीणाक्वाणलयोल्लासिलोलदङ्गुलिपल्लवः ।
भारत्या पातु भूतानि पाणिर्लसितकङ्कणः ॥१॥

कङ्कणस्य ।

352 आदित्यादपि नित्यदीप्तममृतप्रस्यन्दिचन्द्रादपि
त्रैलोक्याभरणं मणेरपि तमःकाषं हुताशादपि ।
शार्दूलविक्रीडित विश्वालोकि विलोचनादपि परब्रह्मस्वरूपादपि
स्वान्तानन्दनमस्तु धाम जगतस्तोषाय
सारस्वतम् ॥२॥

बलदेवस्य ।

353 निगूढं कुत्रापि क्वचिदपि बहिर्व्यक्तमधुरं
सरस्वत्याः स्रोतः परिमलगभीरं विजयते ।
शिखरिणी अतिस्वादुन्यन्तःपिहितरसरम्ये यदुपरि
प्लवन्ते भूयांसः कतिचिदपि मज्जन्ति निपुणाः ॥३॥

गदाधरस्य

349 Sp., I. O. भवग्रामीणवाथोकस्य for ०वाथोकस्य.

350 (a) A, Ed. लक्ष्मीर्नीचा० far लक्ष्मि नीचा०

353 Sp. prefixes पण्डित before the poet's name.

354 क्वचिदिव रविर्जाड्यच्छेदि क्वचित्प्रचुराचिर-
द्युतिरिव चमत्कारि क्वापि क्षपाकरवन्मृदु । हरिणी
शिखिवदनृजु क्वापि क्वापि प्रदीपवदुज्ज्वलं
विजयि किमपि ज्योतिः सारस्वतं तदुपास्महे ॥४॥
अपिदेवस्य ।

355 यस्याः प्रसादपरमाणुरसायनेन
कल्पान्तरे सुकविकीर्तिशरीरमस्ति । वसन्ततिलक
या कामधेनुरिव कामशतानि दुग्धा
देवी प्रयच्छति नमामि सरस्वतीं ताम् ॥५॥
पुरुषोत्तमदेवस्य ।

७२ प्रशस्तचन्द्रः* ।

356 शृङ्गारे सूत्रधारः कुसुमशरमुनेराश्रमब्रह्मचारी Srk. 897
नारीणामादिदेवस्त्रिभुवनमहितो रागयज्ञे पुरोधाः । स्रग्धरा
ज्योत्स्नासत्रं दधानः पुरमथनजटाजूटकोटीशयालु-
र्देवः क्षीरोदजन्मा जयति कुमुदिनीकामुकः
श्वेतभानुः ॥१॥
वसुकल्पस्य ।

354 (a) S, I O. क्वचिदपि for क्वचिदिव
(b) Ed., A क्षमाकर for क्षपा०
355 (a) Ed., A यस्य for यस्याः.
(b) S, I. O. कल्पान्तरम् for कल्पान्तरे.
(c-d) दुग्धा and देवी transposed Ed. दुग्ध्वा
* I. O. प्रशस्ति for प्रशस्त.
356 (a) Srk आश्रमे for आश्रम
(b) Srk., S, I. O. राज्ये for यज्ञे.
(d) Ed. नायक for कामुक

357 कामायुष्टोमयज्वा पुरमथनजटाचक्रकौमारभक्ति
Ar. vii. 62 प्राणायामोपदेष्टा सरसिरुहवने शर्वरीसार्वभौमः ।
स्रग्धरा देवो जागर्ति भानोर्भुवनभरभृतः स्कन्धविश्रामबन्धुः
शृङ्गाराद्वैतवादी शमितकुमुदिनी मौनमुद्रो
मृगाङ्कः ॥२॥
मुरारे ।

358 कन्दर्पस्य जगत्त्रयीविजयिनः साम्राज्यदीक्षागुरुः
कान्तामानशिलोञ्छवृत्तिरखिलध्वान्ताभिचारे
कृती ।
शार्दूलविक्रीडित देवस्त्र्यम्बकमौलिमण्डनसरित्तीरस्थली तापसः
शृङ्गाराध्वरदीक्षितो विजयते राजा
द्विजानामयम् ॥३॥
विश्वेश्वरस्य ।

359 व्योमाम्भोनिधिपुण्डरीकममृतप्राधारधारागृहं
शृङ्गारद्रुमपुष्पमीश्वरशिखालङ्कारमुक्तामणिः ।
कालाकारतमोभिभूतकुमुदग्रामाय मृत्युञ्जयो
शार्दूलविक्रीडित जीयान्मन्मथराष्ट्रपौष्टिकमहाशान्ति-
द्विजश्चन्द्रमाः ॥४॥
उमापतिधरस्य ।

360 लीलासद्मप्रदीपस्त्रिपुरविजयिनः स्वर्णदीकेलिहंसः
स्रग्धरा कन्दर्पोल्लास सबीजं रतिरसकलहक्लेशविच्छेदचक्रम् ।

357 Ar. reads the verse thus.—प्राणायामोपदेष्टा सरसिरुहवने यौवनोन्मादलीलागोष्ठीना पीठमर्दस्त्रिभुवनवनितानेत्रयो' प्रातराश. । कामायुष्टोमयज्वा शमितकुमुदिनीमौनमुद्रानुरागः शृङ्गाराद्वैतवादी विभवति भगवानेष पीयूषभानु' ।

358 (c) I. O. मण्डल for मण्डन.

359 (d) A, I. O. महाशान्तिर्द्विज for महा…ज

कह्लाराद्वैतबन्धुस्तिमिरजलनिधेरुच्छिखो वाडवाग्नि-
र्लक्ष्म्याः क्रीडारविन्दं जयति भुजभुवां वंशकन्दः
सुधांशुः ॥५॥
श्रीमत्केशवसेनस्य ।

७३ चन्द्रकला ।

361 श्यामायाः करजक्षतं रतिपतेर्जैत्रं धनुर्बन्धकी-
हृत्कम्बुक्रकचश्चकोरखुरली सौहृद्यबीजाङ्कुरः । शार्दूलविक्रीडित
चोरग्रामगजांकुशः परिलसन्मन्दाकिनीरोहितो
ध्वान्ताम्भस्तरणैकनौरुदयते बालः
सुधादीधितिः ॥१॥
उमापतेः ।

362 लेखामनङ्गपुरतोरणकान्तिभाज-
मिन्दोर्विलोकय तनूदरि नूतनस्य ।
देशान्तरप्रणयिनोरपि यत्र यूनो- Srk. 903
र्नूनं मिथः सखि मिलन्ति विलोकितानि ॥२॥ वसन्ततिलक
वसुकल्पस्य ।

363 विगाढदोषं तिमिरं निरस्यता
क्रमेण विद्वाग्रकलाशलाकया ।
चिकित्सकेनेव विलोकनक्षमं वंशस्थविल
पुनर्नभश्चक्षुरिवेन्दुना कृतम् ॥३॥
गणपतेः ।

360 (d) Ed. वश for वंश I. O. श्रीमत्केशवसेनदेवस्य for श्री . स्य.
361 (a) Sp. वल्लकी for बन्धकी.
(d) Ed , A ०स्तिमिरैक for ०स्तरणैक. विजयते for उदयते.
362 (c) Sp देशान्तरे for देशान्तर
Srk-राजशेखरस्य
363 (b) Sp विद्वासुकला० for विद्वाग्रकला०.

364 प्रसरत्तिमिरसरित्तरिरसतीहृद्दारुदारुणक्रकचः ।
आर्या स्मरगृहकवाटविघटनराजतकुञ्जीकला शशिनः ॥४॥

सेह्लोकस्य ।

365 चैतन्यं नभसश्चकोररमणीकर्पूरपाली सुधा-
निर्यासद्रवदोहदस्य कुमुदस्तोमस्य सन्धुक्षणम् ।
शार्दूलविक्रीडित ध्वान्तोत्तुङ्गमतङ्गवारणसृणिः शृङ्गारबीजाङ्कुरः
पश्योदञ्चति सस्पृहं प्रणयिनि
प्रालेयभानोः कला ॥५॥

इन्द्रज्योतिषः ।

७४ चन्द्रबिम्बः ।

366 अनलसजवापुष्पोत्पीडच्छवि प्रथमं ततः
समदयवनीगण्डच्छायं पुनर्मधुपिङ्गलम् ।
Srk. 943
हरिणी तदनु च नवस्वर्णाम्भोजप्रभं शशिनस्तत-
स्तरुणि तगराकारं बिम्बं विभाति नभस्तले ॥१॥

कस्यचित् ।

367 उद्दर्पहूणतरुणीरमणोपमर्द-
भुग्नोन्नतस्तननिवेशनिभं हिमांशोः ।
Srk. 924
वसन्ततिलक बिम्बं कठोरविसकाण्डकडारगौरै
र्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥२॥

अपराजितरक्षितस्य ।

364 (a) Ed., A दारुणारुण for दारुदारुण.
(b) S, Sp, I. O. कुञ्ची for कुञ्जी.
366 (c) Srk. आदर्श for अम्भोज.
(d) Srk. तरुण for तरुणि. Ed., A तु गवाकार for तगराकारम्.
367 (a) I. O., S तद्गर्भभ्रूण (Srk. उद्गर्भहूण) for उद्दर्पहूण.
Ed. रमणी for तरुणी.
Srk-anonymous.

368 स्फुटकोकनदारुणं पुरस्ताद् | Srk. 941
अथ जाम्बूनदपत्रपिञ्जराभम् । | मालभारिणी
क्रमलङ्घितमुग्धभावमिन्दोः
स्फटिकच्छेदनिभं विभाति बिम्बम् ।।३।।

भगीरथस्य ।

369 करमूलबद्धपन्नगविषाग्निधूमहतमध्यम् । | Srk. 950
ऐशानमिव कपालं स्फुटलक्ष्म स्फुरति | Jh. VII. 17
शशिबिम्बम् ।।४।। | उपगीति

कस्यचित् ।

370 मध्येयामिनि पार्वणामृतरुचेर्बिम्बं स्फुरच्चन्द्रिका
तत्प्रान्तं परितो विसारिकिरणश्रेणीशलाकावलि । | शार्दूलविक्रीडित
ताराग्रन्थिविसंष्ठुलं स्थलमिव ज्योत्स्नास्फुरद्वाससा
संवीतं सुखमध्यशेत जगती सुव्यक्तमालोक्यते ।।५।।

अंशुधरस्य ।

७५ प्रौढचन्द्रः ।

371 एतत्तर्कय कैरवक्लमहरे शृङ्गारदीक्षागुरौ
दिक्कान्तामुकुरे चकोरसुहृदि प्रौढे तुषारत्विषि । | Spd 3639 Srk. 900
कर्पूरैः किमपूरि किं मलयजैरालेपि किं पारदै- | शार्दूलविक्रीडित
रक्षालि स्फटिकोपलैः किमघटि
द्यावापृथिव्योर्वपुः ॥१॥

वसुकल्पस्य ।

368 Ed. भागीरथस्य for भगीरथस्य
369 (a) Srk. कच for कर. Srk. inserts निश्वास bet. पन्नग and विषाग्नि.
Ed. धूमाहतं मध्ये for धूम……मध्यम्.
Srk-दत्तस्य.
370 (a) S मानिनि for यामिनि,
371 (c) Sp. अक्षालि for आलेपि.
(d) Sp. स्फटिकान्तरैः for स्फटिकोपलैः.
Srk. changes the order of lines as c d a b. Spd., Srk. -anon.

372 पश्चे घोरिषुकोटिशातनशिलाचक्रं चकोराङ्गना-
चक्षुष्यश्चतुरङ्घ्रितताण्डवगुरुश्चौरः कृशाङ्गीरुषाम् ।
शार्दूलविक्रीडित सोयं सान्द्रतमिश्रसिन्धुरघटाकण्ठीरवः कैरव-
श्रीजीवातुरमर्त्यमण्डलसुधासत्त्री दिवि द्योतते ॥२॥

गङ्गाधरस्य ।

373 चन्द्रे सान्द्रमरीचिसंचयजुषि प्राचीप्रियाप्रेयसि
प्राप्ते प्रौढतमिस्रभावतिमिरध्वंसप्रशंसानिधौ ।
शार्दूलविक्रीडित कालिन्दी सुरनिम्नगीयति तथा विन्ध्या हिमाद्रीयति
क्षोणी राजतभाजनीयति तथा चक्रोऽपि हंसीयति ॥३॥

कस्यचित् ।

374 जनानन्दश्चन्द्रो भवतु न कथं नाम सुकृती
Srk. 425 प्रयातोवस्थाभिस्तिसृभिरपि यः कोटिमियतीम् ।
Smv. 53 33 भ्रू वोर्लीलां वालः श्रियमलिकपट्टस्य तरुणो
शिखरिणी मुखेन्दोः सर्वस्वं हरति हरिणाक्ष्याः परिणतः ॥४॥

मुरारेः ।

375 निर्यासैः करपत्रपीडनवशान्निर्यद्भिरिन्दूपला-
न्मानग्रन्थिभिरश्रमेण कठिनैस्त्रुट्यद्भिरेणीदृशाम् ।
शार्दूलविक्रीडित देवोऽयं परिपिष्टचक्रहृदयादुत्सर्पिभिः पावकै-
र्व्यक्ताहंकृतिरभ्युदेति तमसां माराङ्कमल्लः शशी ॥५॥

शान्त्याकरस्य ।

372 (a) I O., A, ZDMG शासन for शातन

373 (a) S, A युधि for जुषि.

(b) Sp. ध्वान्त for ध्वंस, विधौ for निधौ.

374 (a) Smv., Srk भवति for भवतु

Srk. वामदेवस्य for मुरारेः. Smv.—anonymous

375 (b) S, I O मार for मान.

७६ सकिरणचन्द्रः ।

376 अद्यापि स्तनशैलदुर्गविषमे वामेक्षणानां हृदि
स्थातुं वाञ्छति मान एष धिगिति
क्रोधादिवालोहितः ।
उद्यन्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणं
स्फायत्कैरवकोषनिःसरदलिश्रेणीकृपाणं शशी ॥१॥
वसुकल्पस्य ।

Mn. II. 41
Srk 921
Spd 3636
Sd. under VII. 4
Kp 237
शार्दूलविक्रीडित

377 सद्यः कुङ्कुमपङ्कपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्यैरावतकान्तदन्तमुसलच्छेदोपमेयाकृतिः ।
उद्गच्छत्ययमच्छमौक्तिकमणिप्रालम्बलम्बैः करै-
र्मुग्धानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी ॥२॥
राजशेखरस्य ।

Srk 908
शार्दूलविक्रीडित

378 सलीलं लिम्पद्भिर्धवलधवलैरम्बरतलं
करौघैः कह्लारप्रसवनवकर्मस्थपतिभिः ।
चकोरस्तोमानाममृतघृतकुल्यामुपनय-
न्नयं देवः प्राचीमवतरति तारापरिवृढः ॥३॥
हरेः ।

शिखरिणी

376 (a) Srk, Mn, Sd., Kp सीमन्तिनीना (Spd किं मानिनीना) for वामेक्षणाना

(b) Srk, Spd. झगिति for धिगिति.

(c) Mn. प्रोद्यन् (Kp., Sd प्रोद्यत्) for उद्यन् Mn., Sd., Kp. क्षणात् for क्षण.

(d) Spd., Sd, Mn. फुल्लत् for स्फायत्

Spd.—anonymous.

377 (a) I.O., Srk. चन्दन for कुङ्कुम

Srk—anonymous.

The entire verse has been omitted in A, S.

379 गोरोचनारुचकभङ्गपिशङ्गिताङ्ग

Sik 945 स्तारापतिर्मसृणमाक्रमते क्रमेण ।

वसन्ततिलक गोभिर्नवीनबिसतन्तुवितानगौरै

राच्यम्भविष्णुरयमम्बरमावृणोति ॥४॥

कस्यचित् ।

380 रसातलस्थानविसारिणीं हरन्

प्रभां मृणालीमिव धौतकर्दमाम् ।

वंशस्थविल समुत्पपाताङ्कतनूरुहः शनै

रुदन्वतो हंस इव क्षपाकरः ॥५॥

भृङ्गस्वामिनः ।

७७ चन्द्ररश्मिः ।

381 ये पूर्वं यवशूकसूचिसुहृदो ये केतकाग्रच्छद-

Vsb. III 10 च्छायाधामभृतो मृणाललतिका लावण्यभाजश्च ये ।

Srk 953 ये धाराम्बुविडम्बिनः क्षणमथो ये तारहारश्रिय-

शार्दूलविक्रीडित स्तेमी स्फाटिकदण्डडम्बररुचो जाताः

सुधांशोः कराः ॥१॥

राजशेखरस्य ।

382 कपाले मार्जारः पय इति करॉल्लेढि शशिन-

Kp. 546 स्तरुश्छिद्रप्रोतान् बिसमिति करी संकलयति ।

Sv. 1994 रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति

Sk. III 114 प्रभामत्तश्चन्द्रो जगदिदमहो विह्वलयति ॥२॥

Srk. 905

शिखरिणी तस्यैव ।

381 (a) Vsb., Sik सूचिसूत्र for शूकसूचि. Vsb. कैतक for केतक.
(b) Vsb साम्य for धाम अनु (Srk. अत्र) for च.
(d) Vsb., Srk. जितो for रुचो

382 (a) Sv, Sk कपोले for कपाले. (b) Srk. इव for इति
(c) Sk. दयिता for वनिता Sp. अंशुकधिया for अंशुकमिति.
(d) Ed., I O., Sv. विप्लवयति (Sp, Sk., Kp. विभ्रमयति, Srk. विक्लवयति) for विह्वलयति
Sv. ascribes it to Bhāsa. Srk-anon.

383 निद्रानन्दकरीर्नितान्तधवला आमोदिनीरप्यमूः
पीयूषं मधु वर्षतीरपि तमोभृङ्गान्निराकुर्वतोः।
आकाशद्रुममञ्जरीरिव विधोर्भासः ककुप्कामिनी-
लीलोत्तंसरुचः करोति नियतं बाणान्
प्रसूनायुधः ॥३॥ शार्दूलविक्रीडित

सुरभेः।

384 एतैर्जह्नुसुताजलैरयमुनाभिन्नै रलग्नाञ्जनै-
र्नारीणां नयनैरकर्दमलवालिप्तैर्मृणालाङ्कुरैः।
हारैरस्फुरदिन्द्रनीलतरलैः कुन्दैरलीनालिभि-
र्वेल्लद्भिर्भुवनं विभूषितमिदं शीतद्युतेरंशुभिः ॥४॥ शार्दूलविक्रीडित

तस्यैव।

385 हारश्रीसुहृदो रथाङ्गरमणीसंन्यासपुण्यापगा
वन्दीभूतमधुव्रताब्जकलिकाकाराकवाटार्गलाः।
उन्मीलन्ति चकोरदैवतसुधापूर्णाहुतीनां स्रुचो
व्योमान्तःपरिमाणसूत्रसरलास्तास्ता
हिमांशोः कलाः ॥५॥ शार्दूलविक्रीडित

अभिनन्दस्य।

७८ ज्योत्स्ना।

386 शीतांशुः शशिकान्तनिर्मलशिला तस्यां प्रसुप्तः सुखं
जग्ध्वा ध्वान्ततृणाङ्कुरान्मृगशिशुः
खण्डेन्द्रनीलत्विषः।
निद्रामुद्रितलोचनालसतया रोमन्थफेनच्छटां
रोदःकन्दरपूरणाय तनुते ज्योत्स्नाच्छलेनामुना ॥१॥ शार्दूलविक्रीडित

कापालिकस्य।

387 संप्रत्याक्रमते पुरन्दरपुरीकासारकह्लारिणी-
कोषोद्घाटनकुञ्जिकाः प्रकटयन्नारम्भतः कौमुदीः।

385 (d) Ed °स्तारा for स्तास्ता, करा° for कलाः.
S °स्तास्तुहिनांशोः for °स्तास्ता हिमाशो..

शार्दूलविक्रीडित

पौरस्त्याद्रितटीकुटुम्बि मृगयुव्यापारितास्त्रव्यध-
व्यङ्गक्रोडकुरङ्गसङ्गलदसृक्संसर्गशोणः शशी ॥२॥

अपिदेवस्य ।

Sik 937
शार्दूलविक्रीडित

388 कर्पूरद्रवसीकरोत्करमहानीहारमग्नामिव
प्रत्यग्रामृतफेनपङ्कपटलीलेपोपदिग्धामिव ।
स्वच्छैकस्फटिकाश्मवेश्मजठरक्षिप्तामिव क्ष्मामिमां
कुर्वन् पार्वणशर्वरीपतिरसावुद्दाम विद्योतते ॥३॥

परमेश्वरस्य ।

Spd 3638
Smv 72.15
Srk. 952
शार्दूलविक्रीडित

389 सद्यःपाटितकेतकोदरदलश्रेणीश्रियं बिभ्रती
येयं मौक्तिकदामगुम्फनविधौ योग्यच्छविः प्रागभूत् ।
उन्मेयाकलशीभिरञ्जलिपुटैर्ग्राह्या मृणालाङ्कुरैः
पातव्या च शशिन्यमुग्धविभवे सा

वर्तते चन्द्रिका ॥४॥

राजशेखरस्य ।

Sik 927
शार्दूलविक्रीडित

390 क्षीरोदाम्भसि मज्जतीव दिवसव्यापारखिन्नं जगत्
तत्क्षोभाज्जलबुद्बुदा इव भवन्त्यालोहितास्तारकाः ।
चन्द्रः क्षीरमिव क्षरत्यविरतं धारासहस्रोत्करै-
रुद्ग्रीवैस्तृषितैरिवाद्य कुमुदै

र्ज्योत्स्नापयः पीयते ॥५॥

विक्रमादित्यचण्डालविद्याकालिदासानाम् ।

387 Ed आपदेवस्य for अपिदेवस्य.

388 (d) Srk उद्दाममुद्द्योतते for उद्दाम विद्योतते.
Ed., A पञ्चमेश्वरस्य for परमेश्वरस्य.

389 (d) Smv. transposes वर्तते and चन्द्रिका

Smv., Spd.—anonymous.

390 (b) Srk. तरन्त्या० for भवन्त्या०
The order of lines in Srk. is c d a b.

Srk.—चतुर्णाम् ।

७२ कलङ्कः ।

391 महानीलश्यामं नरकरिपुवक्षो वियदिदं
ततांशुश्रेणीकस्तुहिनकिरणः कौस्तुभमणिः । शिखरिणी
कलङ्कोऽप्येतस्य प्रमुखनिवसत्तोयाधिसुता
स्तनासङ्गस्फूर्जन्मदलिखितपत्रप्रतिकृतिः ॥१॥

सुरभेः ।

392 किरद्धारां धारा इव किरणधाराः प्रतिदिशं
तुषारांशोर्बिम्बं मणिघटितधारागृहमिव ।
इहायं कस्तूरीहरिणमदपङ्काङ्किततनुः शिखरिणी
कलङ्कव्याजेन प्रतिवसति कन्दर्पनृपतिः ॥२॥

प्रतिनन्दस्य ।

393 शेषस्याहेर्व्रजति तुलनां मण्डलीभूतमूर्ते-
रिन्दुः कुन्दस्तवकविशदः पार्वणोऽयं यथैव ।
व्योमाम्भोधौ सजलजलदश्यामरोचिस्तथोच्चै- मन्दाक्रान्ता
रङ्कः शङ्कामयमपि हरेस्तल्पसुप्तस्य धत्ते ॥३॥

राजशेखरस्य ।

394 स्फटिकालवाललक्ष्मी प्रवहति
शशिबिम्बमम्बरोद्याने । Srk. 928
किरणजलसिक्तलाञ्छनबालतमालैकविटपस्य ॥४॥ आर्या

तस्यैव ।

395 यथायं भात्यंशून् दिशि दिशि किरन् कुन्दविशदान्
शशाङ्कः काश्मीरीकुचकलशलावण्यघटितः ; Srk 939
तथायं कस्तूरीमसिलिखितमुद्रामतितुलां शिखरिणी
नवाम्भोदच्छेदच्छविरपि समारोहति मृगः ॥५॥

शर्वस्य ।

392 Ed अभिनन्दस्य for प्रतिनन्दस्य.

394 Srk—anonymous.

395 (b) Srk लडितः for घटितः.

(c) Srk. मद for मसि, पत्रावलि for मुद्रामति.

८० सतमश्चन्द्रः†।

Kp. 139
Sv. 2004
Smv. 72 4
Srk. 926
हरिणी

396 प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
प्रभवति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥१॥

राजशेखरस्य।

स्वागता

397 निःससार करघातविदीर्ण-
ध्वान्तदन्तिरुधिरारुणमूर्तिः।
केशरीव कटकादुदयाद्रे-
रङ्कलीनहरिणो हरिणाङ्कः ॥२॥

भवभूतेः।

शार्दूलविक्रीडित

398 प्रत्यग्रप्रसरे तमिस्रपटले बिम्बैकमात्रोदया-
रम्भे शीतरुचावकीर्णकिरणे रम्योऽयमेकः क्षणः।
यस्मिन्नीलनिचोलकेन पिहितं कृत्वा तदेकान्ततः
सिन्दूरारुणचक्रमुद्रितमिव त्रैलोक्यमालोक्यते ॥३॥

कस्यचित्।

मालिनी

399 अथ जगदवगाढं वासरान्तापचारा-
त्तिमिरपटलवृद्धावप्रतीकारसत्त्वम्।
शशिभिषगनुपूर्वं शीतहस्तो भिषज्य-
न्नधिकविशदवक्त्रः स्वैरभावं चकार ॥४॥

कस्यचित्।

† S उत्तम for सतम.

396 (a) Sv. कनकाकृति for ०प्रभः.

(c) Srk. प्रसरति पुन. for प्रभवति (Kp. उदयति) ततो.

Sv. त्नोद for ध्वंस.

(b-c) Transposed in Sv.

Srk., Smv., Sv.—anonymous

399 (c) Sp. अभिषिञ्चन् for अभिषज्यन्.

400 य एष प्रत्यूषे रविशबरमालोक्य पुरतो
नभःपारावारं न्यविशत भयादिन्दुशफरः ।
स सायं निःशङ्कं चटुलतरताराभकशतै- शिखरिणी
श्चरन्मन्दं मन्दं तिमिरजलनीलीमुदयते ॥५॥
वैद्यश्रीजीवदासस्य ।

८१ सतारश्चन्द्र † ।

401 मृगेन्द्रस्येव चन्द्रस्य मयूखैर्नखरैरिव । Sık. 948
पाटितध्वान्तमातङ्गमुक्ताभा भान्ति तारकाः ॥१॥ अनुष्टुप्
अभिनन्दस्य ।

402 तारास्तोकतमिस्रधूमपटलीव्यापारसन्ध्यानन-
ज्वालालीढनभःकपालविचलल्लाजश्रियं बिभ्रति । शार्दूलविक्रीडित
किं चायं रजनीपतिः परिणतप्राग्भारतालद्रवो-
न्मिश्रं चिक्कणपिण्डमण्डकलसल्लावण्यमारोहति ॥२॥
कस्यचित् ।

403 उदयगिरिसौधशिखरे ताराचयचित्रिता-
म्बरविताने । आर्या
सिंहासनमिव निहितं चन्द्रः कन्दर्पभूपस्य ॥३॥
कस्यचित् ।

400 S drops श्री in the poet's name.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 544, with
कुरर for शबर (a), नि.शङ्क. for निःशङ्कं (c)

† A, S सतारक for सतार.

401 Srk—anonymous

403 The verse has been quoted by Aufrecht in ZDMG, 36, p. 551.

404 ताराकोरकराजिभाजि गगनोद्याने तमोमक्षिकाः
Srk. 956 सन्ध्यापल्लवपानिनीः कवलयन्नैकान्ततस्तर्कय ।
शार्दूलविक्रीडित एतस्मिन्नुदयान्तपर्वततरुद्वन्द्वान्तराले ततै-
रेतैर्भाति गभस्तितन्तुपटलैः श्वेतोर्णनाभ शशी ॥४॥
हरेः ।

405 अयमुदयमहीध्रधातुरागै-
पुष्पिताग्रा रुणकरारुणिताम्बराभिरामः ।
वितरसि न दृशौ कृशाङ्गि तारा-
मिव दिवि वन्दितुमिन्दुरभ्युपैति ॥५॥
हरिदत्तस्य ।

८२ शरदमृतचन्द्रः ।

406 शशिनमसूत प्राची नृत्यति मदनो
Srk. 919 हसन्ति ककुभोऽपि ।
आर्या कुमुदरजःपटवासं विकिरति गगनाङ्गने पवनः ॥१॥
धर्मकीर्तेः ।

407 तथा पौरस्त्यायां दिशि कुमुदकेदारकलिका-
कपाटघ्नीमिन्दुः किरणलहरीमुल्लयति ।
Ar. II. 78 Srk. 915 समन्तादुन्मीलद्बहुलजलबिन्दुव्यतिकरै-
शिखरिणी र्यथा पुञ्जायन्ते प्रतिगुणकमेणाङ्कमणयः ॥२॥
मुरारेः ।

404 (c) Srk. उदयास्तभूधर for उदयान्तपर्वत
(d) Srk एभि॰ for एतैः.
Srk—वसुकल्पस्य

405 (d) Ed. अभ्युदेति for अभ्युपैति
The verse has been quoted by Aufrecht in ZDMG, 36, p. 547

407 (c) Ar., Srk बहलजलबिन्दुस्तबकिनो for बहुल · करैः. Sp. बहल for बहुल.
(d) Ar., Srk. प्रतिगुडकम् for प्रतिगुणकम्.

408 स श्रीकण्ठकिरीटकुट्टिमपरिष्कारप्रदीपांकुरो
देवः कैरवबन्धुरन्धतमसप्राग्भारकुक्षिम्भरिः । Ar. VII. 61
संस्कर्ता निजकान्तमौक्तिकमणिश्रेणीभिरेणीदृशां शार्दूलविक्रीडित
गीर्वाणाधिपतेः सुधारसवती
पौरोगवः प्रोदगात् ॥३॥
तस्यैव ।

409 आमोदं कुमुदाकरेषु विपद पद्मेषु कालानलं
पञ्चेषोर्विशिखेषु सान्द्रशिशिरक्षारं शशिग्रावसु ।
म्लानिं मानवतीमुखेषु विनयं चेतःसु वाभभ्रुवां शार्दूलविक्रीडित
वृद्धिं वार्धिषु निक्षिपन्नुदयते देवस्तमीकामुकः ॥४॥
शङ्करदेवस्य ।

410 सौरातपविरहज्वरलङ्घितगात्रीं कुमुद्वतीं निभृत ।
संरक्त परिपश्यन् विधुरयमयते प्रसादयितुम् ॥५॥ आर्या
कस्यचित् ।

८३ भासः† ।

411 कह्लारस्पर्शगर्भैः शिशिरपरिचयात्कान्तिमद्भिः
कराग्रै-
श्चन्द्रेणालिङ्गितायास्तिमिरनिवसने
स्रंसमाने रजन्याः । Srk 920
अन्योन्यालोकिनीभिः परिचयजनितप्रेम- स्रग्धरा
निस्यन्दिनीभि-
र्दूरारूढे प्रमोदे हसितमिव
परिस्पष्टमाशासखीभिः ॥१॥
पाणिने ।

† A आभासः ।

411 (a) Srk. स्पर्शि for स्पर्श, परिगमात् for परिचयात्.

(d) Srk. वधूभिः for सखीभि.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 367

Sv 1969
Spd. 3634
वंशस्थविल

412 उपोढरागेण विलोलतारकं
तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तथा
पुरोऽपि मोहाद्गलितं न लक्षितम् ॥२॥

तस्यैव।

Srk. 922
Mn II. 42
शार्दूलविक्रीडित

413 यातस्यास्तमनन्तरं दिनकृतो वेशेन रागान्वितः
स्वैरं शीतकरः करं कमलिनीमालिङ्गितुं योजयन्।
शीतस्पर्शमवाप्य संप्रति तया गुप्ते मुखाम्भोरुहे
हासेनेव कुमुद्वतीवनितया वैलक्ष्यपाण्डूकृतः ॥३॥

वसुकल्पस्य।

शार्दूलविक्रीडित

414 प्राचीमञ्चति यामिनीमनूनयत्याशाः समालम्बते
द्यामालिङ्गति सेवते कुमुदिनीं स्निग्धोतिमुग्धैः करैः।
बह्वीषु प्रतिपन्नमन्मथरसं कुर्वन्मनः कामिना-
मिन्दुर्वन्द्यकरः स एष भुवनानन्दः परिस्पन्दते ॥४॥

कस्यचित्।

Srk. 901
शिखरिणी

415 कलाधारो वक्रः स्फुरदधररागो नवतनु-
र्गलन्मानावेशास्तरुणरमणीर्नागर इव।
घनश्रोणीबिम्बे नयनमुकुले चाधरदले
कपोले ग्रीवायां कुचकलशयोश्चुम्बति शशी ॥५॥

श्रीकण्ठस्य।

412 (d) Sv, Spd. रागात् for मोहात्.

413 (c) A, S, Srk. अवेत्य सान्द्रमनयारुद्धे for अवाप्य.... गुप्त.
(d) A, S, Srk. हास्येनैव कुमुद्वतीदयितया for हासेनेव ...तया.
Mn. हासेनैव for हासेनेव.

Srk. राजशेखरस्य।

414 (a) S अर्चति for अञ्चति.
(d) S, Sp. वन्द्यकल. for बन्द्यकर..

८४ मिश्रकचन्द्रः ।

416 उत्पल्लव इव किरणैः कुसुमित इव
तारकाभिरयमिन्दुः । आर्या
उदयत्युदयतटान्ते सुरतरुरिव शीतलच्छायः ॥१॥
जनकस्य ।

417 यात्रायामिव दत्तपूर्णकलशः कन्दर्पराज्ञः शशी
तत्रायं सहकारपल्लवतुलामङ्कः समारोहति ।
ज्योत्स्नालेपनपङ्कपूरितमिव व्योमाङ्गणं सर्वतः शार्दूलविक्रीडित
क्षिप्ता मङ्गललाजमुष्टय इव भ्राजिष्णवस्तारकाः ॥२॥
कस्यचित् ।

418 गगनतलतडागप्रान्तसीम्नि प्रदोष-
प्रबलतरवराहोत्खन्यमानश्चकास्ति । Srk. 932
परिकलितकलङ्कस्तोकपङ्कानुलेपो- मालिनी
निजकिरणमृणालीमूलकन्दोऽयमिन्दुः ॥३॥
परमेश्वरस्य ।

419 चिताचक्रं चन्द्रः कुसुमधनुषो दग्धवपुषः
कलङ्कस्तस्यायं वहति मलिनाङ्गारतुलनाम् । Srk. 907
अथैतस्य ज्योतिर्दरदलितकर्पूरधवलं शिखरिणी
मरुद्भिर्भस्मेव प्रसरति विकीर्णं दिशि दिशि ॥४॥
राजशेखरस्य ।

416 Quoted by Aufrecht in ZDMG, 36, p. 532.

418 (c) Srk कलङ्क° for कलङ्क.

Srk—anonymous.

419 (b) Srk. तत्रास्यो for तस्यायं.

(c) इदं त्वस्य for अथैतस्य.

Srk—anon.

420 अथोद्दामैरिन्दोः सरसबिसदण्डद्युतिधरै-
Srk. 923 मयूखैर्विक्रान्तं सपदि परितः पीततिमिरैः ।
शिखरिणी दिनमन्या रात्रिश्चकितचकितं कौशिककुलं
प्रफुल्लं निद्राणैः कथमपि यथाम्भोरुहवनैः ॥५॥
योगेश्वरस्य ।

८५ बहुरूपकचन्द्रः ।

421 फेनः क्षीराम्बुराशेरयमुदयगिरेस्तुङ्गशृङ्गातपत्रं
पूर्वस्या भालदेशे तिलक इव दिशो दर्पणो
स्रग्धरा यामिनीनाम् ।
वापीनां राजहंसः परिलसितसटः केशरीकाननाना-
माकाशस्याट्टहासः कुमुदवनचयोद्बोधशङ्खः
शशाङ्कः ॥१॥
राजशेखरस्य ।

422 वृद्धं क्षौणिभुजां कुलस्य कुलटासंकेतयात्रापुरो-
वर्ती तुच्छघटस्तमीसुततमस्तोमस्य जन्माष्टमः ।
शार्दूलविक्रीडित क्षीराम्भोधिरसायनं रचयति प्राचीं प्रसन्नस्मितां
दुर्दैवं कमलस्य पान्थतरुणी प्रौढाक्षिशूलं शशी ॥२॥
सागरस्य ।

423 एकः संप्रति पाकशासनपुरीपीयूषसत्त्री पुरः
पारक्यं तमसामसौ कुमुदिनीचैतन्यचिन्तामणिः ।
शार्दूलविक्रीडित मानोच्चाटनकार्मणं मृगदृशां देवो नभोम्भोनिधौ
पश्योदञ्चति पञ्चबाणवणिजो यात्रा-
वहित्रं शशी ॥३॥
हरेः ।

420 (a) Ed., Srk. तथा for अथ.

Srk—धोयीकस्य ।

421 (c) S, Sp. प्रविलसितशट for परिलसितसट

424 अमृतमयमनङ्गक्ष्मारुहस्यालवालं
मृतदिवसकपाल कालकापालिकस्य। मालिनी
जयति मकरकेतोः शाणचक्रं शराणा-
ममरपुरपुरन्ध्रीदर्पणः श्वेतभानुः ॥४॥

त्रिपुरारेः।

425 क्रीडाकर्पूरदीपस्त्रिदशमृगदृशां
कामसाम्राज्यलक्ष्मी-
प्रोत्क्षिप्तैकातपत्रं श्रमशमनचलच्चामरं
कामिनीनाम्। स्रग्धरा
कस्तूरीपङ्कमुद्राङ्कितमदनवधूमुग्धगण्डोपधानं
द्वीपं व्योमाम्बुराशेः स्फुरति सुरपुरी-
केलिहंसः सुधांशुः ॥५॥

जयदेवस्य।

८६ अस्तमय।

426 यथैवैष श्रीमांश्चरमगिरिप्रान्तजलधौ
सुधासूतिश्चेतः कनककमलाशङ्कि कुरुते। Srk. 940
तथायं लावण्यप्रसरमकरन्दद्रवतृषा- शिखरिणी
पतद्भृङ्गश्रेणिश्रियमपि कलङ्कः कलयति ॥१॥

कस्यचित्।

427 कृतपादनिगूहनोवसीद
न्नधिकश्यामकलङ्कपङ्कलेखः। Srk 978
गगनोदधिपश्चिमान्तलग्नो मालभारिणी
विधुरुत्तान इवास्ति कूर्मराजः ॥२॥

शतानन्दस्य।

428 मुषितमुषितालोकास्तारास्तुषारकणत्विषः
सवितुरपि च प्राचीमूले मिलन्ति मरीचयः। Srk. 973
श्रयति शिथिलच्छायाभोगस्तटीमपराम्बुधे- हरिणी
र्जरठलवलीलावण्याच्छच्छविर्मृगलाञ्छनः ॥३॥

शर्वस्य।

429 लुठत्यपरवारिधौ कमलनिर्विशेषः शशी
Smv. 82. 20 प्ररूढमुदयाचले चुलुकमात्रमुष्णं महः ।
पृथ्वी क्षणं गगनवेदिकामिदमनङ्कुशं गाहते
कलिन्दगिरिकन्यकातटतमालनीलं तमः ॥४॥

सिह्लणस्य ।

430 स्वस्थानाद्वनोभुजेव पतितं दोषाकरेणेन्दुना
ताराभिर्विरलायितं प्रकृतिभिस्तस्येव निर्धामभिः ।
शार्दूलविक्रीडित निःश्रीकैः कुमुदाकरैर्मुकुलितं तस्यावरोधैरिव
प्रध्वस्तं तिमिरोत्करैः परिजनैस्तस्यैव

दुश्चारिभिः ॥५॥

लक्ष्मीधरस्य ।

८७ उच्चावचचन्द्रः ।

431 नेपथ्यं भूतभर्तुस्त्रिदशपरिषदां जीवनं यामिनीना-
मुत्तंसः पांसुलानां कुलरिपुरमृतस्रोतसामादिशैलः ।
स्रग्धरा आतङ्कः पङ्कजानां जयति रतिकलाकेतनं मीनकेतोः
सिन्धूनामेकबन्धुः कुमुदसमुदया-

नन्दकन्दोऽयमिन्दुः ॥१॥

शरणस्य ।

432 ज्योत्स्नामुग्धवधूविलासभवनं पीयूषवीचिसरः
Srk. 955 क्षीराब्धेर्नवनीतकूटमवनीतापार्तितोयोपलः ।
शार्दूलविक्रीडित यामिन्यास्तिलकं कला मृगदृशां प्रेमव्रतैकाश्रमः
कामत्येष चकोरयाचकमहःकर्पूरवर्षः शशी ॥२॥

433 प्राचीगण्डस्थलमलयजस्थासके कामिनीना-
मन्तर्यामिण्यमृतकिरणे वैरिणि स्वैरिणीनाम् ।
मन्दाक्रान्ता

429 (a) S कमठ for कमल.

Smv. attributes it to बिल्हण.

430 (d) Ed. तस्येव for तस्यैव.

ज्योत्स्नाजालं विकिरति मुहुश्चन्द्रकान्तप्रणाली-
राचामन्ति प्रियसहचरीचाटुकाराश्चकोराः ॥३॥

हरेः ।

434 तमोभिर्दिक्कालैर्वियदिव विलङ्घ्य क्व नु गतं
गता द्राङ्मुद्रापि क्व नु कुमुदकोषस्य सरसः ।
क्व धैर्यं तच्चाब्धेर्विदितमुदयाद्रेः परिसर-
स्थलीमध्यासीने शशिनि जगदप्याकुलमिदम् ॥४॥

Srk 925
शिखरिणी

अपराजितरक्षितस्य ।

435 ऋक्षैर्वृतो हरिपदे निवसन्समीर-
सन्तानशैत्यजनक कुमुदप्रमोदी ।
निघ्नन्निशाचरतमः पृथुनीललक्ष्मा
तारापतिः स्फुरति चित्रमनङ्गदोथम् ॥५॥

वसन्ततिलक

सुरभेः ।

८८ वातः ।

436 मज्जन्नम्भसि पुष्पधूलिषु लुठन्नाकम्पयन् भूरुह-
श्रेणीरुन्मदकोकिलावलिरवैराबद्धकोलाहलः ।
अध्वन्यान् हृदि ताडयन् पुरवधूवासांसि विस्रंसयन्
स्वच्छन्द भ्रमति स्मरावनिपतेरुन्मत्तको मारुतः ॥१॥

शार्दूलविक्रीडित

कस्यचित् ।

437 अलीनां मालाभिर्विरचितजटाभारमहिमा
परागैः पुष्पाणामुपरचितभस्मव्यतिकरः ।
वनानामाभोगे कुसुमवति पुष्पोच्चयपरो
मरुन्मन्दं मन्दं विचरति परिव्राजक इव ॥२॥

Srk 1134
शिखरिणी

वीर्यमित्रस्य ।

434 (a) Srk. अपि for इव (b) Ed. द्रङ् for द्राङ्.
(c) Srk. प्रति for परि. Srk. om. रक्षितस्य in the poet's name.
435 (b) Ed दैन्य for शैत्य.
437 S वीरमित्रस्य for वीर्यमित्रस्य Srk.—anonymous.

438 सुरतसमरस्वेदच्छेदप्रदो दलदम्बुज-
व्रजपरिमलस्पर्शं वर्षन्नसौ श्वसनः शनैः।
हरिणी प्रसरति पिकत्रोटित्रुट्यद्रसालनवाङ्कुर-
द्रवनवपरिष्वङ्गैः शीतः कुरङ्गवधूदृशाम् ॥३॥

कस्यचित्।

439 प्रमदविपिनवापीसंभृताम्भोजराजि-
प्रकटितमकरन्दग्राहिणोमी समीराः।
मालिनी अभिनवमदभाजां कामिनीनां कपोले
सुरतसमरखेदस्वेदमुन्मूलयन्ति ।।४॥

गदाधरनाथस्य।

440 एते पल्लीपरिवृढवधूप्रौढकन्दर्पकेलि-
क्लिश्यत्पीतस्तनपरिसरस्वेदसम्पद्विपक्षाः।
Srk. 1141 वान्ति स्वैरं सरसि सरसि क्रोडदंष्ट्राविमर्द-
मन्दाक्रान्ता त्रुट्यद्गुन्द्रापरिमलगुणग्राहिणो गन्धवाहाः ॥५॥

कस्यचित्।

८९ दक्षिणवातः।

441 चुम्बन्नाननमालुठन् स्तनतटीमान्दोलयन् कुन्तलं
व्यस्यन्नंशुकपल्लवं मनसिजक्रीडां समुल्लासयन्।
Srk. 1133 अङ्गं विह्वलयन्मनो विकलयन्मानं समुन्मूलयन्
शार्दूलविक्रीडित नारीणां मलयानिलः प्रिय इव प्रत्यङ्गमालिङ्गति ॥१॥

विनयदेवस्य।

442 एते ते मलयाद्रिकन्दरजुषस्तच्छाखिशाखावली-
शार्दूलविक्रीडित लीलाताण्डवसंप्रदानगुरवश्चेतोभुवो बान्धवाः।

440 (b) Srk. क्लिष्टा for क्लिश्यत्.
441 (b) Srk. क्रीडाः for क्रीडां.

Srk.—anonymous.

चूतोन्मत्तमधुव्रतप्रणयिनीहुङ्कारझङ्कारिणो
हा कष्टं प्रसरन्ति पान्थयुवतिजीवद्रुहो वायवः ॥२॥
श्रीपतेः ।

443 अन्ध्रीनीरन्ध्रपीनस्तनतटलुठनायासमन्दप्रचारा-
श्चारून्नुल्लासयन्तो द्रविडवरवधू-
हारधम्मिल्लभारान् । Srk. 1126
जिघ्रन्तः सिंहलीनां मुखकमलवनं केरलीनां कपोलं स्रग्धरा
चुम्बन्तो वान्ति मन्दं मलयपरिमला वायवो
दाक्षिणात्याः ॥३॥
कस्यचित् ।

444 ये दोलाकेलिकाराः किमपि मृगदृशां
मन्युतन्तुच्छिदो ये Vsb. I. 27
सद्यः शृङ्गारदीक्षाव्यतिकरगुरवो Spd. 3816
ये च लोकत्रयेऽपि । Smv. 59.29
ते कण्ठे लोठयन्तः परभृतवयसां पञ्चमं रागराजं Srk 1145
वान्ति स्वैरं समीराः स्मरविजयमहासाक्षिणो स्रग्धरा
दाक्षिणात्याः ॥४॥
राजशेखरस्य ।

443 (b) Srk हारि for हार.
(c) S रसं (Srk. मलं) for वनम्
Srk. ascribes the verse to वसुकल्प.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 548.

444 (a) Vsb. मनसि for किमपि Smv मान for मन्यु.
(c) Vsb., Spd., Smv. लोलयन्त for लोठयन्तः.
Spd.—anonymous.
The verse has some similarity with Br. x. 55

मन्दाक्रान्ता

445 स्वैरं स्वैरं द्रविडललनागण्डपीठ स्पृशन्तः
कर्णाटीनामटनकुटिलाः कुन्तलावर्तनेषु ।
व्याधुन्वन्तो वकुललवलीनागपुनागवल्ली-
र्लोपामुद्रादयितककुभो मारुताः सचरन्ति ॥५॥

कस्यचित् ।

९० नदीवातः ।

मालिनी

446 प्रतितटिनि तरङ्गान्मन्दमान्दोलयन्त-
स्तरुणकरुणमल्लीफुल्लमुल्लासयन्तः
इह हि नववसन्ते वान्ति सीमन्तिनीनां
सुरतसमरखेदच्छेदधीराः समीरा ॥१॥

कस्यचित् ।

Srk. 1129
शिखरिणी

447 धुनानः कावेरीपरिसरभुवश्चम्पकतरू-
न्मरुन्मन्द कुन्दप्रकरमकरन्दानवकिरन् ।
प्रियप्रेमावर्षच्युतरचनमामूलसरलं
ललाटे लाटीनां लुठितमलक ताण्डवयति ॥२॥

अचलस्य ।

शार्दूलविक्रीडित

448 रेवानिर्झरवारिविन्दुशिशिरः प्रेयानिवार्यं सखे
वातः फुल्लवङ्गसङ्गमवशान्मन्दः कुरङ्गीदृशाम् ।
वक्त्रं चुम्बति वेपथु जनयति प्रोद्घाटयत्यंशुकं
शीत्कारं तनुते तनोति पुलकं केशान्तमाकर्षति ॥३॥

कस्यचित् ।

445 (a) Ed. भित्ती. (I O दीपम्) for पीठम्.

447 (a) Ed. चन्दन for चम्पक.

(c) Sp. प्रेमाकर्ष for प्रेमावर्ष.

Ed., Srk—anonymous.

448 Ed. अचलस्य for कस्यचित्.

449 वहति मलयशैलोपान्तविश्रान्तवल्ली-
नवकिसलयभङ्गक्षीरसौरभ्यबन्धुः ।
रहसि परिचितोयं पाण्ड्यसीमन्तिनीनां
दरतरलितरेवातीरनीरसमीरः ॥४॥ मालिनी

उमापतिधरस्य ।

450 उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः
कुहूकण्ठीकण्ठीरवरवलवत्रासितप्रोषितेभाः । Spd. 3810
अमी चैत्रे मैत्रावरुणि तरुणीकेलिकङ्केलिमल्ली-
चलद्वल्लीहल्लीसकसुरभयश्चण्डि चञ्चन्ति वाताः ॥५॥ मेघविस्फूर्जिता

राक्षसस्य ।

९१ समुद्रवातः ।

451 वहति जलधिकूले बालताम्बूलवल्ली-
चलनविधिविदग्धः सान्द्रनीहारसार्द्रः ।
गगनचरपुरन्ध्रीदन्तनिर्भिन्नवन्य-
क्रमुकफलकषायामोदसौम्यः समीरः ॥१॥ मालिनी

दक्षस्य ।

452 लवणजलधिवेलाशीकरासारवर्षी
सुरतरभसखिन्नद्राविडीभुक्तमुक्तः ।
वहति मलयशैलारण्यदोलाविलासी
तरुणकरुणमल्लीगन्धबन्धुः समीरः ॥२॥ मालिनी

धर्मपालस्य ।

453 ये कल्लोलैश्चिरमनुगता दक्षिणस्याम्बुराशेः
पीतोच्छिष्टास्तदनु मलये भोगिभिश्चन्दनस्थैः ।
अन्तर्भ्रान्ताः प्रतिकिसलयं पुष्पितानां लतानां
संप्राप्तास्ते विरहशिखिनो गन्धवाहाः सहायाः ॥३॥ मन्दाक्रान्ता

अमरसिंहस्य ।

449 Ed. transposes the verses 448 and 449.
450 (a) Spd. नटन्त for लुठन्तः.
453 Quoted by Aufrecht in ZDMG, 36, p. 363.

454 मन्दान्दोलितदक्षिणार्णवचलत्कल्लोललीलालस-
शार्दूलविक्रीडित
त्कर्णाटीरतकेलिलोलसुमनोमालासमुल्लासिनः।
वाताः केरलकामिनीकुचतटे लाटीललाटे मुहुः
खेलन्तो विकिरन्ति मालववधूधम्मिल्लमल्लीस्रजः ॥४॥

कस्यचित्।

455 लावण्यैश्चक्रपाणेः क्षणधृतगतयः प्रांशुभिश्चन्द्रकान्त-
प्रासादैर्द्वारिकायां तरलित-
शार्दूलविक्रीडित
चरमाम्भोधितीराः समीराः।
सेवन्ते नित्यमाद्यत्करिकठिनकरास्फालकालप्रबुद्ध-
क्रुध्यत्पञ्चाननोग्रध्वनिभरविगलच्चण्डहुङ्कारगर्भाः ॥५॥

कस्यचित्।

९२ प्राभातिकवातः।

456 अयमुषसि विनिद्रद्राविडीपीनतुङ्ग-
Srk. 1144
मालिनी
स्तनपरिसरसान्द्रस्वेदबिन्दूपमर्दी।
स्रुतमलयजवृक्षक्षीरसौरभ्यसभ्यो
वहति सखि भुजङ्गीभुक्तशेषः समीरः ॥१॥

कस्यचित्।

457 प्रभाते सन्नद्धस्तनिततनिमानं जलधरं
Srk 1139
शिखरिणी
स्पृशन्तः सर्वत्र स्फुटिततरमल्लीसुरभयः।
अमी मन्दं मन्दं सुरतसमरश्रान्ततरुणी-
ललाटस्वेदाम्भःकणपरिमुषो वान्ति मरुत ॥२॥

अचलस्य।

455 (b) Sp. नीराः for तीराः.
Omitted by A.
456 (a) Ed., Srk. transpose पीन and तुङ्ग
(c) Ed. रम्यो for सभ्यो
457 (a) Srk. महिमानं for तनिमानं
(b) S k. वन for तर
Srk.-anonymous.

458 रजनिकरमयूखोन्निद्रनीलोत्पलाली-
परिमलबहुगन्धो बन्धुरस्तत्परागैः ।
कवलितरतिखेदस्वेदविन्दुर्निशान्ते
पुलकयति तुषारासारवर्षी समीरः ॥३॥ मालिनी

सरसिरुहस्य ।

459 रामाणां रमणीयवक्त्रशशिनः स्वेदोदविन्दुप्लुत-
व्यालोलालकवल्लरीः प्रचलयन् धुन्वन्नितम्बाम्बरम् । Spd. 3732
प्रातस्त्यो वहति प्रकामविलसद्राजीवराजीरजः- Smv. 83.1
पुञ्जामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥४॥ शार्दूलविक्रीडित

अमरुकस्य ।

460 स्तनपरिसरभागे दूरमावर्तमानाः Sv. 2167
श्रिततनिमनि मध्ये किंचिदेव स्खलन्तः । Spd. 3730
ववुरतनुनितम्बाभोगरुद्धा वधूनां मालिनी
निधुवनरसखेदच्छेदिनः कल्यवाताः ॥५॥

रत्नाकरस्य ।

459 (a) Spd. स्वेदोप for स्वेदोद.
(b) Spd., Smv. मञ्जरी॰ for वल्लरीः, नितम्बांशुकम् for नितम्बाम्बरम्.
(c) Spd., Smv. प्रातर्वाति न चाति (Smv न वाति) कुष्टविकसत् for प्रात..... ...विलसत्

Smv , Spd.—anonymous.

This is a doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 72)

460 (b) Sv., Spd. स्फुट for श्रित
(c) Sv , Spd अलघु for अतनु.
(d) Sv. प्राह्ण (Spd. शीत) for कल्य.

Spd., Sv.—anonymous.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 374.

९३ मदनः ।

461 सुधासूतेर्बन्धुर्मधुसहचरः पञ्चमरुचि-
दिशाँल्लीला बह्वीः कुवलयदृशां नर्मणि गुरुः ।
शिखरिणी स देवः शृङ्गारी हृदयवसतिः पञ्चविशिखः
सदा स्वादून् कुर्वन्मधुमदविकारान् विजयते ॥१॥

राजशेखरस्य ।

462 अन्तर्बहिस्त्रिजगतोरसभावविद्वा-
न्यो नर्तयत्यखिलदेहभृतां कुलानि ।
वसन्ततिलक क्षेमं ददातु भगवान् परमादिदेवः
शृङ्गारनाटकमहाकविरात्मजन्मा ॥२॥

भवानन्दस्य ।

463 जयति स मदलेखोच्छृङ्खलप्रेमरामा-
Srk. 332 ललितसुरतलीलादैवतं पुष्पचापः ।
मालिनी त्रिभुवनजयसिद्धौ यस्य शृङ्गारमूर्तै-
रुपकरणमपूर्वं माल्यमिन्दुर्मधूनि ॥३॥

उत्पलराजस्य ।

464 मनसि कुसुमबाणैरेककालं त्रिलोकीं
Srk. 325 कुसुमधनुरनङ्गस्ताडयत्यस्पृशाङ्गिः ।
मालिनी इति विततविचित्राश्चर्यसंकल्पशिल्पो
जयति मनसिजन्मा जन्मिभिर्मानिताङ्गः ।४।

कस्यचित् ।

Srk. 333 465 याच्यो न कश्चन गुरुः प्रतिमा च कान्ता
वसन्ततिलक पूजा विलोकननिगूहनचुम्बनानि ।

461 (a) Sp. सुधामूर्तेः for ॰सूतेः.

463 (c) Srk., Sp. सिद्धैन for सिद्धौ.

464 (d) Srk. मानिताङ्ग. for मानिताङ्ग॰.

Srk ascribes the verse to मनोविनोद

465 (b) Srk. विगूहन for निगूहन

आत्मा निवेद्यमितरव्रतसारजैत्रीं
वन्दामहे मकरकेतन देव दीक्षाम् ॥५॥

वल्लनस्य ।

९४ मदनशौर्यम्† ।

466 वन्दे देवमनङ्गमेव रमणीनेत्रोत्पलच्छद्मना
पाशेनायतिशालिना सुनिबिड संयम्य लोकत्रयम् । Srk. 328
येनासावपि भस्मनाञ्चिततनुर्देवः कपाली बला- शार्दूलविक्रीडित
त्प्रेमक्रुद्धनगात्मजाङ्घ्रिविनतिक्रीडाव्रते दीक्षितः ॥१॥

ललितोकस्य ।

467 चापः क्षमाधरपतिः फणिनां पतिर्ज्या
बाणः पुराणपुरुषस्त्रिदशा सहायाः । वसन्ततिलक
ईशः पुरामिति पुरां तिसृणां विजेता
पुष्पायुधः पुनरयं त्रिजगद्विजेता ॥२॥

भवानन्दस्य ।

468 अयं स भुवनत्रयप्रथितसंयम· शङ्करो
बिभर्ति वपुषाधुना विरहकातरः कामिनीम् । Srk. 323
अनेन किल निर्जिता वयमिति प्रियायाः करं पृथ्वी
करेण परिताडयञ्जयति जातहासः स्मरः ॥३॥

नीलपट्टस्य ।

465 A omits वल्लनस्य.
† Omitted by A.

466 (b) Srk. आयत for आयति. (c) Srk. लाञ्छित· for ०नाञ्जित
The verse has been quoted by Aufrecht in ZDMG, 36, p. 542.

468 (a) Ed , S संयमी for संयमः.
(d) Ed. लालयन् for ताडयन्
Srk. नीलपटहस्य for नीलपट्टस्य.

Vsb I. 1
Srk. 327
Spd. 3077
Smv 1 25
मालिनी

469 कुलगुरुरबलानां केलिदीक्षाप्रदाने
परमसुहृदनङ्गो रोहिणीवल्लभस्य।
अपि कुसुमपृषत्कैर्देवदेवस्य जेता
जयति सुरतलीलानाटिकासूत्रधारः ॥४॥

राजशेखरस्य ॥

Sv. 82
Srk. 331
शिखरिणी

470 धनुर्माला मौर्वी क्वणदलिकुलं लक्ष्यमबला-
मनोभेद्यशब्दप्रभृतय इमे पञ्च विशिखाः।
इयाञ्जेतुं यस्य त्रिभुवनमदेहस्य विभवः
स वः कामः कामान् दिशतु
दयितापाङ्गवसतिः ॥५॥

कस्यचित्।

९५ उच्चावचम्।

Srk 36
शिखरिणी

471 पुनः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्।
नमञ्जन्मन्यस्मिन्नहमतनुरग्रेप्यनतिभाङ्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥१॥

मुञ्जस्य।

शार्दूलविक्रीडित

472 न ज्योत्स्ना न च मालती न दयिता नो वल्लकीपञ्चम-
स्ताम्बूलं न विलेपनं न च रहःकेलिर्न मुक्तालता।
नो वा सत्कविसूक्तयो मम तथा हर्तुं क्षमन्ते मनः
पुण्यैरुन्मिलिता चराचरगुरोर्भक्तिर्यथा शूलिनः ॥२॥

तस्यैव।

469 (a) Sp. प्रबन्धे for प्रदाने
Spd —anonymous.

470 (b) Srk., Sv. भेद्यं for भेद्य Ed पद्म for शब्द.
(d) Sv. reads वः after कामान्.
Sv. ascribes the verse to घटक.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 553, with लक्ष for लक्ष्य (a)

471 (a) Srk. वपुः for पुनः.

472 (b) Sp. बहु for रहः. (d) Ed. उन्मिषिता for उन्मिलिता.

473 का दुर्दशा कुपितनिर्दयचित्रगुप्त-
विल्लासितस्य जगतो यदि देवि न स्या॰। — वसन्ततिलक
त्वं कर्मबन्धनविमोचनधर्मराज-
लेखाधिकारपरिशोधनजातपत्नी ॥३॥

विरिञ्चेः।

474 स्वाङ्गैः कल्पितसान्द्रतल्परचनः
श्वासानिलोल्लासिभिः
कल्लोलैः कृतचामरः पृथुफणाक्लृप्तातपत्रक्रियः। — शार्दूलविक्रीडित
चूडारत्नधृतप्रदीपवलयो विश्वेशमाराधय-
न्नाकल्पस्थिरनिश्चयेन मनसा शेषः परं जीवति ॥४॥

ब्रह्मनागस्य।

475 स श्लाघ्यस्तमुपस्तुवन्ति विबुधास्तेनान्वयः पावित-
स्तस्मै नाम नमन्ति तेपि मुनयो
मान्यास्ततो बिभ्यति। — शार्दूलविक्रीडित
हस्ते तस्य जगत्त्रयी किमपरं तत्रामृतं लीयते
येन श्रीहरिपादपद्मरजसि न्यस्तं कदाचिन्मनः ॥५॥

तस्यैव।

श्रीधरदासविनिर्मितसदुक्तिकर्णामृते पवित्रयतु।
गङ्गेव गाहमानान् प्रथमो देवप्रवाहोऽयम् ॥

इति श्रीमहामाण्डलिकश्रीधरदाससंगृहीते सदुक्ति-
कर्णामृते देवताप्रवाहो नाम प्रथमः प्रवाहः ॥
अथ वीचयः ९५ श्लोकाः ४७५।

---

474 (a) S उद्वासिभि. for उल्लासिभि.
(b) Ed. कह्लारै. for कल्लोलै.
(c) S, Sp. प्रवाल for प्रदीप.
475 Omitted in A, S.

सदुक्तिकर्णामृतम्

शृङ्गारप्रवाहवीचयः ।

वयसोः सन्धिरूढश्चयुवभावा युवतिरङ्गनाश्चर्यम् ।
मुग्धा मध्या प्रौढा नवपरिणीता
च सैव विस्रब्धा ॥१॥
गर्भवती सत्यवती स्वैरिण्युपदेशगुप्तबन्धक्यौ ।
वैदग्ध्यवती कुलटा लक्षितकुलटा
च वारवनिता च ॥२॥
अपि दाक्षिणात्यपाश्चात्यौदीच्यप्राच्य
युवतयो ग्राम्याः ।
स्त्रीमात्रं खण्डितया सहान्यसंभोगचिह्नदूना च ॥३॥
कलितविरहिणी विरहिण्यस्या
वागश्रु दूतिकावचनम् ।
दयिते प्रियपरुषोत्तरवचसी चेष्टानुकथनं च ॥४॥
ताप तनुत्वोद्वेगक्षणदावस्थाविभावनं तस्याः ।
वासकसज्जा स्वाधीनभर्तृका विप्रलब्धा च ॥५॥
कलहान्तरिता तद्वाक् सखीवचो गोत्रत स्खलनम् ।
मानिन्युदात्तमानिन्यनुरक्तमनस्विनी तदीयोक्तिः ॥६॥
तस्यां सखीप्रबोधोऽनुनयो मानक्षतिः प्रवसत स्त्री ।
यात्राक्षेपः प्रोषितपतिका तद्वाक्
सखीषु तद्वचनम् ॥७॥
तस्याः प्रियसंवादोऽवस्थाकथनं प्रतीक्षणं पत्युः ।
काकः प्रियसंभेदोप्यथाभिसारक्रियारम्भः ॥८॥

2 (a) S सत्यसती for ०वती
4 (a) S ललित for कलित
7 (a) Ed. तस्या. for तस्याम्.
8 (a) S पथीक्षणम् for प्रतीक्षणम्.

अभिसारिका दिनतमोज्योत्स्नादुर्दिनगता
च कुलटानाम् ।
प्रलपितमबलारूपं भ्रू दृक्कर्णाधराननं वचनम् ॥९॥

बाहुस्तनरोमावलिमध्यं च क्रीडितानि युवतीनाम् ।
अनुकूलो दक्षिणशठधृष्टग्राम्याश्च
नायका मानी ॥१०॥

प्रोषितपथिकौ वर्षापथिकः पथिकस्य
नायिकास्मरणम् ।
यात्राभङ्गो विरहो विरहिस्त्रीस्मरणमवलोकः ॥११॥

चित्रं स्वप्नो यूनोरभिलाषस्तानवं गुणाख्यानम् ।
उद्वेगः परिदेवनमिन्दुस्मरजलमुचामुपालम्भः ॥१२॥

उन्मादः स्मरलेखः क्रीडावनवारिणोरलंकारः ।
दूतीसंवदनं स्त्री पुंलोभनदूत्युपालम्भौ ॥१३॥

मिथुनागमनं वाद्यं गीतं दुरोदरं दृष्टिः ।
स्त्रीणां कटाक्षचाटू मधुपानं तल्पसंश्रयणम् ॥१४॥

परिरम्भचुम्बनाधरदंशनखन्यासकण्ठकूजाश्च ।
वस्त्राकर्षनवोढासंभोगौ निधुवनारम्भः ॥१५॥

सुरतं विपरीतरतं विपरीतरतानुकथनसुरतान्तौ ।
उषसि प्रियावलोकनमथ वनितानिष्क्रमो
रतश्लाघा ॥१६॥

आलीनामितरेतरकथा शुकालापलज्जमाना च ।
प्रत्यूषादित्योदयमध्याह्नास्तमयसायतिमिराणि ॥१७॥

दीपेन्दूदयरजनय आरम्भः कुसुमसमयस्य ।
कुसुमसमयोऽस्य वासरतरुपिकमधुपा
निदाघतक्लेशौ ॥१८॥

11 (a) Ed. ॰पथिको for ॰पथिकौ.

ग्रीष्मभवः शृङ्गारो दववह्निः प्रावृडारम्भः ।
वर्षा वार्षिकवारिदतटिनीदिनरात्रयः
शरत्सन्धिः ॥१९॥
शारदेतदीयह्लादिनी खञ्जनहेमन्ततत्तमस्विन्यः ।
हैमनहालिकपथिकौ शिशिरस्तद्ग्राम-
शस्यशर्माणि ॥२०॥
उच्चावचमिति नवसप्तत्यधिकशतेन सरसवीचीनाम् ।
श्रीधरदासेन समारचि शृङ्गारप्रवाहोऽयम् ॥२१॥

शृङ्गारप्रवाहः ।

१ वयःसन्धिवीचिः ।

476 अचञ्चलं मुग्धमुदञ्चितं दृशो-
रनुन्नत श्रीमदुरो मृगीदृशः ।
अभङ्गुराकूतवती गतिर्भ्रुवो-
रबद्धलक्ष्यं क्वचिदुत्क्रमान्तरम् ॥१॥ वंशस्थविल

गोसोकस्य ।

477 अप्रकटवर्तितस्तनमण्डलिकानिभृतचक्रदर्शिन्यः ।
आवेशयन्ति हृदयं स्मरचर्यागुप्तयोगिन्यः ॥२॥ आर्या

तस्यैव ।

478 यूनां पुरः सपदि किंचिदुपेतलज्जा
वक्षो रुणद्धि मनसैव न दोर्लताभ्याम् ।
प्रौढाङ्गनाप्रणयकेलिकथासु वाला
शुश्रूषुरन्तरथ वाह्यमुदास्त एव ॥३॥ वसन्ततिलक

श्रीहनूमत ।

477 (b) Sp. सुर for स्मर
478 (a) S, Sp. उपोढ for उपेत.
(b) Sp. सहसैव for मनसैव.

479 अहमहमिकाबद्धोत्साहं रतोत्सवशंसिनि
हरिणी
प्रसरति मुहुः प्रौढस्त्रीणां कथामृतदुर्दिने ।
कलितपुलका सद्यः स्तोकोद्गतस्तनकोरके
वलयति शनैर्बाला वक्षःस्थले तरलां दृशम् ॥४॥

धर्माशोकदत्तस्य ।

480 लावण्यामृतसान्द्रसिन्धुलहरीसंसिक्तमस्या वपु-
र्जातस्तत्र नवीनयौवनकलालीलालतामण्डपः ।
Srk. 359
शार्दूलविक्रीडित
तत्रायं स्पृहणीयशीतलतरुच्छायाप्रसुप्तोत्थितः
संमुग्धो मधुबान्धवः स भगवानद्यापि
निद्रालसः ॥५॥

भिक्षोः ।

२ किंचिदुपारूढयौवना* ।

481 यत्प्रत्यङ्गं स्फुटमनुसरन्त्यूर्मयो विभ्रमाणां
Srk. 365
मन्दाक्रान्ता
क्षोभं धत्ते यदपि विपुलः स्निग्धलावण्यपङ्कः ।
उन्मग्नं यत्स्फुरति च मनाक्कुम्भयोर्युग्ममेत-
त्तन्मन्येऽस्या स्मरगजयुवा गाहते हृत्तडागम् ॥१॥

विधूकस्य ।

479 (c) S मण्डलम् for कोरके.
480 (a) Sp. लावण्य for संसिक्त
(c) Srk. तर for तरु, छायासु for छाया, drops प्र.
Srk. वीर्यमित्रस्य for भिक्षो..
* Sp. किंचिदुपोढयौवना ।
481 (b) Srk. बहलः for विपुलः.
(c) Sp., Srk. द्वन्द्वम् for युग्मम्.

482 भ्रुवोः काचिल्लीला परिणतिरपूर्वा नयनयो
स्तनाभोगो व्यक्तस्तरुणिमसमारम्भसमये ।
इदानीमेतस्याः कुवलयदृशः प्रत्यहमयं
नितम्बस्याभोगो नयति मणिकाञ्चीमधिकताम् ॥२॥
राजोकस्य ।

Srk. 334
Spd. 3274
Smv. 51 7
शिखरिणी

483 दरोत्तानं चक्षुः कलितविरलापाङ्गचलनं
भविष्यद्विस्तारस्तनमुकुलगर्भोलसमुरः ।
नितम्बे संक्रान्ताः कतिपयकला गौरवजुषो
वपुर्मुञ्चद्बाल्यं किमपि कमनीयं मृगदृशः ॥३॥
कस्यचित् ।

Srk. 351
Smv. 51 10
शिखरिणी

484 पङ्क्त्यां मुक्तास्तरलगतय संश्रिता लोचनाभ्यां
श्रोणीबिम्बं त्यजति तनुतां सेवते मध्यभागः ।
धत्ते वक्षः कुचसचिवतामद्वितीयं च वक्त्रं
तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥४॥
राजशेखरस्य ।

मन्दाक्रान्ता
Srk 355
Spd. 3282
Smv. 52.4

482 (b) Srk. अव्यक्त for व्यक्त. Smv. तरुणिमनि सरम्भ for तरुणिमसमारम्भ

(c-d) Srk. reads इदानीं बालाया. किममृतमयं किंमधुमयः,
किमानन्दः साक्षाद् ध्वनति मधुर पञ्चमलयं ॥
Spd., Smv.—same as Srk. with विषमयं for मधुमयं, ध्वनित for ध्वनति and रव for लय.

Srk. वीर्यमित्रस्य for राजोकस्य.
Smv., Spd.—anonymous.

483 (a) Srk. वलनं (Smv चपलं) for चलनं.
(b) Srk., Smv. विस्तारि for विस्तार. Smv. युगल for मुकुल
(c) Smv. पुषो for जुषो.

484 (b) Spd. बन्धः (Smv. बिम्ब.) for बिम्बं, देश for भाग .
(c) Sp., S, Srk, Spd. अद्वितीयत्वमास्यम् for अद्वितीयं च वक्त्रम्.
Spd.—anonymous.

485 गते बाल्ये चेतः कुसुमधनुषा सायकहृतं
शिखरिणी भयाद्वीक्ष्यैवास्याः स्तनयुगमभून्निर्जिगमिषु ।
सकम्पा भ्रूवल्ली चलति नयन कर्णकुहरं
कृशं मध्यं भुग्ना वलिरलसित· श्रोणिफलकः ॥५॥

शतानन्दस्य ।

३ युवतिः ।

486 तरन्तीवाङ्गानि स्फुरदमललावण्यजलधौ
Srk. 375
शिखरिणी प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च ।
दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलता-
महो सारङ्गाक्ष्यास्तरुणिमनि गाढः परिचय· ॥१॥

राजशेखरस्य ।

487 अतन्त्री वाग्वीणा स्तनयुगलमग्रीवकलसा-
शिखरिणी वनब्जं दृङ् नीलोत्पलदलमपत्त्रोरुकदली ।
अकाण्डा दोर्वल्ली वदनमकलङ्कः शशधर-
स्तदस्यास्तारुण्यं भुवनविपरीतं घटयति ॥२॥

वाग्वीणस्य ।

488 न जङ्घे गौराङ्ग्याः सरसकदलीस्तम्भयुगल'
शिखरिणी न मध्योयं वेदी न कुचयुगल' काञ्चनघटौ ।
न काञ्ची किं चायं स्फुरति परितस्तोरणगुणः
स्मरस्यैतन्मन्ये सकलमभिषेकोपकरणम् ॥ ॥

कस्यचित् ।

486 (d) A सरसकदलीकाण्डयुगलं for तरुणिमनि .....परिचयः.
A omits राजशेखरस्य.

487 Omitted in A. Quoted by Aufrecht in ZDMG, 36, p. 542

488 (a) Omitted in A. S suggests काण्ड as an alternative reading for स्तम्भ.

489 तदेतत्सर्वस्वं भुवनजयिनः पुष्पधनुषो
मनुष्याणामेकं तदिदमसमं जीवितफलम् ।
इदं तत्सौख्यानां कुलभवनमाद्यं त्रिभुवने शिखरिणी
यदेतत्तारुण्योपहितमहिमानो मृगदृशः ॥४॥

कस्यचित् ।

490 मध्यं बद्धवलित्रयं विजयते निस्सन्धिबन्धोन्नम- Srk. 361
द्विस्तारिस्तनभारमन्थरमुरो मुग्धाः कपोलश्रियः । शार्दूलविक्रीडित
किं चामुग्धविनिद्रनीरजदृशस्तारुण्यपुण्यातिथे-
रस्याः कुङ्कुमपङ्कलेपलडहच्छायं वपुर्वर्तते ॥५॥

कस्यचित् ।

४ नायिकाद्भुतम् ।

491 मध्येहेमलतं कपित्थयुगलं प्रादुर्बभूव क्रम-
प्राप्तौ तालफलद्वयं तदभवन्निःसन्धि भावस्थितम् । Srk. 387
पश्चाद्बद्धसमुन्नतिव्यतिकरं सौवर्णकुम्भद्वया- शार्दूलविक्रीडित
कारेण स्फुटमेव तत्परिणतं क्वेद वदामोद्भुतम् ॥१॥

वेतोकस्य ।

492 दृष्टा काञ्चनयष्टिरद्य नगरोपान्ते भ्रमन्ती मया
तस्यामद्भुतमेकपद्ममनिशं प्रोत्फुल्लमालोकितम् । Srk. 387
तत्रोभौ मधुपौ तथोपरि तयोरेकोष्टमीचन्द्रमा- शार्दूलविक्रीडित
स्तस्याग्रे परिपुञ्जितेन तमसा नक्तंदिवं स्थीयते ॥२॥

तस्यैव ।

489 Quoted by Aufrecht in ZDMG, 36, p. 552

490 (a) S चयं for त्रयम्

(c) S किं चास्निग्ध for किं चामुग्ध. Srk. विलोल for विनिद्र.

(d) Srk. नडह for लडह. Srk. वज्रमुष्टेः for कस्यचित्.

491 (b) Srk. तदनुतत् for तदभवत्.

(c) Srk. तुल्य for बद्ध. Srk. वित्तोकस्य for वेतोकस्य.

492 (b) Srk. पद्ममेकम् for एकपद्मम् Srk. वित्तोकस्य for वेतोकस्य.

493 दृष्टाः शैवलमञ्जरीपरिचिताः सिन्धोश्चिरं वीचयो
Srk 452
शार्दूलविक्रीडित
रत्नान्यप्यवलोकितानि बहुशो युक्तानि मुक्ताफलैः ।
यत्तु प्रोज्झितलाञ्छने हिमरुचावुन्निद्रमिन्दीवरं
संसक्तं च मिथो रथाङ्गमिथुनं तत्कुत्र दृष्टं पुनः ॥३॥

रथाङ्गस्य ।

वसन्ततिलक
S. K. IV. 102
Srk. 426
Smv. 49.17

494 लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलकाण्डमृणालदण्डाः ॥४॥

विक्रमादित्यस्य ।

शार्दूलविक्रीडित

495 किं कोप्येष मनोभ्रमः किमथवा जातो दृशां मादृशां
दोषस्तैमिरिकः किमेष सुमहानुत्पातनामा विधिः ।
यन्नीलाञ्जनसंनिभोत्पलदलद्वन्द्वोल्लसत्पक्ष्म-
व्याहारी दिवसे च वर्धितरुचिर्गेहे शशी पार्वण ॥५॥

कस्यचित् ।

५ मुग्धा ।

Srk. 350
शार्दूलविक्रीडित

496 वारंवारमनेकधा सखि मया चूतद्रुमाणां वने
पीतकर्णदरीप्रणालवलितः पुंस्कोकिलानां ध्वनिः ।
तस्मिन्नद्य पुनः श्रुतिप्रणयिनि प्रत्यङ्गमुत्कम्पितं
तापश्चेतसि नेत्रयोस्तरलता कस्मादकस्मान्मम ॥१॥

भोजदेवस्य ।

493 (d) Srk. युगल for मिथुनं, केन for कुत्र
Srk विक्रमादित्यस्य for रथाङ्गस्य.

494 (d) S. K. कदलि for कदल.
Ed. विकटनितम्बायाः (Srk. श्रीविक्रमादित्यदेवस्य) for विक्रमादित्यस्य.

495 (a) Ed. मम for मनो.

496 (d) Srk. तरलिमा for तरलता. Ed.—anonymous.

497 ववुरेव मलयमरुतो जगुरेव पिकाः परारि च परुच्च ।
उत्कण्ठाभरतरलं सखि मानसमैषमः किमिदम् ॥२॥ आर्या
कालिदासस्य ।

498 सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनं वक्रोक्तिसंसूचनम् । As. 28
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला शार्दूलविक्रीडित
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥३॥
अमरोः ।

499 ध्रुवमुदधितटीषु वल्लयस्ता
यदुदिततन्तुचयैर्भवन्ति काञ्चयः । पुष्पिताग्रा
इह हरिणदृशः फलैर्यदीयै- Smv. 86.3
र्विदधति मौक्तिकनामभिश्च हारान् ॥४॥
राजशेखरस्य ।

500 यावद्यावत्कुवलयदृशा मृज्यते दन्तराजि-
स्तावत्तावद्द्विगुणमधरच्छायया शोणशोचिः । मन्दाक्रान्ता
भूयोभूयः प्रियसहचरीदर्शितादर्शभित्तौ
दृष्ट्वा दृष्ट्वा न विरमयते पाणिमद्यापि मुग्धा ॥५॥
देववोधस्य ।

498 (b) Ed., As. वलना for वलनम्.
499 (a) Ed. उदय for उदधि.
(d) Sp. दामभिः for नामभि..
500 (a) Smv. पाली for राजि.
(b) Smv. रोचिः for शोचिः.
(c) Smv. प्रत्यासन्न for भूयोभूय .
(d) Smv. दशं दर्शं for दृष्ट्वा दृष्ट्वा. बाला for मुग्धा.
Smv.—anonymous.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 516.

६ मधरा।

Spd. 3675
Smv. 77·4
द्रुतविलम्बित

501 विरम नाथ विमुञ्च ममाञ्चलं
शमय दीपमियं समया सखी।
इति नवोढवधूवचसा युवा
मुदमगादधिकां सुरतादपि ॥१॥

रुद्रटस्य।

शार्दूलविक्रीडित

502 दृष्टिः स्निह्यति निर्भरं प्रियतमे वैदग्ध्यभाजो गिरः
पाणिः कुन्तलमालिकाविरचने त्यक्तान्यकार्यग्रहः।
वक्षः संव्रियते पुनः पुनरिदं भारालस गम्यते
जाता सुभ्रु मनोरमा तव
दशा कस्मादकस्मादियम् ॥२॥

कस्यचित्।

शिखरिणी

503 यथा रोमाञ्चोयं स्तनभुवि लसत्स्वेदकणिको
यथा दृष्टिस्तिर्यक् पतति सहसा संकुचति च।
तथा शङ्केऽमुष्याः प्रणयिनि दराखादितरसं
न मध्यस्थं चेतः प्रगुणरमणीयं न च दृढम् ॥३॥

कस्यचित्।

शिखरिणी

504 न वक्ति प्रेमार्द्रं न खलु परिरम्भं रचयति
स्थितौ तस्यां तस्यां करकमललीलां न सहते।
स्मितज्योत्स्नाकान्तं मुखमभिमुखं नैव कुरुते
तथाप्यन्तः प्रीतिं वपुषि पुलकोस्याः कथयति ॥४॥

कालिदासस्य।

501 (b) Smv., Sp., Spd. इमं for इयम्. Smv., Spd. सखीम् for सखी.
(c) Spd. वचनैः for वचसा.
(d) Spd. अधिकं for अधिकां. Smv., Spd. रुद्रस्य for रुद्रटस्य.
502 Ed., S तस्यैव for कस्यचित्.

505 यदन्योन्यप्रेमप्रवणयुवतीमन्मथकथा-
समारम्भे स्तम्भीभवति पुलकैरञ्चिततनुः ।
तथा मन्ये धन्यं परमसुरतब्रह्मनिरतं
कुरङ्गाक्षी दीक्षागुरुमकृत कंचित्सुकृतिनम् ॥५॥
नरसिंहस्य ।

Srk. 374
शिखरिणी

७ प्रगल्भा ।

506 गण्डे मण्डनमात्मनैव कुरुते वैदग्ध्यगर्वादसौ
मुक्त्वा हेमविभूषणानि तनुते तालीदलेषु ग्रहम् ।
मन्दा कन्दुकखेलनाय भजते शारीषु शिक्षारसं
तन्व्याश्चित्रमकाण्ड एव लडहे भावे निबद्धो भरः ॥१॥
कस्यचित् ।

Smv. 51.12
शार्दूलविक्रीडित

507 दोलायां जघनस्थलेन चलता लोलेक्षणा लज्जते
सज्जं मौग्ध्यविसर्जनाय सुतनोः शृङ्गारमित्रं वपुः ।
स्पर्शैः कण्टककोटिभिः कुटिलया लीलावने नेष्यते
धत्ते दिक्षु निरीक्षणं स्मितमुखी
पारावतानां रुतैः ॥२॥
बिल्हणस्य ।

Spd. 3278
Smv. 51.14
V. C. VIII. 86
शार्दूलविक्रीडित

506 (b) Smv. त्यक्त्वा for मुक्त्वा. Ed. कुरुते for तनुते.
Smv. आग्रहम् for ग्रहम्.
(c) Ed. कुरुते for भजते.
(d) Smv. लटभाभावे for लडहे भावे.

507 (a) Sp. वलता for चलता.
(b) This line, with वयः for वपुः, is the fourth line in Spd., V. C., Smv., Spd. read the second line thus—सशङ्कं तनुकण्ठकल्पतभिया क्रीडावने क्रीडति ।
(c) Ed. लीलावनौ for ॰वने
Spd. om. this line.
(d) As pointed out above, Spd. and Smv. read
(b) here. S पारावतीना for ॰वताना.
(b) & (d) are transposed in Ed.

508 प्रियस्य रूढप्रणयस्य काचित्
किंचित्समुत्सार्य नितम्बविम्बम् ।
उपजाति
भ्रुवल्लिभागेन तरङ्गितेन
सलीलमर्धासनमादिदेश ॥३॥

प्रवरसेनस्य ।

509 मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै-
रलसवलितैरङ्गन्यासैर्महोत्सवबन्धुभिः ।
हरिणी
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥४॥

रुद्रटस्य ।

510 अभ्यस्य स्मरदंशकौशलमुपाध्यायोरुपास्यावयोः
क्रीडाम्नायरहस्यवस्तुनि
मिथोप्यासीज्जिगीषा सखि ।
शार्दूलविक्रीडित
उत्कम्पोत्पुलकाङ्गसंभृतघनस्वेदाविलस्तन्मया
सद्यो निष्प्रतिभः स मन्मथकथावैतण्डिकः
खण्डित ॥५॥

योगोकस्य ।

८ नवोढा ।

511 प्रथयति मयि व्याजेनाङ्गं ह्रिया च निगूहते
क्षिपति विशदस्निग्धं चक्षुः क्षणाच्च नियच्छति ।
हरिणी
मम च सहते दृष्टा दृष्टिं पुनश्च समीहते
वहति हृदये कामं बाला न चोज्झति वामताम् ॥१॥

चन्द्रस्वामिन· ।

509 (b) Sp. रभस for अलस, मदोत्सव for महोत्सव.
510 (d) S, I. O. निष्प्रभितः for निष्प्रतिभः. Ed. कला for कथा.
511 (d) A, I. O. हरति for वहति.

512 पटालग्ने पत्यौ नमयति मुखं जातविनया | As. 38
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् । | Sv. 2056
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना | Spd. 3673
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥२॥ | शिखरिणी

अमरुकस्य ।

513 निर्यन्त्रणं विहर मा चिरय प्रसीद
किं वेपसे पवनवेल्लितवल्लरीव ।
क्षीरोदचञ्चलदृगञ्चलपातमात्रैः | वसन्ततिलक
क्रीते जने क इव संभ्रमसंनिरोधः ॥३॥

गोवर्धनस्य ।

514 अवचनं वचनं प्रियसंनिधा-
वनवलोकनमेव विलोकनम् । | द्रुतविलम्बित
अवयवावरणं च यदञ्चल- | Srk. 502
व्यतिकरेण तदङ्गसमर्पणम् ॥४॥ | Smv. 88.18

कालिदासस्य ।

515 क्षिपति दयिते दृष्टिं वक्रामपाङ्गतरङ्गिणीं
हसितमनभिव्यक्तं मध्ये दधाति कपोलयोः ।
मृदु मदकलं किंचिद्वाक्यं कथंचन मुञ्चती | हरिणी
हरति हृदयं प्रौढेवेयं नवापि नितम्बिनी ॥५॥

उमापतिधरस्य ।

512 (b) A शनकैः for निभृतम्.
Ed. अमरो. for अमरुकस्य.
Exactly the same verse occurs under II. 131 (Verse No. 1128)

513 (c) Ed. मात्र for मात्रैः
(d) Ed., S विभ्रम for संभ्रम.

514 (c) Smv. यदंशुक for यदञ्चल. Sp. यदङ्ग for तदङ्ग.
Smv.—anonymous.

९ विस्रब्धनवोढा ।

शार्दूलविक्रीडित
Nn. III. 4
Sv. 2072
Srk. 469
Spd. 3672
Smv. 77.2

516 दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेद्य सुतरां प्रीत्यै नवोढा प्रिया ॥१॥

श्रीहर्षदेवस्य ।

हरिणी

517 अपि भुजलतोत्क्षेपादस्याः कृतं परिरम्भणं
प्रियसहचरीक्रीडालापे श्रुता अपि सूक्तयः ।
नवपरिणयव्रीडावत्या मुखोन्नतियत्नतो-
प्यलसवलिता तिर्यग्दृष्टिः करोति महोत्सवम् ॥२॥

कालिदासनन्दिनः ।

Sv. 2061
हरिणी

518 हरति रुचिरं गाढाश्लेषे यदङ्गकमङ्गना
स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने ।
यदपि बहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फुटं
रमयतितरां तेनैवासौ मनोभिनवा वधूः ॥३॥

कस्यचित् ।

516 (a) Smv. दधाति for ददाति. (c) Sp राज for वास.
(d) S बालतयैव for वामतयैव. Sv. भोद्य for मेद्य, वधूः for प्रिया. Spd. reads the line thus—बाला वामतया प्रियस्य नितरां प्रीत्यै नवोढाभवत्. Smv. same as Spd. with सुतरां for नितरा and प्रिया for अभवत्.

Smv., Spd., Sp. श्रीहर्षस्य for श्रीहर्षदेवस्य.

This verse, with slight variations, is again quoted in II. 131 (Verse No. 1126).

518 (a) Sv. सुचिरं for रुचिरं. S, Sp. यदङ्गकमाकुला (also Sv.) for यदङ्गकमङ्गना.
(c) Sv. यदति for यदपि, वदति for ब्रवीति. Sv. रुद्रटस्य for कस्यचित्.

519 प्रगल्भस्त्रीशिक्षानियमितभयव्रीडमुदित-
स्मरोत्कम्पस्वेदं वहति घनमालिङ्गति मुहुः।
मुहु· स्वादु स्वैरं वदति निभृतं पश्यति मुहु-
श्चिरादेवं धन्या नचिरपरिणीता रमयति ॥४॥ शिखरिणी

प्रियाकस्य।

520 दन्ताग्रग्रहणं करोति शनकैर्नै वाधरे खण्डनं
कण्ठे श्लिष्यति निर्भरग्रहविधिं कर्तुं पुनः शङ्कते। Sv. 2111
तिष्ठत्येव रतान्तरेष्वभिमुख नैवाभियुङ्क्ते स्वयं
निष्प्रागल्भ्यतयैव वल्लभतरो यूनां नवोढाजनः ॥५॥ शार्दूलविक्रीडित

भ्रमरदेवस्य।

१० गर्भिणी।

521 आविर्भूतविपाण्डुरच्छवि मुख· क्षामा कपोलस्थली
सव्यापारपरिश्लथे च नयनेऽनुत्साहमुग्धं वपुः। शार्दूलविक्रीडित
श्यामीभूतमुख· पयोधरयुगं मध्यः स्वभावोच्छ्रितो
जातान्यैव मनोहराकृतिरहो गर्भोदये सुभ्रुवः ॥१॥

कालिदासनन्दिनः।

522 हारिद्रमम्बरमुपान्तनिबद्धचक्र-
मेकं कुलस्थितिवशाद्दधती प्रियाणौ। वसन्ततिलक
तत्कालमङ्गलसमाचरणप्रयत्न-
व्यासिद्धकेलिरपि मङ्गलमातनोति ॥२॥

तस्यैव।

523 मृदासक्ता हृद्यं स्थगयति मुखं चुम्बति मयि
स्तनौ पाण्डुश्यामौ मम करतलादाक्षिपति च। शिखरिणी

519 (b) S स्मितोत्कम्प for स्मरोत्कम्प.

520 (c) Sv अभिमुखी for ०मुखं

Sv श्रीडामरस्य for भ्रमरदेवस्य

521 (a) S, Sp. विपाण्डर for विपाण्डुर.

523 (b) Sp. न कथया for करतलात्

कृते गर्भालापे विशदहसितं रक्षति रुषा
प्रिया सर्वाकारं विशति हृदयं वल्लभतया ॥३॥

कर्णाटदेवस्य ।

524 अलसमधुरा स्निग्धा दृष्टिर्घनत्वमुपागता
किसलयरुचिर्निस्ताम्बूलस्वभावधरोधरः ।
हरिणी
त्रिवलिवलया लेखोन्नेया घटन्त इवैकतः
प्रकृतिसुभगा गर्भेणासौ किमप्युपपादिता ॥४॥

तस्यैव ।

525 परिणतशरकाण्डा पाण्डुरा गण्डभित्तिः
मालिनी
कुचकलसमुखश्रीः कालिमानं दधाति ।
व्यपनतकृशभावं पीनतामेति मध्यं
वपुरतिशयगौरं गर्भमाविष्करोति ॥५॥

पशुपतिधरस्य ।

११ कुलस्त्री ।

526 कुर्वीथाः श्वशुरस्य भक्तिमधिकां श्वश्र्वाश्च पादानतिं
स्नेहं भृत्यजने प्रतीच्छ रभसाद्द्वारागतान्
शार्दूलविक्रीडित
बान्धवान् ।
भर्तारं सुखदुःखयोरविकृतप्रेमानुबन्धोदया
गेहे वा विपिनेपि वा सहचरी-
वृत्तेन नित्यं भज ॥१॥

कालिदासनन्दिनः ।

527 न नयति बहुमानस्यास्पदं स्निग्धबन्धू-
न्न च गुणिनि समृद्धेप्यादरं याति ताते ।
मालिनी
न भजति धृतिमन्तर्नन्दनेप्यन्तरात्मा
भवति हि पतिनिष्ठं प्रेम साध्वीजनस्य ॥२॥

उमापतिधरस्य ।

525 (a) S, Sp. पाण्डरा for पाण्डुरा.
526 Ed. कालिदासस्य for कालिदासनन्दिन..

528 अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्या स्वयम् । Br. IV. 43
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति शार्दूलविक्रीडित
प्राच्यैः पुत्रि निवेदिताः
कुलवधूसिद्धान्तधर्मा अमी ॥३॥
राजशेखरस्य ।

529 शिरो यदवगुण्ठितं सहजरूढलज्जानतं
गतं च परिमन्थरं चरणकोटिलग्ने दृशौ । पृथ्वी
वचः परिमितं च यन्मधुरमन्दमन्दाक्षरं
निजं तदियमङ्गना वदति नूनमुच्चैः कुलम् ॥४॥
क्षेमीश्वरस्य ।

530 शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने Smv. 118.1
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । Śak. IV. 18
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी शार्दूलविक्रीडित
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥५॥
कालिदासस्य ।

१२ असती ।

531 सिकतिलतलाः सान्द्रच्छायास्तटान्तविलम्बिनः
शिशिरमरुतां लीलावासाः क्वणज्जलरङ्कवः । Srk. 809
अविनयवतीनिर्विच्छेदस्मरव्ययदायिनः हरिणी
कथय मुरले केनामी ते कृता निचुलद्रुमाः ॥१॥
विद्यायाः ।

529 Ed. लक्ष्मीधरस्य for क्षेमीश्वरस्य.

530 (c) Smv., Śak भाग्येषु for भोगेषु.

531 (a) Ed. छायातटान्त for छायास्तटान्त. S तटान्तावलम्बिन. for तटा· ····नः

(b) Ed. नीतावासा· for लीलावासा·.

(d) Sp. सुवले (?) for मुरले.

Srk.—anonymous.

532 पत्युः केलिभिरस्थिपु च्छिदुरता मर्मक्षतिर्नर्मणा
शृङ्गारेण गुरुव्यथा समुदयत्युच्चाटनं चाटुभिः ।
ध्यायन्त्याः सततोत्सुकेन मनसा नीरन्ध्रवानीरिणी-
राकौमारमुपास्यमानमुरलासीमाभुवः सुभ्रु वः ॥२॥

शार्दूलविक्रीडित

उमापतिधरस्य ।

533 यः कौमारहर स एव हि वरस्ताश्चन्द्रगर्भा निशाः
प्रोन्मीलन्नवमालतीसुरभयस्ते ते च विन्ध्यानिलाः ।
सा चैवास्मि तथापि चौर्यसुरतव्यापारलीलाभृतां
रेवारोधसि वेतसीवनभुवां चेतः समुत्कण्ठते ॥३॥

शार्दूलविक्रीडित
Pv. 382
Spd. 3768
Srk. 815
Smv. 87.9

कस्यचित् ।

534 दावालीढकलेवरे विटपिनि प्राप्तोद्गमानङ्कुरा-
नग्रे पल्लवितैर्मनोभिरचिराच्चेतोभुवा नर्तिताः ।
सानन्दाश्रु विलोकयन्ति कलितस्वेदं स्पृशन्त्यादरा-
दुत्कम्पाङ्गुलि दर्शयन्ति मदनक्रीडामहस्सारिणः ॥४॥

शार्दूलविक्रीडित

जलचन्द्रस्य ।

535 तस्याः संप्रति वासरक्रमनमत्तोये तमालातटे
साकूतं निपतन्ति वेतसलताकुञ्जोदरे दृष्टयः ।
सोत्कम्पस्खलितांशुकस्तनतटं सोल्लासकाञ्चीगुण-
ग्रन्थिन्यस्तचलाङ्गुलीकिसलयं
स्वेदार्द्रहस्ताम्बुजम् ॥५॥

शार्दूलविक्रीडित

चण्डालचन्द्रस्य ।

533. (a) Pv., Spd. एव चैतत्क्षपाः for चन्द्रगर्भा निशा .
(b) Pv., Spd. read thus—ते चोन्मीलितमालतीपरिमला .
(c) Pv. तत्र for चौर्य. Pv., Spd., Smv. लीलाविधौ for लीलाभृताम्.
(d) Srk. किं मे for रेवा. Pv., Spd., Smv. तरुतले for वनभुवा.
Smv., Spd. attribute it to शीला- (Smv. शिला-) भट्टारिका.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 527, with variants as in Pv.

534. Ed.—anonymous.

१३ कुलटोपदेशः ।

536 वयं बाल्ये बालांस्तरुणिमनि यूनः परिणता- S K. III. 163
वपीच्छामो वृद्धांस्तदिह कुलरक्षा समुचिता । Spd. 3761
त्वयारब्धं जन्म क्षपयितुमनेनैकपतिना शिखरिणी
न नो गोत्रे पुत्रि क्वचिदपि सतीलाञ्छनमभूत् ॥१॥
विद्यायाः ।

537 उन्मीलद्यौवनासि प्रियसखि
विषमाः श्रेणयो नागराणां
तस्मात्कोपि त्वयाद्य प्रभृति न सहसा
संमुखं वीक्षणीयः । स्रग्धरा
यावच्चन्द्रार्कमेकः पतिरतिशयितश्रद्धया सेवितव्यः
कर्तव्या रूपरक्षा वचसि न हृदयं
देयमस्मद्विधानाम् ॥२॥
शरणस्य ।

538 आराध्यः पतिरेव तस्य च पदद्वन्द्वानुवृत्तिर्व्रतं
केनैताः सखि शिक्षितासि विपथप्रस्थानदुर्वासनाः । शार्दूलविक्रीडित
किं रूपेण न यत्र मज्जति मनो यूनां किमाचार्यकै-
र्गूढानङ्गरहस्ययुक्तिषु फलं येषां न दीर्घं यशः ॥३॥
तस्यैव ।

539 अस्माकं व्रतमेतदेव यदयं कुञ्जोदरे जागरः
शुश्रूषा मदनस्य वक्त्रमधुभिः संतर्पणीयोतिथिः ।
निस्त्रिंशाः शतशः पतन्तु शिरसश्छेदोथवा जायता- शार्दूलविक्रीडित
मात्मीयं कुलवर्त्म पुत्रि न मनागुल्लङ्घनीयं त्वया ॥४॥
वैद्यगदाधरस्य ।

536 (b) S.K. परिणयविधौ न स्थितिरियम् (Spd. परिणयविधिस्तु स्थितिरिति) for तदिह......चिता.

(c) S.K. °मकाण्डेन विधिना for °मनेनैकपतिना.

(d) Spd. मे for नो.

Spd.—anonymous.

शिखरिणी

540 कुलोत्कर्षात्स्नेहात्कमितुरथवा पातकभया-
त्सखि श्रद्धा ते स्याद्यदि विनयमालम्बितुमपि ।
किमेभिर्दातव्यं परिकलय शिप्रातटरुहां
करञ्जानां कुञ्जैरविनयवतीनर्मनिपुणैः ॥५॥

डिम्बोकस्य ।

१४ गुप्तासती ।

Dr. under II. 21 (a).
Spd. 3769
Smv. 877
Srk. 807
शार्दूलविक्रीडित

541 दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः
कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्रन्थयः ॥१॥

विद्यायाः ।

शिखरिणी

542 उपान्तप्रोन्मीलद्विटपिजटिलां कौतुकवती
कदाचिद्गन्तासि प्रियसखि न शिप्रातटभुवम् ।
यदस्यां मुक्तास्रग्विहितसितभोगिभ्रमतया
वयोरूढः केकी लिखति नखरेण स्तनतटम् ॥२॥

मधोः ।

शार्दूलविक्रीडित

543 षष्ठ्यां गन्तुमरण्यमस्मि चकिता
यत्नार्चयन्ती द्रुमान्
दृष्ट्वैवापतिता भुजङ्गमभितो व्यस्तापयान्ती ततः ।
विश्लिष्यद्वसना विकीर्णकबरी जातक्षता कण्टकैः
कास्मीति स्वमहं न वेद सखि
तद्वन्दे व्रतं तादृशम् ॥३॥

गोविन्दस्वामिनः ।

541 (a) Dr. अस्मिन् for असत्.
(b) Srk. प्रायो नैव for प्रायेणास्य, पिताद्य for पिता न.
(c) Dr., Srk. तद्वरमितः (Smv. तद्वनम्) for सत्वर०
(d) Srk. जठर for जरठ.
Smv., Spd. विज्जकाया. for विद्यायाः.

544 अन्यासां न किमस्ति वेश्मनि
वधूः कैवं निशि प्रावृषि
प्रैति प्रान्ततडागमम्ब गृहिणि स्वस्थासि मैवस्थया ।
भग्नोऽयं वलयो घटो विघटितः क्षुण्णा तनुः कण्टकै- शार्दूलविक्रीडित
राक्रान्तः स तथा भुजङ्गहतक
कष्टं न यद्दष्टवान् ॥४॥
पातुकस्य ।

545 अम्ब श्वश्रु यदि त्वया हतशुकः संवर्धनीयस्तदा
लौहं पञ्जरमस्य दुर्णयवतो गाढान्तरं कारय । Srk. 818
अद्यैनं वदरीनिकुञ्जकुहरे संलीनमन्विष्यती शार्दूलविक्रीडित
दष्टा यन्न भुजङ्गमेन तदतिश्रेयः किमेभिः क्षतैः ॥५॥
कस्यचित् ।

१५ विदग्धासती ।

546 ग्रामान्ते वसतिर्ममातिविजने दूरप्रवासी पति-
र्गेहे देहवती जरेव जरती श्वश्रूर्द्वितीया परम् ।
एतत्पान्थ वृथा विडम्बयति शार्दूलविक्रीडित
मां बाल्यातिरिक्तं वयः
सूक्ष्मं वीक्षितुमक्षमेह जनता
वासोऽन्यतश्चिन्त्यताम् ॥१॥
बलभद्रस्य ।

544 (a) Sp. सैवं for कैवम्
Ed पादूकस्य (Sp पादुकस्य) for पातुकस्य ।

545 (a) Srk मातर्गेहिनि यद्यय for अम्ब··· त्वया, मया for तदा
(b) Srk गाढं तदा for गाढान्तरं
(c) Srk लीन प्रचण्डोरगे for स · ती
(d) Srk. reads—कर्षन्त्या मम तावदङ्गलिखनैरेवापदेषा गता
The verse has been quoted by Aufrecth in ZDMG, 36, p. 549

547 एकाकिनी परवशा तरुणी तथाह-
मस्मिन् गृहे गृहपतिश्च गतो विदूरम्।
वसन्ततिलक किं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढपान्थ ॥२॥

रुद्रटस्य ।

Srk. 812
Smv. 87.12
Srk. 812
स्रग्धरा

548 अम्बा शेतेऽत्र वृद्धा परिणतवयसामग्रणीरत्र तातो
निःशेषागारकर्मश्रमशिथिलतनुर्गर्भदासी तथात्र ।
अस्मिन् पापाहमेका कतिपयदिवसप्रोषितप्राणनाथा
पान्थायेत्थं युवत्या कथितमभिमतं
व्याहृतिव्याजपूर्वम् ॥३॥

भट्टस्य ।

549 पुरः पल्ली शून्या तदनु च विदूरेऽस्ति नगरं
परं पारेगङ्गं चरमगिरिगामी च मिहिरः ।
शिखरिणी इतो यान्तं प्रान्ते मम रमणमालोकयसि चे-
त्ततस्ते कल्याणं पथिक स हि तत्र प्रहरिकः ॥४॥

नीलोकस्य ।

Srk. 810
शार्दूलविक्रीडित

550 पान्थ स्वैरगतिं विहाय झटिति प्रस्थानमारभ्यता-
मत्यन्तं करिशूकराहिगवयैर्भीमं पुरः काननम् ।
चण्डांशोरपि रश्मयः प्रतिदिशं म्लानास्त्वमेको युवा
स्थानं नास्ति गृहे ममापि भवतो
बालाहमेकाकिनी ॥५॥

कस्यचित् ।

548 (b) Srk. Smv., Srk. कुम्भ for गर्भ, इह for अत्र.
(d) Smv. तरुण्या for युवत्या, कथितमवसर for कथि . . . मतं.
Smv. रुद्रस्य for भट्टस्य. Srk.—anonymous.
This verse has been quoted by Aufrecht in ZDMG, 36, p. 539, with व्याकृति for व्याहृति (d)

549 (b) S जघन for चरम.

१६ लक्षितासती ।

551 दशनपदमतिस्फुटं विभाति
स्फुरति तनुः श्रमवारिसिक्तमास्यम् ।
अवितथमभिधत्स्व कामिनि त्वां
कुटिलगतिर्न न दष्टवान् भुजङ्गः ॥१॥ पुष्पिताग्रा

कस्यचित् ।

552 न्यस्तं न स्तनमण्डले नखपदं कण्ठान्न विश्लेषिता
मुक्ता हारलता कपोलफलके लुप्ता न पत्रावली ।
मुग्धे यद्यपि तेन ते न दशनैर्भिन्नोष्ठ बिम्बाधर-
स्तद्वैलक्ष्यविजृम्भितैरिह तथाप्युन्नीयते दुर्णयः ॥२॥ शार्दूलविक्रीडित

श्रीमल्लक्ष्मणसेनस्य ।

553 निर्धौताञ्जनलक्ष्मनेत्रमरुणोच्छूना कपोलस्थली
क्लान्तेवाधरपालिरस्फुटमिलल्लेखा तटी पार्श्वयोः ।
निद्राघूर्णितनिष्प्रयत्नशिथिलान्यङ्गानि ते तद्वयं
नो विद्मः सखि संमुखः स भगवान्
कस्याद्य पुष्पायुधः ॥३॥ शार्दूलविक्रीडित

उमापतिधरस्य ।

554 मीलच्चक्षुरनुक्षणं पुलकिनी धत्से यदन्तर्मुदं
सावज्ञं यदुपान्तसंकुचितया दृष्ट्या पतिं पश्यसि ।
यद्वक्रास्वपि वेषभाषितकलास्वभ्यासमालम्बसे
तन्मन्ये सखि नागरस्य विषयं
कस्यापि यातासि किम् ॥४॥ शार्दूलविक्रीडित

तस्यैव ।

555 परिणतसखीवाङ्निर्वेदान्निवृत्तगृहग्रहे
सुदति मदनाद्वैताभ्यासान्निकुञ्जनिवासिनि । हरिणी

552 (b) Sp. सुप्ता for लुप्ता.
553 (b) S क्लान्ते for कान्ते.

कनखलशिलोत्खेलद्गङ्गास्खलद्रुरुकीकसः
कथय कतमो वानप्रस्थाश्रमेद्य तवातिथिः ॥५॥

पादूकस्य ।

१७ वेश्या ।

556 ईर्ष्या कुलस्त्रीषु न नायकस्य
इन्द्रवज्रा निःशङ्ककेलिर्न पराङ्गनासु ।
वेश्यासु चैतद्द्वितयं विरूढं
सर्वस्वमेतास्तदहो स्मरस्य ॥१॥

रुद्रटस्य ।

557 कुप्यत्पिनाकिनेत्राग्निज्वालाभस्मीकृतः पुरा ।
अनुष्टुप् उज्जीवति पुनः कामो मन्ये वेश्यावलोकितैः ॥२॥

तस्यैव ।

558 सश्रीकोलकपल्लवेन तिमिरस्ताम्बूलरागच्छविः
स्वच्छायादशनव्रणैर्नखपदैश्चित्रा च पत्रावली ।
शार्दूलविक्रीडित लोलापाङ्गविलोकितस्तवकिता कर्णोत्पलश्रीरिति
व्यक्तोद्दीपितभूषणः स्मरमपि क्षुभ्नन्ति वारस्त्रियः ॥३॥

जलचन्द्रस्य ।

559 श्रोणीभारभरालसा दरगलन्माल्योपवृत्तिच्छला-
Pc. II. 34 ल्लोलोत्क्षिप्तभुजोपदर्शितकुचोन्मीलन्नखाङ्कावलिः ।
शार्दूलविक्रीडित लोलेन्दीवरदामदीर्घतरया दृष्ट्या धयन्ती मनो
दोरान्दोलनलोलकङ्कणझणत्कारोत्तरं सर्पति ॥४॥

कृष्णमिश्रस्य ।

Mk. iv. 15 560 समुद्रवीचीव चलस्वभावा
उपजाति सन्ध्याभ्रलेखेव मुहूर्तरागा ।

555 S पातुकस्य (Sp. पादुकस्य) for पादूकस्य.

557 (a) Ed. क्रथत् for कुप्यत्. ज्वाल for ज्वाला.

559 (c) Pc. नीलेन्दीवर for लोलेन्दीवर. (d) Pc. दोषान्दोलन for दोरान्दोलन, रणत् for झणत्.

वेश्या कृतार्था पुरुष इतस्त्वं
निष्पीडितालक्तकवद् जहाति ॥५॥

शूद्रकस्य ।

१८ दाक्षिणात्यस्त्री ।

561 आमूलतो वलितकुन्तलचारुचूड-
चूर्णालकप्रकरलाञ्छितभालभागः । वसन्ततिलक
कक्षानिवेशनिविडीकृतनीविरेष
वेषश्चिरं जयति कुन्तलकामिनीनाम् ॥१॥

राजशेखरस्य ।

562 नेत्रयात्राशरक्षेपैस्त्र्यम्बकस्यापि ताडनी । Br x 68
भ्रूलता द्राविडस्त्रीणां द्वितीयं कामकार्मुकम् ॥२॥ अनुष्टुप्

तस्यैव ।

563 मुखानि चारूणि घनाः पयोधरा
नितम्बपृष्ठ्यो जघनोत्तमश्रियः ।
तनूनि मध्यानि च यस्य सोऽभ्यगात्
कथं नृपाणां द्रविडीजनो हृदः ॥३॥ वंशस्थविल

पाणिनेः ।

564 वाचो माधुर्यवर्षिण्यो नाभयः शिथिलांशुकाः । अनुष्टुप्
दृष्टयश्च चलद्भ्रूका मण्डनान्यन्ध्रयोषिताम् ॥४॥

भर्तृमेण्ठस्य ।

565 द्रविडीनां ध्रुवं लीलारेचितभ्रूलते मुखे । S. k. ii. 200
आसज्य राज्यभावं स्वं सुखं स्वपिति मन्मथः ॥५॥

कस्यचित् । अनुष्टुप्

560 Ed. reads वेश्या in the plural number and the adjectivse also are in the plural number. Ed. त्यजन्ति for जहाति (d). I. O. शुभ्रकस्य for शूद्रकस्य

563 Quoted by Aufrecht in ZDMG, 36, p. 368.

564 Quoted by Aufrecht in ZDMG, 36, p. 369

564 Sp. भर्तृमेढ्रस्य for भर्तृमेण्ठस्य.

565 (a) S.k. द्राविडीना for द्राविडीनाम्. Sp. रोचित for रेचित.
(b) S. k. भार for भावम् I. O. स्वपितु for स्वपिति.

१९ पाश्चात्यस्त्री ।

Br. X. 87
पथ्यावक्त्र्

566 प्रपञ्चितकलातन्त्रे पञ्चालीकेलिकर्मणि ।
सर्वास्त्रमोक्षं लभते समं कुसुमकार्मुकः ॥१॥

राजशेखरस्य ।

Smv. 107. 25
Br. X. 81
शार्दूलविक्रीडित

567 खेलं संचरितुं तरङ्गतरलभ्रूलेखमालोकितुं
रम्यं स्थातुमनादरार्पितमनोमुद्रं च संभाषितुम् ।
संत्यज्योज्ज्ञयिनीजनीर्विवदितुं हृद्यं च लङ्कापते
प्रत्यङ्गार्पणसुन्दरं च न जनो जानाति रन्तुं पुरः ॥२॥

Br. X. 82
Sd. under
X. 68
नविपुला

568 चकोर्य एव चतुराश्चन्द्रिकापानकर्मणि ।
आवन्त्य एव निपुणाः स्त्रियः सुरतकर्मणि ॥३॥

तस्यैव ।

वसन्ततिलक

569 ताडङ्कवल्गनतरङ्गितगण्डलेख-
मानाभिलम्बिदरदोलिततारहारम् ।
आश्रोणि गुल्फपरिमण्डलितोत्तरीयं
वेशं नमस्यत महोदयसुन्दरीणाम् ॥४॥

कस्यचित् ।

मन्दाक्रान्ता

570 बाहुद्वन्द्वे वलयरचना रक्तकौशेयसूत्रैः
सिन्दूरान्तस्तवकशवला सामि सीमन्तलक्ष्मीः ।

566 (a) Ed. नर्मणि for कर्मणि.
(b) Ed. कुरुते for लभते, स्वयं (Br. युगपत्) for समम्. Br. कुसुमायुध for कुसुमकार्मुकः

567 (a) S, A, I.O. संचरितं for संचरितुं
(b) Br. मुग्धं for मुद्रं Smv. सभावितुं... ..for संभाषितुं.
(c) Smv. reads—संत्यज्योज्जयिनीं जनैर्विवदितुं हृद्यं च हे मानवा ।
A, Smv —anonymous

568 (a) Br. चन्द्रिकाचाम for चन्द्रिकापान
(b) Br. सुदृशो रत for स्त्रियः सुरत. Ed. नर्मणि for कर्मणि
Sd. reads विनावन्तीर्न निपुणा· सुदृशो रतनर्मणि.

दूर्वाश्यामं तिलकमलिके ग्रन्थिलः केशपाशः
प्रीतिं काशीनगरसुदृशामेष वेषस्तनोति ॥५॥
कस्यचित् ।

२० उदीच्यप्राच्ये ।

571 कान्तिं कुङ्कुमकेशरान्मधुरतां द्राक्षारसस्यासवा-
द्वैदर्भीपरिपाकपूतवचसः काव्यात्कवेर्मार्दवम् । शार्दूलविक्रीडित
पार्श्वादेव जरातुरेण विधिना तं तं गृहीत्वा गुणं
सृष्टा हन्त हरन्ति कस्य न
मनः कश्मीरवामभ्रुवः ॥१॥
उमापतिधरस्य ।

572 भ्रूणीनां हरिणाङ्कपाण्डुमधुरश्रीभाजि गण्डस्थले
शोभां कामपि बिभ्रति प्रणिहिताः
कश्मीरविच्छित्तयः । शार्दूलविक्रीडित
अप्यासां स्तनमण्डले परिणमन्मालूरगौरे श्रियं
संधत्ते नवसान्ध्यरश्मिरुचिरं माञ्जिष्ठपट्टांशुकम् ॥२॥
तस्यैव ।

573 उत्तरापथकान्तानां किं ब्रूमो रामणीयकम् । पथ्यावक्त्र
यासां तुषारसंभेदे न म्लायति मुखाम्बुजम् ॥३॥
अमृतदत्तस्य ।

574 अत्रार्द्रचन्दनकुचार्पितसूत्रहार-
सीमन्तचुम्बिसिचयस्फुटबाहुमूलः । वसन्ततिलक
दूर्वाप्रकाण्डरुचिरासु गुरूपभोगो
गौडाङ्गनासु चिरमेष चकास्ति वेषः ॥४॥
राजशेखरस्य ।

571 (b) Ed. पूर for पूत.
(c) I.O. जवोत्तरेण for जरातुरेण.
(d) Sp , I.O., S कस्य हरन्ति हन्त for हन्त ··कस्य.
572 (a) I O. भ्रूलीला for भ्रूणीनाम्.
573 Quoted by Aufrecht in ZDMG, 36, p. 510
574 (c) Sp. गुरूपभोगात् for ०भोगो.

575 वासः सूक्ष्मं वपुषि भुजयोः काञ्चनी चाङ्गदश्री-
मालागर्भः सुरभिमसृणैर्गन्धतैलैः शिखण्डः ।
मन्दाक्रान्ता
कर्णोत्तंसे नवशशिकला निर्मलं तालपत्रं
वेशः केषां न हरति मनो वङ्गवाराङ्गनानाम् ॥५॥

कस्यचित् ।

७१ ग्राम्या ।

576 तथाप्यकृतकोत्तालहासपल्लविताधरम् ।
अनुष्टुप्
मुखं ग्रामविलासिन्याः सकलं राज्यमर्हति ॥१॥

भर्तृमेण्ठस्य ।

577 भाले कज्जलविन्दुरिन्दुकिरणस्पर्धी मृणालाङ्कुरो
दोर्वल्लीषु शलाटुफेनिलफलोत्तंसश्च कर्णातिथिः ।
शार्दूलविक्रीडित
धम्मिल्लस्तिलपल्लवाभिषवणस्निग्धः स्वभावादयं
पान्थान्मन्थरयत्यनागरवधूवर्गस्य वेशग्रहः ॥२॥

चन्द्रचन्द्रस्य ।

578 न तथा नागरस्त्रीणां विलासा रमयन्ति नः ।
अनुष्टुप्
यथा स्वभावमुग्धानि वृत्तानि ग्राम्ययोषिताम् ॥३॥

कस्यचित् ।

579 मञ्चे रोमाञ्चिताङ्गी रतिमृदिततनोः कर्कटीवाटिकायां
कान्तस्याङ्के प्रमोदादुभयभुजपरिष्वक्तकण्ठे निलीना ।
स्रग्धरा
पादेन प्रेङ्खयन्ती मुखरयति मुहुः पामरी फेरवाणां
रात्रावुत्त्रासहेतोर्वृतिशिखरलताल‍म्बिनीं कम्बु-
मालाम् ॥४॥

विद्यायाः ।

576 Sp. भर्तृमेढ्रस्य for भर्तृमेण्ठस्य
The verse has been quoted by Aufrecht in ZDMG, 36, p. 369.

578 (a) Sp. नगर for नागर
The verse has been quoted by Aufrecht, under Bhartrmentha, in ZDMG, 36, p. 369.

580 श्लक्ष्णतकरस्पर्शलपयेवासितानननम् ।
बिभर्ति सुभगाभोगं ग्राम्यस्त्री स्तनमण्डलम् ।।५।। अनुष्टुप्

आचार्यगोपीकस्य ।

२२ स्त्रीमात्रम् ।

581 यासां सत्यपि सद्गुणानुसरणे दोषानुबन्धः सदा — S D under III. 116
याः प्राणान् वरमर्पयन्ति न पुनः संपूर्णदृष्टिं प्रिये । — Srk. 384
अत्यन्ताभिमतेपि वस्तुनि विधिर्यासां निषेधात्मक- — Spd. 3079
स्तास्त्रैलोक्यविलक्षणप्रकृतयो — शार्दूलविक्रीडित
वामाः प्रसीदन्तु वः ॥१॥

विभोकस्य ।

582 दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः । — Srk. 395, Vsb. I 2.
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ।।२।। — Sv. 1309, Spd. 3078

राजशेखरस्य । — Smv. 37.2, पथ्यावक्त्र

583 सोनङ्गः कुसुमानि पञ्च विशिखाः पुष्पाणि बाणासनं
स्वच्छन्दच्छिदुरा मधुव्रतमयी पंक्तिर्गुणः कार्मुके ।

580 (b) Sp. सुरताभोगं for सुभगाभोगम्.

581 (a) S. D. दोषानुवृत्तिः (Srk. दोषानुराग) परा (Spd. दोषानुरागो भृशं) for दोषा.. .. सदा.

(b) Spd. परं for वरं. A तुष्टि for दृष्टिम्

(d) S. D. ते for व. Spd. reads—स्तत्केलिषु दक्षिणा अपि सदा वामा जयन्त्येव ताः.

Srk. वित्तोकस्य for विभोकस्य.

Spd.—anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 543.

582 Sv. quotes it anonymously. Spd. attributes it to क्षेमेन्द्र.

Srk. 403
शार्दूलविक्रीडित

एतत्साधन उत्सहेत स जगज्जेतुं कथं मन्मथ-
स्तस्यामोघममूर्भवन्ति नहि चेदस्त्रं कुरङ्गीदृशः ॥३॥

अमरसिंहस्य ।

Srk. 435
शार्दूलविक्रीडित

584 यन्नामापि सुखाकरोति कलयत्युर्वीमपि द्यामिव
प्राप्तिर्यस्य यदङ्गसङ्गविधिना किं यन्न निह्नूयते ।
अन्तः किं च सुधासपत्नमनिशं जागर्ति यद्रागिणां
विस्रम्भास्पदमद्भुतं किमपि तत्कान्तेति

तत्त्वान्तरम् ॥४॥

कस्यचित् ।

Srk. 441
बसन्ततिलक

585 व्यर्थं विलोक्य कुसुमेषुमसुव्ययेपि
गौरीपतीक्षणशिखिज्वलितो मनोभूः ।
रोषाद्वशीकरणमस्त्रमुपाददे य-
त्सा सुभ्रुवां विजयते जगति प्रतिष्ठा ॥५॥

मनोविनोदस्य ।

२ खण्डिता ।

मालिनी

586 तव कितव किमाभिर्वाग्भिरभ्यर्णचूत-
क्षितिरुहि कलकण्ठालापमाकर्णयन्ती ।
रजनिमहमलज्जाऽजागरं पांशुलाना-
मुषसि विघस न त्वां पाणिनापि स्पृशामि ॥१॥

धर्मयोगेश्वरस्य ।

583 (c) Srk. एव' साधनम् for एतत्साधन
This verse has been quoted by Aufrecht in ZDMG, 36, p. 363.

584 (d) I. O., S. विश्रान्ता for विस्रम्भा , ०मस्तुतं for ०मद्भुतम्.

585 (c) A, S वशीकरणमन्त्रम् for वशीकरणमस्त्रम्. Srk. या for यत्
Srk. मनोविनोदकृत· for मनोविनोदस्य.

587 सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या । Pv, 218
अस्माकमस्ति न च कश्चिदिहावकाश- Spd. 3563
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥२॥ वसन्ततिलक

कस्यचित् ।

588 पादान्ते पतितः प्रिय· पततु न प्रव्यक्तवाष्पोद्गमः
संजातः स न जायतां त्वमधुना तद्वक्त्रमत्रागता । शार्दूलविक्रीडित
एकाहं तटिनीतटान्तविटपागारे यदा जागरं
नासीत्कापि सखी तदा घनतमः स्तोमावृतायां
निशि ॥३॥

आचार्यगोपीकस्य ।

589 किं ते वाष्पस्तिरयति दृशो किं सकम्पोधरस्ते
गण्डाभोगः कथय किमु ते कोपकेलीकषायः । मन्दाक्रान्ता
निर्मर्यादे मम हि रजनी जागरक्लेशराशे-
रेकः साक्षी स खलु मुरलातीरवानीरकुञ्जः ॥४॥

वासुदेवस्य ।

590 ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा Dr. under
मनस्विन्या रूढप्रणयकलहाविष्टमनसा । IV. 17

587 (c) Pv. हि for च. Sp. न कथञ्चित् for न च कश्चित्
Pv. attributes it to Rudra

588 (b) I. O वक्त्रं for वक्त्रम् Sp. तद्वक्त्रमात्रागता for तद्···ता.
(d) S, I. O., A तदागम for तदाघन.

589 S वामदेवस्य for वासुदेवस्य.

590 (b) Dr. रोषप्रणयरभसाद्गद्गदगिरा (Sv. रूढप्रणयगरिमोद्गद्गदगिरा) for रूढ ···मनसा.
(c) I. O. रुदन्त्या (Sv., Dr. निगद्या) for लपन्त्या.

Sv. 1324 अहो चित्रं चित्रं स्फुटमिति लपन्त्याश्रुकलुषं
शिखरिणी रुषा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः ॥५॥

अमरुकस्य ।

२४ अन्यरतिचिह्नदुःखिता ।

591 हंहो कान्त रहोगतेन भवता यत्पूर्वमावेदितं
निर्भिन्ना तनुरावयोरिति मया तज्ज्ञातमद्य स्फुटम् ।
Srk. 624 कामिन्या स्मरवेदनाकुलहृदा य केलिकाले कृतः
शार्दूलविक्रीडित सोऽत्यर्थं कथमन्यथा तुदति मामेष त्वदोष्ठव्रणः ॥१॥

कस्यचित् ।

592 अयं धूर्तो मायाविनयमधुरादस्य वचसः
Srk. 685 सखि प्रत्येषि त्वं प्रकृतिसरले पश्यसि न किम् ।
शिखरिणी कपोले यल्लाक्षाबहलरसरागप्रणयिनी-
मिमां धत्ते मुद्रामनतिचिरवृत्तान्तपिशुनाम् ॥२॥

सोल्होकस्य ।

593 किमेता स्वच्छन्दं वितथशपथोक्तीर्वितनुषे
भजेथास्तामेव प्रियसहचरीं चित्तमधुराम् ।
शिखरिणी यया याच्ञानम्रे तव शिरसि सौभाग्यगरिम-
प्रशस्तिर्न्यस्तेयं चरणनखलाक्षारसमयी ॥३॥

वामदेवस्य ।

(d) Sv. काम for ब्रह्म

Sv. दुर्वहकस्य for अमरुकस्य

This is a doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 71).

591 (b) Srk. जातम् for ज्ञातम्

(c) I.O., S, Srk. दृशा for हृदा

(d) Srk. दहति for तुदति.

592 (a) Srk चरितात् for वचसः. (b) Srk. प्रत्युषि for प्रत्येषि.

(c) Srk. transposes बहल and रस.

Sp., I O. सोल्लोकस्य (S सोल्लकस्य, Srk. सोन्नोकस्य) for सोल्होकस्य.

594 लाक्षालक्ष्मललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोदयः । As. 53
दृष्ट्वा कोपविधायिमण्डनमिदं प्रातश्चिरं प्रेयसः Pv. 216
क्रीडातामरसोदरेम्बुजदृशः Sv. 2215
Spd. 3740
श्वासाः समाप्तिं गता ॥४॥ Smv. 82.17
अमरोः । शार्दूलविक्रीडित

595 निद्राच्छेदकषायिते तव दृशौ दृष्टिर्ममालोहिनी
वक्षो मुष्टिभिराहतं तव हृदि स्फूर्जन्ति मे वेदनाः ।
आश्चर्यं नवकुन्दकुड्मलशिखा तीक्ष्णैरमीभिर्नखैः शार्दूलविक्रीडित
प्रत्यङ्गं तव जर्जरा तनुरहृ जाता पुनः खण्डिता ॥५॥
उमापतिधरस्य ।

२५ लक्षितविरहिणी ।

596 कुचौ धत्तः कम्पं निपतति कपोलः करतले
निकामं निःश्वासः सकलमलकं ताण्डवयति । Srk. 750
दृशः सामर्थ्यानि स्थगयति मुहुर्बाष्पसलिलं शिखरिणी
प्रपञ्चोयं किंचित् तव सखि हृदिस्थं कथयति ॥१॥
अमरसिंहस्य ।

597 आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा S. K. IV. 73
Pv. 238
नासाग्रे नयनं यदेतदपरं यच्चैकतानं मनः । Sv. 3485

594 (b) Sv., Spd. रागः पर. (Smv., Pv. रागो घन°, As. रागोऽपर°) for रागोदय°
(c) Ed प्रात° for दृष्ट्वा, दृष्ट्वा for प्रात°. Pv. दृष्टा for दृष्ट्वा.
(d) Pv., Sv., Spd., Smv लीला for क्रीडा, मृग for अम्बुज.
Sv. दाक्षिणात्यस्य कस्यापि (Pv. औत्कलस्य) for अमरोः.

596 (b) Ed. सरल for सकल. Srk नरसिंहस्य.
This verse has been quoted by Aufrecht in ZDMG., 36, p. 362.

597 (a) Sv., Spd. समग्र for समस्त.
(b) Sv. नयने for नयनं. S.D. तदेतत् for यदेतत्. Smv., Spd. निष्ठं for तानं.

S.D. under IV. 14
Spd. 3423
Smv. 39.3
Srk. 703
शार्दूलविक्रीडित

मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते
तद्ब्रूयाः सखि योगिनी किमसि भोः किं
वा वियोगिन्यसि ॥२॥

राजशेखरस्य ।

Vsb. II. 14
Smv. 39 2
शार्दूलविक्रीडित

598 यत्तालीदलपाकपाण्डुवदनं यन्नेत्रयोर्दुर्दिनं
गण्डः पाणिनिषेवणाच्च यदयं संक्रान्तपञ्चाङ्गुलिः ।
गौरी क्रुध्यतु वर्तते यदि न ते तत्कोपि चित्ते युवा
धिक्धिक्त्वां सहपांशुखेलनसखीवर्गोपि यन्निह्नवः ॥३॥

तस्यैव ।

शार्दूलविक्रीडित

599 यत्संभाषणलालसेव कुरुषे वक्त्रेन्दुमर्धोन्नतं
धत्से बाहुलतार्गलां कुचतटे निष्क्रान्तिभीत्येव यत् ।
किं वा मन्त्रयते जनोयमिति यत्सर्वत्र शङ्काकुला
तज्जाने हृदि कोपि तिष्ठति युवा प्रौढश्च गूढश्च ते ॥४॥

शिल्हणस्य ।

Srk. 715
मन्दाक्रान्ता

600 यद्दौर्बल्यं वपुषि महती सर्वतश्चास्पृहा य-
न्नासालक्ष्यं यदपि नयनं मौनमेकान्ततो यत् ।
एकाधीनं कथयति मनस्तावदेषा दशा ते
कोसावेकः कथय सुमुखि ब्रह्म वा वल्लभो वा ॥५॥

लक्ष्मीधरस्य ।

(c) S.D अधुना for अखिलम्. Smv. विश्वमाभाषते for विश्वमाभाति ते.
(d) Sv. वा for भोः. Pv., Srk-anonymous.
598 (a) S, I. O. ताडी for ताली. Vsb. transposes नेत्रयोः and दुर्दिनं.
(b) Vsb. reads—यत्प्रेङ्खोलितकेलिपङ्कजदलं श्वासाः प्रसर्पन्ति च ।
(d) Vsb., Smv. लोके for वर्गे.
599 (a) Ed., A तनुषे for कुरुषे ; अर्धानतम् for अर्धोन्नतं.
600 (d) I. O. सुसखि for सुमुखि.

२६ विरहिणी ।

601 श्वासास्ताण्डवितालकाः करतले सुप्ता कपोलस्थली
नेत्रे बाष्पतरङ्गिते परिणतः कण्ठे कलः पञ्चमः । Srk 729
अङ्गेषु प्रथमप्रबुद्धफलिनी लावण्यसंवादिनी शार्दूलविक्रीडित
पाण्डिम्ना विरहोचितेन गमिता कान्तिः
कथाशेषताम् ॥१॥
शघोकस्य ।

602 कस्मान्म्लायसि मालतीव मृदितेत्यालीजने पृच्छति
व्यक्तं नोदितमार्तयापि विरहे शालीनया बालया । Srk. 741
अक्ष्णोर्बाष्पभरं निगृह्य कथमप्यालोकितः केवलं शार्दूलविक्रीडित
किंचित्कुड्मलकोटिभिन्नशिखरश्चूतद्रुम प्राङ्गणे ॥२॥
वाह्नटस्य ।

603 सा चन्द्रादपि मन्मथादपि जलद्रोणीसमीरादपि
त्रस्ता मन्मथमत्तसिन्धुरकरक्रीडाविहारस्थली । शार्दूलविक्रीडित
क्रीडा कल्पितकालकण्ठकपटस्वर्भानुचक्षुःश्रवः-
श्रेणी संभृतदुष्प्रवेशशिविरक्रोडान्न निष्क्रामति ॥३॥
महादेवस्य ।

601 (b) A, S, Srk तरङ्गिणी for तरङ्गिते.
(c) Srk. सपादिनी for सवादिनी, गोचरम् for शेपताम् for अर्धोन्नतं.
Ed.—anonymous.

602 (c) Srk. चयं for भरं.
S वाभटस्य (Srk. वाक्कूटस्य) for वाह्नटस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 538.

603 (a) S समीपादपि for समीरादपि.
(b) S सिन्दूर for सिन्धुर. Ed. वर for कर.
(c) Sp. कालकूट for कालकण्ठ.

604 निःशेषा मणिपञ्जरावलिरसौ दात्यूहशून्या कृता
श्येनाः केलिवनेषु कोकिलकुलोच्छेदाय संचारिताः ।
किं कुर्मः पुनरत्र रात्रिमखिलां कल्यक्वणत्कोकिला-
केलीपञ्चमहुंकृतेः स्वयमियं यन्मृत्युमाकाङ्क्षति ॥४॥

शार्दूलविक्रीडित

शिल्हणस्य ।

605 प्रयातेस्तं भानौ श्रितशकुनिनीडेषु तरुषु
स्फुरत्सन्ध्यारागे शशिनि शनकैरुल्लसति च ।
प्रियप्रत्याख्यानद्विगुणविरहोत्कण्ठितदृशा ।
तदारब्धं तन्व्या मरणमपि यत्नोत्सवपदम् ॥५॥

Sv. 1090
Spd. 3404
शिखरिणी

लड्डूकस्य ।

२७ विरहिणीवचनम् ।

606 जलार्द्रां चार्द्रां वा मलयजरसैर्मा मम कृथा
वृथा सद्यः पद्मच्छदनशयनं मापि च विधाः ।
अतीवार्द्रेणाय प्रियसखी शिखी वाडवनिभः
परीतापं प्रेयश्चिरविरहजन्मा जनयति ॥१॥

शिखरिणी

नरसिंहस्य ।

607 वृथा गाथाश्लोकैरलमलमलीकां मम रुजं
कदाचिद्धूर्तोसौ कविवचनमित्याकलयति ।
इदं पार्श्वे तस्य प्रहिणु सखि लग्नाञ्जनलव-
स्रवद्बाष्पोत्पीडग्रथितलिपि ताडङ्कयुगलम् ॥२॥

Smv. 41.6
शिखरिणी

शिल्हणस्य ।

608 गच्छामि कुत्र विदधामि किमत्र कस्मिं-
स्तिष्ठामि कः खलु ममात्र भवेदुपायः ।

वसन्ततिलक

605 (a) Sv. लीढेषु for नीडेषु.
Sv. लुट्टकस्य (Spd भल्लटस्य) for लड्डूकस्य
606 (a) I. O., Sp स्रर्चां for चार्द्राम्.
607 (b) Smv. अयं for असौ.
Smv. बिल्हणस्य for शिल्हणस्य.

कर्तव्यवस्तुनि न मे सखि निश्चयोस्ति
त्वां चेतसा परमनन्यगतिः स्मरामि ॥३॥

कालिदासनन्दिनः ।

609 सखि मलयजं मुञ्च क्षारं क्षते किमिवार्प्यते
कुसुममशिवं कामस्यैतत्किलायुधमुच्यते । हरिणी
व्यजनपवनो मा भूच्छ्वासान् करोति ममाधिका-
नुपचितवले व्याधावस्मिन् मुधा भवति श्रमः ॥४॥

तस्यैव ।

610 विरमत विरमत सख्यो नलिनीदलतालवृन्तपवनेन । Spd. 3432
हृदयगतोय वह्निर्धगिति कदाचिज्ज्वलत्येव ॥५॥ आर्या

कस्यचित् ।

२८ विरहिणीरुदितम् ।

611 वल्ली पादपमोचितेव सुतनुः प्रम्लायति प्रत्यहं
निःश्वासाकुटिलालकं करतलोत्सङ्गे मुखं सीदति । शार्दूलविक्रीडित
नासाग्रातिथयो मुहूर्तमरुणोच्छूनान्तयोर्नेत्रयो-
र्विश्राम्यन्ति न सिन्दुवारमुकुलस्थूलाः
पयोविन्दवः ॥१॥

वलभद्रस्य ।

612 कोसौ धन्यः कथय सुभगे कस्य गङ्गासरय्वो- Srk 735
स्तोयास्फालव्यतिकरखणत्कारि कङ्कालमास्ते । मन्दाक्रान्ता

608 (d) Sp., I O. तं for त्वाम्.
A कालिदासस्य for कालिदासनन्दिन·

610 (b) Spd. झटिति for धगिति
Quoted by Aufrecht in ZDMG, 36, p. 556, with झटिति for धगिति (b).

611 (b) A निःश्वासाकुलितालक for निःश्वासाकुटिलालकम्
Ed —anonymous.

612 (b) Srk खलत् for खणत्.

३० प्रियसम्बोधनम् ।

S. k. v. 614
Srk. 537
Smv. 44 7
शिखरिणी

621 विलिम्पत्येतस्मिन्मलयजरसार्द्रेण महसा
दिशं चक्रं चन्द्रे सुकृतमय तस्या मृगदृशः ।
दृशोर्बाष्पः पाणौ वदनमसवः कण्ठकुहरे
हृदि त्व ह्रीः पृष्ठे वचसि च गुणा एव भवतः ॥१॥

अचलसिंहस्य ।

शिखरिणी

622 मुखेन्दुः प्रभ्रश्यन्नयनजलबिन्दुः करतले
मृणालीहारोपि ज्वर इव परीतापजनकः ।
प्रियङ्गुश्यामाङ्ग्याः सुकृतमय वक्रे त्वयि मना-
गनाख्येयावस्थो रतिरमणबाणव्यतिकरः ॥२॥

तस्यैव ।

Vsb. II. 20
Srk. 541
Smv. 44 9
शार्दूलविक्रीडित

623 चन्द्रं चन्दनकर्दमेन लिखितं सा मार्ष्टि दष्टाधरा
वन्द्यं निन्दति यच्च मन्मथमसौ भङ्क्त्वाग्रहस्ताङ्गुलीः ।
कामः पुष्पशरः किलेति सुमनोवर्गं लुनीते च य-
त्तत्का सा सुभग त्वया
वरतनुर्वातूलतां लम्भिता ॥३॥

राजशेखरस्य ।

621 (a) Smv. रसद्रोण for रसार्द्रेण.
(b) S. k. वक्रं for चक्रम्, सुकृतमथ for ०मय.
Ed —anonymous.
Smv. राजशेखरस्य for अचलसिंहस्य.

623 (a) Vsb. यत् for सा.
(b-c) Vsb., Smv. transpose these lines.
(d) S, Srk. काम्या (Smv., Vsb. कामं) for का सा ; बाहुलता. for वातूलताम्. Smv. शिक्षिता for लम्भिता.
Smv. नन्दनस्य for राजशेखरस्य

624 उन्मीलन्ति नखैर्लुनीहि वहति क्षौमाञ्चलेनावृणु
क्रीडाकाननमाविशन्ति वलयक्काणैः समुत्त्रासय ।
इत्थं वञ्जुलदक्षिणानिलकुहूकण्ठीषु सांकेतिक-
व्याहाराः सुभग त्वदीयविरहे
तस्याः सखीनां मिथः ॥४॥
अमरोः ।

Pv. 360
Sd. under X. 103
Spd 3489
Smv 44 13
शार्दूलविक्रीडित

625 दरपरिणतदूर्वादुर्बलामङ्गलेखां
ग्लपयति न यदस्याः श्वासजन्मा हुताशः ।
स खलु सुभग मन्ये लोचनद्वन्द्ववारा-
मविरतपटुधारावाहिनीनां प्रभावः ॥५॥
धोयीकस्य ।

मालिनी

३१ परुषाभिधानम् ।*

626 तस्यास्तापमहं नृशंस कथयाम्येणीदृशस्ते कथं
पद्मिन्याः सरसं दलं विनिहितं यस्याः शमायोरसि ।
आदौ पुष्यति संकुचत्यनु ततश्चूर्णत्वमापद्यते
पश्चान्मुर्मुरतां दधाति दहति श्वासावधूतं सखीः ॥१॥
कस्यचित् ।

Srk. 553
Smv. 44 25
शार्दूलविक्रीडित

624 (b) Spd., Smv. आश्रयन्ति for आविशन्ति.
(c) Pv. पल्लव for वञ्जुल. Sd. कण्ठेषु for कण्ठीषु.
(d) Pv. रावा for तस्याः Sd. क्रमात् for मिथः.
Pv. शम्भो॰ (Spd. सत्कविमिश्रस्य) for अमरोः.
Smv.—anonymous.

* S, A पुरुषाभिधानम् for परुषा॰.

626 (a) Srk, तापभुव for तापमहं.
(b) Smv. सतापो for शमायो.
(d) Srk., Smv. दधद्दहति च for दधाति दहति, सखीम् for सखी .
Ed. —उत्पलराजस्य for कस्यचित्.

अनुष्टुप्

627 नीरसं काष्ठमेवेदं सत्य' ते हृदयं यदि ।
तथापि दीयतां तस्यै गता सा दशमीं दशाम् ॥२॥

कुब्जराजस्य ।

Kuval. p. 167,
S. K. I. 97
आर्या

628 कुशलं तस्या जीवति कुशलं पृष्टासि जीवतीत्युक्तम् ।
पुनरपि तदेव कथयसि मृतां नु कथयामि या
श्वसिति ॥३॥

शित्तिपस्य ।

शिखरिणी

629 तनुर्लीना तल्पे प्रियसहचरी हस्तकलना-
न्निजस्थानेङ्गानि श्वसितमपि तस्याः श्रमपदे ।
क्व सा कान्तिर्याता बत न शपथैस्ताःवयमपि
प्रतीमः स्त्रीहत्या तदपि तव चेतो नटयति ॥४॥

युवराजदिवाकरस्य ।

शार्दूलविक्रीडित

630 धिक् चण्डाल किमाल्पामि मधुपीझंकारझन्झामरु-
न्माकन्दांकुरसंनिपातजनितस्तस्याः स कोपि ज्वरः ।
ताः संतापरुजः स चाङ्गजडिमा साहर्निशं जागरो
त्वय्याश्लेषरसेन जीवति पुनस्तत्रकोन्यथा
हस्तकः ॥५॥

कस्यचित् ।

३२ विरहिणीचेष्टा* ।

Srk. 555
Spd. 3487
शार्दूलविक्रीडित

631 त्वां चिन्तापरिकल्पितं सुभग सा संभाव्य
रोमाञ्चिता
शून्यालिङ्गनसंचलद्भुजयुगेनात्मानमालिङ्गति ।

627 Ed. कुञ्जराजस्य (Sp कुब्जराजद्रव्यस्य) for कुब्जराजस्य.
This verse has been quoted by Aufrecht in ZDMG, 36, p. 365.

628 (a) S, Kuval., S. K., Sp. पृच्छामि for पृष्टासि
(b) Sp. कथयति for कथयसि Ed. छित्तपस्य for शित्तिपस्य.

629 (c) Sp. जाता for याता. S शपथैस्ताः वयमपि for शपथै ..पि.

* I. O., S read अथ (om. in S) विरहिणीचेष्टाकथनम् ।

किं चान्यद्विरहव्यथाप्रणयिणीं संप्राप्य मूर्छां चिरा-
त्प्रत्युज्जीवति कर्णमूलपठितैस्त्वन्नाममन्त्राक्षरैः ॥१॥

कस्यचित् ।

632 अच्छिन्नं नयनाम्बु वन्धुषु कृतं चिन्ता गुरुभ्योर्पिता — Dr. under IV. 29
दत्तं दैन्यमशेषतः परिजने तापः सखीष्वाहितः । — Pv. 364
अद्य श्वः परिनिर्वृतिं व्रजति सा श्वासैः परं खिद्यते — Sv. 1407, Spd. 3486
विश्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया ॥२॥ — Smv. 44.29

कस्यचित् । — शार्दूलविक्रीडित

633 पुनरुक्तावधिवासरमेतस्याः कितव पश्य गणयन्त्याः ।
इयमिव करजः क्षीणस्त्वमिव कठोराणि पर्वाणि ॥३॥ — Srk 558, आर्या

धरणीधरस्य ।

634 अत्रैव स्वयमेव चित्रफलके कम्पस्खलल्लेखया
संतापार्तिविनोदनाय कथमप्यालिख्य — Srk 549

सख्या भवान् । — शार्दूलविक्रीडित

631 (c) Spd प्रशमनी० for प्रणयिनी'

632 (a) Smv अश्रु for अम्बु. Sv., Pv., Spd , Smv. तापः सखीष्वाहितः for चिन्ता...अर्पिता.

(b) Smv., Sv., Pv., Spd. न्यस्तं for दत्तं, चिन्ता गुरुभ्योऽर्पिता. for तापः . आहित . Pv., Spd. transpose न्यस्तं (for दत्तं) and दैन्यं.

(c) Pv., Sv , Spd., Smv. किल for परि.

(d) I. O., S विमुक्तं for विभक्तम्. A तथा for तया.
Smv., Spd., Sv. ascribe it to आमरुक and Pv. to रूद्र.
This verse has been quoted by Aufrecht in ZDMG, 36, p. 548.
This is a doubtful verse of Amaru. (See S. K De, *OurHeritage*, II, p 73)

634 (a) Srk. एष for एव.

वाष्पव्याकुलमीक्षितः सपुलकं चूतांकुरैरर्चितो
मूर्ध्ना च प्रणतः सखीषु मदनव्याजेन चापह्नुतः ॥४॥
वाक्कूटस्य ।

635 दूर्वाश्यामरुचोपि चन्दनरसैर्यत्ते लिखत्याकृतिं
शार्दूलविक्रीडित सोढुं तापमनीश्वरा यदपि च ग्रीष्मागमं वाञ्छति ।
यत्पुष्णाति निरस्य विभ्रमशुकान् बाला चकोरीकुलं
मूढस्तत्र सखीजनः स्फुरति किं
सुस्थस्य मे चेतसि ॥५॥

३३ संतापकथनम् ।

636 सा धैर्याम्बुमरुस्थली विस्मरज्वालः स तापानल-
शार्दूलविक्रीडित स्ते मुक्तामणयः कठोरतरुणज्वालामुचः शर्कराः ।
कर्पूरस्य रजांसि वालुकमसावस्यास्तु जीवाध्वगः
क्वापि क्वाप्युपयाति मुह्यति मुहुः क्वापि
क्वचिन्मूर्छति । १॥
महादेवस्य ।

637 मृगशिशुदृशस्तस्यास्तापं कथं कथयामि ते
Dr under II. 29 Srk. 557 हरिणी
दहनपतिता दृष्टा मूर्तिर्मया न हि वैधवी ।
इति तु नियतं नारीरूपः स लोकदृशां प्रिय-
स्तव शठतया शिल्पोत्कर्षो विधेर्विघटिष्यते ॥२॥
वाचस्पतेः ।

634 (c) Srk. सरभस for सपुलकं.

(d) A चापहृत for चापह्नुतः.

Srk. ascribes the verse to डिम्बोक.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 523,

635 The name of the poet is not given.

637 (c) Br. विदितं for नियतं, सुधा for प्रिय.

638 एतस्याः स्मरसंज्वरः करतलस्पर्शैः परीक्ष्योद्य नः | Srk. 711
स्निग्धेनापि जनेन दाहभयतः प्रस्थंपचः पाथसाम्। | Br. V. 11
निर्वीर्यीकृतचन्दनौषधविधौ तस्मिंश्चटत्कारिणो | शार्दूलविक्रीडित
लाजस्फोटममी स्फुटन्ति
मणयो विश्वेपि हारस्रजाम् ॥३॥

राजशेखरस्य।

639 स्नाता निष्पतयालुलोचनपयः पुण्यस्रवन्तीजलै-
रध्यास्ते नवचन्दनार्द्रनलिनीसंवर्तिकावेदिकाम्। | शार्दूलविक्रीडित
प्रत्येकं स्मरजातवेदसि निजान्यङ्गानि हुत्वा क्षणा-
दिन्दोरभ्युदयेन दास्यति पुनः
सा प्राणपूर्णाहुतिम् ॥४॥

धर्मयोगेश्वरस्य।

640 माल्यं मृणालवलयानि जलं जलार्द्रा
कर्पूरहारहरिचन्दनचर्चितानि। | वसन्ततिलक
तस्या नवेन्दुकिरणाश्च न तापशान्त्यै
त्वत्सङ्गसाध्यविरहज्वरजर्जरायाः ॥५॥

पुरुषोत्तमदेवस्य।

३४ तनुताख्यानम्।

641 दोलालोलाः श्वसनमरुतश्चक्षुषी निर्झराभे | Srk. 552
तस्याः शुष्यत्तगरसुमनःपाण्डुरा गण्डभित्तिः। | मन्दाक्रान्ता

638 (a) Srk. विरहज्वर. for स्मरसंज्वरः, न यः (also Br) अद्य न..
(b) Br. म्लोषप्रदः for प्रस्थपच
(c) Srk. नि शङ्की (Ed निर्बीजी) for निर्वीर्यी, औषधिविधावस्मिंश्चमत्का-
रिणो for औषध......कारिणो. Br. तडत् for चटत्.
Ed. and MSS योगेश्वरस्य for राजशेखरस्य.

639 (b) S घन for नव.

तद्गात्राणां किमिव हि बहु ब्रूमहे दुर्बलत्वं
येषामग्रे प्रतिपदुदिता चन्द्रलेखाप्यतन्वी ॥१॥

राजशेखरस्य ।

642 आरब्धा मकरध्वजस्य धनुषैतस्यास्तनुर्वेधसा
शार्दूलविक्रीडित त्वद्विश्लेषविशेषदुर्बलतया जाता न तावद्धनु ।
तत्संप्रत्यपि रे प्रसीद किमपि प्रेमामृतस्यन्दिनीं
दृष्टिं नाथ विधेहि सा
रतिपतेः शिञ्जापि संजायताम् ॥२॥

धीयीकस्य ।

643 तस्यास्त्वदेकमनसः स्मरबाणवर्षैः
वसन्ततिलक कार्श्यं वपुः शठ बिभर्ति यथा यथैव ।
स्तोकायिताश्रयतयेव तथा तथैव
कान्तिर्घनीभवति लोलविलोचनायाः ॥३॥

तस्यैव ।

644 स्पृशन्त्याः क्षामत्वं मदनशरटङ्कव्यतिकरा-
Smv 44 17 त्कुरङ्गाक्ष्यास्तस्याः शृणु सुभग कौतूहलमिदम् ।
शिखरिणी अपूर्वेति त्रस्ता परिहरति तां केलिहरिणी
न विश्वेप्याश्वासं दधति गृहलीलाशकुनयः ॥४॥

कस्यचित् ।

645 अभवदभिनवप्ररोहभाजां
छविपरिपाटिषु यः पुराङ्गकानाम् ।
पुष्पिताग्रा अहह विरहवैकृते स तस्याः
कृशिमनि संप्रति दूर्वया विवादः ॥५॥

तैलपाटीयगाङ्गोकस्य ।

641 (c) Srk. वयं for बहु.
642 (a) I. O. आवद्धा for आरब्धा.
643 (d) Sp. दीर्घ for लोल.
644 (c) Smv. त्रासात् for त्रस्ता.

३५ उद्वेगकथनम् ।

646 सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वारात्त्रस्यति चित्रकेलिसदसो वेशं विषं मन्यते ।
आस्ते केवलमब्जिनीकिसलयप्रस्तारिशय्यातले
संकल्पोपनतत्वदाकृतिरसायत्तेन चित्तेन सा ॥१॥

Br V. 8
S. K. V. 208
Vsb. III. 2
Srk. 745
शार्दूलविक्रीडित

राजशेखरस्य ।

647 सोद्वेगा मृगलाञ्छने मुखमपि स्वं नेक्षते दर्पणे
त्रस्ता कोकिलकूजितादपि गिरं नोन्मुद्रयत्यात्मनः ।
इत्थं दुःसहदाहदायिनि धृतद्वेषापि पुष्पायुधे
मुग्धा सा सुभगे त्वयि प्रतिमुहुः प्रेमाधिकं
पुष्यति । २॥

Srk. 536
शार्दूलविक्रीडित

शृङ्गारस्य ।

648 विषं चन्द्रालोकः कुमुदवन्वातो हुतवहः
क्षतक्षारो हारः स खलु पुटपाको मलयजः ।
अये किंचिद्वक्रे त्वयि सुभग सर्वे कथममी
समं जातास्तस्यामहह विपरीतप्रकृतयः ॥ ॥

शिखरिणी

अचलसिंहस्य ।

649 न क्रीडागिरिकन्दरीषु रमते नोपैति वातायनं
दूराद्द्वेष्टि गुरून्निरस्यति लतागारे विहारस्पृहाम् ।
आस्ते सुन्दर सा सखीप्रियगिरामाश्वासनैः केवलं
प्रत्याशां दधती तया च हृदयं तेनापि
च त्वां पुनः ॥४॥

शार्दूलविक्रीडित

धोयीकस्य ।

646 (b) Vsb. आरात् for द्वारात्.
(c) Br., S. K., Vsb. प्रस्तार for प्रस्तारि.
(d) Vsb. संकल्पोपनमत्तदाकृति for सं. ति.
Ed. वशायत्तेन for रसायत्तेन.
647 (d) Srk. बाला for मुग्धा. S, Srk. सुभग for सुभगे. Srk. पदं for मुहुः.
648 Ed. अचलनृसिंहस्य for अचलसिंहस्य.

650 हारं पाशवदाच्छिनत्ति दहनप्रायां न रत्नावलीं
धत्ते कण्ठकशङ्किनीव कलिकातल्पे न विश्राम्यति ।
शार्दूलविक्रीडित स्वामिन् संप्रति सान्द्रचन्दनरसात्पङ्कादिवोद्वेगिनी
सा बाला बिसवल्लरीवलयतो व्यालादिव त्रस्यति ॥५॥

उमापतिधरस्य ।

३६ निशावस्थाकथनम् ।

651 अस्मिंश्चन्द्रमसि प्रसन्नमहसि व्याकोपकुन्दत्विषि
प्राचीनं खमुपेयुषि त्वयि मनाग्दूरं गते प्रेयसि ।
शार्दूलविक्रीडित श्वासः कैरवकोरकोयति मुखं तस्याः सरोजीयति
क्षीरोदीयति मन्मथो दृगपि च द्राक्
चन्द्रकान्तीयति ॥१॥

कस्यचित् ।

652 अम्भोरुहं वदनमम्बकमिन्दुकान्तः
Srk. 538 पाथोनिधिः कुसुमचापभृतो विकारः ।
वसन्ततिलक प्रादुर्बभूव सुभग त्वयि दूरसंस्थे
चण्डालचन्द्रधवलासु निशासु तस्याः ॥२॥

चण्डालचन्द्रस्य ।

653 तापोम्भः प्रसृतिंपच प्रचयवान् बाष्पः प्रणालोचितः
Vsb II. 21 Srk 540 श्वासानर्तितदीपवर्तिलतिकाः पाण्डिम्नि मग्नं वपुः ।
शार्दूलविक्रीडित किं चान्यत् कथयामि रात्रिमखिलां त्वद्वर्त्मवातायने
हस्तच्छत्त्रनिरुद्धचन्द्रमहसस्तस्या. स्थितिर्वर्तते ॥३॥

राजशेखरस्य ।

654 बाष्पैर्निष्पतयालुभिः कलुषिता गण्डस्थली चिन्तया
शार्दूलविक्रीडित चेत कातरितं तरङ्गितमुरः श्वासोर्मिभिः पीवरैः ।

650 (c) Sp. वशात् for रसात्.

653 (a) Ed. अन्तः for अम्भ .

Sp., Srk. प्रसृतं for प्रसृतिं. Vsb. प्रणालाश्चितः for प्र...त.

(d) Vsb. निवारितेन्दु for निरुद्धचन्द्र.

इत्थं त्वद्विरहे तदीयविपदं देवी त्रियामैव वा
तल्पं वा परितापखिन्नमथवा जानाति

पुष्पायुधः ॥४॥

शरणस्य ।

655 निष्पत्र सरसीरुहां वनमिद निश्चन्दना मेदिनी
निष्पङ्कानि पयांस्यपल्लवपुटा वृक्षाः सखीभिः कृताः । शार्दूलविक्रीडित
नीयन्ते सुभग त्वया रहितया सोत्कण्ठकोकीकुला-
क्रन्दाकर्णनजागरूककुमुदामोदास्तया रात्रय ॥५॥

कस्यचित् ।

३७ वासकसज्जा ।

656 तल्प कल्पितमेव कल्पयति सा भूयस्तनुं मण्डितां
भूयो मण्डयति स्वयं रतिपतेरङ्गीकरोत्यर्चनाम् । शार्दूलविक्रीडित
गच्छन्त्यां निशि मन्यते क्षतिमिव द्वारं चिरं सेवते
लीलावेश्मनि सा करोति

मदनक्रान्ता वराकी न किम् ॥१॥

आचार्यगोपीकस्य ।

657 दृष्ट्वा दर्पणमण्डले निजमुखं भूषां मनोहारिणीं
दीपार्चिःकपिशं च मोहनगृहं त्रस्यत्कुरङ्गीदृशा । शार्दूलविक्रीडित
एवं नौ सुरतं भविष्यति चिरादद्येति सानन्दया
मन्दं कान्तदिदृक्षयातिललितं द्वारे दृगारोपिता ॥२॥

रुद्रटस्य ।

658 अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः As. 4
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः । Sv. 1098

654 (c) S, I. O. यदीय for तदीय
655 (b) Sp. निष्कम्पानि for निष्पङ्कानि
656 (d) S मदनक्रान्तौ for ०क्रान्ता.
657 (c) A, S अन्येति for अद्येति.
658 (a) Srk. निमेषपराङ्मुखै for मुहु..... कृतैः
(b) Srk. अभिमुख for ०मुखै, मुहुर्मुकुलीकृतै for निमेष......मुखैः.

Srk. 508
Spd. 3416
Smv. 39.4
हरिणी

हृदयनिहित भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोयं मुग्धे त्वयाद्य विलोक्यते ॥३॥

अमरोः ।

Gg. vi. 3
शार्दूलविक्रीडित

659 अङ्गेष्वाभरणं तनोति बहुशः पत्रेपि संचारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिर ध्यायति ।
इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा
निशां नेष्यति ॥४॥

जयदेवस्य ।

Pv. 214
Spd. 3427
Srk. 723
पुष्पिताग्रा

660 अरतिरियमुपैति मां न निद्रा
गणयति तस्य गुणान् मनो न दोषान् ।
विरमति रजनी न संगमाशा
व्रजति तनुस्तनुतां न चानुरागः ॥५॥

प्रवरसेनस्य ।

३८ स्वाधीनभर्तृका ।

हरिणी

661 लिखति कुचयोः पत्रं कण्ठे नियोजयति स्रजं
तिलकमलिके कुर्वन्नारादुदस्यति कुन्तलान् ।
इति चटुशतैर्वारं वारं प्रियां परितः स्पृश-
न्विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥१॥

रुद्रटस्य ।

S. D. under
III. 73

662 स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय ।

658 (d) Srk. असौ for अयं.
Sv. कस्यापि (Srk. श्रीहर्षस्य) for अमरोः.

659 (a) Gg. करोति for तनोति.

660 (c) Spd. विगलति for विरमति
Pv. कङ्कस्य (Spd. बिल्हणस्य) for प्रवरसेनस्य.

662 (a) Smv. फालं for भालं

इत्युक्त्वा सुरतावसानसमये व्याघूर्णमानेक्षणा | Smv 80.6
स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम् ।२॥ | शार्दूलविक्रीडित

तस्यैव ।

663 यावकं तरुणपङ्कजप्रभे
योषितश्चरणपङ्कजद्वये । रथोद्धता
तुल्यरागमपि स न्यपातय-
च्चाटुमात्रकरणप्रयोजनः ॥३॥

कस्यचित् ॥

664 एतांस्ते भ्रमरौघनीलकुटिलान्बध्नामि किं कुन्तला- शार्दूलविक्रीडित
न्किं न्यस्यामि मधूकपाण्डुमधुरे गण्डेत्र पत्रावलीम् ।
किं चास्मिन् व्यपनीय बन्धनमिदं पङ्केरुहाणां दल-
त्कोषश्रीमुषि सर्वचित्तहरिणस्यारोपयामि स्तने ॥४॥

सूर्यधरस्य ।

665 अगणितगुरुर्याच्ञालोलः पदान्तसदातिथिः हरिणी
समयमविदन् मुग्धः कालासहो रतिलम्पटः ।
कृतककुपितं हस्ताघातं त्रपारुदितं हठा-
दपरिगणयन्लज्जायां मां निमज्जयति प्रियः ॥५॥

आचार्यगोपीकस्य ।

३९ विप्रलब्धा ।

666 दृष्टोऽयं विषवत्पुरा परिजनो दृष्टायतिर्वारय-
न्पौर्वापर्यविदां त्वया न हि
कृताः कर्णे सखीनां गिरः । शार्दूलविक्रीडित
हस्ते चन्द्रमिवावतार्य सरले धूर्तेन धिग्वञ्चिता
तत्किं रोदिषि किं विषीदसि
किमुन्निद्रासि किं दूयसे ॥१॥

कस्यचित् ।

662 (c) Smv सुखिता for समये. Smv. and S. D संपूर्णचन्द्रानना for व्याघूर्ण.... ना. Smv. रुद्रस्य for रुद्रटस्य.

664 (d) A कोपाभा for कोषश्री, चर्म (also Sp.) for सर्व. S (also Sp.) चित्र for चित्त. A सूर्यकरस्य for सूर्यधरस्य.

Spd. 3616
Smv. 71.14
शार्दूलविक्रीडित

667 ज्ञातं ज्ञातिजनैः प्रघुष्टमयशो दूरं गता धीरता
त्यक्ता ह्रीः प्रतिपादितोप्यविनयः
साध्वीपदं प्रोज्झितम्।
लुप्ता चोभयलोकसाधुपद्वीद्त्तः कलङ्कः कुले
भूयो दूति किमन्यदस्ति
यदसावद्यापि नागच्छति ॥२॥

कस्यचित्।

Dr. under
II. 25
Pv. 213
हरिणी

668 सखि स विजितो लीलाद्यूते कयापि परस्त्रिया
पणितमभवत्ताभ्यां तस्मिन्निशाललितं ध्रुवम्।
कथमितरथा शेफालीषु स्खलत्कुसुमास्वपि
स्थितवति नभोमध्येपीन्दौ प्रियेण विलम्ब्यते ॥३॥

रुद्रटस्य।

शार्दूलविक्रीडित

669 सोत्कण्ठं रुदितं सकम्पमसकृद् ध्यातं सबाष्पं चिरं
चक्षुर्दिक्षु निवेशितं सकरुणं सख्या समं जल्पितम्।
नागच्छत्युपचितेपि वासकविधौ कान्ते समुद्विग्नया
तत्तत्किंचिदनुष्ठितं मृगदृशा
नो यत्र वाचां गतिः ॥४॥

तस्यैव।

शार्दूलविक्रीडित

670 यत्संकेतगृहं प्रियेण गदितं संप्रेष्य दूतीं स्वयं
तच्छून्यं सुचिरं निषेव्य सुदृशा पश्चाच्च भग्नाशया।

667 (a) Smv अधीरता for धीरता
(b) Smv. धी॰ for ह्री. (c) Smv. transposes लोक and साधु.
668 (a) Dr. Pv वीणावाद्यैः for लीलाद्यूते.
I.O. पुरस्त्रिया (Dr. Pv अपरस्त्रिया) for पर॰,
(b) Dr. Pv. तत्र नृपा for तस्मिन्निशा.
(d) Dr. Pv. प्रसरति for स्थितवति
Pv. कस्यचित् for रुद्रटस्य.

स्थानोपासनसूचनाय विगलत्सान्द्राञ्जनैरश्रुभि-
र्भूमावक्षरमालिकेव लिखिता
दीर्घं रुदत्या शनैः ॥५॥
तस्यैव ।

४० कलहान्तरिता ।

671 कर्णे यन्न कृत सखीजनवचो यन्नादृता बन्धुवाक्
यत्पादे निपतन्नपि प्रियतमः कर्णोत्पलेनाहतः । Srk. 702
तेनेन्दुर्दहनायते मलयजालेपः स्फुलिङ्गायते शार्दूलविक्रीडित
रात्रिः कल्पशतायते विसलताहारोपि भारायते ॥१॥
अमरो ।

672 मया तावद्गोत्रस्खलितहतकोपान्तरितया
न रुद्धो निर्गच्छन्नयमिति विलक्षः प्रियतमः । Smv 844
अयं त्वाकृतज्ञः परिणतिपरामर्शकुशलः Srk 656
सखी लोकोप्यासील्लिखित शिखरिणी
इव चित्रेण किमिदम् ॥२॥
विम्बोकस्य ।

673 पदोपान्ते कान्ते लुठति तमनादृत्य भवनाद्
द्रुतं निष्क्रामन्त्या किमपि न मयालोचितमभूत् । शिखरिणी
अये श्रोणीभार स्तनभर युवां निर्भरगुरू
भवद्भ्यामन्यत्र विलम्बो न विहितः ॥३॥
गङ्गाधरस्य ।

670 A om. तस्यैव

671 (a) A वाग् for वच॰. Ed. बान्धवा for बन्धुवाक्
Srk—anonymous.

672 Smv.—anonymous. Srk हिम्बोकस्य.

673 Quoted by Aufrecht in ZDMG, 36, p. 511

674 यत्पादप्रणतः प्रियः परुषया वाचा स निर्वारितो
Smv 56 I
शार्दूलविक्रीडित
यत्सख्या न कृतं वचो जडतया यन्मन्युरेको धृतः।
पापस्यास्य फलं तदेतदधुना यच्चन्दनेन्दुद्युति-
प्रालेयाम्बुसमीरपङ्कजविसैर्गात्रं मुहुर्दह्यते ॥४॥

रुद्रटस्य ।

675 दहति विरहेष्वङ्गानीर्ष्यां करोति समागमे
Srk. 734
हरिणी
हरति हृदयं दृष्टः स्पृष्टः करोत्यवशां तनुम्।
क्षणमपि सुखं यस्मिन् प्राप्ते गते च न लभ्यते
किमपरमतश्चित्रं यन्मे तथापि स वल्लभः ॥५॥

अमरुकस्य ।

४१ कलहान्तरितावाक्यम् ।

676 सखि स सुभगो मन्दस्नेहो मयीति न मे व्यथा
Sv. 1118
Srk 694
हरिणी
विधिविरचितं यस्मात्सर्वो जनः सुखमश्नुते।
मम तु मनसः संतापोयं जने विमुखेपि य-
त्कथमपि हतव्रीडं चेतो न याति विरागिताम् ॥१॥

अमरोः ।

677 निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मूल्यते
Dr under II. 26a.
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुद्यते ।

674 (a) Smv. पादं for पाद. A निर्वापितो (Ed निर्वाहितो, I. O. निर्धारितो, Smv. निर्म्मोटितो) for निर्वारितो.

Smv. रुद्रस्य for रुद्रटस्य

675 Srk—anonymous.

676 (a) Sv. ममेति for मयीति. (b) Srk. परिणतं for विरचितं

(c) Sv. सततं (Srk. हृदये) for मनस°. Srk. प्रिये for जने.

(d) Sv. विरागता for विरागिता.

Srk., Sv. —anonymous.

677 (a) Dr., Pv. उन्मथ्यते for उन्मूल्यते.

(b) Pv. रात्रि for नक्तं.

अङ्गं शोषमुपैति पादपतितः प्रेयान्न संभाव्यते
सख्य. कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥२॥ Pv. 237 Spd. 3543 शार्दूलविक्रीडित

कस्यचित् ।

678 ज्योतिर्भ्यस्तदिदं तमः समुदितं जातोयमङ्गरः शिखी
पीयूषादिदमुत्थितं विषमयं छायातजन्मातपः ।
को नामास्य विधिः प्रशान्तिषु भवेद्गाढ द्रढीयानयं
ग्रन्थिर्यत्प्रियतोपि विप्रियमिदं सख्यः कृतं
सान्त्वनैः ॥३॥ S. K. II. 63 शार्दूलविक्रीडित

कस्यचित् ।

679 तल्लाक्षालिपिलाञ्छितादपि मुखादिन्दुः स किं
दुःसह·
संतापाय पिकध्वनिः किमु मृषा वार्ता प्रप्रश्चादपि
किं तस्य प्रणयावधीरणपराधीनादपि प्रेक्षणा-
दुन्मीलन्ति सखि प्रसूनधनुषो मर्मच्छिदः
सायकाः ॥४॥ शार्दूलविक्रीडित

जलचन्द्रस्य ।

680 कथाभिर्देशानां कथमपि च कालेन बहुना
समायाते कान्ते सखि रजनिरर्धं गतवती ।
ततो यावल्लीलाकलहकुपितास्मि प्रियतमे
सपत्नीव प्राची दिगियमभवत्तावदरुणा ॥५॥ Srk. 1642 शिखरिणी

कस्यचित् ।

677 (c) Pv, Dt. तथोपेक्षित (Spd तदोपेक्षित·) for न संभाव्यते.
A, S संभाष्यते for संभाव्यते.
(d) S, Sp किं for कम्.
Pv अमरो. for कस्यचित्.

678 (b) S K उच्छ्रितं for उत्थितम्.
(c) Sp. प्रशस्तिषु for प्रशान्तिषु

679 (a) I. O. तल्लक्ष्य for तल्लाक्षा.
(c) Srk प्रणय for कलह, प्रकुपिता for प्रियतमे.

४२ कलहान्तरितासखीवचनम् ।

As 66
Pv. 229
Sik. 659
Sv. 1170
शिखरिणी

681 अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वयाकाण्डे मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा ह्येते विरहदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥१॥

अमरो ।

शिखरिणी

682 मया प्रागेवोक्तं कलहवति मा त्याजय गुण
भयेरतु प्रेयांस्ते स्वकरवशगं मुञ्चसि मुधा ।
अवाप्तो वैलक्ष्य शर इव पुनर्नेति तदयं
स्वयं गत्वानेयः प्रियसखि कराकर्षविधिना ॥२॥

आचार्यगोपीकस्य ।

Srk. 687
हरिणी

683 श्रवसि न कृतास्ते तावन्तः सखीवचनक्रमा-
श्चरणपतितोऽङ्गुष्ठाग्रेणाप्ययं न हतो जन ।
कठिनहृदये मिथ्यामौनव्रतव्यसनादयं
परिजनपरित्यागोपायो न मानपरिग्रहः ॥३॥

कस्यचित् ।

Sv. 1168
द्रुतविलम्बित

684 जघनमुन्नतमाकुलमेखलं
मुखमपाङ्गविसर्पिततारकम् ।

681 (b) Ed. कान्ते for काण्डे Sv संप्रति (also As.) कृत. for प्रेयसि कृतः.
(c) Ed दहनोद्दामर for दहनोद्भासुर
(d) Sv. अधुना तस्य for अधुनारण्य.
Srk. ascribes the verse to विकटनितम्बा.
S, Sp. राजशेखरस्य. Sv —anonymous
Ed. No name of poet.

682 (d) Sp. प्रियाकर्ष for कराकर्ष.

683 (c) I. O मिथ्यासौन for मिथ्यामौन.

684 (b) विसारित for विसर्पित.

इदमपास्य गतो यदि निर्घृणो
ननु वरोरु स एव हि वञ्चितः ॥४॥

कस्यचित् ।

685 सखि न गणिता मानोन्मेषात्प्रियप्रणयक्षतिः
परमिह सखीवर्गस्येदं वचो न पुरस्कृतम् । हरिणी
उदयशिखरारूढे नायं कलानिधिना बलात्
किमिति शिथिलो मानग्रन्थिः करैर्न करिष्यते ॥५॥

जलचन्द्रस्य ।

४३ गोत्रस्खलितम् ।

686 पुरस्तस्या गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः । शिखरिणी
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥१॥

अमरोः ।

687 कृथा मैव चेतः कथमपि मनागस्खलदितः
प्रमादाद्वाणीयं किमिह करवाणि प्रणयिनि । शिखरिणी
वृथैवायं ग्रन्थिर्झणझणितमञ्जीररणितं
ततस्त्वत्पादाब्जं यदिदमवतंसो भवतु मे ॥२॥

नरसिंहस्य ।

684 (c) Sv. अपोह्य for अपास्य.
685 (d) Sp करिष्यति for ०ष्यते
Ed कस्यचित् for जलचन्द्रस्य
686 (a) S, I O, Dr. पुरस्तन्व्या for पुरस्तस्या.
(b) A किमिति for किमपि
(d) S, I O सैक for सैव
This is a doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 70).

688 अर्धोक्ते भयमागतोसि किमिदं कण्ठश्च किं गद्गद-
Smv. 57.26 श्चाटोरस्य न च श्रणोयमनुपक्षिप्तेयमास्तां कथा।
शार्दूलविक्रीडित ब्रूहि प्रस्तुतमस्तु संप्रति महत्कर्णे सखीनां सुखं
तृप्तिर्निर्भरमेभिरक्षरपदैः प्रागेव मे संभृता ॥३॥

अभिनन्दस्य।

689 कथमपि कृतप्रत्यासत्तौ प्रिये स्खलितोत्तरे
As 63 विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम्।
हरिणी असहनसखी श्रोत्रप्राप्तिप्रमादससंभ्रमे
विचलितदृशा शून्ये गेहे समुच्छ्वसितं ततः ॥४॥

कस्यचित्।

690 दूरादेत्य दृशा निवार्य च सखीरुत्क्षिप्तदोःकङ्कण-
श्रेणिः सप्रणया पिधाय नयनद्वन्द्वं तवावस्थिता।
शार्दूलविक्रीडित ज्ञातासीति विपक्षनाम गदता संभाविता सा त्वया
जीवत्येव यदि त्वरां त्यज ननु त्वामेव याचिष्यते ॥५॥

आचार्यगोपीकस्य।

४४ मानिनी।

As 51, S K. I 158, II. 347
691 बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोस्मासु न मेपराध्यति भवान् सर्वेपराधा मयि।

688 (a) I. O भयमागतोपि for ०सि
(c) Ed., I O. प्रस्तुतवस्तु for प्रस्तुतमस्तु

Smv. -anonymous.

689 (a) As प्रत्यावृत्तौ for प्रत्यासत्तौ
(c) As ससंभ्रमं for ससंभ्रमे
(d) As विवलित for विचलित, पुन for तत..

690 (c) I O., A गदिता for गदता.

ननु किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते — Dr. under II. 17
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो — Sv 1614
रुद्यते ॥१॥ — Spd. 3554, Smv. 57. 1
अमरोः । — Sik. 653
शार्दूलविक्रीडित

692 एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत- — As. 17
स्ताम्बूलानयनच्छलेन रभसाश्लेषोपि संविघ्नितः । — Dr under II 19
आलापोपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके — Sv. 1583
कान्तं प्रत्युपचारतश्चतुरया कोप कृतार्थीकृतः ॥२॥ — Spd 3534, Smv 55.6
तस्यैव । — Sik. 639
शार्दूलविक्रीडित

693 आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादराद्
व्याजेनागतमावृणोति हसितं स्पष्टं समुद्वीक्षते । — As. 43
मय्यालापवति प्रकोपपिशुनं सख्या सहाभाषते — Sv. 1590, Spd. 3537
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोपि रम्योदयः ॥३॥ — Smv. 55 11
तस्यैव । — शार्दूलविक्रीडित

691 (d) S मन्ये तन्मम (Sp. नन्वेव मम) for नन्वेतन्मम S, Sp. कातरास्मि for का तवास्मि
Sv भट्टकुमारस्य (Spd., Smv , Sik. कुमारदासस्य) for अमरो.

692 (a) Smv. संगति for संस्थिति
(b) Dr., Spd. आहरण for आनयन Sik. श्लेषक्रम for श्लेषोपि, om सं in संविघ्नित .
(c) Srk. सलापो for आलापो. Sp. विश्रुत॰ for मिश्रित॰
Ed. व्यापारयन्त्या तया for व्यापारयन्त्यान्तिके.
(d) Srk भर्तु for कान्तं
Sv. पुलिनस्य Smv. अमरानन्दस्य. Srk. श्रीहर्षस्य
Spd.—anonymous.

693 (b) Sv., Smv. न स्पष्टम् (Spd. चास्पष्टम्) for स्पष्टं सम्
(c) Sv. सख्यालापवती for मय्यालापवति. Smv. प्रतीपवचना (Spd,. As प्रतीपवचनं) for प्रकोपपिशुनं, समं भाषते for सहाभाषते.
Smv., Sv. भीमस्य.

694 धूमायते मनसि मूर्छति चेष्टितेषु
सन्दीप्यते वपुषि चेतसि जाज्वलीति ।
वसन्ततिलक वक्त्रे परिस्फुरति वाचि विजृम्भतेस्याः
कान्तावमानजनितो बहुमानवह्निः ॥४॥

कस्यचित् ।

695 वाष्पासारं कथयति भृशं गण्डयोः पाण्डिमानं
मन्दाक्रान्ता श्वासो भूम्ना स्तनकलसयोः पीनतामातनोति ।
चित्तौत्सुक्यं किमपि कुरुते क्षाममङ्गं तदस्या-
स्तारुण्यस्य प्रसरमधिकं मन्युराविष्करोति ॥५॥

कस्यचित् ।

४५ उदात्तमानिनी ।

696 न मन्दो वक्त्रेन्दुः श्रयति न ललाटं कुटिलतां
Srk 688 न नेत्राब्जं रज्यत्यनुपजति न भ्रूरपि भिदाम् ।
इदं तु प्रेयस्याः प्रथयति रुषोऽन्तर्विलसितं
शिखरिणी शतेऽपि प्रश्नानां यदभिदुरमुद्रोधरपुटः ॥१॥

वैद्यधन्यस्य ।

697 ईर्ष्याप्रस्फुरिताधरोष्ठरुचिरं वक्त्रं न मे दर्शितं
Sv 1591 साधिक्षेपपदा मनागपि गिरो न श्राविता मुग्धया ।
मद्दोषैः सरसैः प्रतापितमनोवृत्त्यापि कोपोनया
शार्दूलविक्रीडित काञ्च्या गाढतरावबद्धवसनग्रन्थ्या समावेदितः ॥२॥

काश्मीरनारायणस्य ।

698 भ्रूभेदो न कृतः कृता मुखशशिच्छायापि नान्यादृशी
शार्दूलविक्रीडित कालुष्येण न लम्भिताः कलगिरः कोपस्त्वतो लक्ष्यते ।

694 (b) A चक्षुषि for चेतसि.
696 (a) Srk. कुटिलता for कुटिलता
(c) Srk विकसिताः for विलसितं.
Ed. वैद्यधनस्य for वैद्यधन्यस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 525.
697 (d) Ed. समावेशितः for समावेदितः.

यत्प्रागल्भ्यमपास्य संप्रति नवीभूत पुनर्लज्जया
यश्चाय विनयादरः प्रणयितां मुक्ता महान्वर्तते ॥३॥

कस्यचित् ।

699 आमृद्यन्ते श्वसितमरुतो यत्कुचोत्सेधकम्पै-
रन्तर्ध्यानात् त्रुटति च दृशोर्यद्बहिर्लक्ष्यलाभः ।
पक्ष्मोत्क्षेपव्यतिकरहतो यच्च वाष्पस्तदेते
भावाश्चण्डि त्रुटितहृदयं मन्युमावेदयन्ति ॥४॥ मन्दाक्रान्ता

कस्यचित् ।

700 यद्यपि श्रियमाधत्ते भूषणानादरस्तव ।
तथाप्यन्तर्गतं मन्युमयं कथयतीव मे ॥५॥ अनुष्टुप्

कस्यचित् ।

४६ अनुरक्तमानिनी ।

701 वलतु तरला धृष्टा दृष्टिः खला सखि मेखला
स्खलतु कुचयोरुत्कम्पान्मे विदीर्यन्तु कञ्चुकम् । Srk. 636
तदपि न मया सभाव्योऽसौ पुनर्दयितः शठः हरिणी
स्फुटति हृदयं मौनेनान्तर्न मे यदि तत्क्षणात् ॥१॥

अमरोः ।

702 भ्रूभेदे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते । As. 27
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते Sv. 1580
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥२॥ Sik. 695
शार्दूलविक्रीडित

तस्यैव ।

699 (a) I. O आनर्त्यन्ते for आमृद्यन्ते

701 (a) Sik दृष्टा for धृष्टा

(c) Srk. संभाष्यो for संभाव्यो.

702 (a) As. भ्रूभङ्गे for भ्रूभेदे

Sv. ascribes the verse to भदन्तारोग्य. Srk. -anonymous.

703 भ्रूभेदो रचितश्चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः ।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया
बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥३॥
धर्मकीर्तेः ।

Sik 645
As 71
शार्दूलविक्रीडित

704 तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता चान्यत-
स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
हस्ताभ्यामपि वारितः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति सहसा यत्कञ्चुके
सन्धयः ॥४॥
अमरोः ।

As. 11
Sv 1581
Spd. 3535
Sik 640
शार्दूलविक्रीडित

705 स्फुटतु हृदयं कामः काम करोतु तनुं ननु
न सखि चटुलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानाटोपादुदीर्य वचस्तथा
रमणपदवी सारङ्गाक्ष्या सशङ्कितमीक्षिता ॥५॥
तस्यैव ।

As. 61
Smv. 55.1
Srk, 666
हरिणी

703 (a) Srk भ्रूभङ्गोगुणित for भ्रू रचित As. गुणित for रचित.
(d) Srk परिग्रह परिकरे for ग्रहे· कर
A adds अमरो after धर्मकीर्तेः

704 (a) Srk. यद् for तद्, विनिहितं for विनमितं, धृता for कृता.
Spd., As पादयोः for चान्यतः.
(c) Sv. विनिवारित· for अपि वारित. Spd., Srk., As. पाणिभ्या (Srk हस्ताभ्या) च तिरस्कृतः for हस्ताभ्या· वारित
(d) Sv., Srk शतधा for सहसा.
Sv., Srk. -anonymous.

705 (b) Sik खलु for सखि
(c) Smv., As मानावेशात् for मानाटोपात्.
(d) Smv. निरन्तरम् for सशङ्कितम्.
Ed. कस्यचित् for तस्यैव. Smv., Srk. -anonymous.

४७ नायके मानिनीवचनम् ।

706 किं पादान्ते पतसि विरम स्वामिनो हि स्वतन्त्राः Pv. 381
कञ्चित्कालं क्वचिदसि रतस्तेन कस्तेऽपराधः । Smv. 57 14
आगस्कारिण्यहमिह यया जीवितं त्वद्वियोगे Srk 643
भर्तृप्राणाः स्त्रिय इति ननु त्वं मयैवानुनेयः ॥१॥ मन्दाक्रान्ता

भावदेव्याः ।

707 तथाभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा । As. 58
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं Sv. 1622
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ॥२॥ Srk 646
शिखरिणी

अमरोः ।

708 भवतु विदितं व्याालापैरलं प्रिय गम्यतां As 29
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः । Pv 223
तव यदि तथाभूतं प्रेम प्रपन्नमिमां दशां Sv. 1617
Smv. 57.6
प्रकृतिचपले का नः पीडा गते हतजीविते ॥३॥ Srk 657

तस्यैव । हरिणी

706 (a) Pv. लुटसि for पतसि, विमना (also Smv) for विरम
(b) A, S अपि (Pv., Smv. अभि) for असि Srk. रति॰ for रत॰.
Pv. तत्र for तेन
(c) Ed., S मया for यया Pv तत् for त्वत्
(d) Smv. भर्तुः॰ for भर्तृ॰. Pv. ममैव for मयैव.
Srk. वाक्कूटस्य for भावदेव्या.
Pv, Smv.—anonymous.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 520.

707 (a) As. पुरा for तथा. (b) As. न for नु.
(c) Sv. transposes नाथ and त्वम्.

708 (a) Sv., Smv., As. व्यर्थ (Pv छद्म) for भव्य.
(c) Sv., Smv., As रूढं for भूतं.
(d) Sv., As. तरले for चपले.

As 35
Dt. under II. 19
Sv 1630
Spd 3562
Smv. 84.7
Srk. 648
मन्दाक्रान्ता

709 कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो यत्र दृष्टिः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः ॥४॥

तस्यैव ।

Spd 3564
Smv 57.20
Srk. 647
शिखरिणी

710 यदा त्वं चन्द्रोभूरविकलकलापेशलवपु-
स्तदार्द्रा जाताहं शशधरमणीनां प्रकृतिभिः ।
इदानीमर्कस्त्वं खररुचि समुत्सारितरसः
किरन्ती कोपाग्नीनहमपि रविग्रावघटिता ॥५॥

अचलस्य ।

४८ मानिन्यां सखीप्रबोधः ।

Srk. 680
शिखरिणी

711 कियन्मात्रं गोत्रस्खलनमपराद्धं चरणयो-
श्चिरं लोठत्येष प्रभवति न मानाद्विरमसि ।
रुषं मुञ्चामुञ्च प्रियमनुगृहाणाथतिहितं
शृणु त्वं यद्ब्रूमः प्रियसखि न माने कुरु मतिम् ॥१॥

मनोकस्य ।

709 (b) Spd, Smv., Srk., As., Dt, Sv दृष्टिपात for यत्र दृष्टि॰. Smv, Sv quote it anonymously. Spd attributes it to वामन, Srk to प्रद्युम्न

710 (a) Spd. शिशिरकरसपर्करुचिर (Smv. हिमकरकलापेशल) for अविकल ....वपु.

(b) Spd., Smv, Srk. स्तदार्द जाता द्राक् (Srk. जाताद्री) for स्तदार्द्रा जाताहं, प्रतिकृतिः for प्रकृतिभि .

Srk. अचलसिंहस्य.

711 (a) Srk. स्खलितमपराध॰ for स्खलनमपराद्धं.

(d) Srk. नख' मा कुरु नदीम् for न .....मतिम्.

Srk.—anonymous.

712 असद्वृत्तो नायं न च सखि गुणैरेष रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः । Smv. 56.10
गृहाणैनं मुग्धे व्रजतु तव कण्ठप्रणयिता Srk. 658
मुपायो नास्त्यन्यो हृदयपरितापोपशमने ॥२॥ शिखरिणी

कस्यचित् ।

713 लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो As. 7
निराहाराः सख्यः सततरुदितोच्छूननयनाः । Spd 3551
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै- Smv. 56.5
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥३॥ शिखरिणी

अमरोः ।

714 यदेतत्ते मौन स्मितमुदयते यन्न वदने
यदव्यक्ता दृष्टिर्यदभिमुखवामः स्थितिरसः ।
उपास्यानामीदृग्विमतिषु हृतप्रश्रयतया शिखरिणी
हृदा दूरं यान्ति प्रियसखि नवीनः परिजनः ॥ ४॥

उमापतिधरस्य ।

715 पाणौ शोणतले तनूदरि दरक्षामा कपोलस्थली Sik. 651
विन्यस्ताञ्जनदिग्धलोचनजलैः किं म्लानिमानीयते । शार्दूलविक्रीडित
मुग्धे चुम्बतु नाम चञ्चलतया भृङ्गः क्वचित्कन्दली-
मुन्मीलन्नवमालतीपरिमलः कि तेन विस्मर्यते ॥५॥

पाणिनेः ।

712 (d) Ed. परितापापनयने for परि ने Smv. तव हृदयसंतापशमने for हृदय शमने. Sik. भट्टहरे.
This is a doubtful verse of Amaru (See S. K. De, *Our Heritage*. II, p. 71).

713 (d) Ed. चेत्थं for चेयम्.

715 (a) I. O. शोणतमे for ०तले. Srk क्षाम कपोलस्थलं for क्षामा...... ...स्थली.

Sik.—anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 367.

४९ अनुनयः ।

716 रम्भोरु क्षिप लोचनार्धमभितो बाणान्वृथा मन्मथः
Srk. 450
शार्दूलविक्रीडित
संधत्तां धनुरुज्झतु क्षणमितो भ्रूवल्लिमुल्लासय ।
किं चान्तर्निहितानुरागमधुरामव्यक्तवर्णक्रमां
मुग्धे वाचमुदीरयास्तु जगतो
वीणासु भेरीभ्रम ॥१॥

भेरीभ्रमकस्य ।

717 किमिति कबरी यादृक्तादृग्दशौ किमनञ्जने
S. K. IV 193
Srk. 731
हरिणी
मृगमदमसीपत्त्रन्यासः स किं न कपोलयोः ।
अयमसमयं किं च क्लाम्यत्यसंस्मरणेन ते
शशिमुखि सखीहस्तन्यस्तो विलासपरिच्छदः ॥२॥

अभिनन्दस्य ।

718 प्रिये मौनं मुञ्च श्रुतिरमृतधारां पिबतु मे
Srk. 670
शिखरिणी
दृशावुन्मील्येनां भवतु जगदिन्दीवरमयम् ।
प्रसीद प्रेमापि प्रशमयतु निःशेषमधृती-
रभूमिः कोपानां ननु निरपराधः परिजनः ॥३॥

डिम्बोकस्य ।

719 यदि विनिहिता शून्या दृष्टिः किमु स्थिरकौतुका
Sv. 1625
यदि विरचितो मौने यत्नः किमु स्फुरितोऽधरः ।

716 Sp. भेरीभ्रमरस्य for ०भ्रमकस्य.

717 (a) S. K., Srk. किमकज्जले for किमनञ्जने.

(b) S. K. reads the line thus—न खलु लिखिताः पत्त्रावल्यः किमद्य कपोलयोः.

(c) S K. अयमयमयं for अयमसमयम्.

(d) S. K. प्रियसखि for शशिमुखि.

Ed. अमरोः for अभिनन्दस्य. Srk.—anonymous

यदि नियमितं ध्याने चक्षुः कथं पुलकोद्गमः | Srk. 638
स्तनमभिनयैर्दृष्टो मानः प्रसीद किमुच्यताम् ॥४॥ | हरिणी

अमरोः ।

720 कपोले पत्राली करतलनिरोधेन मृदिता | As 67
निपीतो निःश्वासैरयममृतहृद्योऽधररस । | S. K. V. 489
मुहुः कण्ठे लग्नस्तिरयति च वाष्पः स्तनतटं | Sv. 1627
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥५॥ | Srk. 664

कस्यचित् । | शिखरिणी

५० मानभङ्ग ।

721 दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्र-
न्न्यग्भूतं वहिरासितं पुलकवत्स्पर्शं समातन्वति । | S K V 15,496 / Spd. 3581
नीवीवन्धवदागतं शिथिलतां सभापमाणे ततो | Smv. 58.2 / Srk 699
मानेनापसृत ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥१॥ | शार्दूलविक्रीडित

कस्यचित् ।

722 चेतस्यङ्कुरितं विसारिणि दृशोर्द्वन्द्वे द्विपत्रायितं | Srk. 679
प्रायः पल्लवितं वचस्युपचितं प्रौढं कपोलस्थले । | शार्दूलविक्रीडित

719 (c) Sv. चेत॰ for चक्षु॰

720 (b) Sv. अलम् for अयम्
(c) S. K. लग्न कण्ठे तरलयति for कण्ठे लग्नस्तिरयति. As., Srk., Sv. तरलयति for तिरयति च S K. तटीं for तटम्.

721 (a) S. K. चक्र for वक्त्र Srk चाग्रे गते for पार्श्वस्थिते.
(b) Srk. आस्थितं for आसितं, संस्पर्शमातन्वति for स्पर्शं समातन्वति.
(c) S K., Srk. आभापमाणे for संभाषमाणे Spd. क्षणम् (Smv. क्षणात्) for ततो.

722 (a) Srk. चिकारिणि for विसारिणि
(b) Srk. वच.स्वपरताप्रत्यायमानादिषु for वच…स्थले.

तत्तत्कोपविचेष्टिते कुसुमितं पादानते तु प्रिये
मानिन्यां फलितं नु मानतरुणा पर्यन्त-
बन्ध्यायितम् ॥२॥

राजशेखरस्य ।

As 22
Sv. 2112
Spd. 3715
Smv. 81.8
Srk. 667
शार्दूलविक्रीडित

723 एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः ॥३॥

अमरोः ।

As. 45
Smv. 55 3
Srk. 641
शार्दूलविक्रीडित

724 दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने कोपाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णं क्षणात्
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥४॥

तस्यैव ।

As. 36
Sv. 1600
Spd 3577

725 सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत् ।

722 (d) S, I. O, Srk मानिन्या for मानिन्याम् Srk., S न (I O. तु) for नु.

723 (a) Smv. नयने for शयने
(b) Sv., Spd., Srk अन्योन्य हृदये for अन्योन्यस्य हृदि.
(c) Srk. पश्चादाकुलयो for दम्पत्यो· शनकै.
(d) Srk. व्यावृत्त for व्यासक्त Sv. कौतूहलः for कण्ठग्रह·. Spd सहासरभसं कण्ठग्रहोनुष्ठितः for सहास · ग्रह· Smv व्यावृत्तकण्ठग्रहम् for व्यासक्त ग्रह..

Sv, Srk. —anonymous.

724 (a) Ed., A विकसितं (Sp विचलितं) for विवलितम्
(c) Ed., As. पूर्णेक्षणम् for पूर्णं क्षणात्

Srk. रतिपालस्य.

725 (a) Sv. Spd., Srk मानं (As. मौनं) for कोपं.
(b) Spd तव न खलु for न···तव

इति निगदति नाथे तिर्यगामीलिताक्ष्या — Smv. 57.33, Srk. 678

नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥५॥ — मालिनी

तस्यैव ।

५१ प्रवसद्भर्तृका ।

726 दृष्टः कातरनेत्रयातिसुचिरं बद्धाञ्जलिं याचितः — As. 69

पश्चादंशुकपल्लवे च विधृतो निर्व्याजमालिङ्गितः । — Spd. 3386, Smv. 37 6

इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तस्तदा — शार्दूलविक्रीडित

पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥१॥

कस्यचित् ।

727 संरुद्धाः कथमप्यमङ्गलभयात्पक्ष्मान्तरव्यापिनो-

ऽप्युत्तानीकृतलोचनं निपुणया वाष्पाम्भसां — शार्दूलविक्रीडित

बिन्दवः ।

न्यस्यन्त्याः सहकारपल्लवमथ व्यानम्य पत्युः पुरो

धारावाहिभिरेव लोचनजलैर्यात्राघटः पूरितः ॥२॥

धोयीकस्य ।

728 मुग्धे प्रेषय यामि यान्ति पथिकाः कालोवधिः

कथ्यता-

मुद्विग्ना किमकाण्ड एव भवती तूर्ष्णी किमेवं — Sv. 1062

स्थिता । — शार्दूलविक्रीडित

725 Sp. अमरोः for तस्यैव Spd , Srk —anonymous.

726 (a) Spd., Smv., As चिरतरं for अतिसुचिरं

(b) Spd., As. पल्लवेन for पल्लवे च.

(c) Spd. om यदा, समस्तमर्थं for समस्तं, शठः (also Smv , As.) for तदा

Spd., Smv attribute it to अमरुक.

727 (a) I O. संरुध्वा for संरुद्धा

(d) Ed. धारा for यात्रा.

728 (a) Sv. अवधेर्ब्यताम् for अवधि. कथ्यताम्.

पूर्वोक्त्योपरतां प्रियेण दयितामाश्लिष्य तत्तत्कृतं
दत्तो येन समस्तपान्थनिवहप्राणान्तिको

डिण्डिमः ॥३॥

कस्यचित् ।

Sv. 1054
शार्दूलविक्रीडित

729 आपृष्टासि विनिर्गतोऽध्वगजनस्तन्वङ्गि गच्छाम्यहं
स्वल्पैरेव दिनैः समागम इति ज्ञात्वा शुचं मा कृथाः ।
इत्याकर्ण्य वचः प्रियस्य सहसा तन्मुग्धया चेष्टितं
येनाकाण्डसमाप्ततीव्रविरहक्लेशः कृतो वल्लभः ॥४॥

कस्यचित् ।

शार्दूलविक्रीडित

730 भ्रातर्बाष्प मुहुर्विमुञ्च नयनं यावत्तिरोधीयते
नाथ निष्करुणः पुरा निरवधिर्भावी तवैवोदयः ।
इत्याकर्ण्य वियोगमुग्धमनसः स्वप्नोपनीतं वचः
संजाता दयितस्य योजनशतं

शय्योपकण्ठस्थली ॥५॥

जलचन्द्रस्य ।

५२ यात्राक्षेपः ।

शार्दूलविक्रीडित

731 कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः ।

728 (c) Sv. इत्युक्त्वोपनता for पूर्वोक्त्योपरता, आलिङ्गय for आश्लिष्य, तादृक् for तत्तत्
(d) A, S विरह (Sv विरहि) for निवह. Sv प्राणान्तकृत् for प्राणान्तिको.

729 (b) Sv. समागति for समागम.
(d) Sp. समस्त for समाप्त. Sv. सर्वकरण for तीव्रविरह, कृतोन्यो जनः for कृतो वल्लभः.

730 (c) सुप्तोपनीतं for स्वप्नोपनीतम्.

आयाता वयमागमिष्यथ सुहृद्वर्गस्य भाग्योदयैः
संदेशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥१॥

वीरस्य ।

732 गन्तुं वाञ्छसि गच्छ पिच्छिलममी यावन्न कुर्वन्ति ते
पन्थानं मृदुमर्दलध्वनिमुचो धाराभिरम्भोधराः ।
एतस्यास्तव तानि रहसि प्रेमाक्षराणि ध्रुवं शार्दूलविक्रीडित
ध्यायन्त्यास्तु विपद्विनोदनसखी
मूर्छैव संपत्स्यते ॥२॥

कस्यचित् ।

733 यास्यामीति गिरः श्रुता अवधिरप्यालम्बितश्चेतसा
गेहे यत्नवती भविष्यसि सदेत्येतत्समाकर्णितम् । Sv 1064
मुग्धे मा शुच इत्युदीरितवतः पत्युर्निरीक्ष्याननं शार्दूलविक्रीडित
निःश्वस्य स्तनपायिनि स्वतनये
दृष्टिश्चिरं पातिता ॥३॥

भदन्तधीरनागस्य ।

734 आयास्यस्यवधावपर्यवसिते गत्वेति संभाव्यते Sv. 1061
संप्राप्ते त्वयि यानि तान्यपि शार्दूलविक्रीडित
सुखान्यद्यापरोक्षाणि नः ।

731 Ed अमरो॰ for वीरस्य
This is a doubtful verse of Amaru. (See S. K. De, *Our Heritage*, II, p. 69)

732 (d) I O संपूर्यते for संपत्स्यते.

733 (a) Sv. आरोपितश्चेतसि for आलम्बितश्चेतसा
(c) Sv. बाले for मुग्धे
Sv. omits भदन्त in the poet's name.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 518

734 (b) Sv. तानि for यानि Ed. सुखान्यस्या for सुखान्यद्या.

किंत्वज्ञातवियोगवेदनमिद सद्यस्त्वयि प्रस्थिते
च्चेतः किं नु करिष्यतीत्यविदितं
सम्यङ् न निश्चीयते ॥४॥
कस्यचित् ।

735 लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः परै-
As. 54 रन्यास्ता विनिवारयन्ति
Sv. 1060 कृपणाः प्राणेश्वरं प्रस्थितम् ।
Spd. 3395 पुण्याह व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
Smv. 37 12 यत्स्नेहोचितमीहितं प्रिय
शार्दूलविक्रीडित मया तन्निर्गतः श्रोष्यसि ॥५॥
कस्यचित् ।

५२ प्रोषितभर्तृका ।

736 मध्ये वेश्म समुद्गता तदनु च द्वारान्तरालं गता
निर्याताथ कथंचिदङ्गणभुवं प्रेयांस्तु नालोकितः ।
Srk. 718 हहो वायस राजहंस शुक हे हे सारिके कथ्यतां
शार्दूलविक्रीडित का वार्तेति मृगीदृशो विजयते बाष्पाम्बुगर्भं
वचः ॥१॥
महोदधेः ।

734 (c) Sv. तु ज्ञात for त्वज्ञात

735 (a) As. प्रियै for परै.

(c) Spd., Smv. दिवसः for दिवस.

(d) Sv. गृहात् for मया, As. प्रियतम for प्रिय मया, त्वं निर्गतः for तन्निर्गतः.

Smv , Spd. attribute it to अमरु

736 (a) Srk. सद्म for वेश्म.

(b) Srk. अङ्गणामपि for अङ्गणभुवं

(d) Srk. बाष्पान्तरायं for बाष्पा...गर्भं.

Srk. —चित्ताङ्कस्य.

737 अस्तव्यस्तसमीरकम्पिततया दृष्टेस्तिरस्कारिणीं
हस्तेनालकवल्लरीमकुटिलामानीय कर्णान्तिकम् । शार्दूलविक्रीडित
उद्वीक्ष्य प्रियमार्गमध्वगवधूरस्तं गते भास्वति
छिन्नाशा स्वनिवेशमेति शनकैः स्वप्नेक्षणाशंसिनी ॥२॥

कस्यचित् ।

738 अभ्यासस्थितचूतषण्डगहनस्थानादितो गेहिनी
ग्रामं कंचिदवृक्षकं विरहिणी तूर्णं वधूर्नीयताम् ।
अत्रायान्त्यचिरेण कोकिलकुलव्याहारझंकारिणः शार्दूलविक्रीडित
पान्थस्त्रीजनजीवितैकहरणप्रौढाः पुरो वासराः ॥३॥

कस्यचित् ।

739 सौख्ये गते प्रवसता दयितेन सार्धं
नेत्रद्वये दयितमार्गगमान्निवृत्ते ।
व्रीडावती बत कृता हतजीवितेन वसन्ततिलक
निर्याय यन्न पदमात्रमपि प्रयातम् ॥४॥

कस्यचित् ।

740 वत्से माधवि मुग्धिकासि बलवद्वन्यौकसो देवताः
पान्तु त्वामयमस्तमञ्चति रविर्यातोवधिस्ते पितुः । शार्दूलविक्रीडित
शान्तं पापममङ्गलं परमतः शान्त्या न कल्याणि मे
कल्यन्नव्यमधुव्रताय तु मधून्युद्दिश्य मे दास्यसि ॥५॥

कस्यचित् ।

५४ प्रोषितभर्तृकावचनम् ।

741 प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं As. 32 Pv. 314
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः । Sv. 1151

738 The verse has been quoted by Aufrecht in ZDMG, 36, p. 549

741 (a) Sv. बाष्पै. (As. अस्रम्) for अस्रैः.

(b) Ed., Smv. पुनः for पुर..

Spd. 3424
Smv. 37.19
शार्दूलविक्रीडित

यातु निश्चितचेतसि प्रियतमे सर्वे सम प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमु
त्यज्यते ॥१॥
कस्यचित् ।

742 आयाता मधुयामिनी विजयते कान्तप्रयाणोत्सवः
प्राणा यान्तु यियासवो यदि पुनर्जन्मग्रहोऽभ्यर्थये ।
व्याधाः कोकिलबन्धने विधुपरिध्वंसे च राहोर्गणाः
कन्दर्पे हरनेत्रपावककणाः प्राणेश्वरे मन्मथाः ॥२॥
इन्द्रशिवस्य ।

शार्दूलविक्रीडित

743 यात्रामङ्गलसविधानरचनाव्यग्रे सखीनां गणे
वाष्पाम्भःपिहितेक्षणे गुरुजने तद्वत्सुहृन्मण्डले ।
प्राणेशस्य मदीक्षणार्पितदृशः कृच्छ्रादतिकामतः
किं व्रीडाहतया मया भुजलतापाशो न
कण्ठेऽर्पितः ॥३॥

Sv. 1150
Spd. 3437
शार्दूलविक्रीडित

744 किं चूतैर्न विजृम्भितं स्तवकितं किं नैकङ्केल्लिभिः
सिन्दूरैरिव मुद्रितास्तत इतो
जाता न किं किं शुकाः ।
विस्मृत्यापि न कोकिलैः किमु रुतं
किं दाक्षिणात्यानिलै-
र्वातं तत्र न निर्वृतैकहृदयो यत्रास्ति मे वल्लभः ॥४॥
कस्यचित् ।

शार्दूलविक्रीडित

741 (d) Spd., Smv क्रिमुत्सृज्यते for किमु त्यज्यते.
Pv. अमरोः (Spd. अमरुकस्य) for कस्यचित्.
Ed. om. कस्यचित

742 (b) I. O , Sp. यात for यान्तु

743 (a) Sv. निधान for विधान.
(c) Sv. अप for अति.

744 (d) Sp. मत् for मे.

745 मया बद्धा वेणी निवसितमशुक्लं च वसनं
श्रुताः शोचन्तीनां परिजनसखीनामपि गिरः। Sv. 1142
निवृत्तास्ते दृष्टा गतमनुगता येऽस्य सुहृद- शिखरिणी
स्तथाप्येते प्राणा दयितमनुयाता न कृपणाः ॥५॥

कस्यचित्।

५९ सखीं प्रति प्रोषितभर्तृकावचनम्।

746 अवधिदिवसः सोयं प्राप्तस्तनोर्विरहस्य वा
रविरयमुपैत्यस्तं सख्यो ममैव मनोरथः। Smv. 4019
तदलमफलैराशाबन्धैः प्रसीद नमोस्तु ते हरिणी
हृदय सहसा पाकोत्पीडां विडम्बय दाडिमीम् ॥१॥

अभिमन्योः।

747 गर्जन्येकः परभृतयुवा पञ्चमध्वानगर्भं
वाति स्वैरं मलयपवनो दूरतो जीवितेशः।
पश्चालिङ्ग प्रियसखि पुनः क्वावयोर्दर्शनं स्या- मन्दाक्रान्ता
त्प्रत्यासन्नं मरणमसवः कण्ठदेशे लुठन्ति ॥२॥

कस्यचित्।

748 अवधिदिवसः सोयं नाद्यागतः किमियत्क्षणं
वितर नयने पश्यैतन्मे पुरः सखि साहसम्। हरिणी
इयमियमहं रूढज्वालाकरालितरोदसीं
मलयजरसाभ्यक्तैरङ्गैः पताम्यभि कौमुदीम् ॥३॥

गोसकस्य

745 (b) Ed. किल for अपि
Sv. ascribes the verse to भदन्तधीरनाग.

746 (a) Smv. प्राप्तश्चायं for सोयं प्राप्त॰
(b) Smv. ममापि च जीवितम् for ममैव⋯⋯रथः.
(d) Smv. पाकोत्पीडं for ०पीडां, दाडिमं (IO. दाडिमी॰)
for दाडिमीम्। Smv क्षेमेन्द्रस्य for अभिमन्योः.

747 Quoted by Aufrecht in ZDMG, 36, p. 552.

748 Ed. गोसोकस्य for गोसकस्य.

749 दृष्टं केतकधूलिधूसरमिदं व्योम क्रमाद्वीक्षिताः
Pv. 327
कच्छान्ताश्च शिलीन्ध्रकन्दलभृतः
शार्दूलविक्रीडित
सोढाः कदम्बानिलाः।
सख्यः संवृणुताश्रु मुञ्चत भयं कस्मान्मुधैवाकुला
एतानप्यधुनापि वज्रघटिता नूनं सहिष्ये घनान् ॥४॥

रुद्रटस्य।

750 प्रसर शिशिरामोदं कौन्दं समीर समीरय
Pv. 334
प्रकटय शशिन्नाशाः काम प्रपञ्चय दुःस्थताम्।
Smv. 40.18
अवधिदिवसः पूर्णः सख्यो विमुञ्चत तत्कथां
हरिणी
हृदयमधुना किं चित्कर्तुं ममान्यदिहेच्छति ॥५॥

तस्यैव।

५६ प्रोषितभर्तृकाप्रियसंवादः।

751 द्वारस्तम्भनिषण्णया दयितया वक्रीकृतग्रीवया
नासाग्रागतवारिबिन्दुविसरैः संसिच्यमानाङ्गया।
शार्दूलविक्रीडित
मन्युस्तम्भितकण्ठगद्गदगिरा प्रोच्चारितार्धाक्षरं
संदिष्टं तव कान्तया पथिक तद्वक्तुं
न यत्पार्यते ॥१॥

तुतातितस्य।

752 नावस्था वपुषो ममेयमवधेरुक्तस्य नातिक्रमो
Stk. 725
शार्दूलविक्रीडित
नोपालम्भपदानि वाप्यकरुणे तत्राभिधेयानि ते।

749 (d) Pv. अस्मि for अपि

Pv. रुद्रस्य for रुद्रटस्य.

750 (a) Smv मन्दं for कौन्दं

(b) Pv कामं मनोज समुल्लस (Smv. काम मनोभव जृम्भताम्) for काम..... दुःस्थताम्.

Smv., Pv attribute it to Rudra.

751 Quoted by Aufrecht in ZDMG, 36, p. 514.

752 Do, p. 524.

प्रष्टव्यः शिवमालि केवलमसौ कच्चिद्भवद्गोचरे
नायातं मलयानिलैर्मुकुलितं कच्चिन्न चूतैरिति ॥२॥

पाक्कूटस्य ।

753 कुटजकटवो घ्राता वाताः श्रुतं घनगर्जितं
निशि निशि मुहुः शून्ये तल्पे कृत शयनश्रमः ।
अवधिगणना रेखा पूर्णा कृता गृहभित्तयो
न नव सविधं प्राणाः प्राप्ता न वा त्वमिहागतः ॥३॥ हरिणी

कस्यचित् ।

754 विज्ञप्तिरेषा मम जीवबन्धो
तत्रैव नेया दिवसाः कियन्तः । उपजाति
संप्रत्ययोग्यस्थितिरेष देशः
करा हिमांशोरपि तापयन्ति ॥४॥

विज्जाया गणपतेः ।

755 गन्तासि चेत्पथिक हे मम यत्र कान्त-
स्तत्त्वं वचो हर शुचौ जगतामसह्यः । वसन्ततिलक
तापः सगर्जगुरुवारिनिपातभीत-
स्त्यक्त्वा भुवं विरहिणीहृदयं विवेश ॥५॥

लडहचन्द्रस्य ।

५७ प्रोषितभर्तृकावस्था* ।

756 अविरलपतद्बाष्पोत्पीडप्रसिक्तकपोलया
वचनविषयः संदेशोऽन्यस्तया विहितो न ते । हरिणी
मनसि किमपि ध्यायन्त्या तु क्षणं तव कान्तया
पथिक निहिता दृष्टिः कष्टं नवे करुणाङ्कुरे ॥१॥

धर्मपालस्य ।

753 (b) Ed. खल्पे for शून्ये
(d) S च for न.
754 Ed. विद्यायाः for विज्जाया गणपतेः.
755 Quoted by Aufrecht in ZDMG, 36, p. 552
S adds कथनम्.

757 पक्ष्माग्रस्खलिताश्रुधौतवलया निष्पन्दतारेक्षणा
शार्दूलविक्रीडित विभ्राणा करपल्लवेन सततं क्षामं कपोलस्थलम् ।
सेदानीं लिखितेव कामपि गतावस्थां सखीभिश्चिरा-
दासन्नावधिवासरप्रकटितप्रत्याशयाश्वास्यते ॥२॥

कस्यचित् ।

758 विच्छिन्नेवधिवासरे क्षणमथ त्वद्वर्त्मवातायनं
शार्दूलविक्रीडित वारं वारमुपेत्य निर्घृणतया निश्चित्य किंचित्ततः ।
सम्प्रत्येव निवेद्य केलिकुररीः सास्रं सखीभ्यः शिशो-
र्माधव्याः सहकारकेण करुण पाणिग्रहः

कल्पितः ॥३॥

कस्यचित् ।

759 निपतति शयने तव स्मरन्ती
पुष्पिताग्रा पथिकवधूरवधूतजीविताशा ।
जलधरसमयस्य केतुभूतां
वकुललतामवलोक्य पुष्पिताग्राम् ॥४॥

कस्यचित् ।

760 आदूरात्प्रतिपान्थमाहितदृशः प्रत्याशयोन्मीलति
शार्दूलविक्रीडित ध्वान्ते स्वान्तमहर्व्ययेपि न परावृत्तं कुरङ्गीदृशः ।
तस्या निःसहबाहुवल्लिविगलद्धम्मिल्लवक्रङ्कुर-
ग्रीवं दीर्घमजीववत्प्रियसखीवर्गेण नीतं वपुः ॥५॥

कस्यचित् ।

५८ वर्त्मावलोकिनी ।

761 पाण्डुक्षामकपोलपालिलुठितां न्यस्तैणशावेक्षणा
शार्दूलविक्रीडित हस्तेन श्लथकङ्कणेन कवरीमुल्लासयन्ती मुहुः ।

757 (b) S क्षाल्यत् for क्षामम्
(d) I. O. प्रत्याशया श्राम्यति (Sp. प्रत्याशयान्वास्यते.)
for प्रत्याशयाश्वास्यते.

द्वारोपान्तविलम्बिनी प्रियपथं तन्वङ्गि यद्वीक्षसे
तन्मन्ये विकटैरिवाञ्जसि पुरः पन्थानमिन्दीवरैः ॥१॥

कस्यचित् ।

762 पर्यस्तो दिवसस्तटीमपरतस्त्यस्ताचलस्यांशुमान्
संप्रत्यं कुरितान्धकारपटलैरबालका द्यौरपि ।
यद्यन्तर्दिश वेश्मनः शशिमुखि द्वारस्थलीतोरणे
स्तम्भालम्बितबाहुवल्लि रुदती
किं त्वं पथः पश्यसि ॥२॥ शार्दूलविक्रीडित

धर्मयोगेश्वरस्य ।

763 उन्निद्राल्कमालिकां विलुलितामापाण्डुगण्डस्थला-
द्विश्लिष्यद्वलयप्रपातभयतः प्रोल्लास्य किंचित्करौ ।
द्वारस्तम्भनिषण्णगात्रलतिका केनापि पुण्यात्मना
मार्गालोकनदत्तदृष्टिरबला तत्कालमालिङ्गयते ॥३॥ शार्दूलविक्रीडित

रुद्रटस्य ।

764 आजन्मव्यवसायिना क्रतुशतैराराध्य पुष्पायुधं
केनाकारि पुरा तनूदरि तनुत्यागः प्रयागश्रमे ।
यस्यार्थे सखि लोलनेत्रनलिनीनालायमानस्खल-
द्वाष्पाम्भःपतनान्तरालवलितग्रीवं
पथ पश्यसि ॥४॥ शार्दूलविक्रीडित

धोयीकस्य ।

765 आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विश्रान्तेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति । As. 64 Dr. under II. 27a

762 (c) S, I O तोरण for तोरणे.

763 (b) A प्रोन्नम्य for प्रोल्लास्य.

(d) I. O. गत for दत्त

764 (b) Ed. प्रयागद्रुमे for ०श्रमे.

765 (a) Ed. निर्विघ्नया for निर्विण्णया.

(b) Sv., As. विच्छिन्न षु for विश्रान्तेषु.

Sv 1056
Sık 728
शार्दूलविक्रीडित

यान्त्यैव स्वनिवेशनं प्रतिपथं पान्थस्त्रियास्मिन्क्षणे
माभूदागत इत्यमन्दवलितोद्ग्रीवं मुहुर्वीक्षितम् ॥५॥

सिद्धोकस्य ।

५९ काकः ।

Sv. 1140
शिखरिणी

766 गतोस्तं तिग्मांशुर्व्रज सहचरीनीडमधुना
सुखं भ्रातः सुप्याः स्वजनसदृशं वायस कृतम् ।
मयि स्नेहाद्बाष्पस्थगितरुचिदृष्टौ सकरुणं
रुदत्यां यो यातस्त्वयि स विलपत्येष्यति कथम् ॥१॥

कस्यचित् ।

मन्दाक्रान्ता

767 दत्तं पिण्डं नयनसलिलक्षालनाधौतगण्डं
द्वारोपान्ते गतदयितया संगमान्वेषणाय ।
वक्रग्रीवश्चलनतशिराः पार्श्वसंचारिनेत्रः
पाशाशङ्की गलितवलयाक्रान्तमश्नाति काक ॥२॥

कस्यचित् ।

Srk. 732
शार्दूलविक्रीडित

768 वारं वारमलीक एव हि भवान्किं व्याहृतैर्गंस्यता-
मित्युद्गम्य सुमन्दबाहुलतिकामुत्थापयन्त्या रुषा ।
संक्रान्तैर्वलयैरलंकृतगलो युष्मद्वियोगोचितां
तन्वङ्ग्याः प्रकटीकरोति तनुतामङ्के भ्रमन्वायसः ॥३॥

कस्यचित् ।

765 (c) Sık., Dr., Sv , As. दत्त्वैक सशुचा (Sık. ससुधा) गृह प्रतिपदं for यान्त्यैव...पथम्.

d) Srk. न for मा. Ed , Dr , As वलितग्रीवं for वलितोद्ग्रीवं

Sv., Dr , A, As. पुनः for मुहु

Sv. अमरुकस्य for सिद्धोकस्य

766 (a) Sv. घर्मांशु for तिग्मांशु

(b) Sv. सुजन for स्वजन.

(c) Sv. नयनायासपघृणो for रुचि......सकरुणाम्

Sv. शिवस्वामिन for कस्यचित्.

768 (d) Ed. तनुतामङ्के (Srk. तनुतां व्रजे) for त......ङ्के.

769 यत्पुष्णासि पिकानकारणरिपूनध्वन्यवामभ्रुवां
यच्चाच्छिद्य बलिं विलुम्पसि करात्सर्वं
सहिष्ये तव ।
हंहो मद्वचनादितस्त्वयि गते शाखान्तरं वायस
क्षेमेणाद्य समागमिष्यति स चेत्कान्तश्चिरं
प्रोषितः ॥४॥ शार्दूलविक्रीडित
धोयीकस्य ।

770 उल्लासो विरुतेन मङ्गलबलिग्रासेन विश्वासनं
संचारेण कृतो विलोचनयुगे वाष्पोद्गमावग्रहः ।
यातोस्तं रविरेव संप्रति पुरः स्वस्त्यस्तु ते गम्यता-
मेते त्वामनुयान्तु सप्रति मम प्राणाः
प्रियान्वेषिणः ॥५॥ शार्दूलविक्रीडित
जलचन्द्रस्य ।

६० प्रोषितसंभेदः ।

771 आयाते दयिते मरुस्थलभुवामुत्प्रेक्ष्य दुर्लङ्घ्यतां
गेहिन्या परितोषबाष्पतरलामासज्य दृष्टिं मुखे ।
दत्त्वा पीलुशमीकरीरकवलान्स्वेनाञ्चलेनादरा-
दामृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥१॥
केशटस्य । शार्दूलविक्रीडित

S. K v. 120
Dr. under IV. 14a,
Srk. 512
Sv. 2075
Smv. 54 4

769 (d) Ed चेपेण for क्षेमेण.

770 (d) I. O. प्रियाद्वेषिण. for प्रियान्वेषिण·

771 (a) S K. संचिन्त्य (Sv उद्वीक्ष्य, Srk. उल्लङ्घ्य) for उत्प्रेक्ष्य.

(b) Sv तन्वङ्गया for गेहिन्या Dr. कलिलाम् for तरलाम्.

(c) Sv. कवलं for कवलान्

(d) Sv., Dr., S. K., Smv. उन्मृष्टं for आमृष्टं. Sv., Srk., Smv. भाराव for भाराग्र Smv. attributes it to अद्भुतपुण्य.

Sv. —anonymous.

772 केयूरीकृतकङ्कणावलिरसौ कर्णावतंसीकृत-
Smv. 54 10
Srk. 713
शार्दूलविक्रीडित
व्यालोलालकपद्धतिः पथि पुरो बद्धाञ्जलिः पृच्छति ।
यावत्कंचिदुदन्तमात्मकमितुस्तावत्स एवेत्यथ
व्रीडावक्रितकण्ठनालमबला कैः कैर्न भिन्ना रसैः ॥२॥
राजशेखरस्य ।

773 निद्रे भद्रमवस्थितासि कुशलं सवेदने किं तव
Srk. 717
क्षेमं ते सखि निर्वृते ननु समं कान्तेन यूयं गताः ।
शार्दूलविक्रीडित
किं चान्यत्प्रियसंगमेन चलितो गच्छन्विपद्वत्सलो
मूर्छाविस्मृतिवेदनापरिजनो दृष्टोऽस्मदीयो न वा ॥३॥
अरविन्दस्य ।

774 प्राग्यामिनि प्रियवियोगविपत्तिकाले
त्वय्येव वासरशतानि लयं गतानि ।
वसन्ततिलक
दैवात्कथं कथमपि प्रियसंगमेद्य
चण्डालि किं त्वमसि वासर एव लीना ।४॥
कस्यचित् ।

775 प्रत्युद्गम्य तनूरुहोद्गतिवशात्खेदस्खलच्चेष्टया
दत्त्वा स्वेदलवैः स्वहस्तगलितैः प्रक्षालना पादयोः ।
शार्दूलविक्रीडित
किंचित्स्मेरमुखप्रकीर्णदशनस्वच्छांशुपुष्पोज्ज्वलै-
रानन्दाश्रुभिरर्चितो दयितया पान्थश्चिरादागतः ॥५॥
कस्यचित् ।

772 (a) Srk. कर्णान्तिकोत्तंसित for कर्णा··· ·कृत.
(c) Ed., Srk. किंचित् for कंचित्.
(d) Smv. काण्डम् for नालम्, भिन्ना न कै. कै रसै. for कै· ·····रसै·.
Srk. —anonymous.

773 (b) Sp. नतु for ननु.
(c) Srk. संगमेऽद्य for संगमेन

774 Quoted by Aufrecht in ZDMG, 36, p. 554.

६१ अभिसारारम्भः ।

776 पतिर्दुर्वैश्वोयं विधुरमलिनो वर्त्म विषम Srk. 830
जनश्छिद्रान्वेषी प्रणयिवचनं दुष्परिहरम् । शिखरिणी
अतः काचित्तन्वी रतिविदितसंकेतगतये
गृहाद्द्वारं वारं निरसरदथ प्राविशदथ ॥१॥

कस्यचित् ।

777 मन्दं निधेहि चरणौ परिधेहि नीलं
वासः पिधेहि वलयावलिमञ्चलेन । Pv 194 Spd. 3620
मा जल्प साहसिनि शारदचन्द्रकान्त- Smv 71.8
दन्तांशवस्तव तमांसि समापयन्ति ॥२॥ वसन्ततिलक

नालस्य ।

778 उत्क्षिप्तं सखि वर्तिपूरितमुखं मूकीकृतं नूपुरं
काञ्चीदाम निवृत्तघर्घररवं क्षिप्तं दुकूलान्तरे । शार्दूलविक्रीडित
सुप्ताः पञ्जरसारिकाः परिजनोप्याधूर्णितो निद्रया
शून्यो राजपथस्तमांसि निविडान्येह्येहि
निर्गम्यताम् ॥३॥

योगेश्वरस्य ।

779 सखी निर्वैलक्ष्या स च सहचरोत्यन्तचपल शिखरिणी
कुतो मुग्धे दुग्धे किमिति वृषदंशः प्रहरिकः ।

776 Quoted by Aufrecht in ZDMG, 36, p. 553.

777 (a) Spd., Smv. वासो for नीलं.

(b) Spd., Smv. नीलं for वासः. Smv. अंशुकेन for अञ्चलेन.

(c) PV. कान्ति for कान्त.

PV. षाण्मासिकस्य (Smv. हरिहरस्य) for नालस्य.

Spd. —anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 517.

सुवर्णं स्वं चक्षुः फलति न विलम्बस्य कुलटा-
कुलोत्पातः शातक्रतवमचलं चुम्बति शशी ॥४॥

मित्रस्य ।

780 मुञ्चत्याभरणानि दीप्तमुखराण्युत्तंसमिन्दीवरैः
शार्दूलविक्रीडित कुर्वाणा दधती मुहुर्मृगमदक्षोदानुलिप्तं वपुः ।
कालिन्दीजलवेणिनीलमसृणं चीनांशुकं बिभ्रती
मुग्धे त्वं प्रकटीकरोष्यविनयारम्भं वृथा निह्नवः ॥५॥

लक्ष्मणसेनदेवस्य ।

६२ अभिसारिका ।

781 निविडय कुचयोर्निचोलबन्धं
पुष्पिताग्रा
रचय लघूनि कियन्तिचित्पदानि ।
निजपतिचिरभोगपातकाना-
मुपशमतीर्थमयं स ते निकुञ्जः ॥१॥

चूडामणेः ।

782 अभिसरणरसः कृशाङ्गयष्टे-
Smv 71.9
पुष्पिताग्रा
रयमपरत्र न वीक्षित श्रुतो वा ।
अहिमपि यदियं निरास नाम्रे-
र्निविडितनूपुरमात्मनीनबुद्ध्या ॥२॥

धूर्जटेः ।

As. 30
Dr. under II. 27b.
783 उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।

779 Quoted by Aufrecht in ZDMG, 36, p. 541

780 Ed लक्ष्मणसेनस्य. (I. O., S श्रीमल्लक्ष्मणसेनदेवस्य) for लक्ष्मण-सेनदेवस्य.

781 (d) Sp. सदा for सते.

782 (b) Sp. यदयं for यदियम्

Smv. —anonymous.

प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा Sv 1947
किमिदमपरं त्रासोत्कम्पं दिशो मुहुरीक्षसे ॥३॥ Spd 3613 Srk 835

अमरोः। शिखरिणी

784 किं न्वावृणोषि कवरीं सखि किं नु काञ्चीं
बध्नासि वर्मयसि किं कुचयोर्निचोलम्। वसन्ततिलक
सोत्कण्ठकान्तसुभगाभ्युषितोपकण्ठा
प्राप्ता पुरः सुरतसगररङ्गभूमिः ॥४॥

धर्मयोगेश्वरस्य।

785 वस्त्रप्रोतदुरन्तनूपुरमुखाः संयम्य नीवीमणी-
नुद्गाढांशुकपल्लवेन निभृतं दत्ताभिसारक्रमाः। Srk 829
एताः कुन्तलमल्लिकापरिमलव्यालोलभृङ्गावली- शार्दूलविक्रीडित
झङ्कारैर्विकलीकृताः पथि
वत व्यक्तं कुरङ्गीदृशः ॥५॥

कस्यचित्।

६२ दिवाभिसारिका।

786 अवलोक्य नर्तितशिखण्डिमण्डलै-
र्नवनीरदैर्निचुलितं नभस्तलम्। प्रबोधिता
दिवसेपि वञ्जुलनिकुञ्जमित्वरी
विशति स्म वल्लभवतंसितं रसात् ॥१॥

सुभटस्य।

787 सान्द्रेषु चम्पकवनेषु विनिद्रपुष्प-
पंक्तिप्रकाशितपरागपिशङ्गितेषु। वसन्ततिलक

783 (c) S, Sp. समाहित (Srk समाहृत) for त्वमाहत.
(d) Spd., Sv. यदि किमपरं for किमिदमपरं.
S, Sv., Srk. त्रासोत्कम्पा for कम्पं. Sv, Spd. दिश. सम् for दिशो मुहु॰. Dr., As. read the line thus—यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे.
Spd., Sv. अर्गटस्य (Srk. देवगुप्तस्य.) for अमरोः.

मध्यंदिनेपि रमणी रमणाभिसार-
बुद्धिं बभार कनकाभरणं भजन्ती ॥२॥

तस्यैव ।

788 दिवापि जलदोदयादुपचितान्धकारच्छटा-
जटालिततटीमिमां विशति विस्मरन्ती भयम् ।
पृथ्वी तमालतरुमण्डितावटनिरस्तभानुद्युतिं
धृताभिसरणव्रता शबरसुन्दरी कन्दरीम् ॥३॥

कालिदासस्य ।

789 मध्याह्ने द्विगुणार्कदीधितिदलत्संभोगवीथीपथ-
प्रस्थानव्यथितारुणाङ्गुलिदलं राधापदं माधवः ।
शार्दूलविक्रीडित मौलौ स्रक्शबले मुहुः समुदितस्वेदे मुहुर्वक्षसि
न्यस्य प्राणयति प्रकम्पविधुरैः
श्वासोर्मिवातैर्मुहुः ॥४॥

आचार्यगोपीकस्य ।

790 दिवसेपि धूममहिषी वाद्योत्सवदुर्दिनेषु
मिलितायाः ।
आर्या नाकृतपुण्यः पश्यति रहसि मुदा
वदनक्रममेणाक्ष्याः ॥५॥

उमापतिधरस्य ।

६४ तिमिराभिसारिका ।

791 खद्योतोत्करदन्तुरान्धतमसोत्सङ्गेन मा गाः सखि
शार्दूलविक्रीडित स्वैरं नूपुरजागरूकचरणौ दुःशिक्षिते रोपय ।

789 (a) Ed. मध्याह्न for मध्याह्ने.
(b) S, I O. प्रस्थानव्यथितावशाङ्गुलितलं for प्रस्थान......दलम्
(d) S, I. O. प्रीणयति for प्राणयति.
790 (b) Ed. वदनम् for वदनक्रमम्.

न्यश्चच्चोलचलाचलेन तरले हारस्रजं निष्पिधाः
प्राप्तः पुत्रि स एष नीलनिचुलक्रीडालतामण्डपः ॥१॥

पाथीकस्य ।

792 मौलौ श्यामसरोजदाम नयनद्वन्द्वेऽञ्जनं कर्णयो-
स्तापिच्छप्रसवः कपोलफलके कस्तूरिकापल्लवः ।
विश्वालोकविलोपि निन्दितमपि प्रेयोभिसाराशया
हृष्यद्भिः स्मरदुर्विनीतवनितास्तोमैस्तमो मन्यते ॥२॥ शार्दूलविक्रीडित

उमापतिधरस्य ।

793 वासो बर्हिणकण्ठमेदुरमुरो निष्पिष्टकस्तूरिका-
पत्त्रालीमयमिन्द्रनीलवलयं दोर्वल्लिरासेवते ।
निर्यान्ती च लघुस्खलत्पदमिदं ध्वान्तं न यन्मन्यसे
तन्नूना मदिराक्षि केन सुचिरादाराधि पुष्पायुधः ॥३॥ शार्दूलविक्रीडित

आवन्तिकजह्नोः ।

794 प्रयासि यत्कुण्डलचक्रधारया
विपाटयन्तीव घनं निशातमः ।
तदद्य कर्णायतलोचनोत्पले
फलेग्रहिः कस्य मनोरथद्रुमः ॥४॥ वंशस्थविल

धोयीकस्य ।

795 इह निशि निविडनिरन्तरकुचकुम्भद्वितयदत्त-
हृदयभरा ।
रमणगुणकृष्यमाणा संतरति तमस्तरङ्गिणीं कापि ॥५॥ आर्या

अमरोः ।

६५ ज्योत्स्नाभिसारिका ।

796 शशधरकरस्पर्धामुग्धं विधाय विभूषणं
किमिति वलितग्रीवं मुग्धे मुधैव विलोक्यते । हरिणी

791 (d) S एव for एष.

कृतमपि कृतं नेदं दूति प्रतीहि न मामिय
सहजमलिना देहच्छाया विमुञ्चति वैरिणी ॥१॥

केशवकोलीयनाथोकस्य ।

Srk 832
सरसी

797 मलयजपङ्कलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां
गताः
प्रियवसतिं व्रजन्ति सुखमेव मिथो निरस्त-
भियोभिसारिकाः ॥२॥

बाणस्य ।

शार्दूलविक्रीडित

798 मौलौ मौक्तिकदाम केतकदलं कर्णे स्फुटत्कैरवं
ताडङ्कः करिदन्तजः स्तनतटीकर्पूररेणूत्करा ।
कण्ठो निस्तलतारहारवलयी शुभ्रं तनीयोंशुकं
ज्योत्स्नायामभिसारसंपदमिमां पञ्चेषुरभ्यञ्चति ॥३॥

कस्यचित् ।

आर्या

799 नवधौतधवलवसनाश्चन्द्रिकया सान्द्रया
तिरोगमिताः ।
रमणभवनान्यशङ्कं सर्पन्त्यभिसारिकाः सपदि ॥४॥

कस्यचित् ।

शिखरिणी

800 इतः प्रालेयांशुः प्रलयमकरोत्कैरवकुल
क्लमच्छेदोत्सेकैः किरणनिकरैरेप तमसाम् ।
इतोप्याज्ञावज्ञां सखि न सहते दुःसहतर-
प्रतापः पञ्चेषुस्तदिह शरणं साहसरसः ॥५॥

सुभटस्य ।

६६ दुर्दिनाभिसारिका ।

801 पङ्के नूपुरशिञ्जितस्य गरिमा मग्नः क्वणन्मेखला-
जल्पाकी जघनस्थली जलमुचां नादैर्निषिद्धाधिकम् ।

797 (d) Srk om. मिथो.

दोर्वल्लीवलयांशवश्च शमिताः सौदामिनीविभ्रमै-
र्वर्षारात्रिविभूतिभिस्तव सखि क्षीणोन्तरायः
क्षणात् ॥१॥ शार्दूलविक्रीडित

सुभद्रस्य।

802 असूचीसंचारे तमसि नभसि स्निग्धजलद-
ध्वनिप्राज्ञंमन्ये पतति पृषतानां च निचये।
इदं सौदामन्याः कनकरमणीयं विलसितं
करालम्बं दूरादविनयवतीनां वितनुते ॥२॥ शिखरिणी

तस्यैव।

803 धावति चेतो न तनुर्धाराधौतोधरो हृदि न रागः। आर्या
इह रमणमभिसरन्त्याः स्खलति गतिर्नत्ववष्टम्भः ॥३॥

अमरोः।

804 प्राणेशमभिसरन्ती मुग्धा पथि पङ्किले स्खलन्तीव। Spd. 3612
अवलम्बनाय वारां धारासु करं प्रसारयति ॥४॥ आर्या

धरणीधरस्य।

805 मत्पाणावपसव्यमर्पय करं सव्यं च काञ्च्यां कुरु
प्रोत्कुञ्चाग्रममू निधेहि चरणावुत्पङ्किले वर्त्मनि।
मा पुत्रि त्रस पश्य वर्त्म कतिचिद्विस्फार्य
चक्षुः क्षणा-
न्यावल्लेढि तडिल्लता तत इतः पिण्डावलेह्यं तमः ॥५॥ शार्दूलविक्रीडित

चन्द्रज्योतिषः।

६७ स्वैरिणीप्रलापः।

806 देवो रविर्वा प्रणिपत्य याच्यः
कालक्रमान्मण्डलमागतस्य। उपजाति

804 (a) Spd पथि स्खलन्ती सुपिच्छिले मुग्धा for मुग्धा · स्खलन्तीव. S. om धरणीधरस्य Spd. -anonymous. I. O. reads this verse after 809 below. S. reads it after 806.

परःसहस्राः शरदो विधेया-
स्त्वयातिथेयी मृगलाञ्छनस्य ॥१॥

कस्यचित् ।

उपगीति

807 शीतमधुरमपि गलितं वमति विधुं व्याधिना येन ।
शमयति यस्तं राहोः सखि भिषजस्तस्य दासी
स्याम् ॥२॥

धर्मपालस्य ।

वसन्ततिलक

808 अस्मिन्करीन्द्रकरनिर्गलितारविन्द-
कन्दानुकारिणि चिरं रुचिचक्रवाले ।
कस्मै फलाय कुलटाकुलकोटिहोमं
हंहो मृगाङ्क कुरुषे करुणामपास्य ॥३॥

सुभटस्य ।

शार्दूलविक्रीडित

809 निष्पीयांशुपयः पयोरुहरिपोश्चकुश्चकोरा इमे
यन्नाद्यापि कलङ्कपङ्किलकलाकङ्कालशेषं वपुः ।
सैषा किं कविकल्पना सखि किमु स्वैराङ्गनादुष्कृतै-
रेभ्यः कान्तिकलापपानपटिमव्युत्पत्तिरुद्धा-
सिता ॥४॥

तस्यैव ।

शार्दूलविक्रीडित

810 यन्मृत्युञ्जयमौलिरत्नममृतप्रस्यन्दिसान्द्रच्छवि-
र्ज्यायान्मन्त्रविदां महार्णवमणिश्रेणिसकुल्याग्रणीः ।
प्रेयानोषधिमण्डलस्य वहति क्षीणं वपुर्यः क्षणा-
त्तस्तैते विलसन्ति पुंसि कुलटासत्कर्मणां मूर्तयः ॥५॥

जलचन्द्रस्य ।

807 (a) S, A गिलितं for गलितम्.
808 (d) I. O. मृगाक्षि for मृगाङ्क.
809 (d) I. O. उत्त्रासिता (S उद्भासिता) for उद्वासिता.

६८ स्त्रीरूपम् ।

811 यत्त्रैलोक्यमनोरथस्य परमं पात्रं मनोजन्मना
यच्चास्त्रं हरनिर्जितेन जगतीं जेतुं चिरादर्जितम् ।
यन्मे श्रोत्ररसायनं कथमहो प्राप्तं तदेतन्मया
रूपं लोचनपीयमानविगलल्लावण्यपूरं वपुः ॥१॥ शार्दूलविक्रीडित

कालिदासस्य ।

812 दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ॥२॥

Dr. under IV. 48
S. D. under III. 16
M. II. 3

तस्यैव । शार्दूलविक्रीडित

813 बिम्बोष्ठाय नमस्करोति चकिता बन्धूकपुष्पद्युतिः
कार्पण्यं तनुते न किं स्मरधनुर्दीनं भ्रुवोरग्रतः ।
आशां मूर्धभिरुद्वहन्ति कमलान्यक्ष्णोर्मृगाक्ष्याः
स्फुटं
किं चान्यद्वदनस्य धावति पुरो बद्धाञ्जलि-
श्चन्द्रमाः ॥३॥ शार्दूलविक्रीडित

पुरुषोत्तमदेवस्य ।

814 लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः
स्वच्छन्दं वसतो जनस्य हृदये चिन्ताज्वरो निर्मितः । Kuval. p.100

811 (d) Ed., Sp. पुरः for वपुः.

812 (b) Sp., A निविडोद्गत for निविडोन्नत

(c) Dr., M पादावरालाङ्गुली for पादावुदग्राङ्गुली.

(d) M., Dr. स्पष्टं for सृष्टम्.

M. मनसि श्लिष्टं for मनसः सृष्टं.

Srk. 454 एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता
शार्दूलविक्रीडित कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं
तन्वता ॥४॥
धर्मकीर्तेः ।

815 लावण्यद्रवकल्पमेव कनकं वक्त्रस्य नीराजना-
पिण्डश्रीः शशभृद्दृगेव नयनद्वन्द्वस्य नीलोत्पलम् ।
शार्दूलविक्रीडित भ्रूवल्लीं किमुदाहरामि यदवच्छेदो धनुर्मान्मथं
तत्पीयूषभुजामरोचकचमत्कारि स्मितं सुभ्रुवः ॥५॥
करञ्जमहादेवस्य ।

६९ भ्रू ।

816 असंगतेनोन्नतिमागतेन
चलेन वक्रेण मलीमसेन ।
उपजाति सा दुर्जनेनेव समस्तमेतं
प्रबाधते भ्रूयुगलेन लोकम् ॥१॥
यज्ञघोषस्य ।

817 अकौसुमी मन्मथचापयष्टि-
रनशुका विभ्रमवैजयन्ती ।
उपजाति ललाटरङ्गाङ्गणनर्तकीयम्
अनङ्गना भ्रूरनुयाति दृष्टिम् ॥२॥
राजशेखरस्य ।

814 (a) Kuval. अर्जित. for स्वीकृत.
(b) Kuval. वरतो for वसतो.
(d) Kuval. तन्वीमिमा for तन्व्यास्तनुम्.

816 (a) Ed. वक्रेण for वक्रेण.
(b) Ed. समस्तमेतत् for समस्तमेतम्.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 521.

818 विरमतु रतिजाने लोलरोलम्बकीट-
व्रणविवरसहस्रक्षुण्णमेतद्धनुस्ते ।
यदिह कुसुमकेतो भ्रूलता कापि यूना-
मुपरि जयपताका सुभ्रु वो विश्वजेत्री ॥३॥

मालिनी

वासुदेवज्योतिष ।

819 इन्दोः कान्तिं जडतरकरान्मत्तनागाद्गतिं वा
त्रस्तान्नेत्रे हरसि हरिणात्तत्र किं नाम चित्रम् ।
एतच्चित्रं पुनरिह जगज्जैत्रकन्दर्पचाप-
श्रीसर्वस्वं यदपहरसि प्रेयसि भ्रूविलासैः ॥४॥

मन्दाक्रान्ता

नान्यदेवस्य ।

820 भ्रूलेखायुगलं भाति तस्याश्चटुलचक्षुषः ।
पत्रद्वयीव हरिता नासावंशस्य निर्गता ॥५॥

Spd. 3297
Smv 53 7
V. c. III. 79

बिल्हणस्य ।

पथ्यावक्त्र

७० नयनम् ।

821 नलिनं मलिनं विवृण्वती
पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते
विदधाते रुचिगर्वदुर्विधम् ॥१॥

N. c. II. 23
Spd. 3301
सुन्दरी

कविपण्डितश्रीहर्षस्य ।

818 (b) S भ्रूणा for व्रण

819 (b) Ed, A नेत्रं for नेत्रे, तच्च for तत्र.

820 (b) Spd वंश (Smv. वशी) विनिर्गता for वंशस्य निर्गता.
A, I O शिल्हणस्य for बिल्हणस्य.

821 Spd., Ed. om. कविपण्डित in the poet's name.

S. D. under VIII. 19
Sik. 391
Smv. 67 13
आर्या

822 निजनयनप्रतिबिम्बैरम्बुनि
बहुशः प्रतारिता कापि ।
नीलोत्पलेपि विमृशति
करमर्पयितुं कुसुमलावी ॥२॥
धरणीधरस्य ।

वसन्ततिलक

823 नीराजयामि नयने तव यन्मृषोद्य-
मिन्दीवरैः सममबद्धमुखाः करं ते ।
अद्यापि शाम्यति न ते बत पार्वणेन्दु-
बिम्बोपमा सखि मुखाम्बुजकिंवदन्ती ॥३॥
पीताम्बरस्य ।

अनुष्टुप्

824 अक्षिभ्यां कृष्णशाराभ्यामस्याः कर्णौ न बाधितौ ।
शङ्के कनकताडङ्कपाशत्रासवशादिव ॥४॥
वङ्गालस्य ।

V c. viii. 73
अनुष्टुप्

825 मृगीसम्बन्धिनी दृष्टिरसौ यदि न सुभ्रुवः ।
धावति श्रवणोत्तंसलीलादूर्वाङ्कुरे कुतः ॥५॥
बिल्हणस्य ।

७१ कर्णः ।

वसन्ततिलक

826 त्यक्तादरो धनुषि सौमनसे वरोरु
नीराजितः सुतनु नैष निजैः पृषत्कैः ।
बध्नन्नभून्नयनकालमृगानिदानीं
त्वत्कर्णपाशयुगवागुरिको मनोभूः ॥१॥
गोपीकस्य ।

पुष्पिताग्रा

827 अहह किमधुना मुधैव बध्ना-
स्यनुचितकारिणि कर्णदन्तपत्रम् ।

822 (b) Smv. सद्योत्पले for नीलोत्पले, पुरः पत्युः for कुसुमलावी.
Smv. गीयिधोयिकविराजयोः for धरणीधरस्य.

825 A, I. O., शिल्हणस्य for बिल्हणस्य.

ननु तव चटुलभ्रु कर्णपालि-
र्भुवनविलोचनकालसारपाशः ॥२॥

तस्यैव ।

828 किं पत्रभङ्गरुचिजालमिदं कपोले
त्वत्कर्णयोः सुदति सारित एष पाशः । वसन्ततिलक
कश्चित्त्ववत्यपि किमुत्पतितो नितम्बां-
स्तन्मध्यदेशदवमीक्षणकालसारः ॥३॥

तस्यैव ।

829 स्मरशरधिनिकाशं कर्णपाशं कृशाङ्गी
रयविगलितताडीपत्रताडङ्कमेकम् । Srk. 524
वहति हृदयचोरं कुङ्कुमन्यासगौरं मालिनी
वलयितमिव नालं लोचनेन्दीवरस्य ॥४॥

कस्यचित् ।

830 संभोगभ्रष्टताडङ्कः कर्णस्तस्या विराजते । अनुष्टुप्
नेत्रनीलोत्पलस्येव नालकं द्विगुणीकृतम् ॥५॥

विक्रमादित्यकालिदासयोः ।

७२ अधरः ।

831 अयमक्षुण्णकान्तश्रीरधरो हरिणीदृशः ।
प्रवालपद्मरागादेरुपरि प्रतिगर्जति ॥१॥ अनुष्टुप्

धर्माशोकदत्तस्य ।

828 (c) Sp. कश्चित्तुरत्यपि(?) for कश्चि...पि.
829 (a) Srk. सकाशं for निकाशं
(c) I. O. घोरं for गौरम्.
Ed. कस्यापि for कस्यचित्.
830 (a) Ed. एष for भ्रष्ट ; तस्य for तस्या..

832 अभिनवजवापुष्पस्पर्धी तवाधरपल्लवो
हसितकुसुमोन्मेषच्छायादृरच्छुरितान्तरः ।
हरिणी नयनमधुपश्रेणीं यूनामनारतमाहरं-
स्तरुणि तनुते तारुण्यश्रीर्विलासवतंसताम् ॥२॥

जलचन्द्रस्य ।

833 अयं ते विद्रुमच्छायो मरुदेश इवाधरः ।
Srk. 492 करोति कस्य नो मुग्धे पिपासातरलं मनः ॥३॥
अनुष्टुप्

कस्यचित् ।

834 विभाति विम्बाधरवल्लिरस्याः
स्मरस्य वन्धूकधनुर्लतेव ।
उपजाति विनापि बाणेन गुणेन येयं
यूनां मनांसि प्रसभं भिनत्ति ॥४॥

जयदेवस्य ।

835 स्याद्बन्धुजीवनिवहैर्यदि पञ्चबाण-
चापश्चलत्कुसुमकेशरचामराङ्कः ।
वसन्ततिलक स्यादेव तेन तुलना तरुणि त्वदीय-
विम्बाधरस्य मधुरस्मितभावितस्य ॥५॥

शङ्करदेवस्य ।

७३ वदनम् ।

836 यदपि विबुधैः सिन्धोरन्तः कथंचिदुपार्जितं
Srk. 401 तदपि सकलं चारुस्त्रीणां मुखेषु विभाव्यते ।

832 (a) Ed. जपा for जवा.
(b) I. O. द्रवितान्तरः for दुरितान्तर·
833 (a) Srk मार्ग for देश.
(b) Srk. बाले for मुग्धे. Ed., Srk पिपासाकुलित for ०तरलम्
The verse has been quoted by Aufrecht in ZDMG, 36, p. 550.
835 (c) I. O. तव वै for तरुणि.
836 (b) Ed. विलोक्यते for विभाव्यते.

सुरसुमनसः श्वासामोदे शशी च कपोलयो- Smv. 53.31
रमृतमधरे तिर्यग्भूते विषं च विलोचने ॥१॥ हरिणी

लक्ष्मीधरस्य ।

837 जनानन्दश्चन्द्रो भवतु न कथं नाम सुकृती
प्रयातोवस्थाभिस्तिसृभिरपि यः कोटिमियतीम् । Smv. 53 33
भ्रुवोर्लीलां वालः श्रियमलिकपट्टस्य तरुणो शिखरिणी
मुखेन्दोः सर्वस्वं हरति हरिणाक्ष्याः परिणतः ॥२॥

मुरारेः ।

838 तपस्यतीव शीतांशुस्त्वन्मुखेन्दुजिगीषया । Srk. 460
कृशः शम्भुजटाजूटतटिनीतटमाश्रितः ॥३॥ अनुष्टुप्

कस्यचित् ।

839 प्रत्यासन्नविदूरवर्तिविषयेमुष्मिन् द्विचन्द्रभ्रमे
मुख्या चन्द्रमतिर्मुखे तव निरालम्बैव तु व्योमनि । शार्दूलविक्रीडित
भङ्क्त्वासौ हरिणः सदा जनभयात्तत्रैव लीनः प्रिये
नैवं चेत्कथमेव यस्य जठरे तस्यैव लोले दृशौ ॥४॥

शब्दार्णवस्य ।

840 कोषः स्फीततर. स्थितानि परित. पत्राणि दुर्गं जलं Sv 1523
मैत्रं मण्डलमुज्ज्वलं चिरमधोनीतास्तथा कण्टकाः । Srk 445

836 (d) Ed. अधरं for अधरे.

Smv. भासस्य for लक्ष्मीधरस्य

837 (a) Smv. भवति for भवतु

838 (a) Srk. चन्द्रोयं for शीतांशुः.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 552.

839 (a) S, A विषमे for विषये.

(c) A, S अत्रैव for तत्रैव.

(d) Sp. अस्य for एव. अस्य for यस्य.

840 (b) Spd. मित्रैः for मैत्रं.

Spd. 3322 इत्याकृष्टशिलीमुखेन रचनां कृत्वा तदत्यद्भुतं
शार्दूलविक्रीडित यत्पद्मेन जिगीषुणापि न जितं
मुग्धे तवेदं मुखम् ॥५॥
कस्यचित् ।

७४ वचनम् ।

841 कलक्वाणे वीणे विरम रणितात्कोकिलसखे
शिखरिणी सखेदो माभूस्त्वं द्रुहिणविहितस्ते परिभवः ।
सुधे मुञ्च स्पर्धामधरमधुसंसर्गसरसाः
स्फुटन्त्येता वाचः किमपि कमनीया मृगदृशः ॥१॥
सूर्यधरस्य ।

842 नैवोदञ्चय पञ्चमं पिकरुतं मा शारिके सारय
त्वं धीरो भव कीर वल्लकिवरात्तन्त्रीमतन्त्रीं कुरु ।
शार्दूलविक्रीडित उन्मीलद्युवभावसंभृतरसप्रत्युन्मिपद्वक्रिम-
प्रक्रान्तसितकौमुदीसहभुवो
वाचः श्रुताः सुभ्रुवः ॥२॥
सेन्दुभस्य ।

843 तिर्यक्कयैव परपुष्टवधूरपास्ता
वसन्ततिलक वीणाप्यमानुपगुणा गणना कुतोऽस्याः ।
वाचां न किंचिदनुकारि मृगायताक्ष्या
माधुर्यसीमनि सुधां पुनरालिखामि ॥३॥
कालिदासनन्दिनः ।

840 (c) Sv. अप्यद्भुतं for अत्यद्भुतम्.
(d) Sv., Srk, Spd. त्वदीयं for तवेदं.
Spd., Sv. विज्जकायाः for कस्यचित्.

842 Ed. सिन्दूभस्य (Sp. सिन्दुभस्य) for सेन्दुभस्य.

844 तन्व्या मनोज्ञस्वरनैपुणेन
विनिर्जितो रोषविलोहिताक्ष । Jh. VII. 17
प्रसक्तचित्ताहितमन्युपुष्ट उपजाति
शोकेन कार्ष्ण्यं वहतीति मन्ये ॥४॥

कुमारदासस्य ।

845 शिरीषपुष्पादपि कोमलाया
वेधा विधायाङ्गमशेषमस्याः । Nc. VII. 47
प्राप्तप्रकर्षः सुकुमारसर्गे उपजाति
समापयद्वाचि मृदुत्वतत्त्वम् ॥५॥

कविपण्डितश्रीहर्षस्य ।

७५ बाहुः ।

846 इमां विधातुं भुजवल्लिमुज्ज्वलां वंशस्थविल
गृहीतसारं विधिना नतभ्रुवः ।
कठोरभावप्रियमेव केवलं
मृणालमन्तस्तरलं कुतोऽन्यथा ॥१॥

दूनोकस्य ।

847 किं स्यात्फलं स्फुटमधूकमयेन दाम्ना
का वार्थिता विकचचम्पकमालया मे । वसन्ततिलक
धिक्तां च काञ्चनसरोजमृणालनालां
लीलाभुवो भुजलता ललितास्तु सैव ॥२॥

कविकुसुमस्य ।

844 (c) Jh. चिन्ताहितम् for चित्ताहितम्.
845 (a) Nc. कोशात् for पुष्पात्.
(b) Nc. मुद्राम् for तत्त्वम्.
Sp om. कविपण्डित.
846 (c) A. S. कठोरभावाश्रयमेव for कठोर °मेव.
I. O. दुलोकस्य(?) for दूनोकस्य.
847 (d) S, I. O., A लीलाभुजो for °भुवो.

Sv. 1529 848 दयिता बाहुपाशस्य कुतोयमपरो विधिः ।
Spd. 3330 जीवयत्यर्पितः कण्ठे मारयत्यपवर्जितः ॥३॥
Smv. 53.40
अनुष्टुप् कश्मीरकश्यामलस्य ।

849 सरले एव दोर्लेखे यदि चञ्चलचक्षुषः ।
V. c. viii. 64 अमुग्धाभ्यो मृणालीभ्यः कथमाजहतुः श्रियम् ॥४॥
अनुष्टुप् बिल्हणस्य ।

850 बाहू तस्याः कुचाभोगनिषिद्धान्योन्यदर्शनौ ।
V. c. viii. 66 मन्त्रितं कथमेताभ्यां मृणालीकीर्तिलुण्ठनम् ॥५॥
अनुष्टुप् तस्यैव ।

७६ स्तनः ।

851 एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-
Sik 1664 प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
Kp. 142 तत्पल्लीपतिपुत्रि कुञ्जरकुलं जीवाभयाभ्यर्थना
शार्दूलविक्रीडित दीनं त्वामनुनाथति स्तनयुगं पत्रावृतं मा कृथा ॥१॥
वल्लणस्य ।

852 विलसतु फलजातं चारु हृद्यं तरूणां
तरुणि न पदवीं तद्यास्यति श्रीफलस्य ।
मालिनी असमनिजमहिम्ना येन ते तन्वि तुङ्ग-
स्तनयुगलजिगीषा साहसेनार्जिता श्रीः ॥२॥
तालहडीयदङ्कस्य ।

848 Sv. कलशकस्य (Spd. भासस्य, Smv. शकवृद्धे) for कश्मीरकश्यामलस्य.

849 A, I. O. शिल्हणस्य for बिल्हणस्य.

851 (a) S, I. O., Kp पाण्डर for पाण्डुर

(c) Ed , Kp. कुम्भा० far जीवा०.

(d) Kp., Srk. कुच for स्तन.

" Ed., Srk. पत्रांशुकैर्मा पिधा. for पत्रा...कृथा°.

852 (a) A, S स्वादु for चारु.

(d) Ed. कलश for युगल.

Ed. रङ्क for दङ्क in the poet's name.

853 अयं लोलन्मुक्तावलिकिरणमालापरिकरः
स्फुटस्येन्दोर्लक्ष्मीं क्षपयितुमलं मन्मथसुहृत्। Srk. 472
विशालः श्यामाया. स्थगितघननीलांशुकवृत. शिखरिणी
स्तनाभोगः स्विद्यन्मसृणघुसृणालेपसुभगः ॥३॥
मनोविनोदकृतः।

854 सजन्मानौ तुल्यावपि जनितुराजन्म च सह
प्रवृद्धौ नाम्ना च स्तन इति समानावुदयिनौ। Srk. 429
मिथः सीमामात्रे यदिदमनयोर्मण्डलभृतो- शिखरिणी
रपि स्पर्धा नूनं तदिह हि नमस्या कठिनता ॥४॥
राजशेखरस्य।

855 उद्भूतं किमिदं मनोभवनृप क्रीडारविन्दद्वयं
तत्सूतिः कथमेकतस्तनुवसद्रोमावलीनालतः।
चक्रद्वन्द्वमपि क्षमं तदपि किं स्थातुं मुखेन्दोः पुरो शार्दूलविक्रीडित
लावण्याम्बुधिमग्नयौवनगजस्यावैमि कुम्भद्वयम् ॥५॥
कस्यचित्।

७७ रोमावली।

856 रोमावली कनकचम्पकदामगौर्या Srk. 394
लक्ष्मीं तनोति नवयौवनसंभृतश्रीः। वसन्ततिलक

853 (b) Ed. drops मन्मथसुहृत्.
(c) Srk. स्खलित for स्थगित, वृतिः for वृत॰.
(d) Srk. स्निह्यन् for स्विद्यन्.
Srk मनोविनोदस्य for मनोविनोदकृत..

854 (a) Srk. अभिजनभुवा for अपि जनितुः.
(c) Srk. मण्डलवतो for मण्डलभृतो..
(d) Srk. युद्ध for नूनं, नमस्य कठिनिमा for नमस्या कठिनता
Srk. भावकदेव्या॰ for राजशेखरस्य.

856 (c) I. O. बद्ध for लब्ध.

त्रैलोक्यलब्धविजयस्य मनोभवस्य
सौवर्णपट्टलिखितेव जयप्रशस्तिः ॥१॥

कस्यचित् ।

857 रोमावली सत्रिवली तरङ्ग-
नाभीह्रदस्योपरि राजतेस्याः ।
उपजाति
मुखेन्दुभीतस्तनचक्रवाक-
वक्त्रच्युता शैवलमञ्जरीव ॥२॥

धोयीकस्य ।

858 दग्धे मनोभवतरौ बाला कुचकुम्भसंभृतैरमृतैः ।
आर्या
त्रिवलीकृतालबाला जाता रोमावलीवल्ली ॥३॥

भासस्य ।

859 उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
Sv. 1354
शार्दूलविक्रीडित
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं
रोमावली केन मे ॥४॥

कस्यचित् ।

860 हरति रतिपतेर्नितम्बबिम्ब-
स्तनतटचंक्रमसंक्रमस्य लक्ष्मीम् ।
पुष्पिताग्रा
त्रिवलिभवतरङ्गनिम्ननाभी-
ह्रदपदवीमधिरोमराजिरस्याः ॥५॥

जयदेवस्य ।

७८ मध्यम् ।

861 निहिता मणिमेखला नितम्बे
मालभारिणी
तरला हारलता कुचद्वये च ।

858 Quoted by Aufrecht in ZDMG, 36, p. 371, with तनौ for तरौ.

अनयाहमलंकृतो न कस्मा-
दिति तस्यास्तनुतामियाय मध्यम् ॥१॥
कुञ्जस्य ।

862 अहं तनीयानतिकोमलश्च
स्तनद्वयं वोढुमलं न तावत् । उपेन्द्रवज्रा
इतीव तत्संवहनार्थमस्या
वलित्रयं पुष्यति मध्यभागः ॥२॥
धोयीकस्य ।

863 लावण्यपुण्यसलिलौघमहार्घतीर्थे
तस्या वलित्रय तरङ्गिणि मध्यदेशे । वसन्ततिलक
निर्वाणमृच्छति मनः सहजैकतान-
मस्मिन्मुहुः किमनुभावयतीव दृष्टिः ॥३॥
हरेः ।

864 तनुत्वरमणीयस्य मध्यस्य च भुजस्य च । S K. II. 159
अभवन्नितरां तस्या वलयः कान्तिवर्द्धये ॥४॥ Smv. 53 64
कस्यचित् । अनुष्टुप्

865 कुचकलशमहिम्ना श्रोणिभारप्रथिम्ना
विहितनिविडपीडास्तां द्वयीमुद्विषन्तः । मालिनी
चिरमुदरतरङ्गश्रेणिमार्गेण यासां
भ्रुकुटिमिव वहन्ति क्रोधतो मध्यभागाः ॥५॥
राजशेखरस्य ।

861 (d) Ed. मध्यः for मध्यम्
863 (b) Ed. भागे for देशे.
(c) S, I O. सहसैकतान for सहजैकतान.
864 (b) Smv अस्या for तस्या.
865 (d) Ed., I. O. वहन्ते for वहन्ति.

७९ नायिकाक्रीडनम् ।

866 अमन्दमणिनूपुरप्रचुरचारुचारक्रमं
Srk. 526 झणज्झणितमेखलास्खलिततारहारच्छटम् ।
Vsb. II. 6 इदं तरलकङ्कणावलिविशेषवाचालितं
Smv. 66 6 मनो हरति सुभ्रुवः किमपि कन्दुकक्रीडितम् ॥१॥
पृथ्वी
राजशेखरस्य ।

867 अस्याः स्वेदाम्बुबिन्दुच्युततिलकतया व्यक्तवक्त्रेन्दु-कान्तेः
पर्यायात्कन्दुकस्य ग्रहणनगणना केलि-
Vsb. II. 8 वाचालितायाः ।
स्रग्धरा उत्पातोत्तालतालक्रमनमितदृशस्ताडनोत्तालताली-
लीलाख्या मौनिताः स्मः प्रतिपदममुना कन्दुक-क्रीडितेन ॥२॥
तस्यैव ।

868 चेलाञ्चलेन चलहारलताप्रकाण्डै-
र्वेणीगुणेन च बलाद्वलयीकृतेन ।

866 (a) Vsb., Srk., Smv. क्वणन for प्रचुर. S, I. O, Srk., Sp. चारी for चार.
(b) S, I. O. झणिति for झणित. Vsb., Smv. मेखलं for मेखला, Ed. छद्म् for छटम्.

Smv.-anonymous.

867 (b) Vsb. वारं वारेण वेगग्रहणननटना for पर्यायात्...गणना.
(c) S, I. O. तत्पातो० for उत्पातो० Vsb. तत्पातोत्पाततानोन्नतविनत for उत्...नमित. I. O. उत्तान for उत्ताल. Vsb. लीला for ताली.
(d) Vb लालित्याच्छन्दिताः for लीलाख्या मौनिताः.

868 (a) Ed. drops all the words excepting काण्डै. I. O. reads चेलाञ्चलेन हारलताप्र.

स्वेच्छाहितभ्रमरकभ्रमिमण्डलीभि- Vsb. II. 9
रन्यं रसं रचयतीव चिरं नतभ्रूः ॥३॥ Sık. 528
वसन्ततिलक
तस्यैव ।

869 शिखामणिरितोरुणस्तिलकयत्ययं मेदिनी-
मितो गलितगुम्फनास्तरलवेणिवान्ताः स्रजः । Vsb. II. 13
इतश्छुरितमन्तरा त्रुटितहारमुक्ताफलै-
रितः श्रवणपाशतः कमलपत्रमास्ते च्युतम् ॥४॥ पृथ्वी
तस्यैव ।

870 च्युतकर्णशिरोरुहावतंसै-
र्निविडस्वेदजलार्द्रगण्डलेखैः । मालभारिणी
असकृन्मणिकुट्टिमोदरे सा
दिवसं कन्दुककेलिभिर्निनाय ॥५॥
मुञ्जस्य ।

८० अनुकूलनायकः ।

871 सदा चाटूञ्जल्पन् सततमुपहारार्पितमना
मुखं पश्यन्नित्यं सततमविभिन्नाञ्जलिपुटः । शिखरिणी
अनिच्छन्निच्छन्वा क्षणमपि न पार्श्वं त्यजति यः
स किं कामी स्त्रीणामयमशरणो भृत्यपुरुषः ॥१॥
श्रीमल्लक्ष्मणसेनदेवस्य ।

868 (c) Vsb., Srk. हला for स्वेच्छा. Sık. भ्रम for भ्रमि.
(d) Vsb. चक्रतयं (Srk. छलतयं) for अन्यं रसं.

869 (b) Ed. गलति for गलित, गुम्फनात्तरल for गुम्फनास्तरल, drops the portion वेणि···स्रजः.
(c) Ed. drops इत · त्रु.
(d) Vsb. तलज for कमल.

870 (a) Sp. सरोरुहा for शिरोरुहा.

871 Ed. omits देव in the name of the poet.

S. K. III. 42
Sv. 1346
Srk. 481
शार्दूलविक्रीडित

872 सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
सा क्रान्ता जघनस्थलेन गुरुणा गन्तु न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स इत्यद्भुतम् ॥२॥

अमरोः ।

Smv. 85.1

873 सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधे
साङ्गीकृतो भगवता मकरध्वजेन ॥३॥

तस्यैव ।

वसन्ततिलक
Vik. III. 47

874 सामन्तमौलिमणिरञ्जितपादपीठ-
मेकातपत्रमवनेर्न तथाधिपत्यम् ।
अस्याः सखे चरणयोरहमद्य कान्त-
माज्ञाकरत्वमधिगम्य यथा कृतार्थः ॥४॥

कस्यचित् ।

872 (a) S. K. वयसः (Sv. वचस·) for मनस·.
(b) Sv. भरं for युगं.
(b-c) Srk. transposes these lines.
(d) Sv. समाश्रयैः (A, Sk. जनाश्रयैः) for जनाश्रितं.
This is a doubtful verse of Amaru. (See S. K. De, *Our Heritaga*, ii, p. 70).

873 (a) Smv. मदलालसेन for मदनालसेन.
(b) Ed. प्रणयापराधात् for ०धे. Smv प्रणयात्तत्कोपान्नोपेक्षितो for प्रणया...कृतो.
This is doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 71).

874 (b) Ed. तथा प्रभुत्वम् for तथाधिपत्यम्.

875 हारो यत्र व्यवधिरचना त्वं तु येनापराधो(?)
रोमोद्भेदोऽप्यशिथिलतरालिङ्गनेष्वन्तरायः। 　　मन्दाक्रान्ता
यस्मिन्वाञ्छा विरमति मिथो नार्धनारीश्वरत्वे
तद्दाम्पत्यं विभजतु कथंकारमन्या मृगाक्षी ॥५॥
गोवर्धनस्य।

८१ दक्षिणनायकः।

876 सैवास्य प्रणतिस्तदेव वचनं ता एव केलिक्रिया-
भीतिः सैव तदेव नर्ममधुरं पूर्वानुरागोचितम्। 　　शार्दूलविक्रीडित
कान्तस्याप्रियकारिणीति भवती तं वक्ति दोषाविलं
किं स्यादित्थमहर्निशं सखि
मनो दोलायते चिन्तया ॥१॥
रुद्रटस्य।

877 स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु- 　　S K V. 364
र्द्यूतै रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च। 　　Dr. under II. 7
इत्यन्तःपुरसुन्दरीभिरसकृद्विज्ञापितेन क्रमा- 　　Sd. under III. 42
द्देवेनाप्रतिपत्तिमूढमनसा द्वित्राः 　　शार्दूलविक्रीडित
स्थितं नाडिकाः ॥२॥
कस्यचित्।

878 रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।

876 (a) A तत्रैव for ता एव.

877 (a) S, I O कुण्डलेश्वर for कुन्तलेश्वर.

(b) Dr द्यूते for द्यूतै.

(c) Dr, S. K., S. D. सुन्दरी॰ प्रति मया विज्ञाय विज्ञापिते for सुन्दरी॰ ॰क्रमात्.

878 (b) Smv. शय्योपान्त for शय्याप्रान्त.

Smv. 42.6
Śak. VI 5
शार्दूलविक्रीडित

दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति
व व्रीडाविलक्षश्चिरम् ॥३॥
कालिदासस्य ।

हरिणी

879 प्रणयि वचनं दीना दृष्टिः शिरोनिहितोऽञ्जलि-
श्चरणपतनं देव्याः सन्ति प्रसादनहेतवः ।
कुसुमविशिखज्वालातापस्फुटन्मृदुमानसा
वरतनुरसौ येन प्राप्या स एव तु नास्ति मे ॥४॥
उमापतिधरस्य ।

अनुष्टुप्

880 वाच परं भजन्त्येता देवि प्रणयचातुरीम् ।
हृदयस्य तु सर्वस्वं त्वमेवैकप्रिया मम ॥५॥
तस्यैव ।

८२ शठनायकः ।

Sv. 2069
Spd. 3575
Srk. 603
शार्दूलविक्रीडित

881 दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलात् ।
ईषद्वक्रिमकन्धरः सपुलकः स्वेदोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकं धूर्तोऽपरां चुम्बति ॥१॥
अमरोः ।

878 (d) Smv. गोत्रेभ्य· for गोत्रेषु, तथा for तदा, व्रीडावनम्र for व्रीडाविलक्ष·

881 (b) Sv., Sp., Spd. निमील्य for पिधाय. Ed., Spd., Srk.. छल· for छलात्.

(c) Spd., Sv. तिर्यक् for ईषत्. Spd., Ed. वक्रित (Sv. वर्तित, Sp. विक्रम) for वक्रिम, प्रेमोल्लसन् (also Sv.) for स्वेदोल्लसन्. Sv. मानसः for मानसा. Srk. reads the line thus—तिर्यग्वर्तित-कन्धरा सपुलकस्वेदोद्गमोत्कम्पिनीम्.

(d) सान्तः for अन्तः, फलको (Spd फलकां) for फलकं. Srk. चलत् for लसत्.

882 कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं | As. 9
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः । | Sv. 1351
भूयो मैवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं | Smv. 85.3
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥२॥ | शार्दूलविक्रीडित

तस्यैव ।

883 एकप्रियाचरणपद्मपरीष्टिजात-
क्लेशस्य मे हृदयमुत्तरलीचकार । | वसन्ततिलक
उद्भिन्ननिर्भरमनोभवभावमुग्ध-
नानाङ्गनावदनचन्द्रमसां दिदृक्षा ॥३॥

लक्ष्मणसेनदेवस्य ।

884 कोपात्किंचिदुपानतोपि रभसादाकृष्य केशेष्वलं
नीत्वा मोहनमन्दिरं दयितया हारेण बद्ध्वा दृढम् । | Spd. 3567
भूयो यास्यसि तद्गृहानिति मुहुः कण्ठार्धरुद्धाक्षरं | Smv. 85.2
जल्पन्त्या श्रवणोत्पलेन सुकृती | शार्दूलविक्रीडित

कश्चिद्रहस्ताड्यते ॥४॥

885 सा बाढं भवतेक्षितेति निविडं संयम्य बाह्वोः स्रजा
भूयो द्रक्ष्यसि तां शठेति परुषं संतर्ज्य संतर्ज्य च । | शार्दूलविक्रीडित
आलीनां पुर एव निह्नुतिपरः कोपाद्रणन्नूपुरं
मानिन्याश्चरणप्रहारविधिना प्रेयानशोकीकृतः ॥५॥

कस्यचित् ।

882 (b) Ed., As. केलि for वास. Smv. मोहनमन्दिरं for वासनिकेतनं.
Srk..—anonymous.
Sv. तासा (Smv. स्वैरं) for सायं.

(c) Sv., S, I. O, Smv. नैवं for मैवं. As. भूयोऽप्येवम् for भूयो मैवम् Sv. पदं for गिरा. A, I. O. Sv.—anonymous. संश्राव्य for ससूच्य.

883 Ed. omits देव in the poet's name.

884 Spd., Smv. attribute it to रुद्र.

885 (d) S, I. O. मानिन्या for मानिन्याः.

८३ धृष्टनायकः ।

886 शतं वारानुक्तः प्रियसखि वचोभिः स परुषैः
S. K. IV. 180 सहस्रं निर्धूतश्चरणपतितः पार्ष्णिहतिभिः ।
V. 371 कियत्कृत्वो बद्धा. पुनरिह न वेद्मि भ्रुकुटय-
शिखरिणी स्तथापि क्लिश्यन्मां क्षणमपि न धृष्टो रहयति ॥१॥

कस्यचित् ।

887 वाचो वाग्मिनि किं तवाद्य
परुषाः सुभ्रु भ्रुवोर्विभ्रमै-
Spd. 3579 र्विश्रान्तं कुत एव लोलनयने किं लोहिते लोचने ।
Smv. 58.6 स्वेदः किं नु घनस्तनि स्तनतटे मुक्ताफलानां तुलां
शार्दूलविक्रीडित धत्ते मुञ्च रुषं ममात्र दयिते
लेशोपि नास्त्यागसः ॥२॥

कस्यचित् ।

888 जल्पन्त्याः परुषं रुषा मम बलाच्चुम्बत्यसावाननं
मृद्नात्याशु करं करेण बहुशः संताड्यमानोपि सन् ।
शार्दूलविक्रीडित आलीनां पुरतो दधाति शिरसा पादप्रहारांस्ततो
नो जाने सखि साम्प्रतं
प्रणयिने कुप्यामि तस्मै कथम् ॥३॥

रुद्रटस्य ।

886 (b) S. K. पदनिपतितः for चरणपतित

(d) S. K. विरमति for रहयति.

887 (a) Spd., Smv. विभ्रमो for विभ्रमैः.

(b) Smv. Spd. प्युद्भ्रान्त कृत एष for विश्रान्तं···एव.

Ed. शून्ये न किं for किं लोहिते.

(c-d) Spd. Smv. read—नास्त्यागो मपि किं मुधैव कुपितेत्युक्ते पुरः प्रेयसा । मानिन्या जलबिन्दुदन्तुरपुटा दृष्टिः सखीष्वाहिता ।

Smv., Spd. attribute the verse to रुद्र.

889 दृष्टा मुष्टिभिराहता हृदि नखैराचोटिता पार्श्वयो-
राकृष्टा कबरीषु गाढमधरे शीत्कुर्वती खण्डिता ।
त्वत्कृत्यं त्वदगोचरेपि हि कृतं सर्वं मयैवाधुना
मामाज्ञापय किं करोमि
सरले भूयः सपत्नयास्तव ॥४॥
कस्यचित् ।

Srk. 677
शार्दूलविक्रीडित

890 दासे कृतागसि भवेदुचितः प्रभूणां
पादप्रहार इति मानिनि नातिदूये ।
उद्यत्कठोरपुलकांकुरकण्टकाग्रै-
र्यद्भिद्यते पदमिदं तव सा व्यथा मे ॥५॥
सत्यबोधस्य ।

S. d. under X. 46
Spd. 3657
Smv. 57.11
वसन्ततिलक

८४ ग्राम्यनायकः ।

891 स्वैरं कीकटदारकः परिसरे गुन्द्रालतोपाहित-
त्वङ्क्षर्चरको विरूढलशुनश्यामः परिक्रामति ।
विश्रान्तं मुषलैः स्थितं तितउभिर्विश्रब्धमम्भोघटै-
र्निर्वाणं ज्वलनैर्मुखैर्विवलितं ग्रामेयिकाणां पुरः ॥१॥
योगेश्वरस्य ।

शार्दूलविक्रीडित

890 (a) S. D. भवति for भवेत्.
(b) Smv., S. D. सुन्दरि for मानिनि. S, I. O, S. D. नात्र (Spd. Smv. नास्मि) for नाति.
(c) Spd. पुलकाङ्कित for पुलकाकुर.
(d) Sp., A, S, Smv. खिद्यते for भिद्यते. Ed., Spd., Smv. तव पदं ननु (S. D. मृदुपदं ननु) for पद……तव.

Spd.—anonymous.
Smv. attributes it to मुञ्ज.

आर्या

892 धावति तरुमारोहति कूपं लङ्घयति शकटमुत्क्षिपति।
तिनवति तिनवति गायति
दृष्ट्वा परयोषितं षिङ्गः ॥२॥

तस्यैव।

शार्दूलविक्रीडित

893 व्रीहिः स्तम्बकरिः प्रभूतपयसः प्रत्यागता धेनवः
प्रत्युज्जीवितभिक्षुणा भृशमिति ध्यायन्नपेतान्यधीः।
सान्द्रोशीरकुटुम्बिनीस्तनभरव्यालुप्तघर्मक्लमो
देवे नीरमुदारमुज्झति सुखं शेते निशाग्रामणी' ॥३॥

तस्यैव।

आर्या

894 परिचुम्बनाय घटते पामरमिथुनं निशासु चैत्रीषु।
कवलितपलाण्डुपरिमलसंवल-
दन्योन्यनिःश्वासम् ॥४॥

शुभाङ्कस्य।

Srk. 511
शार्दूलविक्रीडित

895 व्यावृत्त्या शिथिलीकरोति वसनं जाग्रत्यपि व्रीडया
स्वप्नभ्रान्तिपरिप्लुतेन मनसा गाढं समालिङ्गति।
दत्त्वाङ्गं स्वपिति प्रियस्य रतये व्याजेन निद्रां गता
तन्व्यङ्ग्या विफलं विचेष्टितमभूद्भावानभिज्ञे
जने ॥५॥

अमरोः।

८५ मानिनायकः।

शिखरिणी

896 स्मृतिस्वप्नावाप्तत्वदखिलविलासैकमनसा
तया तावत्तादृक् त्वदनुनययत्नः शिथिलितः।
अयं तु द्रष्टव्यस्तव सुभग गर्वस्य गरिमा
स्मृतौ वा स्वप्ने वा यदि भवसि वामः कथमपि ॥१॥

कस्यचित्।

893 (d) Ed. निशा for निशा.
894 S, I. O. शुभाङ्गस्य for शुभाङ्कस्य.
895 (b) I. O. सुप्त for स्वप्न.
(d) Srk. अहो for अभूत्.

897 चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा कलुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निपातिता ॥२॥

As. 19
हरिणी

अमरोः ।

898 विरहविषमः कामो वामः करोति तनुं तनुं
दिवसगणनादक्षश्चायं व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥३॥

As. 56
Sv. 1633
Spd. 3572
हरिणी

तस्यैव ।

899 कृत्वा नूपुरमूकतां चरणयोः संयम्य नीवीमणी-
नुद्दामध्वनिपण्डितान्परिजने किंचिच्च निद्रायति ।
तस्मिन्कुप्यति यावदस्मि चलिता तावद्विधिप्रेरितः
काश्मीरीकुचकुम्भविभ्रमकरः
शीतांशुरभ्युद्गतः ॥४॥

Smv 70 13
Srk. 834
शार्दूलविक्रीडित

कस्यचित् ।

897 (b) As. उक्ते for उक्त्वा. Ed As. परुषीकृते for कलुषीकृते
(c) As. स्तनाहित for स्तनस्थित
(d) Ed. निवेशिता for निपातिता.

898 (a) Sv. transposes कामः and वाम., करोतु for करोति. As. तनुं. कुरुते for करोति तनुं.
(b) A गणनापेक्ष for ०दक्ष. Sv. असौ for अयं
Spd., Sv. ascribe it to शीलाभट्टारिका.

899 (b) Smv., Srk. निद्रायिते for निद्रायति
(c) Sp कस्मै for तस्मिन्. कस्मात् कुप्यसि (Srk. कस्मै कुप्यसि) for तस्मिन् कुप्यति.
(d) Srk. सम्भ्रम for विभ्रम. S, Srk, I. O, A हरः (Sp. हृत., Smv. धरः) for कर. Smv. अभ्युद्यतः for अभ्युद्गत..
Smv. attributes it to काश्मीरीबिल्हण.

Sv 1635
Spd. 3574
शार्दूलविक्रीडित

900 मुक्तो मानपरिग्रहः सह सखीसार्थेन तन्मन्त्रिणा
शक्ता त्वच्चरणप्रसादरहिता नाहं क्षणं प्राणितुम्।
पश्य त्वं कृशकं शरीरकमिदं यां यामवस्थां गतं
सैषाहं तव पादयोर्निपतिता नाथ प्रसीदाधुना ॥५॥

कस्यचित्।

८६ प्रोषित ।

As. 72
Spd. 3445
Srk. 765
शार्दूलविक्रीडित

901 देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथ कान्तेति जानन्नपि।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णां दृशं
तामाशां पथिकस्तथापि
किमपि ध्यायंश्चिरं वीक्षते ॥१॥

अमरोः।

Sv 1192
Spd.3429
अनुष्टुप्

902 हारो नारोपितः कण्ठे मया विश्लेषभीरुणा।
इदानीमावयोर्मध्ये सरित्सागरभूधराः ॥२॥

धर्मपालस्य।

900 (a) Ed. कर्मणा for मन्त्रिणा.

(c) Sv. अगात् for गतम्.

(d) Sv एषा for सैषा.

901 (c) Spd., चरणाव for चरणार्ध. Sp. भृशं for दृशम्. Spd., As प्रोन्मृज्य सास्रे दृशौ for कृत्वा……दृशम्.

(d) Spd., As. मुहुः for चिरं.

Spd.—anonymous. A, Srk. श्रीहर्षस्य अमरोः (Ed. अमरोः. श्रीहर्षस्य) for अमरोः.

902 Sv. reads the verse thus—हारो नार्पितः कण्ठे संभोगस्पर्शभीरुणा। आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः॥ Sv., Spd. ascribe the verse to Vālmīki.

(b) Spd. reads इदानीमन्तरे जाताः पर्वताः सरितो द्रुमाः.

903 भद्रात्र ग्रामके त्वं वससि
परिचयस्तेन जानासि वार्ता-
मस्मिन्नध्वन्ययोषित्तरुणिमवयसि
ध्याय काचिद्विपन्ना । Spd. 3895
इत्थं पान्थ प्रवासावधि- स्रग्धरा
दिनगणनापायशङ्की प्रियायाः
पृच्छन्वार्तां समीपस्थितनिजभवनं
व्याकुलो नोपयाति ॥३॥
कस्यचित् ।

904 वसन्ताग्नौ मग्ना चिरविरहरुग्णा सहचरी
यदि प्राणान् मुञ्चेत्तदिह वधभागी भवतु कः । शिखरिणी
वयो वा स्नेहो वा कुसुमसमयो वेति विमृशं-
स्तुहीति प्रव्यक्तं पिकनिकरझंकारमशृणोत् ॥४॥
पिकनिकरस्य ।

905 सव्याधेः कृशता क्षतस्य रुधिरं दष्टस्य लालास्रवः
सर्वं नैतदिहास्ति तत्कथमसौ पान्थस्तपस्वी मृतः । Spd. 3822
आ ज्ञातं मधुलम्पटैर्मधुकरैरारब्धकोलाहले Srk. 760
नूनं साहसिकेन चूतमुकुले दृष्टिः समारोपिता ॥५॥ शार्दूलविक्रीडित
राजशेखरस्य ।

903 (a) Sp. भद्रार्य for भद्रात्र. Spd परिचयस्तेस्ति for परिचयस्तेन.
(b) Spd reads the line thus—मस्मिन्नध्वन्यजाया जलधररसितोत्का न काचिद्विपन्ना ।
(c) Spd विगम for गणना
(d) Spd. reads—पृच्छन्वृत्तान्तमारात्स्थितनिजभवनोध्याकुलो न प्रयाति.
Spd. attributes the verse to भीम.

904 (a) Sp रुग्णा for मग्ना. I. O. खिन्ना for रुग्णा.
(c) A विशिखो for समयो.

905 (a) Spd. श्रुति. for स्रव.
(b) Spd किञ्चित् for सर्वं. A अयं for असौ.
(c) Srk. आबद्ध for आरब्ध.
Spd. रामिलसोमिलयोः for राजशेखरस्य

८७ पथिकः ।

906 सुप्ते ग्रामे नदति जलदे शान्तसंपातरम्यं
पान्थेनात्मव्यसनकरुणोदस्तु गीतं निशीथे ।
स्फीतोत्कण्ठापरिगतधिया प्रोषितस्त्रीजनेन
ध्यानावेशस्तिमितनयनं श्रूयते रुद्यते च ॥१॥

मन्दाक्रान्ता

कस्यचित् ।

907 मागा पान्थ पथामुना यदि तव भ्रातः प्रियं जीवितं
यच्चूताकृतिरत्र तिष्ठति महारौद्रः पुरो राक्षसः ।
येनोद्यन्मकरन्दमुग्धमधुपव्याहारझङ्कारिणा
पान्थानामधुनैव निर्घृणधिया सार्थो हतः श्रूयते ॥२॥

शार्दूलविक्रीडित

कस्यापि ।

908 उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरपेक्ष्यताम् ।
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवांकुरकञ्चुकः ॥३॥

हरिणी

कस्यचित् ।

909 कस्मात्त्वं क नु दृश्यते सुखमुखं कास्तेन्धकारः परं
क स्त्रीषु स्मरधूमकेतुरुदितो दृष्टा युवानः क ते ।
गन्ता क क च पञ्चमः क णसकृत्कात्संकुरो निद्रतः (?)
कानन्दैकरसोदयः क नु सती कैवाध्वगस्तत्कथा ॥४॥

शार्दूलविक्रीडित

कस्यचित् ।

910 ग्रामेऽस्मिन् पथिकाय पान्थ वसतिर्नैवाधुना दीयते
पश्यात्रैव विहारमण्डपतले पान्थः प्रसुप्तो युवा ।

Spd. 3893

907 (c) S लुब्ध for मुग्ध
908 (b) I. O., S अवेक्षतां for अपेक्ष्यताम्
909 (a) Sp. क्षण for क नु.
910 (a) Srk. नेव वसतिः पान्थ for पान्थ.. नैव.
(b) Spd. रात्रावत्र विवाह.

तेनोद्गीय खलेन गर्जति घने स्मृत्वा प्रिया तत्कृतं Srk. 1661
येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ॥५॥ शार्दूलविक्रीडित

कस्यचित् ।

८८ वर्षापथिकः ।

911 तावद्वाचः प्रयुक्ता मनसि विनिहिता जीविता-
शापि ताव- Srk. 263
न्निक्षिप्तौ तावदङ्घ्री पथि पथिकजनै- स्रग्धरा
र्लक्षितास्तावदाशाः ।
नृत्यद्धाराकदम्बस्तव कवलयिता यावदेते न दृष्टा
निर्मुक्तव्यालनीलद्युतिनवजलदव्याकुला
विन्ध्यपादाः ॥१॥

योगेश्वरस्य ।

912 लीलाम्भोजतमालकज्जलजलश्रीकण्ठकण्ठद्युते
भ्रातर्मेघ महेन्द्रचापरुचिरं व्यासज्य कण्ठे गुणम् । शार्दूलविक्रीडित
स्वैरं गर्ज मुहूर्तक कुरु दयां सा वाष्पपूर्णेक्षणा
बाला बालमृणालकोमलतनुस्तन्वी न सोढु क्षमा ॥२॥

कस्यचित् ।

913 जलधरमुदितं विलोक्य दूरा-
दहह पदात्पदमेष न याति । पुष्पिताग्रा
अविरतनयनाम्बुदीर्घमुष्णं
श्वसिति कथं हतजीवितोध्वनीनः ॥३॥

कविचक्रवर्तिन ।

910 (c) Srk. यत् for तत्

(d) Srk. तेन for येन.

This is a doubtful verse of Amaru. (See S K. De, *Our Heritage*, II, p 68.

911 (b) Srk. विक्षिप्तौ for निक्षिप्तौ, लम्भिता तावदाशा for लक्षिता-स्तावदाशा·

(c) Srk फुल्लत् for नृत्यत्

914 निशीथे लीनानां झटिति तडितां वीक्ष्य विषमं
घनानामाभोगं रसिकपथिकेनोन्मुखदृशा ।
न गीतं सोत्कण्ठं न च रुदितमुत्कम्पतरलं
न मुक्ता निःश्वासाः स्फुटदनुमतं किंतु हृदयम् ॥४॥
बाह्लीकस्य ।

Spd 3892
शिखरिणी

915 धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अध्वन्येन विमुक्तकण्ठकरुणं रात्रौ तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥५॥
अमरोः ।

शार्दूलविक्रीडित

८९ प्रोषितप्रियास्मरणम् ।

916 विवेकादस्माभिः परमपुरुषाभ्यासरसिकैः
कथंचिन्नीयन्ते रतिरमणबाणैरपि हतैः ।
प्रियाया बालत्वादभिनववियोगात्तव तनो-
र्न जानीमस्तस्या बत कथममी यान्ति दिवसाः ॥१॥
कस्यचित् ।

Srk. 780
शिखरिणी

914 (a) The word bet. निशीथे and झटिति is corrupt in the edition Spd. झगिति for झटिति, विषयं for विषमम्.
(c) Spd. उत्कण्ठ for उत्कम्प.
(d) Spd. नु for तु. Spd. -anonymous

915 (c) I. O., S अखिलां for करुणम् Sp तदा for तथा
This is one of the doubtful verses of Amaru (See S. K. De, *Our Heritage*, II. p. 63.

916 (a) S., I. O. परुष for पुरुष.
(c) Sp. प्रियामा for प्रियाया. Ed., A वयोगोचर (Srk. वियोगातुर) for वियोगात्तव.

917 आलक्ष्याङ्गणवाटिकापरिसरे स्वेच्छानतां शाखिकां
केयूरीभवदल्पशेषवलया बाला समस्तं दिनम् ।
सा दैवोपहतस्य मूढमनसो भग्नावधरेद्य मे
पन्थानं विवृताश्रुणा वदनकेनालोक्य किं वक्ष्यति ॥२॥ शार्दूलविक्रीडित

कस्यचित् ।

918 अनारब्धाक्षेपं परमकृतवाप्यव्यतिकरं
निगूढान्तस्तापं हृदयविनिपीतं व्यवसितम् । Sv. 1333
कृशाङ्ग्या यत्पापे व्रजति मयि नैराश्यपिशुनं शिखरिणी
श्लथैरङ्गैरुक्तं हृदयमिदमुन्मूलयति तत् ॥३॥

कस्यचित् ।

919 उत्कम्पोपि सकम्प एव हृदये चिन्तापि चिन्तान्विता
निःश्वासा अपि निःश्वसन्त्यनिभृतं बाष्पोपि
बाष्पायते । Sv. 1152 शार्दूलविक्रीडित
कान्तां संस्मरतो विदेशवसतेर्नक्तंदिवं कामिनः
प्रारोहा इव निष्पतन्ति मनसो दुःखानि
दुःखान्वितात् ॥४॥

कस्यचित् ।

920 निरस्तालङ्कारां नयनजलसिक्ताधरपुटां
स्वावस्तं याते द्विगुणतरखेदालसमुखीम् । शिखरिणी

917 This is a doubtful verse of Amaru (See S K De, *Our Heritage*, II. p. 73).

918 (b) Sv. अनुक्त for निगूढ, ०पीतव्यवसितम् for ०पीतं व्यवसितम्.

(d) Sv उक्तं for उक्त

Sv. ascribes the verse to लुड्डक.

919 (b) Sv. नि श्वसन्ति निभृतं for नि...तं.

(c) Sv. कान्तस्य स्मरणे स्मराहितमतेः कष्टं हि रक्तात्मन for this line.

(d) Sv. निःसरन्ति हृदये दु खस्य धिग्वल्लभम् for निष्पतन्ति...तात्.

Sv. शर्वटस्य for कस्यचित्.

अहो दूरस्थां तां करकमलविन्यस्तवदनां
प्रियां पश्यामीव स्मृतिशरणकुड्ये विलिखिताम् ॥५॥
कस्यचित् ।

९० प्रस्थानभङ्गः ।

921 प्रहरविरतौ मध्ये वाह्नस्ततोपि परेण वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥१॥
अमरो ।

As. 12
Sv. 1048
Srk. 532
Spd. 3389
Smv. 37.7
हरिणी

922 लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेर्पिता
नो वा पादयुगे मुहुर्निपतिता निष्ठेति नोक्तं वचः ।
काले केवलमम्बुदालिमलिने गन्तुं प्रवृत्तः शठ-
स्तन्व्या बाष्पजलौघकल्पितनदीपूरेण रुद्धः प्रियः ॥२॥
तस्यैव ।

Sv. 1057
Spd. 3388
Smv. 37.5
शार्दूलविक्रीडित

920 (d) S, I. O., Sp अभिलिखिताम् for विलिखिताम्

921 (a) Ed. परेय (Spd. अपरेण) for परेण.

(b) Srk., Spd यातेऽप्यह्नि for याते वाह्नि, त्वमद्य समेष्यसि for प्रिय... सि

(d) S, Sp. मुग्धालापै for बालालापैः. Smv. वाक्यै॰ for आलापै॰. Smv., S, Sv., Srk झलज्झलैः for गलज्जलै A reads the line thus -हरति दयितामुग्धालापै॰ झलज्झलै॰. Sv. झलज्झलिका-वासुदेवस्य (Srk. om वासुदेवस्य, Spd. गलज्जलवसुदेवस्य, Smv. झलज्झलवासुदेवस्य) for अमरोः.

922 (b) Spd., Smv. तया निपतित for मुहुर्निपतिता.

(c) Sv., I. O., S समभ्युद्यतः for प्रवृत्तः शठ॰.

(d) Sv. पतिः for प्रिय. Spd. तन्वङ्गया नयनाम्बु for तन्व्या बाष्पजलौघ.

923 मा याहीति निवारणं न च कृतं नैवावधिर्याचितो
नो वाष्पाम्बुकणावलीमलिनतां नीता कपोलस्थली ।
अर्घ्यव्याजमुपेतया दयितया संप्रस्थितस्याद्य मे शार्दूलविक्रीडित
यात्राभङ्गकरी करे विनिहिता चौती नवा मञ्जरी ॥३॥

कस्यचित् ।

924 दूरं सुन्दरि निर्गतासि भवनादेष द्रुमः क्षीरवा-
नस्मादेव निवर्त्यतामिति शनैरुक्ताध्वगेन प्रिया । Sv. 1063 Spd. 3390
तस्या मन्युभरोच्छ्वसत्कुचयुगाभोगस्फुटत्कञ्चुकं शार्दूलविक्रीडित
वीक्ष्योरःस्थलमश्रुपूरितदृशा प्रस्थानभङ्गः कृत ॥४॥

तरणिनन्दिनः ।

925 यामीत्युक्तवति व्रजेत्यभिहितं त्रस्तं विमुक्तासने
द्वित्राण्येव पदानि गच्छति
गलद्बाष्पान्धमालोकितम् । शार्दूलविक्रीडित
निर्याते दयितेऽश्रुपूरितदृशा तन्मुग्धयानुष्ठितं
व्यासेधस्थितिपत्रकं प्रवसतां यज्जातमाजन्मनः ॥५॥

कस्यचित् ।

923 (b) A कणालिभि॰ for कणावली

924 (a) Sv. नगरात् for भवनात्.

(b) Spd प्रियाम् for प्रिया

(c) Spd गाढालिङ्गनवक्रित (Sv. मन्थर for वक्रित) स्तनतटा for तस्या..... युगा. Sv. स्फुरत् for स्फुटत्.

(d) Sv. तल for स्थल. Spd. दृश॰ for दृशा.

Spd., Sv. quote the verse anonymously.

The verse has been quoted by Aufrecht in ZDMG, 36, p 513, with the variants as in Spd.

925 (a) Sp. क्रान्तं for त्रस्तम्.

(d) S, I. O. व्यासेधि for व्यासेध.

९१ विरही ।

Sik. 785
शिखरिणी

926 प्रहर्ता कानङ्गः स च कुसुमचापोल्पविशिख-
श्चल सूक्ष्मं लक्ष्य व्यवहितममूर्तं क्व च मनः ।
इतीमामुद्भूतां स्फुटमनुपपत्तिं मनसि मे
रुजामाविर्भावादनुभवविरोधः शमयति ॥१॥

मृगराजस्य ।

Sv. 1348
शार्दूलविक्रीडित

927 त्वं तस्यां यदि नाम रागविधुरं जातं विमुच्यैव मां
तत्केनाहमिदं किमप्यनुभवाम्यन्तःसमुत्कण्ठितः ।
स्वस्थीभूय ननु क्षणं हृदय हे सद्भावमाचक्ष्व मां
किं सतापविखण्डितस्य
भवतो वृत्तिर्द्विधा वर्तते ॥२॥

अवन्तिवर्मणः ।

शार्दूलविक्रीडित

928 अप्येतद्रजनीमयं जगदथो निद्रामयी सा निशा
निद्रा स्वप्नमयी भवेदथ च स स्वप्नो मृगाक्षीमयः ।
सेयं मानमयी मम प्रियतमा तच्चाटुचेष्टामयो
मादृक् क्वेति समीहितैकविषये
सकल्प तुभ्यं नमः ॥३॥

गोतिथीयदिवाकरस्य ।

926 (a) Ed. बाणो (Sik. धन्वा) for चापो.
S नृगराजस्य (Srk. वन्यतथागतस्य) for मृगराजस्य.
Ed.—anonymous.

927 (a) Sv. यात समुत्सृज्य माम् for जातं.. ...माम्.
(b) Sv. ०कण्ठितम् for ०कण्ठितः.
(c) स्व' for सत्, मे for माम्
(d) Sv. जायते for वर्तते.
Sp —अवन्तिवर्मण .

928 (d) Ed. मान (I O. कीदृक्) for मादृक्.
Ed.—anonymous.

929 संगमविरहविकल्पे वरमिह विरहो न संगमस्तस्याः । Pv 239
संगे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥४॥ Sd. under X. 52
धर्मकीर्तेः । आर्या

930 विकल्परचिताकृतिं सततमेव तां वीक्षसे
सहासमभिभाषसे समुपगूहसे सर्वथा । Sv. 1329
प्रमोदमुकुलेक्षणं पिबसि चैतदस्या मुखं पृथ्वी
तथापि च दिवानिशं हृदय हे समुत्कण्ठसे ॥५॥
भर्वो

९२ विरहिप्रियास्मरणम् ।

931 ललितललितस्निग्धालापस्मितस्नपिताधरं हरिणी
दरमुकुलितापाङ्गद्रोणीतरङ्गितलोचनम् ।
इदमित इतः पश्यन्नेव प्रियामुखपङ्कजं
किमपि वदनाद्वैतं साक्षात्करोमि मृगीदृश ॥१॥
अभिमन्योः ।

932 मुखं ज्योत्स्नालोकप्रसरधवलाक्षं क्व नु मया
पुनर्द्रष्टव्यं तन्स्मितमधुरमुग्धालपदशनम् ।

929 (a) Pv. तस्य for तस्याः
(b) Pv एक स एव सङ्गे for संगे . तथैका
Pv कस्यचित् for धर्मकीर्ते

930 (a) Sv. ईक्षसे for वीक्षसे
(b) Sv सदा for सहा, सर्वदा for सर्वथा.
(c) Sv. पाययस्यानन for चैत...मुखम्
(d) Ed. हृदयं for हृदय
Sv —anonymous.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 539.

शिखरिणी

क सा श्रव्या वाणी विजितकलहंसीकलरुता
विलासा वीक्ष्यन्तां क च
सहभुवो धीरललिताः ॥२॥

कर्णाटदेवस्य ।

Srk. 777
हरिणी

933 अपि स दिवसः किं स्याद्यत्र प्रियामुखपङ्कजे
मधु मधुकरी वासद्दृष्टिर्विकाशिनि पास्यति ।
तदनु च मृदुस्निग्धालापक्रमाहितनर्मणः
सुरतसचिवैरङ्गैः सङ्गो ममापि भविष्यति ॥३॥

वार्तिककारस्य ।

Srk. 787
वसन्ततिलक

934 अर्ध्याद्विवक्षितमपस्खलदक्षरार्थ-
मुत्कम्पमानदशनच्छदमुच्छ्वसन्त्या ।
अद्य स्मरामि परिमृज्य पटाञ्चलेन
नेत्रे तया किमपि यत्पुनरुक्तमुक्तम् ॥४॥

सोल्लोकस्य ।

Srk. 781
शिखरिणी

935 स्खलल्लीलालापं विनिपतितकर्णोत्पलदलं
स्रवत्स्वेदक्लिन्नं सुरतविरतिक्षामनयनम् ।
कचाकर्षक्रीडासरलधवलश्रोणिसुभगं
कदा तद् द्रष्टव्यं वदनमवदातं मृगदृशः ॥५॥

कस्यचित् ।

932 (c) Ed. करठी for हंसी.

933 Quoted by Aufrecht in ZDMG, 36, p. 524.

934 (a) Srk. असंफलत् for अपस्खलत्.

Srk. सोन्नोकस्य.

935 (b) I. O., Srk. श्रमखेद for स्रवत्स्वेद.

(c) Sp. कुशल (Srk कुरल) for धवल. Srk. श्रेणी for श्रोणि.

९३ विलोकनम्।

936 क्रमसरलितकण्ठप्रक्रमोल्लासितोर-
स्तरलितवलिरेखासूत्रसर्वाङ्गमस्याः। Vsb. III. 3
स्थितमतिचिरमुच्चैरग्रपादाङ्गुलीभिः Srk. 523
करकलितसखीकं मां दिदृक्षोः स्मरामि ॥१॥ मालिनी

कालिदासस्य।

937 तत्तस्य निःश्वासकृतानुयात्रैः
सलीलमाकुञ्चितपक्ष्मपत्त्रैः।
नेत्रद्विरेफैर्वदनारविन्द- उपजाति
मास्वादयन्त्यो लिलिहुस्तरुण्यः ॥२॥

कस्यचित्।

938 भवनभुवि सृजन्तस्तारहारावतारान्
दिशि दिशि विदिशन्तः केतकानां कुटुम्बम्। Vsb IV. 17
वियति च रचयन्तश्चन्द्रिकां मुग्धमुग्धां Srk. 521
प्रतिनयननिपाताः सुभ्रुवो विभ्रमन्ति ॥३॥ मालिनी

राजशेखरस्य।

939 तरत्तारं तावत्प्रथममथ चित्रार्पितमिव
क्रमादेवापाङ्गं सहजमिव लीलामुकुलितम्। Srk. 467

936 (a) Ed कराठं for कराठ, प्रक्रमोल्लासितारं for °तोर.
(b) Ed. लेखा for रेखा, सर्वस्व for सर्वाङ्ग.
As the verse occurs in Vsb, the ascription to Kālidāsa is obviously wrong.

938 (a) Vsb. तार' for तारान्
(b) Vsb., Srk. विकिरन्तः for विदिशन्त°, Vsb. कुरम्बम् for कुटुम्बम्.
(c) Vsb. विरचयन्तः (Ed. विरचयन्त्य°) for च रचयन्तः-Srk. दुग्ध for मुग्ध.
(d) Vsb. बत for प्रति.

939 (b) Srk., Smv. अपाङ्गे for अपाङ्गं.

Smv 43 12 ततः किंचित्क्षुण्णं तदनु घनबाष्पाम्बुलहरी-

शिखरिणी परिक्षामं चक्षुः पततु मयि तस्या मृगदृशः ॥४॥

वीर्यमित्रस्य ।

940 यद्व्रीडाभरभुग्नमास्यकमलं विन्यस्य जानूपरि

Srk 470 प्रोद्यत्पक्ष्मनिरीक्षितं विजयते सप्रेम वामभ्रुवः

शार्दूलविक्रीडित हास्यश्रीलवलाञ्छिता च यदसावस्याः कपोलस्थली

लोलल्लोचनगोचरं व्रजति स स्वर्गादपूर्वो विधिः ॥५॥

प्रद्युम्नस्य ।

९४ चित्रम् ।

941 प्रिया संनिहितैवेयं संकल्पस्थापिता पुरः

Nn. II. 9 दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत्कोत्र विस्मयः ॥१॥

अनुष्टुप् प्रभाकरदत्तस्य ।

942 रहसि सततोत्सङ्गन्यासादजस्र . .

. मर्पान्नित्यस्तनार्पणकेलिभिः ।

हरिणी अनिशचरणोपान्तस्पर्शान्निरन्तरचुम्बनै-

रपि खलु तया ·· ·लेख्यैः स चित्रपटीकृतः ॥२॥

उमापतिधरस्य ।

943 मसीयं तूलीयं फलकमिदमेष त्वमधुना

जडोसि खिन्नोसि स्खलसि खलु पाणे कथमिव ।

शिखरिणी अमुष्य प्राचीण्यं कलयसि न किं हन्त मनसो

विना यत्सामग्रीं सुभगशतमग्रे विलिखति ॥३॥

कस्यचित् ।

939 (c) Srk, Smv. फुल्ल' for क्षुण्ण

940 (a) Srk तद् for यद्.

941 (a) Nn संकल्पै for सकल्प

942 (c) I. O., S स्पर्शनात् for स्पर्शात्.

(d) A, I. O. चित्रपटः for ०पटी Sp. reads रपि खलुतयानालेख्य. स चित्रपटः कृत

943 (a) A, I. O. एव for एष

944 चित्रं चित्रगतोऽप्येष ममालि मदनोपमः।
समुन्मूल्य बलाल्लज्जामुत्कण्ठयति मानसम् ॥४॥ अनुष्टुप्

रुद्रटस्य।

945 तवालेख्ये कौतूहलतरलतन्वीविरचिते
निधायैका वक्त्रं रचयति सुपर्णासुतमपि। S K III. 167
अथ स्विद्यत्पाणिस्खलितमपमृज्यैतदपरा शिखरिणी
करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति ॥५॥

कस्यचित्।

९५ स्वप्नः।

946 जाने सा गगनप्रसूनकलिकेवात्यन्तमेवासती Srk. 763
तत्संभोगरसाश्च तत्परिमलोल्लासा इवासत्तमाः। शार्दूलविक्रीडित
स्वप्नेन द्विपतेन्द्रजालमिव मे संदर्शिता केवलं
चेतस्तत्परिरम्भणाय तदपि स्फीतस्पृहं ताम्यति ॥१॥

कस्यचित्।

947 स्वप्नैर्नः प्रापितायाः प्रतिरजनि
तव श्रीषु मग्नः कटाक्षः Nc. VIII. 107
श्रोत्रे गीतामृताब्धौ त्वगपि स्रग्धरा
ननु तनूमञ्जरीसौकुमार्ये।

945 (b) S. K: अथ: for अपि.
(c) S. K त्वरित for स्खलित.
946 (b-d) A drops the portion असत्तमा..... ताम्यति.
Srk. परमेश्वरस्य.
947 (a) A drops स्वप्नै......प्रापि

नासा श्वासाधिवासेऽधरमधुनि

रसज्ञा चरितेषु चित्तं

तन्नस्तन्वङ्गि कैश्चिन्न

करणहरिणैर्वागुरालङ्घितासि ॥२॥

कविपण्डितश्रीहर्षस्य ।

948 स्वप्न प्रसीद भगवन्पुनरेकवारं
संदर्शय प्रियतमां क्षणमात्रमेव ।
Srk. 806 दृष्ट्वा सती निविडबाहुनिबन्धलग्नं
वसन्ततिलक तत्रैव मां नयति सा यदि वा न याति ॥३॥

कालिदासस्य ।

949 क्व पेय ज्योत्स्नाम्भो वदत बिसवल्लीसरणिभि-
S. K II 60 / Srk. 528 मृणालीतन्तुभ्यः सिचयरचना कुत्र भवतु ।
शिखरिणी क्व वा पारीमेयो बत बकुलदाम्नां परिमलः
कथं स्वप्नः साक्षात्कुवलयदृशां कल्पयतु ताम् ॥४॥

राजशेखरस्य ।

950 तत्तादृक्कुचकुम्भभङ्गुरमुरस्तच्च त्रपामन्थरं
शार्दूलविक्रीडित चक्षुः प्रेमगुरुर्मनोभवसमुद्भेदः स वामभ्रुव ।

947 (c) Sp. चरित्रेषु for चरितेषु
Nc स्वप्नेन for स्वप्ने
(c-d) S drops ०ज्ञा..... आलङ्घितासि and also the poet's name.
Sp om. कविपण्डित in poet's name.

948 (a) Ed. क्षणम् for पुन..
(c) Srk. दृष्टा for दृष्ट्वा

949 (a) Srk. पातव्या for पेय. S.K वदन for वदत. Srk ज्योत्स्नामृत-भवनगर्भापि तृषितैः for ज्योत्स्ना... ..सरणिभि .
(b) S.K. भवति (Srk घटते) for भवतु.
(d) S.K. दृशं for दृशाम् ?

950 (a) A भार for कुम्भ.

रे स्वप्न प्रसभापनीतदयितादोर्वल्लिबन्धस्य किं
सर्वं नीतवतोहमेव भवतो दैवादभूवं गुरुः ॥५॥
आचार्यगोपीकस्य ।

९६ नायकाभिलाषः ।

951 शिखरिणि क नु नाम कियच्चिरं
किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं
दशति बिम्बफलं शुककशावकः । १॥

Kuval. 70
Sv 2030
Sd. under
IV. 9
Srk. 439
द्रुतविलम्बित

धर्मकीर्तेः ।

952 आर्यानङ्ग महाव्रतं विदधता विन्ध्यानिलैः पारणां
कृत्वा साङ्गमकारि केन मुरलाकूले कठोरं तपः ।
येनास्या रतिखेदमेदुरमृदुश्वासाधिवासस्पृशः
पीयन्तेधरसीधवो विहसित-
ज्योत्स्नोपदंशं रहः ॥२॥

शार्दूलविक्रीडित

योगोकस्य ।

953 ध्यायन्किं दनुजद्विषं क नु महातीर्थे क पुण्ये क्षणे
कैर्वा निर्मलकर्मभिः करिपतिः प्राणव्ययं लम्भितः ।
द्यूते यद्दशनांशुपाशकयुगं हाराभिरामोल्लस-
न्नीरन्ध्रस्तनमण्डलद्वयमिदं मृद्वङ्गि मृद्नाति ते ॥३॥

शार्दूलविक्रीडित

आचार्यगोपीकस्य ।

954 अधीराक्ष्याः पीनस्तनकलसमास्कन्दसि मुहुः
क्रमादूरुद्वन्द्वं कलयसि च लावण्यललितम् ।

Srk. 422
शिखरिणी

951 (c) Sd. सुमुखि for तरुणि.
Sv. anonymous.

952 Ed. योगेश्वरस्य for योगोकस्य.

953 (a) S,I O., Sp. पुण्य for पुण्ये
(c) I O. कुशलाशु for दशनाशु.

भुजाश्लिष्टो हर्षादनुभवसि हस्ताहतिकला-
मये वीणादण्ड प्रकटय फलं कस्य तपसः ॥४॥

वाचस्पतेः ।

955 न नीलाब्जं चक्षुः सरसिरुहमेतन्न वदनं
Srk. 409 न बन्धूकस्येदं मुकुलमधरस्तद्द्युतिधरः ।
शिखरिणी ममाप्येषा भ्रान्तिः प्रथममभवद्भृङ्ग किमु ते
कृतं यत्नैरेभ्यो विरम विरमेत्यञ्जलिरयम् ॥५॥

राजशेखरस्य ।

९७ नायिकाभिलापः ।

956 तिर्यग्वर्तितगात्रयष्टिविषमोद्वृत्तस्तनास्फालन-
लुठ्यन्मौक्तिकमालया सपुलकस्वेदोल्लसद्गण्डया ।
शार्दूलविक्रीडित दूरादेव विलोकयेत्यभिमते तद्वक्त्रदत्तेक्षणं
दुर्वारस्मरया तया सहचरी गाढं समालिङ्गिता ॥१॥

रुद्रटस्य ।

957 अभिमुखगते यस्मिन्नेव प्रिये बहुशो वद-
त्यवनतमुखं तूष्णीमेव स्थितं मृगनेत्रया ।
हरिणी अथ किल वलल्लीलालोलं स एष तथेक्षितः
कथमपि यथा दृष्टा मन्ये कृतं श्रुतिलङ्घनम् ॥२॥

तस्यैव ।

958 व्याजृम्भणोन्नमितदन्तमयूखजाल-
व्यालम्बिमौक्तिकगुणं रमणे मुदेव ।
वसन्ततिलक ऊर्ध्वं मिलद्भुजलतावलयप्रपञ्च-
सत्तोरणं हृदि विशत्यपरा व्युदासे ॥३॥

तस्यैव ।

954 (d) Srk. इदं for अये.
955 (c) Srk. अत्र for एषा.
(d) Srk. भ्राम्यसि मुधा for इत्यञ्जलिरयम्

959 प्रविशति यथा गेहे तस्माद्बहिश्च विचेष्टते
वदति च यथा सख्या सार्धं सहासमिवोत्सुका । हरिणी
दयितनयनालोके मन्दं यथावनमत्यसौ
मृगदृशि तथैवास्यां शङ्के स्मरेण कृतं पदम् ॥४॥

तस्यैव ।

960 न जाने संमुखायाते प्रियाणि वदति प्रिये । Pv 234 Sv. 2038
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतामुत नेत्रताम् ॥५॥ Spd. 3522

अमरोः । अनुष्टुप्

९८ तनुता ।

961 विगलन्तीं दधे यावद्दोष्णा जघनमेखलाम् ।
तावत्कलापवलयं विवेद गलितं न सा ॥१॥ पथ्यावक्त्र

रुद्रटस्य ।

962 स्मरेण संतक्ष्य वृथैव बाणै-
र्लावण्यशेषां कृशतामनायि । Nc. III. 109
अनङ्गतामप्ययमाप्यमानः उपजाति
स्पर्धां न सार्धं विजहाति तेन ॥२॥

कविपण्डितश्रीहर्षस्य ।

959 (a) Sp. यदा for यथा

(c) S यथा च वलत्यसौ for यथावनमत्यसौ.

960 (b) S, A पूर्वाणि for सर्वाणि. S,I. O, A का (Spd. किं) for मे.

Sp., I.O. यान्तु for यान्ति.

Pv प्रयान्ति मम गात्राणि for सर्वा······यान्ति, किमु for उत.

Spd,, Sv. किं यान्तु (Spd. यान्ति) नेत्रतामुत कर्णताम् for मे...... नेत्रताम्

Pv., Sv, Spd quote the verse anonymously.

This is a doubtful verse of Amaru. (See S. K. De, *Our Heritage*, II, p. 72).

962 (a) Nc. निस्तक्ष्य for संतक्ष्य.

Ed. om. कविपण्डित in the poet's name.

963 सर्वात्मना प्रहरतापि मनोभवेन
Sv. 1088 संदर्शितं परमकौतुकमायताक्ष्याः ।
वसन्ततिलक लावण्यविभ्रमविलासविचेष्टितानि
नो खण्डितानि गमिता च तनुस्तनुत्वम् ॥३॥

भासोकस्य ।

964 एकां कृत्वा तनुमनुपमां चन्द्रचूडेन सार्धं
यस्त्यक्तोर्धः सततविरहक्लेशभागी भवान्या ।
मन्दाक्रान्ता तेनाङ्गानां रचितमुचितं संविभक्तेन कर्तुं
नूनं दूना तनुतनुलतां निर्ममे तां विरिञ्चिः ॥४॥

आचार्यगोपीकस्य ।

965 अपनिद्रमधूकपाण्डुरा
सुन्दरी सुदृशोऽदृश्यत गण्डमण्डली ।
गमिताश्रुजलप्लवैरिव
कृशिमाकीर्णतयापि निम्नताम् ॥५॥

शिल्हनस्य ।

Br. II 17
S. k. iv. 72
Vsb I. 14
Sd. under x 113

९९ गुणकीर्तनम् ।

966 तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत्स्मितं का सुधा ।

963 (a) Sv. प्रभवता for प्रहरता
(b) Ed., S, Sv. कौशलम् for कौतुकम्.
(d) I. O. नोत्खण्डितानि (Sv नैवेक्षितानि) for नो खण्डितानि.
Sv. भट्टावलोकितस्य for भासोकस्य.

965 Ed. बिल्हणस्य for शिल्हनस्य

966 (a) Sk., Spd., Br. तच्चेत्स्मितं का सुधा for हा.. द्युति.
(b) Br. सा दृष्टि॰ for तच्चक्षु॰.
Br., Spd., Sk. ॰स्ताश्चेद्गिरो धिङ्मधु for ॰स्तच त...सुधा.
Ed., S किम् for का

धिक्कन्दर्पधनुर्भ्रुवौ च यदि ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥१॥
राजशेखरस्य । — Sık 457, Spd. 3373, शार्दूलविक्रीडित

967 दृष्टं चेन्मुखमुन्मुखेन शशिना धूमायिते चक्षुषी
स्पृष्टा चेदिदमीयकान्तिकुलिशैः क्लिश्यन्ति हन्त त्वचः ।
जाता स्मो बत वीणयापि वधिरास्तस्याः श्रुतं चेद्वचः
पीतश्चेदधरस्तदित्थमभजद् द्राक्षारसः क्षारताम् ॥२॥
कस्यचित् । — शार्दूलविक्रीडित

968 निर्माणनैपुणविधेरवधिर्विधातु-
रुद्दामधाम मकरध्वजराजधानी ।
सा चन्द्रविम्बवदना तरलायताक्षी
साक्षादियं किमपि जन्मपरिग्रहस्य ॥३॥
कस्यचित् । — वसन्ततिलक

969 सा यैर्दृष्टा न वा दृष्टा मुषिताः सममेव ते ।
हृतं हृदयमेकेषामन्येषां चक्षुषः फलम् ॥४॥
कस्यचित् । — Srk. 500, अनुष्टुप्

970 आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥५॥
कालिदासस्य । — Vık. II. 3, आर्या

966 (c) Br. सा चेत्कान्तिरतन्त्वमेव कनकं for धिक् .ते.
(d) Vsb., S. k., Spd., Br विरस for विमुख .
Spd., Ed. -anonymous.

967 (a) Ed. लोचने for चक्षुषी

968 (a) Sp राजपुत्री for राजधानी

970 (a) A विधि. for विशेष .
(b) A तथास्याः for तस्याः.

१०० उद्वेगः ।

वसन्ततिलक

971 दुःखानि तिष्ठत चिरं मम चित्तभूमौ
युष्माकमेव वसतिर्विधिना कृतेयम् ।
यद्दैवदुर्विलसितक्रकचप्रहारै-
श्छिन्नोऽपि न त्रुटति जीवनतत्त्वबन्धः ॥१॥

कस्यचित् ।

मन्दाक्रान्ता

972 अन्याकारं कलयसि पुरश्चक्रवाकीव चन्द्रं
बद्धोत्कम्प शिशिरमरुता दह्यसे पद्मिनीव ।
प्राणान् धत्से कथमपि बलाद्गच्छतः शल्यतुल्यां-
स्तत्केनासौ सुतनु जनितो मान्मथस्ते विकारः ॥२॥

रुद्रटस्य ।

Srk 759
शार्दूलविक्रीडित

973 एते चूतमहीरुहोऽप्यविरलैर्धूमायिताः षट्पदै-
रेते प्रज्वलिताः स्फुटत्किसलयोद्भेदैरशोकद्रुमाः ।
एते किंशुकशाखिनोऽपि मलिनैरङ्गारिताः कुड्मलैः ।
कष्टं विश्रमयामि कुत्र नयने सर्वत्र वामो विधिः ॥३॥

वाक्कूटस्य ।

Sv. 1289
Spd. 3466
वसन्ततिलक

974 कान्तामुखं सुरतकेलिविमर्दखेद-
संजातघर्मकणविच्छुरितं रतान्ते ।
आपाण्डुरं तरलतारनिमीलिताक्षं
संस्मृत्य हे हृदय किं शतधा न यासि ॥४॥

कस्यचित् ।

शार्दूलविक्रीडित

975 चन्द्रोदश्च चिरं मनोभवचमूचिह्नांशुकैरंशुभि-
र्मन्दं चन्दनशैलसौरभभरैश्चैत्रानिलाः सपेत ।

971 (c) I.O. यत्रैव for यद्दैव.

972 (a) Ed., A अन्यागारं for अन्याकारम्.

973 Quoted by Aufrecht in ZDMG, 36, p. 523.

974 (c) S आपाण्डरं for आपाण्डुरम्. Spd. विलसदर्धं for तरलतार.
Spd. attributes it to अमरुक.

उज्जृम्भस्व मधो मधुव्रतवधूवाचालवल्लीशतै-
श्चाप मण्डलयत्वयं विरहिणां
प्राणैः स्मरः क्रीडतु ॥५॥
शान्त्याकरस्य ।

१०१ विलापः ।

976 यस्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायाभिरामः शशी ।
ये च त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥१॥
कालिदासस्य ।

Mn. V. 2
Kuval, p. 12
S. k. IV. 21 ; V. 486
Sv. 1366
Sd. under X. 81
शार्दूलविक्रीडित

977 दग्धा स्निग्धवधूविलासकदली वीणा समुन्मूलिता
पीता पञ्चमकाकलीकवलिता शीतद्युतेः कौमुदी ।
प्लुष्टाः स्पष्टमनेकरत्ननिवहा नालं रतेः केवलं
कन्दर्पं हरता हरेण भुवनं निःसारमेतत्कृतम् ॥२॥
रुद्रस्य ।

शार्दूलविक्रीडित

978 स्निग्धश्यामलकान्तिलिप्तनियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोस्मि सर्वं सहे
वैदेही तु कथं भविष्यति
हहा हा देवि धीरा भव ॥३॥
कस्यचित् ।

Sd. under II. 16
शार्दूलविक्रीडित

976 (b) Mn. अन्तरितं for अन्तरितः. Kuval., S. k., Sd , Mn. छायानुकारी (Sv. ०नुकारः) for छायाभिरामः.
(c) Sv., Mn. येपि for येच. Kuval, S. k. अनुसारि for ०कारि.
S, A add यशोवर्मणः after कालिदासस्य. Sv. श्रीयशोवर्मणः.
977 (c) I. O. नालम्बते for नालं रतेः.
978 (a) S, I. O., Sd. वियतो for नियतो.
(c) Ed. सहे for सहो. (d) Sp. मृगा· for भव.

979 एह्येहि क्व गतासि मैथिलि
मृगः प्राप्तो मया काञ्चनी-
शार्दूलविक्रीडित मेतस्य त्वचमुच्चरामि कुचयोर्विन्यस्य वर्णांशुकम्।
मत्सौभाग्यबुभुत्सयापि विपिनेष्वेकाकिनी मास्म भू-
र्विद्विष्टा मयि संचरन्ति
सरले मायाविनो राक्षसाः ॥४॥
कस्यचित्।

980 किं खिद्यसे भुज मुधाधर ताम्यसि त्वं
वसन्ततिलक चक्षुर्विमुञ्च शुचमस्ति हृदि प्रियेयम्।
आश्लेषचुम्बनविलोकनकेलयोपि
सेत्स्यन्ति वः स्फुटति मे हृदयं मुहूर्तम् ॥५॥
शान्त्याकरगुप्तस्य।

१०२ चन्द्रोपालम्भः।

981 यस्तापः शमितो मृगाङ्क जगतां या म्लानिरुन्मूलिता
यामिन्या गगनस्य याः
शार्दूलविक्रीडित स्मृतिपथं नीतास्तमोवीचयः।
यत्क्षामत्वमपाकृतं जलनिधेर्यः कैरवाणां हृतो
मोहस्तत्कथमत्र दुःखिनि जने
सर्वं समावेशितम् ॥१॥
उमापतिधरस्य।

979 (a) Ed. मया प्राप्तो मृगः for मृग .. .. मया.

980 Ed. शान्त्याकरस्य for शान्त्याकरगुप्तस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 526.

981 (a) I. O. यत्तापः for यस्तापः.

982 प्रियविरहमहौष्ण्यान्मुर्मुरामङ्गलेखा-
मयि हतकहिमांशो मा स्पृश क्रीडयापि । Vsb. III. 23
इह हि तव लुठन्तः प्लोषभावं भजन्ते Srk. 714
दरजरठमृणालीकाण्डमुग्धा मयूखा ॥२॥ मालिनी
राजशेखरस्य ।

983 सूतिर्दुग्धसमुद्रतो भगवतः श्रीकौस्तुभौ सोदरौ
सौहार्दं कुमुदाकरेषु किरणाः पीयूषधाराकिरः । Vsb. III. 13
स्पर्धा ते वदनाम्बुजैर्मृगदृशां तत्स्थाणुचूडामणे Śak. 799
हंहो चन्द्र कथं नु मुञ्चसि शार्दूलविक्रीडित
मयि ज्वालामुचो वेदनाः ॥३॥
कस्यचित् ।

984 मुखरय स्वयशो नवडिण्डिमं
जलनिधेः कुलमुज्ज्वलयाधुना । Nc. IV. 53
अपि गृहाण वधूवधपौरुषं द्रुतविलम्बित
हरिणलाञ्छन मुञ्च कदर्थनाम् ॥४॥
कविपण्डितश्रीहर्षस्य ।

985 आश्वासयति काकोपि दुःखितां पथिाङ्गनाम् । Sv. 1956
त्वं चन्द्रामृतजन्मापि दहसीति किमुच्यताम् ॥५॥ अनुष्टुप्
काश्मीरकमहामनुष्यस्य ।

982 (a) Srk., Vsb महोष्मामर्मरा for महौष्ण्यान्मुर्मुरा. Ed. मर्म for ॰मङ्ग
(b) Sp., A, ॰मपि for मयि.
(c) Srk , Vsb. पीडा for भावं
(d) Srk., Ed. जठर for जरठ. A मुग्धकाण्डा for काण्डमुग्धा.
Srk.-anonymous.

983 (a) Srk. श्रीकौस्तुभे सोदरे for श्री…सोदरौ.
(d) Vsb., Srk. निषिञ्चसि for नु मुञ्चसि.
Srk.-राजशेखरस्य

984 Ed. om. कविपण्डित.
985 Sv. omits the name of the poet.
This verse has been quoted by ZDMG, 36 p. 372.

१०३ मदनोपालम्भः ।

शार्दूलविक्रीडित

986 नाथानङ्ग निदेशवर्तिनि जने कस्तेऽभ्यसूयारस-
श्चापारोपितसायकस्य भवतः को नाम पात्रं रुषः ।
विश्राम्यन्तु शरा निषीदतु धनुः शिञ्जापि संयम्यतां
माकन्दांकुरकोमले मनसि नः को बाणमोक्षग्रहः ॥१॥
गोवर्धनस्य ।

Srk. 701
शार्दूलविक्रीडित

987 देवेन प्रथमं जितोसि शशभृल्लेखभृतानन्तरं
बुद्धेनोद्धतबुद्धिना स्मर ततः कान्तेन पान्थेन मे ।
त्यक्त्वा तान् बत हंसि मामपि
कृशां बालामनाथां स्त्रियं
धिक् त्वां धिक् तव पौरुषं धिगुदयं
धिक्कार्मुकं धिक् शरान् ॥२॥
विद्यायाः ।

Srk. 771
शार्दूलविक्रीडित

988 आपुङ्खाग्रममी शरा मनसि मे मग्नाः समं पञ्च ते
निर्दग्धं विरहाग्निना वपुरिदं तैरेव सार्धं मम ।
कष्टं काम निरायुधोसि भवता जेतुं न शक्यो जनो
दुःखी स्यामहमेक एव सकलो
लोकः सुखं जीवतु ॥३॥
राजशेखरस्य ।

हरिणी

989 हरसि हृदयं वेगादन्तः प्रविश्य शरीरिणा-
मथ जनयसि क्रीडाहेतोर्विकारपरम्पराम् ।

986 (c) I. O. नियम्यता for संयम्यताम्.

987 Srk. श्रीराज्यपालस्य for विद्याया..
This is doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 72).

988 (c) I. O. निरायुधोपि for नि·· सि.

वितरसि मुहुर्मोहं पश्चान्निकृन्तसि जीवितं
कितव किमियं चेष्टा लोके तवार्थजनोचिता ॥४॥

गोशरणस्य ।

990 कष्टं हृदि ज्वलति शोकमयो ममाग्नि-
स्ते चक्षुषी च विरहज्वरजागरूके ।
एतन्मनो भ्रमति विष्वगसूंस्तथापि — वसन्ततिलक
त्वं पश्यतोहर इव स्मर हर्तुकामः ॥५॥

कस्यचित् ।

१०४ मेघोपालम्भः ।

991 पाथोवाह किमम्बुभिः प्रियतमानेत्राम्बुसिक्ता मही
किं गर्जैः सुतनोरमन्दरुदितैरुज्जागरा भूरपि । — शार्दूलविक्रीडित
वातैः शीकरिभिः किमिन्दुवदनाश्वासैः सबाष्पैरलं
सर्वं ते पुनरुक्तमेतदपुनःपूर्वा पुनर्मद्व्यथा ॥१॥

देवबोधस्य ।

992 नो रुद्धं गगनं पयोदपटलै रुद्धं प्रियावाञ्छितं
नो शीर्णाः कमलाकराः — शार्दूलविक्रीडित
कृशतनोः शीर्णा मनोवृत्तयः ।
नो पूरः सरितामपूरि दयितानेत्राम्बुकल्लोलिनी
धिग् धिङ् मारकदर्थितां व्यथयता
पाथोभृता किं कृतम् ॥२॥

तस्यैव ।

989 Quoted by Aufrecht in ZDMG, 36, p. 512, with पुनः for मुहु॰ (c)

991 Quoted by Aufrecht in ZDMG, 36, p. 515.

992 (d) I. O. पाथोभृता for पाथोभृता ; भृतम् (also Sp.) for कृतम्
Quoted by Aufrecht in ZDMG, 36, p. 515.

993 आक्रन्दाः स्तनितैर्विलोचनजलान्यश्रान्तधाराम्बुभि-
Srk. 240 स्तद्विच्छेदभुवश्च शोकशिखिनस्तुल्यास्तडिद्विभ्रमैः।
Smv. 43.33 अन्तर्मे दयितामुखं सखे
शार्दूलविक्रीडित जलधर त्वं दग्धुमेवोद्यतः ॥३॥
यशोधर्मणः।

994 हंसानां गतयो हृता यदि तया कूजन्त्वमी सोत्सुका-
स्तत्केशैर्हृतबर्हकान्तय इमे नृत्यन्तु वा बर्हिणः।
शार्दूलविक्रीडित लावण्यं हृतमस्य दग्धशशिनस्तापं करोत्वेप मे
यूयं गर्जथ यन्निरागसि मयीत्येतन्न युक्तं घनाः ॥४॥
कस्यचित्।

995 दग्धा पूर्वमहं वसन्तसमये चूताङ्कुरैः कोकिलैः
शार्दूलविक्रीडित प्रायः प्रावृषि गर्जितैः किमपरं कर्तव्यमद्य त्वया।
दीना कान्तवियोगदुःखविधुरा क्षामा तनुर्वर्तते
क्षारं प्रक्षिपसि क्षते जलधर प्राणावशेषस्थितेः ॥५॥
कस्यचित्।

१०५ उन्मादः।

996 अप्यामीलितपङ्कजां कमलिनीमप्युल्लसत्पल्लवां
शार्दूलविक्रीडित वासन्तीमपि सौधभित्तिपतितामात्म-
प्रतिच्छायिकाम्।

993 (b) Smv. भवाश्च for भुवश्च.
Smv. यशोवर्मणः for ०धर्मणः. ...
Srk.-anonymous.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 521,
995 (b) I. O. मया for त्वया.
(d) S प्राणावशे प्रस्थिते for प्राणा...ते.
996 (a) Ed., A पल्लवं for पल्लवाम्.

मन्वानः प्रथमं प्रियेति पुलकस्वेदप्रकम्पाकुलं
प्रीत्यालिङ्गति नास्ति सेति न पुनः खेदोत्तरं
मूर्च्छति ॥१॥
कस्यचित्।

997 नियमितमपि मानसं तपोभिः प्रविशति
वैशसवारिधावगाधे। पुष्पिताग्रा
अयमपि चिरविस्मृतोपि धैर्यं व्यपनयतीव
पुनर्मनोविकारः ॥२॥
कस्यचित्।

998 व्याधूतं पवनेन पल्लवमिदं तस्याः क्रुधा नाधरः
स्रंसन्ते कुसुमान्यमूनि न पुनर्बाष्पाम्भसां बिन्दवः।
एषां झांकृतिराकुला मधुलिहामार्तो न मन्युध्वनि- शार्दूलविक्रीडित
र्धिक् कष्टं द्रुमसंगता मृदुरियं वल्ली न मे वल्लभा ॥३॥
श्रीलक्ष्मणसेनदेवस्य।

999 काकुत्स्यं शशलक्ष्मणः क च कुलं भूयोपि दृश्येत सा Kuval. p. 186
दोषाणामुपशान्तये श्रुतमहो कोपेपि कान्तं मुखम्। Sk. I. 177
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा Sv. 1343
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं Sd. under III. 240
पास्यति ॥४॥ Smv, 43.30
शार्दूलविक्रीडित

996 (c) A स्वेदास्र (I. O. स्वेदाश्रु) for स्वेदप्र.

998 (b) Ed. विप्रुषः for बिन्दवः.

(d) A विकृष्टं for धिक् कष्टम्.

Ed. omits देव in the poet's name.

999 (a) Kuval., Sk., Sd., Smv. काकार्यं for काकुत्स्यम्.

(b) Kuval., Sv., Sd., Smv. प्रशमाय नः. (Sd., Smv. मे for नः) for उपशान्तये.

(c) S. K. सान्यादृशी for सा दुर्लभा..

(d) Ed. धास्यति for पास्यति.

1000 अमी कारागारे निविडनलिनीनालनिगडै-
शिखरिणी निबध्यन्तां हंसाः प्रथमबिसकन्दाङ्कुरभिदः ।
नवे वासन्तीनामुदयिनि वने गर्भकलिका-
च्छिदो निर्धार्यन्तां परभृतयुवानो मदकलाः ॥५॥

कस्यचित् ।

१०६ अनङ्गलेखः ।

1001 ताडीदलं यदकठोरमिदं यदेषा
Vsb. III 21
Srk. 1691 मुद्रा स्तनाङ्कघनचन्दनपङ्कमूर्तिः ।
बसन्ततिलक यद्बन्धनं बिसलता तनुतन्तुभिश्च
कस्याश्चिदेष गलितस्तदनङ्गलेखः ॥१॥

कस्यचित् ।

1002 पाणिप्रेङ्खणतो विशीर्णशिरसः स्वेदाम्बुभग्नश्रिय-
SVsb. III. 22 स्तत्कृत्याकृतिलेशतो मनसि ते किंचित्प्रतीतिं गताः ।
rk 1690 वैचित्र्यापुनरुक्तलाञ्छनभृतः खण्डेन वामेन वा
शार्दूलविक्रीडित व्याक्षेपं कथयन्ति पक्ष्मलदृशो लेखाक्षरश्रेणयः ॥२॥

राजशेखरस्य ।

1000 (a) Ed., I. O. निवहै for निगडैः.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 549.

1001 (a) Vsb. ताली for ताडी, तदं for इदं, Vsb., Srk. अत्र for एषा.
(b) Srk. तन्तवश्च for तन्तुभिश्च.
As the verse occurs in Vsb. we can read राजशेखरस्य for कस्यचित्. Srk. राजशेखरस्य.

1002 (a) Vsb. रुग्ण for भग्न. Srk. स्वेदावरुग्ण for स्वेदाम्बुभग्न.
(b) Vsb., Srk. ता for तद्, न for ते.
(c) Vsb वैचित्र्यात् for वैचित्र्यात्, कराग्र्येन for खण्डेन, वाच्येन
I. O., Srk. वाक्येन) for वामेन.

1003 कृतसरलमृणालीसूत्रसंतानबन्धः
कुचमुकुलमुखाङ्कश्चन्दनोपात्तमुद्रः ।
स्मरशबरशराणामेष लक्ष्यीभवन्तीं
कथयति ननु लेखस्तामनुद्घाटितोपि ॥३॥ मालिनी

कस्यचित् ।

1004 तुल्यानुरागपिशुनं ललितानुबन्धं
पत्त्रे निवेशितमुदाहरणं प्रियायाः ।
उत्पश्यतो मम सखे मदिरेक्षणाया-
स्तस्याः समागतमिवाननमाननेन ॥४॥ वसन्ततिलक Vik. II. 13

कालिदासस्य ।

1005 क्वापि स्वेदकणानिपातमसृणं कुत्रापि कम्पस्खल-
त्पाणिव्यस्तलिपि क्वचिद्घनपतद्बाष्पाम्बुलिप्ताक्षरम् ।
क्वापि श्वासमहोर्मिमर्मरमिदं ताडङ्कताडीदलं
वर्णैरेव विना व्यनक्ति सुदृशो भावैकतानं मनः ॥५॥ शार्दूलविक्रीडित

उमापतिधरस्य ।

१०७ वनविहार ।

1006 उज्झन्त्यः स्वर्णकाञ्चीर्झणिति
रशनया चम्पकन्यासमय्या
तन्वत्यस्तारहारान्विचकिल-
कलिकापङ्क्तिमुद्रावलीभिः ।
किं चाशोकप्रवालैररुणमणिमयान् संत्यजन्त्योवतंसा-
नुत्कीर्णाः कामबाणैरिव हृदि सुहृदो
वल्लभानां बभूवु ॥१॥ स्रग्धरा

राजशेखरस्य ।

1003 (c) I. O स्मरशरवशवाणीमेष for स्मर .मेष.

1004 (a) I. O, Vik. ललितार्थबन्धं for ललितानुबन्धम्.

(c) Vik. उत्पक्ष्मणो for उत्पश्यतो.

1006 (b) Ed. मुक्ता for मुद्रा.

1007 दूरोदञ्चितबाहुमूलविलसच्चीनप्रकाशस्तना-
भोगव्यायतमध्यलम्बिवसना निर्मुक्तनाभीह्रदा ।
शार्दूलविक्रीडित आकृष्टोज्झितपुष्पमञ्जरिरजःपातावरुद्धेक्षणा
चिन्वत्याः कुसुमं धिनोति
सुदृशः पादाग्रदुःस्था तनुः ॥२॥

उमापतिधरस्य ।

1008 कङ्केल्लिरेष किमचेतन एव सत्यं
नम्रः स्वयं न कुसुमानि ददाति यस्ते ।
वसन्ततिलक धूर्तोथवा नमति नायमुदस्तबाहु-
व्यक्तोन्नतस्तनतटान्तदिदृक्षयेव ॥३॥

तस्यैव ।

1009 एतस्मिन् सुतनु लतागृहेतिरम्यं
मालत्याः कुसुममनाचितं परेण ।
प्रहर्षिणी इत्युक्त्वा मृदुकरपल्लवं गृहीत्वा
मुग्धाक्षीं रहसि निनाय कोपि धूर्तः ॥४॥

जयमाधवस्य ।

1010 तासां पीनस्तनकलसयोः स्थूलमुक्ताभिरामा-
वेणीभूतास्त्रिवलिविषमे तिर्यगायामभाजः ।
मन्दाक्रान्ता वक्त्रे लोलालकविलुलिताः केतकक्षोदलक्ष्मीं
प्राप्ताः क्रोडावनविहरणे बिन्दवः स्वेदवाराम् ॥५॥

धोयीकस्य ।

१०८ जलक्रीडा ।

1011 आयासश्लथबाहुवल्लिरधिकस्मेरै... . ... ..
शार्दूलविक्रीडित लोलापाङ्गकपोलपालिरलिकस्तोमार्धलुप्तालका ।

1008 (c) Sp. धूर्तो यदा for धूर्तोथवा.
(d) I. O. दिदृक्षयैव for दिदृक्षयेव
1009 (a) S, I. O. गृहेस्तिरम्यं for गृहेतिरम्यम्.
1011 (a) Ed. स्मेरै for स्वैरै.

न्यस्यन्ती मदयत्यनावृत'इव प्रच्छादनायाञ्चल'
मुग्धा स्वेदनिपीतसूक्ष्मसिचयव्यक्तस्तनी वक्षसि ॥१॥

तुङ्गोकस्य ।

1012 अम्भोभिस्तनकुम्भयोस्तव घन .
. शुकवक्रिमप्रणयिणी सेयं न लुप्ता लिपिः ।
किं चैतां कुसुमेषु कुञ्जरशिरोनक्षत्रमालां तिरो- शार्दूलविक्रीडित
धित्सुर्निष्फलमेव मज्जसि नभः-
स्वच्छे सरोवारिणि ॥२॥

धर्माशोकदत्तस्य ।

1013 मुग्धाङ्गना कापि सरोजपत्रे Sv. 1875
विलोलिताम्भःकणिकां विलोक्य । उपजाति
प्रसारयामास जवेन पाणिं
ससंभ्रमं मौक्तिकशङ्कयेव ॥३॥

वल्लभदेवस्य ।

1014 बिभ्राणास्तोयलग्नं वसनमरशनादामनि श्रोणिभारे
दूरादन्योन्यसाचिस्मितचतुरसखीकाभिभि- स्रग्धरा
र्वीक्ष्यमाणाः ।

1011 S, I. O. शुङ्गोकस्य for तुङ्गोकस्य

1012 (a) Ed. supplies the lost portion thus in the Errata श्लेषात्समुत्कीर्णता.

(b) Ed. supplies the lost portion thus in the Errata :-याताया.

Ed. रक्तिम for वक्रिम.

1013 (a) Ed. मुग्धानना for मुग्धाङ्गना. Sv पत्र' for पत्रे, कणिकं निरीक्ष्य for कणिका विलोक्य

(b) शङ्कयैव for शङ्कयेव.

Ed. वल्लभस्य for वल्लभदेवस्य.

उत्तेरुस्तीरलेखां विपुलकमलिनीपत्रमीषद्विलक्षा-
वक्षीजाग्रेषु कृत्वा हरिणशिशुदृशो वीतचीनां-
शुकेषु ॥४॥
धोयीकस्य ।

1015 मोक्तुं स्नानांशुकानि स्मरभसरसस्यानुकूलैर्दुकूलैः
संस्कर्तुं केशपाशानगुरुसुरभिणा धूपधूमोद्गमेन ।
स्रग्धरा
ताम्बूलोल्लेखरेखामपि विरचयितुं धौतपृष्ठेधरोष्ठे
तीरोत्तीर्णास्तरुण्यः क्षणमुपविविशुर्वेल्लिकेलीगृहेषु ॥५॥
राजशेखरस्य ।

१०९ वेशः ।

1016 वक्त्रेन्दुर्मृगलाञ्छनेन वलितः पत्रावलीसंगमा-
त्कण्ठे कम्बुविडम्बिनि द्विगुणितास्तारापहारस्रजः ।
शार्दूलविक्रीडित
दोर्वल्लीयुगले मृणालसुहृदि ग्रन्थिभ्रमाथाङ्गदं
मन्ये भूषणमेव दूषणपदे तत्प्राप्य तस्या वपुः ॥१॥
विरिञ्चेः ।

1017 कौसुम्भं कुचकुम्भयोर्निवसनं सौवर्णिकं कर्णयो-
स्ताडङ्कद्वयमाञ्जनी नयनयोरालेख्यलेखालिपिः ।
शार्दूलविक्रीडित
काश्मीरेण तमालपत्रमलिके हैमी करे कङ्कण-
श्रेणि. पाशयितुं जगन्त्यलमलङ्काराः कुरङ्गीदृशः ॥२॥
उमापतिधरस्य ।

1018 दीर्घापाङ्गं नयनयुगलं भूषयत्यञ्जनश्री-
स्तुङ्गाभोगौ प्रभवति कुचावर्चितुं हारयष्टिः ।
मन्दाक्रान्ता
मध्यक्षामे वपुषि लभते स्थाम कूर्पासलक्ष्मीः
श्रोणीबिम्बे गुरुणि रशनादामशोभां बिभर्ति ॥३॥
कस्यचित् ।

1018 (c) I. O. भागे for क्षामे.

1019 कण्ठे मौक्तिकमालिका स्तनतटे कार्पूरमर्ध्यं रजः Vsb. III. 16
सान्द्रं चन्दनमङ्गके वलयिता पाणौ मृणालीलता। Srk. 385
तन्वी नक्तमियं चकास्ति शुचिनी चीनांशुके बिभ्रती शार्दूलविक्रीडित
शीतांशोरधिदेवतेव गलिता व्योमाग्रमारोहतः ॥४॥
राजशेखरस्य।

1020 इन्दोश्चन्दनबिन्दुनैव दशनच्छायन्तदोयं मुखं
चक्रं लोचनभल्लमार्जनविधौ शाणस्य तत्कुण्डलम्।
भिन्नानां कुचकन्दरा स्मितसुधाकुल्येव मुक्तावली शार्दूलविक्रीडित
पादाब्जे ध्वनदिन्द्रनीलवलय रोलम्बमालैव सा ॥५॥
शाण्डिल्यस्य।

११० दूतीसंवादः।

1021 उत्तिष्ठ यदि जीवन्तीं मामिच्छसि तमानय। अनुष्टुप
अहं नेतुमशक्यापि सुदूरमिदमन्तरम् ॥१॥
कस्यचित्।

1022 कामं निष्करुणं वेत्सि वेत्सि तं बहुवल्लभम्। पथ्यावक्त्र
दूति चूताङ्कुरखरा दिशो वेत्सि न वेत्सि किम् ॥२॥
कस्यचित्।

1023 जीवितं जलतरङ्गविलोलं
यौवनं त्रिचतुराणि दिनानि।
शारद .. .. स्वागता
गच्छ दूति वद सत्वरमेतत्। ३॥
कस्यचित्।

1019 (a) Vsb, Srk. मालिका· for मालिका, अच्छं for अर्घ्यं
(b) Vsb., Srk. वलयिताः for वलयिता Ed. मृणालावली for मृणालीलता, Vsb., Srk लता· for लता.

1020 (a) A ज्याय for च्छाय

1021 (b) S,I. O. इयत् for इदम्.

1023 (c) Ed. supplies the lost portion thus in the Erratta—
भ्रतरला तनुकान्तिः.

1024 यस्मिन्बाष्पतरङ्गिताश्रुकलुषा दृष्टि र्न सिद्धिं गता
Sv 1187 नो हस्तेन विवर्तमानवलयेनालिङ्गितो न स्थितः।
शार्दूलविक्रीडित येन स्त्रीहृदयस्य पद्ममृदुनः सम्भावितो नात्यय-
स्तं गत्वा हृदयं किमश्मसदृश

त्वं दूति वक्तुं क्षमा ॥४॥

कस्यचित्।

1025 दूति त्वं तरुणी युवा स चपलः श्यामास्तमोभिर्दिशः
Sv 1188 संकेतः सरहस्य एष विपिने संकेतकावासकः।
Spd. 3439 भूयो भूय इमे वसन्तमरुतश्चेतो नयन्त्यन्यथा
Smv 41 11 गच्छ क्षेमसमागमाय निपुण रक्षन्तु ते देवताः ॥५॥
शार्दूलविक्रीडित

शीलाभट्टारिकायाः।

१११ स्त्रीविलोभनम्।

1026 प्रियतमभुजपञ्जरोपगूढा
पुष्पिताग्रा शशितिलकेषु विभावरीमुखेषु।

1024 (a) Ed. and MSS. drop न … गता. Ed., however, supplies the lost portion in the Erratta thus —न संचारिता.

(b) Sv. यो for नो· Ed. and MSS. drop नालि…स्थितः. Ed, however, suggests the lost portion in the Erratta thus —रुद्धे पतन्ती क्षितौ.

(d) Sv. भो for तं, गत्वापि किमश्मसारहृदये for गत्वा……सदृशं.

1025 (b) ZDMG, Sv., Spd, Smv सदेश for संकेतः. Sv. Spd., Smv. एव for एष

(c) Sp. Sv., Smv. अन्यत for अन्यथा.

(d) Smv. क्षिप्र for क्षेम. Sv निपुणे for निपुण.

Sp. श्यालभट्टारिकाया for शीला०. Spd —anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 527, with संदेश for संकेत (b)

अनुभवमदविभ्रमोपदिष्टा-
न्यविनयदुर्ललितानि मन्मथस्य ॥१॥

कस्यचित् ।

1027 स्तनयुगवहनालसं च मध्यं
चरणयुगं च नितम्बभारखिन्नम् । पुष्पिताग्रा
यदि वहसि बिभर्षि किं वृथैकं
हृदयमिदं दयितानुरागशून्यम् ॥२॥

कस्यचित् ।

1028 सुलभमनृजु जीवितान्यनित्या-
न्यतिसुभगे व्यतिपाति यौवनं च । पुष्पिताग्रा
अनुभवफलमात्मनो गुणानां
दिवि सुखमस्ति न चापरोक्षमेतत् ॥३॥

कस्यचित् ।

1029 यदि बृहज्जघनापघना तनु-
र्यदि च दीर्घविलोचनमाननम् ।
इदमुपैति रतेरभिधेयतां द्रुतविलम्बित
वहति कस्य कृते मदनो धनुः ॥४॥

कस्यचित् ।

1030 स्तनयुगमसिताक्षि सुन्दरीणां
भवति ततः शुभमप्यबन्ध्यशोभम् ।
यदि किल लभते प्रियार्पितानां पुष्पिताग्रा
रसमुपगूहनपीडनामृतानाम् ॥५॥

कस्यचित् ।

११२ पुविलोभनम् ।

1031 स्मितमधुरस्नपिताधरपल्लवा- द्रुतविलम्बित
मभिनवोल्लसितस्तनकुड्मलाम् ।

1027 Dropped in A

1029 (a) Ed. विलोकित for विलोचन
(b) Ed. अविधेयता for अभिधेयताम्

गुणफलां त्वमिमामबलालता
तरुरिवोद्वह पुष्पवतीं लताम् ॥१॥

कस्यचित् ।

1032 गृहीतं ताम्बूलं परिजनवचोभिः कथमपि
Pv. 187 Spd. 3475 शिखरिणी
स्मरत्यन्तः शून्या सुभग विगतायामपि निशि ।
तथैवास्ते हस्तः कलितफणिवल्लीकिसलय-
स्तथैवास्यं तस्याः क्रमुकफलफालीपरिचितम् ॥२॥

शिल्हनस्य ।

1033 त्वं शीतलो न व्यजनानुरागी
दूरान्तरस्तापवती च कान्ता ।
इन्द्रवज्रा
कामं न शक्ता शरदं विषोढुं
स्थाने समाकाङ्क्षति सा हि मर्तुम् ॥३॥

शब्दार्णवस्य ।

1034 विकसिताधरमायतलोचनं
पिब रहस्यभिराममिदं मुखम् ।
द्रुतविलम्बित
रुचिरपत्रविलम्बितकेशरं
मधुकरः सरसीव सरोरुहम् ॥४॥

कस्यचित् ।

1035 नागवल्लिरधिरोहतु पूगं
राल्लिरेणतिलकेन समेतु ।
स्वागता
त्वामसौ भजति कोकिलकण्ठी
वाचमर्चतु कवेः सुकृतोर्थः ॥५॥

राजशेखरस्य ।

1032 (a) Pv न सुमुखी for कथमपि
(b) Pv मुरहर for सुभग, गतायाम् for विगतायाम् (Spd. विरतायाम्)
Spd., Ed. विल्हणस्य (Pv हरिहरस्य) शिल्हनस्य.

1033 (b) कामानुसक्ता for कामं न सक्ता Ed, साभिसर्तुः for सा हि मर्तुम्.
Ed.—anonymous.

११२ दूतिकोपालम्भः ।

1036 निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न
पुनस्तस्याधमस्यान्तिकम् ॥१॥

S. K. IV. 236
Sd. under
II. 23
Smv. 48 2
Srk. 837
शार्दूलविक्रीडित

सुविभोकस्य ।

1037 स्वकार्यबुद्ध्यैव सदा मदर्थे
दूति प्रवृत्तिं प्रतिपालयन्त्या ।
त्वया फलेनैव विभावितोयं
मया सहाभिन्नशरीरवादः ॥२॥

Srk. 853
उपजाति

छित्तोकस्य ।

1038 अधरो वीतरागस्ते कषाये तव लोचने ।
विहारः कण्ठदेशस्ते दूति प्रव्रजितासि किम् ॥३॥

Srk. 840
अनुष्टुप्

भिक्षोः ।

1039 साधु दूति पुनः साधु कर्तव्यं किमतः परम् ।
यन्मदर्थे विरुग्णासि दन्तैरपि नखैरपि ॥४॥

Kuval. p. 96
Srk 839
अनुष्टुप्

तस्यैव ।

1036 (a) Srk. चन्दन. स्तनतट for चन्दनं स्तनतटं, निर्धौत for निर्मृष्ट
(b) S., I. O तथेय for तवेयम्. Srk. जललवप्रस्यन्दिनी for पुल... तवेयं.
(c) Srk. आशाच्छेदिनि for मिथ्यावादिनि Spd. पीडागमा for ०गमे.
Srk , Spd , Smv.—anonymous.

1037 (a) S, Sp. प्रतिपादयन्त्या (Ed. प्रतिपालयन्त्याः) for प्रतिपालयन्त्या.
S, I. O तित्तोकस्य (Srk वित्तोकस्य) for छित्तोकस्य.

1039 (b) Kuval विलूनासि (Srk. विलग्नासि) for विरुग्णासि
Srk.—anonymous.

Sv. 1428
Spd 3510
अनुष्टुप्

1040 किं त्वं निगूहसे दूति स्तनौ वक्त्रं च पाणिना।
सव्रणा एव शोभन्ते वीराधरपयोधराः ॥५॥
कस्यचित्।

११४ नायिकागमनम्।

1041 शय्यागारं व्रजन्त्याश्चतुरसहचरीमुग्धोक्तिमिश्रं
प्राणेशायाः स्मरज्यारणितमिव
समाकर्ण्य मञ्जीरघोषम्।
स्रग्धरा
यामिन्याः पूर्वयामे विगलति
त्रिततौत्सुक्यमुज्जृम्भमाणो
धन्यो निद्राच्छलेन श्लथयति
सुहृदां नर्मगोष्ठीप्रबन्धम् ॥१॥
विक्रमादित्यस्य।

1042 नितम्बगुर्वी बहुशः श्रमेण
विश्रम्य सोपानपदेषु काचित्।
उपजाति
काञ्चीकरालम्बितवामपाणि-
रुत्थाय हर्म्यं कलयारुरोह ॥२॥
राजशेखरस्य।

1043 एषाऽगतैव निबिरीसनितम्बबिम्ब-
वसन्ततिलक
भारेण पक्ष्मलदृशः क्रियते तु विघ्नः।

1040 (b) Sv., Spd. खण्डिता for सव्रणा ZDMG, Sv., Spd शूरा for वीरा
The verse has been quoted by Aufrecht in ZDMG, 36, p. 551.

1041 (a) S, I O चरतु for चतुर.

1042 (b) Ed. कलम् for कलया.

1043 (a) S निबिवीध for निबिरीस
(b) Ed. नु for तु

यान्त्या इतीव दयितान्तिकमेणदृष्टे-
रग्रे जगाम गदितु लघुचित्तवृत्तिः ॥३॥

रत्नाकरस्य ।

1044 प्रकाम सुप्रात तव नयन सपन्नमभित-
स्त्वयाप्यात्तं चेतः फलमिह मनोराज्यलतया ।
स्मरायासप्रोषप्रशमविधिसिद्धौषधिरियं
स्फुरन्ती संप्राप्ता शशधरकलेव प्रियतमा ॥४॥ शिखरिणी

कस्यचित् ।

1045 चेतः कातरतां जहीहि सपदि स्थैर्यं समालम्ब्यता-
मायाता स्मरमार्गणव्रणपरित्राणौषधि प्रेयसी । Smv 708
यस्याः श्वाससमीरसौरभपतद्भृङ्गावलीवारण- Srk 1641
क्रीडाचञ्चलपाणिकङ्कणझणत्कारो मुहुर्मूर्च्छति ॥५॥ शार्दूलविक्रीडित

कस्यचित् ।

1043 (c) S मान्या for यान्त्या.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 373

1044 (a) Ed सपात for सुप्रातम्, तव and नयन transposed.

(b) S, Sp., I. O त्वयाप्यन्तं for त्वयाप्यात्तम्

1045 (a) Srk विमुञ्च झटिति for जहीहि सपदि, स्वास्थ्य for स्थैर्यं, Smv हृदय for सपदि दधीथा चण for समालम्ब्यता.

(b) I. O सायाता (Smv. प्राप्ता सा, Srk. प्राप्तासौ) for मयाता Smv. गण for परि

(c) Smv येन for यस्या, तरङ्ग for समीर, मिलद् for पतद्

(d) Smv. क्रीडान्दोलितबाहु (Srk. क्रीडापाणिविधूति) for क्रीडा ... पाणि, रणत् for झणत्.

Smv. attributes it to गोलानन्द.

११५ नायकागमनम्* ।

1046 संकीर्णं शयनीयमर्पय कुरु द्वेधोपधानक्रिया-
मभ्यासे कुरु तालवृन्तकमिति व्यापारयन्त्या सखीम् ।
आयातस्य पुनर्विलासभवनं कन्दर्पदीक्षागुरो-
रभ्युत्थानमपि प्रमोदजडया नाविष्कृतं सुभ्रुवा ॥१॥

शार्दूलविक्रीडित

जलचन्द्रस्य ।

1047 द्वारागतं काप्यवगम्य कान्त-
मुन्नम्य वक्त्रं सिचयाञ्चलेन ।
विमुञ्चती मण्डनकर्मदीर्घं
यथायथात्मानमलंचकार ॥२॥

उपजाति

राजशेखरस्य ।

1048 काप्यागतं वीक्ष्य मनोधिनाथं
समुत्थिता सादरमासनाय ।
करेण शिञ्जद्वलयेन तल्पम्
आस्फालयन्ती कलमाजुहाव ॥३॥

उपजाति

तस्यैव ।

1049 प्रियतममवलोक्य स्वाश्रयादुत्पतन्त्याः
सरभसमपरस्याः पादमूले सलीलम् ।
अपतदथ कराग्रादच्छरत्नात्मदर्शः
शशधर इव वक्त्रच्छायया निर्जितश्रीः ॥४॥

मालिनी

कस्यचित् ।

1050 द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समापादितम् ।

शार्दूलविक्रीडित

* S, A नायकाभिगमनम्.

1046 (a) I. O , Sp. हर for कुरु.

1049 (c) A रत्नादर्पण· for रत्नादर्शं

आनीतं पुरतः शिरोंशुकमधः क्लृप्ते चले लोचने
वाचस्तच्च निवारितं प्रसरणं संकोचिते दोर्लते ॥५॥

कस्यचित् ।

११६ वाद्यम् ।

1051 पुरन्ध्रीणां पीनैस्तुलितपरिणाहस्तनतटै-
र्द्रुतं संमृज्यन्तां करकिसलयैर्झर्झरपुटाः । शिखरिणी
कलं गुञ्जन्मुग्धं पिबतु मधुदिग्धाधरदलं
मुखं नीलो वेणुः कमलमिव माला मधुलिहाम् ॥१॥

विशाखदत्तस्य ।

1052 धत्ते व्यक्तिं रसितमसकृज्जर्जरं झर्झराणां
स्तोकोत्तुङ्गध्वनितलहरी··· . ········ । मन्दाक्रान्ता
. .स्निग्धै· करकिसलयैराहताः किन्नराणां
शब्दायन्ते नवघनघटामन्द्रनादं मृदङ्गा· ॥२॥

उमापतिधरस्य ।

1053 नान्तःकर्षन्ति केषां कृतपदरचनैः पामरग्रामनारी
वक्षोजोत्तुङ्गतुम्बीफलनिहतमृदूत्सर्पिगम्भीरशब्दैः ।
उद्गीताः शृङ्गकोटीस्थगितकरशिखालोलकल्लोलवीणा- स्रग्धरा
तन्त्रीकाणानुरूपध्वनिभिरभिनयव्याहृताः
काव्यबन्धाः ॥३॥

कस्यचित् ।

1050 (d) Sp. दर्शिते for दोर्लते.

1051 (a) I O पुरस्त्रीणां for पुरन्ध्राणाम्

(d) I. O. मनो for माला

1052 (b) Ed supplies the lost portion in the Erratta thus—
मेरिका नानदीति

(c) Do—धीरैः.

1053 (b) Sp. हृदुत्सर्पि for मृदूत्सर्पि.

Sp. तस्यैव for कस्यचित्.

1054 वक्षोजाभोगगुर्वोर्मुखरयति युगं कांस्ययोः कापि कान्ता

स्रग्धरा

प्रयोदत्तव्रणालीविधुरितमधरं वेणवे कापि दत्ते ।
काचित्कृत्वाङ्कभङ्गं प्रसृतमुदमिव स्निग्धमुग्धप्रणादं
वारं वारं कराभ्यां प्रहरति मुरजं गीतसंवाद रम्यम् ॥४॥

कालिदासनन्दिन ।

1055 वीणया च निनदेन च वेणोः

स्वागता

केकया च कलकण्ठगिरा च ।
शीत्कृतैश्च रणितैश्च वधूनां
भुञ्जते श्रुतिसुखानि युवानः ॥५॥

राजशेखरस्य ।

११७ नृत्यम् ।

1056 रम्यं गायतु वा तरङ्गयतु वा व्यावर्तनैर्भ्रूलते

शार्दूलविक्रीडित

व्यालोलं नयनं च नर्तयतु वा क्षुण्णः स एष क्रमः ।
शृङ्गारं पुनरातनोति मधुरव्यावर्तना नर्तकी
प्रत्यङ्गं रसपेशलानि करणान्याधाय यन्नृत्यति ॥१॥

प्रियंवदस्य ।

1057 विलोला भ्रूवल्ली मसृणतरला दृष्टिरधरः

शिखरिणी

स्मितस्निग्धो धीरा गतिरलसमेवाङ्गचलनम् ।
स्वभावप्रव्यक्तोन्नतनतविभागा तनुलता
विभावो लास्येन स्फुरति कतरोस्या मृगदृशः ॥२॥

उमापतिधरस्य ।

1056 (b) S एव for एष
(c) Sp. आतनोतु for आतनोति
(d) S. किरणानि for करणानि.
1057 (d) S, I. O. कितवो for कतरो

1058 नामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामा विटपसदृशं स्रस्तमुक्तं द्वितीयम्।   M II 6
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं   मन्दाक्रान्ता
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥३॥

कालिदासस्य।

1059 अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमवगतस्तन्मयत्वं रसेषु।   Smv 10973
शाखायोनिर्मृदुरभिनयः तद्विकल्पानुवृत्तौ   M II. 8
भावाभावं नुदति विषयाद्रागबन्धः स एव ॥४॥   मन्दाक्रान्ता

तस्यैव।

1060 ननृतुरनतिखेदं कौशिकीवृत्तिचञ्च-
च्चटुलचरणचारीचारुचित्राङ्गहावाः।   मालिनी
निजहृदयनिमज्जन्मारनाराचसाची-
कृतवदनविनिद्राम्भोजभाजो युवत्यः ॥५॥

हरेः।

११८ गीतम्।

1061 अलसमुकुलिताक्षं वक्त्रमालोक्य तस्या
मयि विलुलितचित्ते मूकभावं प्रपन्ने।   मालिनी

1058 (a) Ed. नयनं for वलयं
(b) Ed. कृत्वास्याग्रे for कृत्वा श्यामा, हस्त for स्रस्त
(c) Ed पदाङ्गल्या for पादाङ्गुष्ठा, पातिनाङ्क for पातिताक्षं
(d) M नृत्तात् for नृत्यात Ed कान्तमत्यायतार्धम for कान्त-मृज्वायतार्धम्

1059 (b) Smv. अनुगत (Ed उपगत) for अवगत
(c) Smv षड्विकल्पो (I. O., S सद्विकल्पा) for तद्विकल्पा, अनुवृत्तो for अनुवृत्तौ
(d) Smv. भावाभावे for ०भावं, दधति for नुदति, विषयान् for विषयात्

श्रवणकुवलयान्तश्चारिणा षट्पदेन
क्षणमनुगतनादं गीतमन्तः स्मरामि ॥१॥

श्रीमल्लक्ष्मणसेनदेवस्य ।

1062 नाधन्यैः क्षणदाविराममधुरा किंचिद्विनीता रसैः
शार्दूलविक्रीडित श्रोत्रै . . पेयानि च ।
श्रूयन्ते मृदुपीतवक्त्रमरुतः पौराणरीतिक्रम-
व्यालोलाङ्गुलिरुद्धमुग्धसुषिरश्रेणीरवा वेणवः ॥२॥

योगेश्वरस्य ।

1063 विलासमसृणोल्लसन्मुसललोलदोःकन्दलाः
Spd 582 परस्परपरिस्खलद्वलयनिःस्वनोद्बन्धुराः ।
Srk 1178 चलन्ति कलहुं कृतिप्रसभकम्पितोरःस्थल-
पृथ्वी त्रुटद्गमकसंकुलाः कलमकण्डनीगीतयः ॥३॥

तस्यैव ।

1064 चिन्वानाभिर्मधूकं मधुरमधुकरध्वानिचूताङ्कुराग्र-
स्रग्धरा ग्रासव्यग्रान्यपुष्टध्वनितधृतजयारम्भसंरम्भणाभिः ।

1061 Ed. om. देव in the poet's, name.

1062 (b) Ed. supplies the lost portion thus in the Errata—
नीपि च किन्नरीकलगलोद्गीतानि

(d) I. O. बद्ध for रुद्ध.

1063 (a) Spd., Srk कन्दली for कन्दला॰.

(b) Srk निःस्वने for निःस्वनोद्. Sp., Srk दन्तुराः for बन्धुराः

(c) Spd. लसन्ति (Srk हरन्ति) for चलन्ति S, Sp., I. O. उरस्तल for ॰स्थल.

Spd. attributes it to विज्जका. Srk.—anonymous.

गीयन्ते वल्लवीभिः पथिकसहचरीप्राणयात्राप्रदीपाः
प्रातः प्रातर्वसन्तस्वररचितपदोद्गारिणो
गीतभेदाः ॥४॥

विरिञ्चेः ।

1065 क्वचिन्मसृणमांसलं क्वचिदतीव तारं पदे
प्रसन्नसुभगं मुहुः सुरतरङ्गलीलाङ्कितम् । पृथ्वी
इदं हि तव वल्लवीरणितनिर्गतैर्जल्पितं
मनो मदयतीव मे किमपि साधु संगीतकम् ॥५॥

वामनस्य ।

११९ द्यूतम् ।

1066 आश्लेषचुम्बनरतोत्सवकौतुकानि — Ar VII. 115, Spd. 3661, Smv. 75 7, Srk. 606
क्रीडा दुरोदरपणः प्रतिभूरनङ्ग ।
भोगः स यद्यपि जये च पराजये च — वसन्ततिलक
यूनोर्मनस्तदपि वाञ्छति जेतुमेव ॥१॥

मुरारेः ।

1067 आश्लेषः प्रथमं क्रमेण विजिते कृत्ये धनस्यार्पणं — Spd 3604
केलिद्यूतविधौ पणं प्रियतमे कान्तां पुनः पृच्छति । — Smv 75.5

1064 (d) Ed. गीति for गीत.

1065 (a) Sp. भारं for तारं.

(b) Ed. लीलान्वितं for लीलाङ्कितम्.

(c) S वलित for रणित. A, I. O निन्दितै॰ for निर्गत॰.

1066 (a) Ar. कौतुकादि (Spd. भूषणादि, Smv. भूषणानि) for कौतुकानि.

(b) Ar दुरोदरपणप्रति for ०पण॰ प्रति

(c) Ar. भोगस्तु for भोग स.

1067 (a) Spd., Smv, Srk. आश्लेष for आश्लेषः Srk. क्रमादपहृते for क्रमेण विजिते.

Spd., Smv., Srk. हृद्येधरस्यार्पणे for कृत्ये. ....र्पणं.

(b) Spd. नर्म for केलि.

Sik 605 अन्तर्गाढविगूढमन्मथरसस्फारीभवद्गण्डया
शार्दूलविक्रीडित स्वैरं शारिविसारणाय निहितः
स्वेदाम्बुगर्भः करः ॥२॥
योगेश्वरस्य ।

1068 तथा गृहीतस्तन्वङ्ग्या विजयोपार्जितः पणः ।
पथ्यावक्त्र यथा धन्याधरोष्ठेन हारितेपि जितं मया ॥३॥
कस्यचित् ।

1069 अक्षदेवनपणीकृतेधरे
Sv. 2048 कान्तयोर्जयपराजये सति ।
Smv. 75 8 अत्र वेत्ति यदि वक्ति मन्मथः
रथोद्धता कस्तयोर्जयति जीयतेपि वा ॥४॥
काश्मीरकजयवर्धनस्य ।

1070 सोत्कण्ठा च पराङ्मुखी च
पुरतो बाला सखीकौशला-
शार्दूलविक्रीडित दक्षद्यूतविधौ विजित्य मदनक्रीडापणं प्रेयसः ।

1067 (c) Spd., Smv read thus—अन्तर्हास (Smv सान्तर्हास) निरोध (Smv निरुद्ध) संभ्रतरसोद्भेदस्फुरद्गण्डया.
Srk. अन्तर्गूढविगाढसंभ्रम for अन्त. ...मन्मथ.
(d) Srk. तूष्णीं for स्वैरं.
Srk.—राजशेखरस्य Smv —anonymous
1068 (a) Ed. कर for पण.
1069 (b) Sv., Smv. वक्तु for वेत्ति, वेत्ति for वक्ति Sv. अथ for अपि.
Ed., Sv. omit काश्मीरक in the poet's name. Smv. attributes it to भागवतजयवर्धन.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 512.

सानन्दा जयतोपि जृम्भितघनव्रीडापि संभोगतः
स्त्यक्तुं न च याचितुं न च परिच्छेदे बभूव प्रभुः ॥५॥

जलचन्द्रस्य ।

१२० दृष्टिः ।

1071 निरवधिरकूपारः पीतः पुरा मुनिना मुहु-
र्निजकरपुटोत्सङ्गेनेद मृषोद्यमभूदपि ।
यदि न विदुषां धैर्याम्भोधिं गभीरमवज्ञया
नयननलिनीनालाकृष्टं पिबन्ति मृगदृशः ॥१॥

हरिणी

धर्मयोगेश्वरस्य ।

1072 प्रेयांसमीक्षितुमथेक्षणतारकस्य
दूरादपाङ्गपदवीमभिधावतोस्याः ।
आनन्दबाष्पजलबिन्दुनिभेन सान्द्राः
स्वेदाम्बुसीकरकणा इव संनिपेतुः ॥२॥

वसन्ततिलक

कस्यचित् ।

1073 विस्फाराः प्रथमं कुतूहलवशादुत्क्षिप्तपक्ष्मश्रियो
जातव्रीडमथो विनम्रसरलाः किंचिद्विलोलास्ततः ।
अभ्यासं पुनराकलय्य कलया कान्तं कुरङ्गीदृशां
सिञ्चन्तीव सुधाच्छटाभिरनृजुप्रागल्भ्यगर्भा दृशः ॥३॥

शार्दूलविक्रीडित

वीर्यमित्रस्य ।

1074 वान् ... . दूत्यो
वाग्देवतापि न सुखं यदपि व्यनक्ति ।
तत्कूटगर्वितदरस्फुटभावभाजो
व्याकुर्वते मृगदृशां दृश एव तत्त्वम् ॥४॥

वसन्ततिलक

1070 (d) S संत्यक्तं for संत्यक्तुम् , याचितं (also Sp.) for याचितुम्

1074 (a) Ed. supplies the lost portion thus in the Errata-यद्वान न मदनो न विदन्ति,

(b) I. O. adds न after this line,

(c) S, Sp. गर्भित for गर्वित.

1075 आश्चर्यस्तिमिताः क्षणं क्षणमथ प्रीतिप्रमीलत्पुटा
वातान्दोलित.. ... .पीयूषधारामुचः ।
शार्दूलविक्रीडित एताः कस्य हरन्ति हन्त न मनः किंचित्त्रपामञ्जुल-
प्रेमप्रेरणमत्र मुग्धमुरचक्षारोत्तरा दृष्टयः ॥५॥

शङ्करधरस्य ।

१२१ कटाक्षः ।

1076 प्रणालीदीर्घस्य प्रसृमरतरङ्गस्य सुहृदः
Vsb. IV 18 कटाक्षव्याक्षेपाः शिशुशफरफालप्रतिभुवः ।
Srk. 520 सुधायाः सर्वस्वं कुसुमधनुषोस्मान् प्रति सखे
शिखरिणी नवं नेत्राद्वैतं कुवलयदृशः संनिदधति ॥१॥

राजशेखरस्य ।

1077 तिष्ठन्त्या जनसंकुलेपि सुदृशा सायं गृहप्राङ्गणे
शार्दूलविक्रीडित तत्कालं मयि निःसहालसतनौ वीथ्यां मृदु प्रेङ्खति ।
ह्रीनम्राननयैव लोलसरलं निश्वस्य तत्रान्तरे
प्रेमार्द्राः शशिखण्डपाण्डिममुषो

मुक्ताः कटाक्षच्छटाः ॥२॥

कस्यचित् ।

1075 (b) I O., S fill up the lacuna thus—पङ्कजातसुमनः (Ed. नीलपङ्कजगलत् in Erratta).

A मुष. for मुचः.

(c) I. O., Sp कुञ्चन for मञ्जुल.

S शङ्करस्य for शङ्करधरस्य.

1076 (a) I. O प्रतिपदमपाङ्गस्य (Vsb., Srk. प्रतिकलमपाङ्गस्य) for प्रसृमरतरङ्गस्य.

(c) Vsb दधानाः (Srk. सुवाना) for सुधायाः.

(d) Vsb संदधति च for सनिदधति.

Ed.—anonymous.

1077 (c) I. O. नयनैरलोल for ०ननयैव लोल

1078 उपरि कबरीबन्धग्रन्थीनथ ग्रथिताङ्गुली-
र्निजभुजतले तिर्यक्कन्ध्या वितत्य विवृत्तया । Srk 509
विवृतविलसद्वामापाङ्गस्तनार्धकपोलया हरिणी
कुवलयदलस्रक्संदिग्धश्रियः प्रहिता दृशः ॥३॥

परमेश्वरस्य ।

1079 वैदग्ध्यक्रमबद्धमुग्धहसितज्योत्स्नावलिप्ताधरे
लब्धा किं नु कुरङ्गशावनयने दीक्षा त्वया मान्मथी ।
लीलानन्तरमन्मथाः शशिमुखि क्षिप्यन्त एताः कथं शार्दूलविक्रीडित
कुन्देन्दीवरदीर्घदामतरलस्निग्धा कटाक्षच्छटाः ॥४॥

मङ्खस्य ।

1080 स्वच्छन्दं मीनकेतोर्युवजनमृगयाजातकौतूहलस्य
जाताबन्धावगच्छत्यधिगतगरिमा-
कार्मुकोत्तंसलक्ष्मीम् । स्रग्धरा
यावल्लोलाक्षि नायं प्रतिफलति वलच्चन्द्रिकाकर्बुरान्तः-
कालिन्दीवीचिमैत्रीमवतरति
तवागोत्रसाक्षी कटाक्षः ॥५॥

जलचन्द्रस्य ।

1078 (a) Srk. ग्रन्थेरथ for ग्रन्थीनथ S, I. O. अङ्गुरी for अङ्गुली.
(b) Srk. लते for तले. I O., S विवृत्य या for विवृत्तया.
(c) Srk. वामापाङ्ग for वामापाङ्ग.
(d) I. O. पिहिता for प्रहिता.
1079 (a) S, I. O. भ्रम for क्रम I. O लिप्ते for लिप्ता
1080 (b) Sp बन्ध्या for बन्धा.
(c) I. O. कर्बुराम्भः for कर्बुरान्तः.
(d) I O. तव गात्रे for तवागोत्र.

१२२ नायिकाचाटुः ।

1081 पाणौ पद्मधिया मधूककुसुमभ्रान्त्या तथा गण्डयो-
Sık. 451 नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे ।
Smv. 65 10 लीयन्ते कबरीषु बान्धवजनव्यामोहजातस्पृहा
शार्दूलविक्रीडित दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि
रक्षिष्यसि ॥१॥

पाणिनेः ।

1082 शोणस्तेधरपल्लवो मधुमती कान्तिर्गिरो नर्मदा
शार्दूलविक्रीडित दृष्टिर्दिव्यतरङ्गिणीव वदनश्रीश्चन्द्रभागोपमा ।
गम्भीरा नलिनाक्षि नाभिरपि चेत्तद्देहदाहज्वर-
च्छेदाय क्षणमात्रमम्बुजमुखि त्वं बाहुदा मे भव ॥२॥

दक्षस्य ।

1083 मुग्धे नार्जुनतां जहाति नयनं मध्ये तथा कृष्णतां
शार्दूलविक्रीडित द्वे रूपे दधतामुना विरचितः कर्णेन ते विग्रहः ।
तत्कृष्णार्जुनकर्णविग्रहवती साक्षात्कुरुक्षेत्रतां
यातासि त्वदवाप्तिरेव तरुणि श्रेय किमन्यत्परम् ॥३॥

सत्यबोधस्य ।

1084 तव नयनवन्नीलाम्भोज तवाननवच्छशी
हरिणी तव हसितवज्ज्योत्स्नाद्योतस्तवोदितवत्सुधा ।

1081 (a) Srk. मुकुल for कुसुम.
(c) Ed. मुग्धाशया for जातस्पृहा
(d) Smv, Srk. सुतनु for तरुणि.
Smv.—anonymous.

1082 (b) S, I. O. तरङ्गिणी च for ०व.
(c) Sp. नलिनाभ for नलिनाक्षि.

सुभगमधुराभोगे .. . ...
प्रणयिनि जगत्संभाराणां त्वमित्युपमास्पदम् ॥४॥

प्रियंवदस्य ।

1085 स्वर्गं स्वर्गादपि समधिके साधनं बोधयन्तः
सन्तु प्रीत्यै मम पुनरमी तन्वि खेदाय वेदाः ।
येषां मध्ये कथयति न चेदीदृश कोप्युपाय- मन्दाक्रान्ता
... . प्रेष्यतां येन यामि ॥५॥

सागरस्य ।

१२३ मधुपानम् ।

1086 अर्धपीतमदिरा मणिपारी
शोभतां (ते) कथमतीव तरुण्याः । Sv 2017
चुम्बितैरधिकपाटलभासा स्वागता
पूरिताधरमयूखभरेण ॥१॥

जयमाधवस्य ।

1087 संक्रान्तमाननमवेक्ष्य मृगेक्षणाया
पार्यां चलन्नयनमासवपूरितायाम् । Sv. 2020
सेन्दीवर कमलमित्यवगम्य दूराद्- वसन्ततिलक
भृङ्गो ममज्ज सहसैव यथार्थनामा ॥२॥

काश्मीरप्रचण्डमाधवस्य ।

1084 (c) Ed. supplies the lost portion in the Errata thus—स्तव वराङ्गकवीप्सितैः, but this is contrary to metre.
(d) A, I. O. सद्भावाना for संभाराणाम्.

1085 (d) Ed. supplies the lost portion in the Errata as खेदापाय प्रणयिवचन.

1087 (a) Sv. मृगायताक्ष्या. for मृगेक्षणायाः.
(b) Sv. पर्याचलन् for पार्यां चलन्.
(c) Sv. अवमन्य for अवगम्य
Ed, चण्ड for प्रचण्ड in the poet's name. Sv. om. काश्मीर.

1088 कान्ताननाधररसामृततृष्णयेव
Sv. 2018 बिम्बं पपात शशिनो मधुभाजने यत्।
Smv. 73. 5 निःशेषिते मधुनि लज्जितचित्तवृत्ति
वसन्ततिलक तत्तन्मुखाब्जजितकान्ति तया विनष्टम् ॥३॥

विभाकरशर्मणः।

1089 पीतस्तुषारकिरणो मधुनैव सार्ध-
Sv. 2022 मन्तः प्रविश्य चषके प्रतिबिम्बवर्ती।
Spd. 3648 मानान्धकारमपि मानवती जनस्य
वसन्ततिलक नूनं बिभेद यदसौ प्रससाद सद्यः ॥४॥

रत्नाकरस्य।

1090 ललितकण्ठनिवेशितदोर्लतः
करतलाकलितैकपयोधरः।
द्रुतविलम्बित मृगदृशो दशनच्छदवासितं
मधु पपौ मदनोत्सव ईश्वरः ॥५॥

मुञ्जस्य।

1088 (a) Ed., A, S. कान्ताननामृतरसाधर (Sv., Smv. कान्तानवाधररसामृत) for कान्ता…मृत.

(d) Sv., Smv. मुखावजितकान्तितयेवनष्टम् for मुखाब्जजितकान्तितया बिनष्टम्.

Smv., Sv. वर्मणः for शर्मणः in the poet's name. The verse has been quoted by Aufrecht in ZDMG, 36, p. 543

1089 (b) Sv., Spd. चषक for चषके.

This is a doubtful verse of Amaru (See S. K De, *Our Heritage*, II. p. 71)

1090 (d) Ed., A मदनोत्सवमीश्वरः for मदनोत्सव ईश्वरः.

१२४ शयनाधिरोहणम् ।

1091 अथ रतिरभसादलीकनिद्रा-
मधुरविघूर्णितलोचनोत्पलाभिः ।
शयनतलमशिश्रियन्वधूभिः
सह मदमन्मथमन्थरा युवानः ॥१॥ पुष्पिताग्रा

रत्नाकरस्य ।

1092 प्रत्यङ्गं प्रतिकर्म नर्मपरया कृत्वाधिरूढं स्मरा-
दौत्सुक्यं प्रविलोक्य मोहनविधौ चातुर्यमालोक्य च ।
सद्यो यावकमण्डनं न रचितं पादे कुरङ्गीदृशा
स्मेरान्ता विशदच्छदे च
शयने दृष्टिः समारोपिता ॥२॥ शार्दूलविक्रीडित

राजशेखरस्य ।

1093 पर्यङ्काङ्कतलं गते रतिरसाव्यक्तक्रमं वल्लभे
तद्भावावगतौ तयापि रतये स्वं चित्तमाविष्कृतम् ।
नास्ते यन्मणिकुण्डले परिहृतो हारः समं कङ्कणैः
काञ्चीदाम निराकृतं विचकिलैः
क्लृप्तश्च नो शेखरः ॥३॥ शार्दूलविक्रीडित

तस्यैव ।

1094 काञ्च्या गाढतरं निबद्धवसनप्रान्ता किमर्थं पुन- As. 20
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति । Sv. 2081

1091 Quoted by Aufrecht in ZDMG, 36, p. 373.
1092 (b) Ed. प्रतिलोक्य for प्रविलोक्य.
1093 (b) Ed. तया प्रियतमे for तयापि रतये
(c) I. O., A नास्ते for नास्ते.
1094 (a) Sv., Smv., As. गाढतरावबद्ध for गाढ ····निबद्ध.

Smv. 77.11
शार्दूलविक्रीडित

मात. सुप्तमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोवकाशस्तथा ॥४॥

अमरोः ।

रथोद्धता
Ks. VIII. 82

1095 तत्र हंसधवलोत्तरच्छदं
जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः
शारदाभ्रमिव रोहिणीपतिः ॥५॥

कालिदासस्य ।

१२५ आलिङ्गनम् ।

वसन्ततिलक

1096 उद्भिन्नसात्त्विकविकारपरिप्लवानि
सद्यस्तिरस्कृतमनोभववेदनानि ।
तन्वि त्वदङ्गपरिरम्भसुखामृतानि
प्रादुर्भवन्तु पुनरागतजीवितानि ।१॥

कस्यचित् ।

वंशस्थविल

1097 समैव सर्वत्र चरित्रपद्धति-
र्निजः परो वा गुणिनां न विद्यते ।
चकार हारः........ . .
यतः परीरम्भविधौ द्वयोरपि ॥२॥

नारायणस्य ।

Srk. 601
शार्दूलविक्रीडित

1098 द्रष्टुं केतकगर्भपत्रसुभगामूरुप्रभामुत्सुक-
स्तत्संवाहनलीलया च शनकैरुत्क्षिप्तचण्डातकः ।

1094 (c) Sv. स्वप्तुं (Smv. सुप्तिम्) for सुप्तम्. Smv. लुम्पसिममेत्यारोपित for वारयति . .. हित

Sv. quotes it anonymously.

1097 (b) Ed. supplies the lost portion in the Erratta as कतुकित्व (?) नाशं, but the metre requires one more syllable. S, I. O. ततः for यतः.

1098 (a) Srk. पत्त्रगर्भ for गर्भपत्त्र.

लज्जामुग्धविलोचनं स्मितसुधानिर्धौतविम्बाधरं
किंचिद्विश्लथबाहुबन्धनमसावालिङ्गितो बालया ॥३॥

कस्यचित् ।

1099 भयमुकुलितचक्षुः संततोत्कम्पनीवी
मणिमुखरितकाञ्चिः श्वासशुष्यन्मुखश्रीः ।
अशिथिलभुजबन्धन्यासनि शङ्कलग्ना
मम वपुषि विशन्तीवायताक्षी धिनोति ॥४॥ मालिनी

उमापतिधरस्य ।

1100 आनन्दाननमीलिताक्षियुगलं किं त्वं मुधा तिष्ठसि
ज्ञातोसि प्रकटप्रकम्पपुलकैरङ्गैः स्थितं मुग्धया ।
मुञ्चैनां जड किं न पश्यसि गलद्बाष्पाम्बुधौताननां
सख्यैवं गदिते विमुच्य रभसात्कण्ठे
विलग्नो मया ॥५॥ शार्दूलविक्रीडित

कस्यापि ।

१२६ चुम्बनम् ।

1101 रसवदमृतं कः संदेहो मधून्यपि नान्यथा S.K. I. 110
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् । Sv. 1511
सकृदपि पुनर्मध्यस्थः सन्सान्तरविज्ञनो Srk. 529 Spd. 3312
वदतु यदिहान्यत्स्वादु स्यात्प्रियारदनच्छदात् ॥१॥ Smv. 53 21

कस्यचित् । हरिणी

1098 (c) Srk विलोचनस्मित for विलोचनं स्मित
(d) I. O. om. किंचिद्...बाहुब, and for the rest reads त्कमलसारालिङ्गितो बालया. Srk. कम्पप्रश्लथ for किंचिद्विश्लथ.

1100 (d) Sp विलग्ना for विलग्नो.

1101 (a) Smv. मधूनि मधून्यथ for मधून्यपि नान्यथा
(b) Sv. अथ (Srk. अपि) किं for अधिकं Spd. द्राक्षायाश्च for चूतस्यापि, तरं for रसं.
(d) Sv. यदिहास्त्यन्यत् for यदिहान्यत्, om. स्यात्. Spd., Srk, Sk. and Sv. दशन for रदन.

1102 कियन्तंचित्कालं दशनपदभीताधरदल
ललाटप्रस्वेदस्खलदलकमुत्तालनयनम् ।
शिखरिणी
निषेधानुज्ञातं पुलकितकपोलं प्रियतमो
वधूवक्त्राम्भोजं रसयति च निर्वर्णयति च ॥२॥

अभिनन्दस्य ।

1103 फलमलघु किं लीलावल्ल्या गृहं नु गुणश्रिया-
ममृतमथवैकस्थं पिण्डीकृतं नु रसायनम् ।
हरिणी
निधिरुत रतेः सर्वस्वं वा विलासविधेः प्रियै-
रिति न ललनाबिम्बोष्ठानां रसः परिचिच्छिदे ॥३॥

शिवस्वामिनः ।

As. 68
Sv. 2113
Sd. under
I. 3
शार्दूलविक्रीडित

1104 शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जामन्थरतारकेण सहसा बाला चिरं चुम्बिता ॥४॥

अमरोः ।

As 33
Sv. 1303
Spd. 3668
शार्दूलविक्रीडित

1105 संदष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥५॥

तस्यैव ।

१२७ अधरखण्डनम् ।

Sv. 2097
Spd. 3684

1106 दृशा सपदि मीलितं दशनरोचिषा निर्गत
करेण परिवेपितं वलयकैस्तथा क्रन्दितम् ।

1103 (c-d) I. O. om. portion from वा to लल in ललना (d)
1104 (c) Sv. परिरभ्य for परिचुम्ब्य
(d) Sv., Sd., As, लज्जानम्रमुखी प्रियेण हसता for लज्जा...सहसा.
Sv —anonymous.
1105 (a) Sv., Spd. संदष्टेधरपल्लवे for सं...वा.
(d) Sv. वृथैव (Spd., As श्रमाय) for मुधैव.
1106 (b) Sv., Spd., Smv. अथ for तथा.

प्रियैः सपदि योषितां ननु विखण्ड्यमानेऽधरे
परव्यसनकातराः किमु न कुर्वते साधवः ॥१॥ Smv. 78 13
पृथ्वी

कस्यचित् ।

1107 सलीलनिर्धूतकरारविन्द-
सीत्कारसंधुक्षितमन्मथायाः ।
जग्राह बिम्बाधरमूढरागं
रागं रमण्या हृदयं च कान्तः ॥२॥

उपजाति

रत्नाकरस्य ।

1108 यद्दन्तदष्टदशनच्छदना चकार
सीत्कारमाकुलितनेत्रयुगा मृगाक्षी ।
मन्ये तदेतदधरामृतपानसेक-
निर्वाप्यमाणविरहज्वरवह्निशब्दम् । ३॥

वसन्ततिलक

जयकण्ठस्य ।

1109 नान्दीपदानि रतिनाटकविघ्नशान्ता-
वाञ्छाक्षराणि परमाण्यथवा स्मरस्य ।
दष्टेऽधरे प्रणयिना विधूताग्रपाणेः
सीत्कारशुष्करुदितानि जयन्ति नार्याः ॥४॥

S K. II. 381
Dr. under
II. 40 b
Smv. 78 4
वसन्ततिलक

वामनस्य ।

1106 (c) Sv, Spd., Smv. समद for सपदि S नख for ननु, विखण्ड्य-
मानाधरे (also I. O.) for विखण्ड्यमानेऽधरे

(d) S, I O किमपि (Sv. किमिव, Ed. किमिति) for किमु न
Ed. कुर्वता for कुर्वते

Quoted by Aufrecht in ZDMG, 36, p. 374.

1108 (a) I. O. मत्कुम्भदन्त for यद्दन्तदष्ट

(b) Ed. आकुञ्चित for आकुलित

Ed. जयंकरस्य for जयकण्ठस्य.

1109 (a) Dr. विभ्रमाणाम् for विघ्नशान्ताव्

(c) S. K. विधुताग्रपाणि for विधूताग्रपाणे.

(d) Smv. reads सीत्कारवन्ति रणितानि जयन्ति तन्व्याः.

1110 सदष्टे धरपल्लवे प्रणयिना हस्ताम्बुजव्याधुति-
प्रेङ्खत्काञ्चनकङ्कणावलिकलव्याहारमिश्रश्रियः ।
शार्दूलविक्रीडित
सीत्कारा हृदयस्पृशो रतिरणक्रीडासु वामभ्रुवां
राजन्ते विजयोद्धुरस्मरचमूक्ष्वेडा निनादा इव ॥५॥

युवतीसभोगकारस्य ।

१२८ नखक्षतम् ।

1111 राजन्ति कान्तनखरक्षतयो मृगाक्ष्या
Srk. 612
लाक्षारसद्रवमुचः कुचयोरुपान्ते ।
वसन्ततिलक
अन्त प्रवृद्धमकरध्वजपावकस्य
शङ्के विभिद्य हृदयं निरगुः स्फुलिङ्गाः ॥१॥

कस्यापि ।

1112 जयन्ति कान्तास्तनमण्डलेषु
Sv. 1541
Srk. 613
विटार्पितान्यार्द्रनखक्षतानि ।
उपजाति
लावण्यसंभारनिधानकुम्भे
मुद्राक्षराणीव मनोभवस्य ॥२॥

कस्यचित् ।

1113 पीनतुङ्गकठिनस्तनान्तरे
Srk. 615
कान्तदत्तमबला नखक्षतम् ।
रथोद्धता
आवृणोति विवृणोति वीक्षते
लब्धरत्नमिव निर्धनो जनः ॥३॥

कस्यचित् ।

1110 (b) S, I. O., व्याकार for व्याहार.

1111 (d) I. O. निविशुः for निरगुः.

Srk—राजशेखरस्य

1112 (b) Sv. कोषे for कुम्भे.

1113 (b) Srk. वेक्षते for वीक्षते, दुःखितो for निर्धनो.

1114 नखक्षतं यन्नवचन्द्रसंनिभं
स्थितं कृशाङ्गि स्तनमण्डले नव।
इदं तरीतुं त्रिवलीतरङ्गिणीं
विराजते पञ्चशरस्य नौरिव ॥४॥

Srk. 623
वंशस्थविल

कस्यचित्।

1115 काश्मीरपङ्कखचितस्तनपृष्ठताम्र-
पट्टावकीर्णदयितार्द्रनखक्षताली।
एणीदृशः कुसुमचापनरेन्द्रदत्ता
जैत्रप्रशस्तिरिव चित्रलिपिर्विभाति ॥५॥

Srk. 628
वसन्ततिलक

दक्षस्य।

१२९ कण्ठकूजितम्।

1116 कान्ते विचित्रसुरतक्रमबद्धरागे
संकेतकेपि मृगशावकलोचनायाः।
तत्कूजितं किमपि येन तदीयतल्पं
नाल्पैः परीतमनुशब्दितलावकौघैः ॥१॥

वसन्ततिलक

रुद्रटस्य।

1117 कान्ते तथा कथमपि प्रथितं मृगाक्ष्या
चातुर्यमुद्धतमनोभवया रतेषु।

वसन्ततिलक

1115 (a) Srk नखाङ्कराली for नखक्षताली.
(b) I. O. om. जैत्र......विभाति. Srk. दत्तताारुण्यशासनमिव प्रकटीकरोति for दत्ता . विभाति.

1116 (c) Ed. उत् for तत्. I. O. तन्त्रं for तल्पम्.
After this verse S, A read यतिस्तनावरणतामालिङ्ग्यमाना बलात्। यत्ते पद्मलनेत्रमुन्नमयतः साचीकरोत्याननं, व्याजेनाप्यभिलाष-पूरणसुखं निर्वर्तयत्येव मे। कालिदासस्य. (See verse 1129 below.)

1117 Omitted in A, I. O, S.

तत्कूजितान्यनुवदद्भिरनेकवारं
शिष्यायितं गृहकपोतशतैर्यथास्याः ॥२॥

कस्यापि ।

1118

॥३॥

1119

॥४॥

1120

॥५॥

१३० वस्त्राकर्षः ।

1121 अंसाकृष्टदुकूलया सरभसं गूढौ भुजाभ्यां स्तना-
वाकृष्टे जघनांशुके कृतमधःसक्तमूरुद्वयम् ।
नाभीमूलनिबद्धचक्षुषि तया व्रीडानताङ्गया प्रिये
दीप फूत्कृतिवातवेपितशिखः कर्णोत्पलेनाहतः ॥१॥

Spd. 3674
Srk. 570
शार्दूलविक्रीडित

कर्णोत्पलस्य ।

1122 समाकृष्टं वासः कथमपि हठात्पश्यति तदा
क्रमादूरुद्वन्द्वं जरठशरगौरं मृगदृशः ।
तया दृष्टिं दत्त्वा महति मणिदीपे निपुणया
निरुद्धं हस्ताभ्यां झगिति निजनेत्रोत्पलयुगम् ॥२॥

Spd. 3677
Smv. 77 5
Srk. 579
शिखरिणी

कस्यचित् ।

1123 अम्बरं विनयतः प्रियपाणे-
र्योषितश्च करयोः कलहस्य ।

स्वागता
Sv. X. 62

1118-1120 Missing in all the manuscripts and in Ed.

1121-1123 Omitted in A, I. O., S.

1121 (a) Srk. अङ्गाकृष्ट for अंसा०.

(c) Srk. मयि for तया, तया for प्रिये

Srk —anonymous.

1122 (a) Srk. मयि for तदा.

वारणामिव विधातुमभीक्ष्णं
कक्ष्यया च वलयैश्च शिशिञ्जे ॥३॥

माघस्य ।

1124

।४॥

1125

॥५॥

१३१ नवोढासम्भोगः ।†

1126 दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता Nn. III. 4
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते । Sv. 2072
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते Srk.469
Spd. 3672
जाता वामतयैव सम्प्रति मम प्रीत्यै नवोढा प्रिया ॥१॥ Smv. 77.2

श्रीहर्षदेवस्य । शार्दूलविक्रीडित

1127 चुम्बनेषु परिवर्तिताधरं
हस्तरोधि रशनाविघट्टने । Spd. 3676
विघ्नितेच्छमपि तस्य सर्वतो रथोद्धता
मन्मथेन्धनमभूद्वधूरतम् ॥२॥

कालिदासस्य ।

1128 पटालग्ने पत्यौ नमयति मुखं जातविनया Sv 2056
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् । Spd 3673
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना Smv. 77.7
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥३॥ शिखरिणी

अमरोः।

1124-1125 Missing in all the sources.

† Om. in A, S, I. O.

1126-28 Omitted in A, S, I. O

Note : The verse, numbered 1126, has been quoted under II 9 (Serial No. 516). For variants see No. 516
The verse, numbered 1128, occurs under II. 8 (Serial No. 512). For variants, see No. 512.

1129 हस्तं कम्पयते रुणद्धि रशनाव्यापारलोलाङ्गुलीः
स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात्।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलापपूरणसुखं निर्वर्तयत्येव मे ॥४॥

M. IV. 15
शार्दूलविक्रीडित

कालिदासस्य।

1130 सखीनां शिक्षाभिः कथमपि गता वासभवन
ततः प्रेमालापैः शयनमुपनीतापि विमुखी।
मयि क्रीडारम्भप्रणयिनि परं वेपथुमती
तथापीयं बाला हृदयमधिकं सम्मदयति ॥५॥

शिखरिणी

शङ्करधरस्य।

१३२ रतारम्भः।

1131 आनन्दोद्गमबाष्पपूरपिहितं चक्षुः क्षमं नेक्षितुं
बाहू सीदत एव कम्पविधुरौ शक्तौ न कण्ठग्रहे।
वाणी साध्वसगद्गदाक्षरपदा संक्षोभलोलं मनो
यत्सत्यं प्रियसंगमोपि सुचिरादादौ वियोगायते ॥१॥

Pv. 380
Sv 2065
Smv. 549
शार्दूलविक्रीडित

कस्यचित्।

1132 अन्योन्यसंवलितमांसलदन्तकान्ति
सोल्लासमाविरलसंवलितार्धतारम्।
लीलागृहे प्रतिकलं किलकिंचितेषु
व्यावर्तमानविनयं मिथुनं चकास्ति ॥२॥

S. K. I 113
वसन्ततिलक

वामनस्य।

1129 (a) M. अङ्गुलीं for अङ्गुलीः.
(d) I O. सा for मे.
This verse is omitted in A, S.

1131 (a) Sv., Pv., Smv. उद्गत for उद्गम
(b) Smv. स्वेदितयैव for सीदत एव Sp सक्तौ for शक्तौ.
(c) Pv. संभ्रम for साध्वस A संक्षेपे for संक्षोभ.
(d) Smv transposes यत् and सत्य. Pv. drops यत्, reads वल्लभ for प्रिय, जातौ (also Smv.) for आदौ.
Sv. श्रीडामरस्य. Pv. शुभ्रस्य. Smv.—anonymous.

1133 समालिङ्गत्यङ्गैरपसरति यत्प्रेयसि वपु
पिधातुं यद्दृश्यं घटयति घनालिङ्गनमपि ।
तपोभिर्भूयोभिः किमु न कमनीयं सुकृतिना-
मिदं रम्यं वाम्यं मदनविवशाया मृगदृशः ॥३॥

Sik. 565
शिखरिणी

कस्यचित् ।

1134 उन्मीलत्पुलकाङ्कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेधरसुधापाने मुधा नर्मभिः ।
आनन्दाभिगमेन मन्मथकलायुद्धेपि यस्मिन्नभू-
त्प्रत्यूहः न तयो र्बभूव सुरतारम्भः प्रियभावुकः ॥४॥

शार्दूलविक्रीडित

जयदेवस्य ।

1135 हस्तस्वस्तिकलाञ्छितां कुचतटीं सोढः स्पृशन्मुग्धया
प्रस्विद्यद्वलिवल्लरीकमुदरं गच्छन्निरुद्धो मनाक् ।
ऊर्वोर्मूलमुपेयिवानथ शनैर्मामेति लज्जाजडं
जल्पन्त्या सुरतातिथिः किल रुषा
पाणिस्तलेनाहतः ॥५॥

शार्दूलविक्रीडित

युवतीसंभोगकारस्य ।

१३३ रतम् ।

1136 क्लेशोल्लासितलोचनं श्लथपतद्दोर्वल्लिकेलिस्खल-
द्धम्मिल्लं श्वसितोत्तरङ्गमपरिस्पन्दं वहन्ती वपुः ।
मुञ्चेति स्खलिताक्षरेण वचसा तन्वी यथा याचते
विश्रामाय तथाधिकं रतविधावाकूतमुन्मीलति ॥१॥

शार्दूलविक्रीडित

कस्यचित् ।

1137 भावोद्गाढमुपोढकम्पपुलकैरङ्गैः समालिङ्गितं
रागाच्चुम्बितमप्युपेत्य वदनं पीतं च वक्त्रामृतम् ।

Srk. 593
शार्दूलविक्रीडित

1134 Ed. and MSS निमिषेण (contrary to metre).

1135 (a) S प्रौढ for सोढ.

S, I. O. युवतीसभोगकारकस्य for ०कारस्य

जल्पन्त्यैव मुहुर्न नेति निभृत प्रस्तब्धचारित्रया
निःशेषेण समापितो रतिविधिर्वाचा

तु नाङ्गीकृतः ॥२॥

कस्यचित् ।

1138 अङ्गानि श्लथनिःसहानि नयने मुग्धालसे विभ्रम
शार्दूलविक्रीडित श्वासोत्कम्पितकोमलस्तनमुरः सायासलुतं भ्रुवौ ।
किं चान्दोलनकौतुकव्युपरतावास्येपु वामभ्रुवां
स्वेदाम्भःस्नपिताकुलाल-

कलतेष्वावासितो मन्मथः ॥३॥

गोसोकस्य ।

1139 साक्षेपं च सचाटुकं प्रलपतोः प्रेमालसं पश्यतो-
शार्दूलविक्रीडित रुत्सूत्रं च ससूत्रमेव च परीरम्भोत्सवं कुर्वतोः ।
आकृष्यालकमाननं च पिबतोरुद्दामकण्ठध्वनि-
क्रीडाडम्बरयोर्जयत्यनुपमावस्थं रहः प्रेयसोः ॥४॥

युवतीसंभोगकारस्य ।

1140 सोत्कण्ठं परिपश्यतोरपि मुहुः सोत्प्रासमाजल्पतोः
शार्दूलविक्रीडित सानन्दं च सकौतुकं च मदनव्यापारमभ्यस्यतोः ।
दम्पत्योर्नवयौवनोज्ज्वलवपुःसौन्दर्यरम्यश्रियोः
शृङ्गारः कृतकृत्य एष मदनाधानैकहेतुः स्फुटम् ॥५॥

प्रियंवदस्य ।

1137 (c) Srk प्रध्वस्त for प्रस्तब्ध.

1138 (c) S, I. O. चान्दोलित for चान्दोलन.

1139 (a) I. O. सोत्क्षेपं for साक्षेपम्.

S, I. O. सचाटु च for ०कम्.

1140 (d) S, I. O. एव for एष.

१३४ विपरीतरतम्* ।

1141 आलोलामलकावलिं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः शीकरैः । Spd. 3702
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये As. 3
तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥१॥ शार्दूलविक्रीडित

अमरोः ।

1142 नाथन्यान्विपरीतमोहनरसप्रेङ्खत्नितम्बस्थली-
लोलद्भूषणकिङ्किणीकलरवव्यामिश्रकण्ठस्वनम् । Srk 581
संरम्भश्लथकेशबन्धविगलन्मुक्ताकलापत्रुट- शार्दूलविक्रीडित
च्छ्वासच्छेदतरङ्गितस्तनयुगं प्रीणाति शृङ्गारिणी ॥२॥

सोल्लोकस्य ।

1143 विकीर्णो धम्मिल्लः श्रमसलिलबिन्दुस्तबकितो
मुखेन्दुर्व्याकोषं श्वसितमिदमाः साधु सुभटे । शिखरिणी
अमुष्मिन्प्रारम्भे चलवलितमुक्तासरमुरः
परं तूष्णीमेते दधति रशनादाम्नि मणय ॥३॥

केन्द्रनीलनारायणस्य ।

1144 माराङ्के रतिकेलिसकुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किंचिदुपरि प्रारम्भि यत्संभ्रमात् । शार्दूलविक्रीडित

* S, I. O. विपरीतम्.

1141 (a) Spd. सकुसुमा for विलुलिता
(b) Sp तनुभवै for तनुतरैः. Ed स्वेदाम्भसां for स्वेदाम्भस.
(c) Spd. रत for रति.

1142 (b) S स्वरम् for स्वनम्
(c) Srk द्रुत for त्रुट.
Srk. सोन्नोकस्य for सोल्लोकस्य.

1143 (d) S महति for दधति

1144 (a) I. O. रतारम्भे for रणारम्भे
(b) Ed. जनाय for जयाय

निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः
सिध्यति ॥४॥
जयदेवस्य ।

शार्दूलविक्रीडित
1145 सोत्कम्पश्वसितोत्तरं सपुलकस्वेदार्द्रगण्डस्थली-
खेलत्कुण्डलमस्फुटस्मितमिलन्मन्दाक्षमुग्धेक्षितम् ।
संभेदेषु मिथो दृशां सुकृतिनः कस्यापि कान्ताननं
प्रभ्रश्यत्कवरीपरीतमुरसि स्मेरस्य विश्राम्यति ॥५॥
आवन्तिकजह्नोः ।

१३५ विपरीतरताख्यानम् ।

शिखरिणी
1146 रिपुः प्रेमारम्भे प्रथममभवन्नूपुररव-
स्तमाक्षेप्तुं पाणिः प्रसरति सवाचालवलयः ।
यदारब्धं किंचित्तदुपशमहेतोः सखि मया
तदा तद्वैगुण्यं द्विगुणयति काञ्चीकलकलः ॥१॥
विरिञ्चेः ।

शार्दूलविक्रीडित
1147 पर्यस्तस्तनकर्मकीर्णकवरीभारं समुन्मूलित-
स्रग्दाम स्वयमन्यदेव तदुपक्रान्तं मया साहसम् ।
संपन्नाः सखि तस्य केलिविधयः प्राच्याः परं दुर्वह-
श्रोणीभारभरान्मनीषितसहस्रांशोपि नासादितः ॥२॥
शरणदेवस्य ।

Sv. 2133
शार्दूलविक्रीडित
1148 पश्याश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्यां संप्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।

1147 (a) I. O. वर्म for कर्म.
(c) I. O. प्राज्या for प्राच्या..
1148 (a) Sv. प्रसङ्गात् for प्रकर्षात्.

गाढोष्ठग्रहपूर्वमाकुलतया पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥३॥

अमरोः । काश्मीरशिल्हनस्य ।

1149 दाक्षिण्याददतिमानतो रसवशाद्विश्रामहेतोर्मम
प्रागल्भ्यात्तदनुष्ठितं मृगदृशा शक्यं न यद्योषिताम् । Srk. 599
निर्व्यूढं न यदा तया तदखिलं खिन्नैस्ततस्तारकैः शार्दूलविक्रीडित
सव्रीडैश्च विलोकितैर्मयि पुनर्न्यस्तः समस्तो भरः ॥४॥

महाकवेः ।

1150 पुरारूढप्रेमप्रबलरसरागेण हृतया Srk. 585
समारब्धं कर्तुं नहि यदबलाभावसदृशम् । शिखरिणी
अनिर्व्यूढे तस्मिन्प्रकृतिसुकुमाराङ्गलतया
पुनर्लज्जालोलं मयि विनिहितं लोचनयुगम् ॥५॥

कोङ्कस्य ।

1148 Ed. बिल्हणस्य for अमरो etc. Sv. omits काश्मीरशिल्हनस्य. Sp. om अमरो

1149 (a) A, S, Srk. अभिमानतो for अतिमानतो. S, I. O. हेतु for हेतोः.

(b) Srk. यद् for तद्, तद् for यद्.

(c) A खिन्नैस्तावत्तारकै (I O. खिन्नैस्तवतारकैः, Sp., Srk. S खिन्नैस्तरत्तारकै) for खिन्नै...कै.

(d) Srk. व्यय for भरः.

Srk.—anonymous.

1150 (a) Srk. चिर for पुरा. प्रणयपरिहासेन for प्रबल···रागेण. S, I. O. कृतया for हृतया

(b) A, I. O समारूढम् for समारब्धं. Srk reads the line thus—
तदारब्धं तन्व्या न तु यदबलाया समुचितम् .

निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः
सिध्यति ॥४॥
जयदेवस्य ।

शार्दूलविक्रीडित
1145 सोत्कम्पश्वसितोत्तरं सपुलकस्वेदार्द्रगण्डस्थली-
खेलत्कुण्डलमस्फुटस्मितमिलन्मन्दाक्षमुग्धेक्षितम् ।
संभेदेषु मिथो दृशां सुकृतिनः कस्यापि कान्ताननं
प्रभ्रश्यत्कवरीपरीतमुरसि स्मेरस्य विश्राम्यति ॥५॥
आवन्तिकजह्नोः ।

१३५ विपरीतरताख्यानम् ।

शिखरिणी
1146 रिपुः प्रेमारम्भे प्रथममभवन्नूपुररव-
स्तमाक्षेप्तुं पाणिः प्रसरति सवाचालवलयः ।
यदारब्धं किंचित्तदुपशमहेतोः सखि मया
तदा तद्वैगुण्यं द्विगुणयति काञ्चीकलकलः ॥१॥
विरिञ्चेः ।

शार्दूलविक्रीडित
1147 पर्यस्तस्तनकर्मकीर्णकवरीभारं समुन्मूलित-
स्रग्दाम स्वयमन्यदेव तदुपक्रान्तं मया साहसम् ।
संपन्नाः सखि तस्य केलिविधयः प्राच्याः परं दुर्वह-
श्रोणीभारभरान्मनीषितसहस्रांशोपि नासादितः॥२॥
शरणदेवस्य ।

Sv 2133
शार्दूलविक्रीडित
1148 पश्याश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्यां संप्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।

1147 (a) I. O. वर्म for कर्म.
(c) I. O. प्राज्या. for प्राच्या .
1148 (a) Sv. प्रसङ्गात् for प्रकर्षात्.

गाढोष्ठग्रहपूर्वमाकुलतया पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥३॥
अमरोः । काश्मीरशिल्हनस्य ।

1149 दाक्षिण्याददतिमानतो रसवशाद्विश्रामहेतोर्मम
प्रागल्भ्यात्तदनुष्ठितं मृगदृशा शक्यं न यद्योषिताम् । Srk. 599
निर्व्यूढं न यदा तया तदखिलं खिन्नैस्ततस्तारकैः शार्दूलविक्रीडित
सव्रीडैश्च विलोकितैर्मयि पुनर्न्यस्तः समस्तो भरः ॥४॥
महाकवेः ।

1150 पुरारूढप्रेमप्रबलरसरागेण हृतया Srk. 585
समारब्धं कर्तुं नहि यदवलाभावसदृशम् । शिखरिणी
अनिर्व्यूढे तस्मिन्प्रकृतिसुकुमाराङ्गलतया
पुनर्लज्जालोलं मयि विनिहितं लोचनयुगम् ॥५॥
कोङ्कस्य ।

1148 Ed. बिल्हणस्य for अमरो etc. Sv. omits काश्मीरशिल्हनस्य. Sp. om अमरो..

1149 (a) A, S, Srk. अभिमानतो for अतिमानतो. S, I. O. हेतु. for हेतोः

(b) Srk. यद् for तद् , तद् for यद् .

(c) A खिन्नैस्तावत्तारकै (I. O. खिन्नैस्तवतारकैः, Sp., Srk. S खिन्नैस्तरत्तारकै) for खिन्नै...कै

(d) Srk. व्यय for भर॰.

Srk.—anonymous.

1150 (a) Srk. चिर for पुरा. प्रणयपरिहासेन for प्रबल...रागेण. S, I. O. कृतया for हृतया

(b) A, I. O समारूढम् for समारब्धं. Srk reads the line thus—
तदारब्धं तन्व्या न तु यदबलाया समुचितम् .

१३६ रतान्तः ।

1151 आवृण्वाना झटिति जघनं मद्दुकूलाञ्चलेन
Smv. 80.5
Srk. 589
मन्दाक्रान्ता
प्रेङ्खल्लीलालुलितकबरीबन्धनव्यग्रपाणि ।
अर्धोच्छ्वासस्फुटनखपदालङ्कृताभ्यां स्तनाभ्यां
दृष्टा धाष्ट्यार्दवनतमुखी सा मया मोहनान्ते ॥१॥

राजशेखरस्य ।

1152 करकिसलयं धूत्वा धूत्वा विमार्गति वाससी
Sv. 2105
Spd. 3706
Smv. 80.3
Srk. 591
हरिणी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।
स्थगयति करं पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या तन्वी मुहुर्मुहुरीक्षते ॥२॥

कस्यापि ।

1153 छिन्नार्धोरुकमेखलं चरणयोः संक्रान्तलाक्षारसं
शार्दूलविक्रीडित
तल्पोपान्तमुदीक्ष्य सस्मितसखीवैलक्ष्यसंभ्रान्तया ।

1151 (a) Srk. झगिति for झटिति Smv. सा for मद्
(b) Smv., Srk. प्रेङखत्क्रीडाकुलित for प्रेङख.. लुलित.
(c) Smv. ऊर्ध्वोच्छ्वास for अर्धो०, पदैश्चिह्निताभ्या for पदालंकृताभ्या.
(d) Smv. धाष्ट्यस्मृति for धाष्ट्यार्दव, मोहनान्ते प्रियेण (Srk मोहनान्ते मया सा) for सा मोहनान्ते

Srk. attributes it to अभिनन्द Smv.—anonymous.

1152 (a) S. धृत्वा धृत्वा for धूत्वा धूत्वा.
(b) Smv. सुतनु for सुमनो.
(c) Sv., Spd., Smv. मुहु (Srk. करैः) for करं.
(d) A, Srk , S, I. O ईक्षितुम् for ईक्षते. Spd., Sv नारी (Spd. तन्वी) पुनः पतिमाश्रिता (Smv. रम्यं तन्व्या मुहुर्मुहुरीक्षितम्) for तन्वी…ईक्षते.

Spd., Smv. attribute it to अमरुक

This is a doubtful verse of Amaru. (See S K. De, *Our Heritage*, II. p. 73).

तन्वङ्ग्या दृढदंशदन्तुरदरोच्छूनाधरोत्सङ्गया
क्षिप्ताः प्रेयसि कूटकोपकुटिलभ्रूविभ्रमा दृष्टयः ॥३॥
धर्मयोगेश्वरस्य ।

1154 पर्यस्तालकपङ्क्ति लुप्ततिलकं निष्पीतरागाधरं
श्वासोत्कम्पिपयोधरं श्रमभरस्वेदार्द्रगण्डस्थलम् । शार्दूलविक्रीडित
तन्वङ्ग्याः श्लथनीविमुक्तकवरीभारं रतान्ते वपु-
र्दृष्टं मुग्धविलोकितस्मितमभूदानन्दनिस्यन्दि न ॥४॥
श्रीकरस्य ।

1155 नयनमलसं स्वेदाम्भोभिः करम्बितमाननं
स्खलितकवरीभारावंसौ श्लथा भुजवल्लरी । हरिणी
इति मृगदृशः संभोगान्ते विलोक्य वपुःश्रियं
व्रजति नियत कन्दर्पोपि स्वबाणशरव्यताम् ॥५॥
शङ्करधरस्य ।

१३७ उषसि प्रियादर्शनम् ।+

1156 संभ्रान्त्या गलितस्रजं स्तनतटव्यस्तस्खलद्वाससो
बध्नन्त्याः शिथिलां झणत्कृतिमतीं काञ्चीं नितम्बस्थले । शार्दूलविक्रीडित
कामिन्याः सरसं निशान्तसमये वक्रा विलुप्ताञ्जना
नाधन्ये निपतन्ति पाटलरुचो निद्रालसा दृष्टयः ॥१॥
कस्यचित् ।

1157 उषसि निबिडयन्त्याः कुण्डलं केलिपर्या-
विलविगलितमन्तः कर्णपालि प्रियायाः । मालिनी
सरसहसिततिर्यग्भङ्गुरापाङ्गरीतिः
सुकृतिभिरवलीढा लोचनाभ्यां मुखश्रीः ॥२॥
रुद्रनन्दिनः ।

1153 (c) I. O, A रदो for दरो.
1154 (b) Ed भय for भर.
+ I. O अथोप for उषसि.

शिखरिणी

1158 प्रियायाः प्रत्यूषे गलितकबरीबन्धनविधा-
वुदञ्चद्दोर्वल्लीदरचलितलोलाञ्चलमुरः ।
घनाकूते पश्यत्यथ मयि समन्दाक्षहसितं
नमन्त्यास्तद्रूपं यदि लिखितुमीशो मनसिजः ॥३॥

धोयीकस्य ।

हरिणी

1159 मसृणमसृणं प्रेयः प्रातर्निवार्य वपुः स्वकं
तदनु च तिरोधाय स्वैरं रतोत्सवमण्डनम् ।
त्रिचतुरपदं गत्वा तस्मान्निवर्तितकन्धरं
स्नपयति दृशा पुण्यात्मानं कमप्युषसि प्रिया ॥४॥

शतानन्दस्य ।

शार्दूलविक्रीडित

1160 अस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धौतोधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः ।
काञ्चीदामदरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमभूद्यन्मे मनः कीलितम् ॥५॥

जयदेवस्य ।

१३८ नायिकानिष्क्रमणम् ।

शिखरिणी

1161 विरामे यामिन्या उपकुचयुगोरूपजघनं
समालम्ब्य व्यस्ताञ्चलमलसमुत्थाय शयनात् ।
हसित्वा संमुग्धं मधुरमवलोक्याथ शिथिलै-
र्भुजैर्निर्यान्तीभिः सुदृढमुपगूढः प्रियतमः ॥१॥

वासुदेवज्योतिषः ।

शार्दूलविक्रीडित

1162 निद्रामीलितचक्षुषो रतिभरश्रान्तस्य पत्युर्भुजौ
स्वैरं कण्ठतटादपास्य शनकैराकृष्य वस्त्राञ्चलम् ।

1158 (b) Ed. चोलाञ्चल for लोलाञ्चल.

1159 (c) S, I. O. विवर्तित for निवर्तित.

1160 (c) Sp. द्रव for दर.

उत्थाय क्रमनिःसहैरवयवैस्तिर्यक्चलल्लोचनं
व्यावृत्ता वदनेन वासभवनान्निर्यान्ति वामभ्रुवः ॥२॥

कस्यापि ।

1163 प्रत्यग्रदंशजनितश्वयथूत्सलील-
मम्भोजकोमलकराङ्गुलिकोटिभागैः ।
बिम्बाधरान्मधुरसीत्कृति संस्पृशन्त्यः — वसन्ततिलक
कान्ताः प्रयान्ति दयितान्तिकतोधुनैताः ॥३॥

रत्नाकरस्य ।

1164 विदलितकुचपाणिजाङ्कलेखा
दरभिदुरोरुभरालसा कृशाङ्गी ।
उषसि निधुवनोपभोगजिह्मा — पुष्पिताग्रा
यदि गृहमेति सखि बलावलेन ॥४॥

योगोकस्य ।

1165 निर्यान्त्या रतिवेश्मनः परिणतप्रायां विलोक्य क्षपां
गाढालिङ्गनचुम्बनानि बहुशः कृत्वाप्यसंतुष्टया । — Sv. 2191
एकं भूमितले निधाय चरणं तल्पे प्रकल्प्यापरं — Spd. 3728
तन्वङ्ग्या परिवर्तिताङ्गलतया — शार्दूलविक्रीडित
प्रेयांश्चिरं चुम्बितः ॥५॥

कस्यापि ।

१३९ रतप्रशंसा ।

1166 यत्नात्संगममिच्छतोः प्रतिदिनं दूतीकृताश्वासयो-
रन्योन्यं परितुष्यतोरवसरप्राप्तिस्पृहां तन्वतोः । — शार्दूलविक्रीडित

1162 (c) S श्रम for क्रम ; वलल्लोचनम् for चलल्लोचनम्.

1163 Quoted by Aufrecht in ZDMG, 36, p. 373.

1164 Sp. योगेश्वरस्य for योगोकस्य.

1165 (c) Sv. अर्पयन्त्या for प्रकल्प्य.

संकेतोन्मुखयोश्चिरात्कथमपि प्राप्ते क्रमाद्दर्शने
यत्सौख्य नवरक्तयोस्तरुणयोस्तत्केन साम्यं व्रजेत् ॥१॥
भट्टचूलितकस्य ।

1167 स स्वर्गादपरो विधिः स च सुधासेकः क्षणान्नेत्रयो-
स्तत्साम्राज्यमखण्डितं तदपरं प्रेम्णः प्रतिष्ठास्पदम् ।
Srk. 564
शार्दूलविक्रीडित
यद्बाला वलवन्मनोभवभयभ्रश्यत्त्रपं सत्रपा
तत्कालोचितनर्मकर्म दयितादस्यास्यमभ्यस्यति ॥२॥
कस्यापि ।

1168 सव्रीडार्धनिरीक्षणं यदुभयोर्यद्दूतिकाप्रेषणं
Sv. 2237
Spd. 3780
Srk. 1654
शार्दूलविक्रीडित
चाद्यश्वो भविता समागम इति प्रीत्या प्रमोदश्च यः ।
प्राप्ते चैव समागमे सरभसं यच्चुम्बनालिङ्गना-
न्येतत्कामफलं तदेव सुरतं शेषः पशूनामिव ॥३॥
कस्यापि ।

1166 I. O., ZDMG भट्टचुणितकस्य for ०चूलितकस्य
The verse has been quoted by Aufrecht in ZDMG, 36, p. 539.

1167 (a) S, I. O., Srk. क्षणं for क्षणात्.
(b) Srk. अगञ्जितं for अखण्डितं.
(d) Ed. अभ्यासम् for अभ्यास्यम्.

1168 (a) Sv., Spd. दूतिसंप्रेषणं for दूतिकाप्रेषणम्.
(b) Srk. वा for च. Sv, Spd. omit च in the beginning. Spd. प्रीतिप्रसादश्च य for प्रीत्या .यः.
(c) Sv. संप्राप्तेपि (Spd. प्राप्तेकाल) for प्राप्ते चैव, आलिङ्गनं (also Spd.) for आलिङ्गनानि.
(d) Spd., Sv. तत् for एतत्, कामस्य for काम. Sv. शिष्टः for शेषः. Spd. शेषा पशूना स्थिति. for शेषः…मिव
Ed., Sv. अपि for इव.

1169 सीत्कारवन्ति दरमीलितलोचनानि
रोमाञ्चमुञ्चि तनुघर्मकणावलीनि । Srk. 582
एणीदृशां मकरकेतुनिकेतनानि वसन्ततिलक
वन्दामहे सुरतविभ्रमचेष्टितानि ॥४॥

कस्यचित् ।

1170 हारावली त्रुटति न प्रणयः प्रियाणा-
माखण्ड्यतेधरदलं न मनोभवाज्ञा ।
यस्मिन्विलेपनमपैति न चानुराग- वसन्ततिलक
स्तन्मोहनं न खलु मैथुनमन्यदस्मात् ॥५॥

केशटस्य ।

१४० सखीनां मिथ कथा । Sk. v. 44

1171 कान्ते तल्पमुपागते विगलिता नीवी स्वय बन्धना- Dr. under II 18
द्वासश्च श्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् । Sv. 2147
एतावत्सखि वेद्मि केवलमहो तस्याङ्गसङ्गे पुनः Spd. 3747
कोऽसौ कास्मि रतं च कीदृशमिति स्वल्पापि Smv. 86 17
मे न स्मृतिः ॥१॥ Srk. 572
शार्दूलविक्रीडित

विकटनितम्बायाः ।

1171 (b) Sk, Spd. वासो विश्लथ (Dr प्रश्लथ) for वासश्च श्लथ. Sv तद्वास for वासश्च श्लथमेखलं करधृतं for श्लथ...धृतं.

(c) Spd., Sk., Dr, Sv., Ed. अहं for अहो

(d) Sk., Spd. कोयं का वयमत्र किंनु सुरतं for कोऽसौ...कीदृशमिति. Dr. नु कि (Sv वा) कथं for च कीदृशम्. A, I.O. किं सखि शपे (Smv., Srk. किं कथमिति) for कीदृशमिति,

Spd., Sv. अमरुकस्य. Smv -anonymous.

This is a doubtful verse of Amaru. (See S. K. De, *Our Heritage*, II, p. 74)

Sd. under III. 73
Spd. 376
Srk 574
वसन्ततिलक

1172 धन्यासि यत्कथयसि प्रियसङ्गमेपि
नर्मस्मितं च वदनं च रसं च तस्य।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किंचिदपि स्मरामि ॥२॥

विद्यायाः।

Srk. 568
शार्दूलविक्रीडित

1173 आत्ते वाससि रोद्धुमक्षमतया दोःकन्दलीभ्यां स्तनौ
तस्योरःस्थलमुत्तरीयविषये सख्यो मया चिन्तितम्।
श्रोणीं तस्य करेधिरोहति पुनर्व्रीडाम्बुधौ मामथो
मज्जन्तीमुदतारयन्मनसिजो देव स मूर्छागुरुः ॥३॥

वल्लणस्य।

Srk. 596
वसन्ततिलक

1174 हर्षाश्रुपूरितविलोचनया मयाद्य
किं तस्य तत्सखि निरूपितमङ्गमङ्गम्।
रोमाञ्चकञ्चुकतिरस्कृतदेहया वा
ज्ञातानि तानि परिरम्भसुखानि किं वा ॥४॥

अचलदासस्य।

1172 (a) Sd., Spd या for यत्. Srk संगमेन for संगमेपि.
(b) Sd. reads विश्रब्धचाटुकशतानि रतान्तरेषु. Spd. reads नर्मोक्तिचाटुकशतानि रतान्तरेषु. Srk. वचनं for वदनं.
This is a doubtful verse of Amaru (See S. K. De, *Our Heritage*, II, p. 70)

Spd. attributes it to विज्जका.

1173 (b) I. O., Srk. सद्यो for सख्या. I O. संचितम् (Srk संजितम्) for चिन्तितम्.

S, I. O वल्लनस्य for वल्लणस्य.

1174 (a) Srk. दूषित for पूरित.
S, I. O. प्रचलदासस्य for अचल०

Srk. अचलस्य for अचलदासस्य.

1175 मा गर्वमुद्वह कपोलतले चकास्ति Sk. I 105, V. 28, 477

कान्तस्वहस्तलिखिता मम मञ्जरीति । Dr. under II. 24a

अन्यापि किं न सखि भाजनमीदृशानां Pv. 302 Sd. under III. 122

वैरी न चेद्भवति वेपथुरन्तरायः ॥५॥ Smv. 86.14 Srk. 1640

केशटस्य । वसन्ततिलक

१४१ शुकोक्तिक्रीडा ।

1176 प्रयच्छाहारं मे यदि तव रहोवृत्तमखिलं
मया वाच्यं नोच्चैरिति गृहशुके जल्पति शनैः । Smv. 77.12 Srk 622
वधूवक्त्रं व्रीडाभरनमितमन्तर्विहसितं शिखरिणी
हरत्यर्धोन्मीलन्नलिनमलिनावर्जितमिव ॥१॥

डिम्बोकस्य ।

1177 प्रत्यूषे गुरुसन्निधौ गृहशुके तत्तद्रहोजल्पितं
प्रस्तोतुं परिहासकारिणि पदैरर्धोदितैरुद्यते । Srk. 631
क्रीडाशारिकया निलीय निभृतं त्रातुं भयार्तां वधूं शार्दूलविक्रीडित
प्रारब्धः सहसैव संभ्रमकरो मार्जारगर्जारवः ॥२॥

मार्जारस्य ।

1175 (b) Pv. नव for मम.

(c) Sd. खलु for सखि. Pv. ईदृशाना for ईदृशाना.

(d) Smv. वपुषि for भवति

Pv. दामोदरस्य for केशटस्य.

Srk., Smv.-anonymous.

1176 Srk., Smv.-anonymous.

1177 (b) S, A उच्यते for उद्यते.

(c) Srk. त्रपार्तां for भयार्तां.

The verse has been quoted by Aufrecht in ZDMG, 36 p. 541, with त्रपार्तां for भयार्तां (c)

1178 त्वद्गण्डस्थलपाण्डु देहि लवलं देहि त्वदोष्ठारुणं
बिम्बं देहि नितम्बिनि त्वदलकश्यामं
Srk. 406 च मे जाम्बवम्।
शार्दूलविक्रीडित इत्यक्षुण्णमनोज्ञचाटुजनितव्रीडः पुरन्ध्रीजना
धन्यानां भवनेषु पञ्जरशुकैराहारमभ्यर्थ्यते ॥३॥

वाक्कूटस्य।

1179 उषसि गुरुसमक्षं लज्जमाना मृगाक्षी
Srk. 616 रतिरुतमनुकर्तुं राजकीरे प्रवृत्ते।
मालिनी तिरयति शिशुलीलानर्तनच्छद्मताल-
प्रचलवलयमालास्फालकोलाहलेन ॥४॥

भवभूतेः।

1180 दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं तद्वच-
As 15, Kuval. p. 173 स्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्योपहारं वधूः।
Sv. 2214, Spd. 3743 कर्णालङ्कृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे
Srk. 621 व्रीडार्ता प्रकरोति दाडिमफलव्याजेन
शार्दूलविक्रीडित वाग्बन्धनम् ॥५॥

अमरोः।

1778 (a) ZDMG लवणं for लवलम्.
(c) Srk. जनो for जना
The verse has been quoted by Aufrecht in ZDMG, 36, p. 523, with लवणं for लवलं.

1179 (b) S, I. O. प्रति for रति

Srk.-anonymous.

1180 (a) Srk. जल्पितं for जल्पतोः.
(b) Srk. प्रातस्तत् for तत्प्रात°. Kuval , Sv , Spd. अतिमात्र° for उपहारम्. Srk., As तस्यैव तार° for तस्योपहारं.
(c) Kuval., Sv , Spd. कर्णालम्बित (Srk. हाराकर्षित) for कर्णालङ्कृति.
Sv., Spd. चञ्च्वा for चञ्चू. Srk. चञ्चो° पुरो for चञ्चूपुटे.
Ed., Kuval. विदधाति for प्रकरोति.

Srk., Spd , Sv.-anonymous.

१४२ प्रत्यूषः।

1181 क्षुण्णान्येव तमांसि किंतु दधति प्रौढिं न सम्यग्दृशो-
वासः संवृतमेव किंतु जहति प्राणेश्वर नाबला ।
पारावारगतैश्च कोकमिथुनैरानन्दतो गद्गदं
साकूतं रुतमेव किंतु सहसा झात्कृत्य नोड्डीयते ॥१॥
वसुकल्पस्य ।

Srk 965
शार्दूलविक्रीडित

1182 पत्यौ पात्रे कलानां व्रजति गतिवशादस्तमिन्दौ क्रमेण
क्रन्दन्ती पत्रिरावैर्विगलिततिमिरस्तोमधम्मिल्लभारा ।
प्रभ्रंशिस्थूलमुक्ताफलनिकरपरिस्पर्धिताराश्रुबिन्दु
प्रोन्मीलत्पूर्वसन्ध्याहुतभुजि रजनी पश्य देहं
जुहोति ॥२॥
योगेश्वरस्य ।

Smv. 82.3
Srk. 970
स्रग्धरा

1183 उत्कण्ठाकुलचक्रवाकयुवतीनिःश्वासदण्डाहतः
पीयूषद्युतिरच्छदर्पणतुलामारोहति प्रस्थितः ।
कोकानां कृपयेव कुक्कुटरवैराहूयमाने रवौ
दिग्जाता नवधौतविद्रुममणिच्छाया च
सौत्रामणी ॥३॥
शुभाङ्कस्य ।

शार्दूलविक्रीडित

1181 (a) A,I. O , Srk. क्षीणान्येव for क्षुण्णान्येव.
(d) Srk बहलं for सहसा, सात्कृत्य for झात्कृत्य
Srk -anonymous.

1182 (a) Srk. याते for पात्रे. Smv. विधि for गति.
(b) Smv. नादै for रावै.
(c) Smv. प्रभ्रश्यत् for प्रभ्रंशि. Ed. ताराग्र for ताराश्रु.
Srk., Smv.-anonymous.

1183 S, I. O , शुभाङ्गस्य for शुभाङ्कस्य.

1184 प्रालेयाम्भःशिशिरपवनापीयमानक्लमानां
मन्दाक्रान्ता
कण्ठोपान्तस्तिमितनमितैकैकदो.कन्दलीनाम् ।
नानाक्रीडाजनितरजनीजागरेणोपनीते
निद्राभोग स्थगयति दृशौ सांप्रतं दम्पतीनाम् ॥४॥

सुरभेः ।

1185 ताराणां विरलोधुना परिकर· स्मेरं नभो वर्तते
शार्दूलविक्रीडित
मञ्जिष्ठारसपाटलेन महसाक्रान्ता च पूर्वा ककुप् ।
किंचान्यत्स्मरजागरूकविहगद्वन्द्वस्य दुःखच्छिदो
मित्रस्यागमनं व्यनक्ति बिसिनीनिद्रादरिद्रः क्षणः ॥५॥

कामदेवस्य ।

१४३ सूर्योदयः ।

1186 अयमुदयति मुद्राभञ्जनः पद्मिनीना-
Sk. I. 100, II. 29
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
Sd. under IX. 6
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्द-
Srk. 979
न्कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥१॥
मालिनी

योगेश्वरस्य ।

1187 शक्याचंनः सुचिरमीक्षणपङ्कजेन
काश्मीरपिण्डपरिपाटलमण्डलश्रीः ।
Srk. 968
ध्वान्तं हरन्नमरनायकपालितायां
वसन्ततिलक
देवोभ्युदेति दिशि वासरबीजकोषः ॥२॥

विष्णुहरेः ।

1184 (a) Ed. श्रमाणा for क्लमानाम्.

1185 (a) A वर्धते for वर्तते.

Sp —anonymous

The verse has been quoted by Aufrecht in ZDMG, 36, p. 531.

1186 (d) Srk. क्रोध for क्रोड.

Spd.—anonymous.

1187 The verse has been quoted by Aufrecht in ZDMG, 36, p. 544.

1188 तेजोराशौ भुवनजलधेः प्लाविताशातटान्तं
भानौ कुम्भोद्भव इव पिबत्यन्धकारोत्कराम्भः । Srk. 976
सद्यो माद्यन्मकरकमठस्थूलमत्स्या इवैते मन्दाक्रान्ता
यान्त्यन्तस्थाः कुलशिखरिणो दृष्टिवर्त्म क्रमेण ॥३॥

शिवस्वामिनः ।

1189 अपास्तस्ताराभिर्विधन इव कामी युवतिभि-
र्मधुच्छत्रच्छायां स्पृशति शशलक्ष्मा परिणतः । शिखरिणी
अयं प्राचीकर्णाभरणरचनाशोककुसुम-
च्छटालक्ष्मीचौरः कलयति रविः पूर्वमचलम् ॥४॥

शतानन्दस्य ।

1190 रतिश्रमपरिस्खलत्समदसिद्धसीमन्तिनी-
स्तनच्युतमिवांशुकं विशदपद्मरागद्युति । पृथ्वी
अयं दिशि शतक्रतोः कुवलयाक्षि विम्बारुण-
त्वदीयदशनच्छदच्छविरुदेति बालातपः ॥५॥

मुञ्जस्य ।

१४४ मध्याह्नः ।

1191 एतस्मिन्दिवसस्य मध्यसमये वातोपि चण्डातप-
त्रासेनेव न संचरत्यहिमगोर्बिम्बे ललाटन्तपे ।
किं चान्यत्परितप्तधूलिलुठनप्रोषासहत्वादिव Srk. 982
च्छाया दूरगतापि भूरुहतले व्यावृत्य संलीयते ॥१॥ शार्दूलविक्रीडित

मलयराजस्य ।

1192 धत्ते पद्मलतादलेष्वुरुपरि स्वं कर्णतालं द्विपः Vsb. I. 43
शष्पस्तम्बरसान्नियच्छति शिखी Srk 989
मध्येशिखण्डं शिरः । शार्दूलविक्रीडित

1188 (d) Srk. व्यक्ति for दृष्टि.

Srk —anonymous

1191 (c) Srk. प्लोष for प्रोष.

मिथ्या लेढि मृणालकोटिरभसाद्दंष्ट्राङ्कुरं शूकरो
मध्याह्ने महिषश्च वाञ्छति
निजच्छायामहाकर्दमम् ॥२॥
राजशेखरस्य ।

1193 मध्याह्नार्कमरीचिदुःसहतया संतज्य दर्भाङ्कुर-
शार्दूलविक्रीडित ग्रासानाश्रितकन्दरद्रुमघनच्छाय मृगाः शेरते ।
मातङ्गः करशीकरैर्निजवशां सिञ्चन्श्रमार्तां मुहु-
र्निष्क्रान्तो गहनाद्द्रुतोद्धतपदं पद्माकरे सर्पति ॥३॥
वसन्तदेवस्य ।

1194 तापात्पिण्डितविग्रहेव विशति च्छाया तरूणां तले
रुद्धः स्वाश्रयपक्षपातकृतिभिः पद्मैरपामातपः ।
शार्दूलविक्रीडित अद्यान्तःपुरयोषितां मधुमदोत्सेकात्कपोलोदरे
क्लिन्नैः स्वेदलवैरुदञ्चितमहो सूर्यो ललाटंतपः ॥४॥
उत्पलराजस्य ।

1195 वपुस्तिर्यच्चीनांशुकनिबिडपीनोरुजघन-
स्तनानां निश्च्योतच्चिकुरपयसां पक्ष्मलदृशाम् ।
शिखरिणी निमग्नोत्तीर्णानां प्रमदवनवापीतटजुषां
दिदृक्षाभिर्देवो रविरथ रथं मन्थरयति ॥५॥
गोवर्धनस्य ।

1192 (d) Vsb. च्छायं for च्छाया

Srk.-anonymous.

1193 (c) Ed. सातङ्क for मातङ्गः.
(d) S, I. O. द्रुतोद्धत for द्रुतोद्धृत.

1194 (c) S, I. O. अभ्यन्तः for अद्यान्त.. S, I. O. मदाताम्रे for मदोत्सेकात्.

1195 (d) Sp., I. O. अपि for अथ.

१४५. अस्तमयः ।

1196 याते भास्वति वृद्धसारसशिरःशोणेस्तशृङ्गाश्रय
व्यालिप्तं तिमिरैः कठोरवलिभुक्कण्ठातिनीलैर्नभः ।
माहेन्द्री दिगपि प्रसन्नमलिना चन्द्रोदयाकांक्षिणी
भात्येषा चिरविप्रयुक्तशवरी-
गण्डाभपाण्डुच्छविः । १॥

Srk. 875
शार्दूलविक्रीडित

मलयराजस्य ।

1197 क्रमसंकुचितकुशेशयकाषान्तरनीयमानमधुपेन ।
गरलमिव गलति नलिनी दिनकरविरहातिखेदेन ॥२॥

आर्या

दत्तस्य ।

1198 करसादोम्बरत्यागस्तेजोहानिः सरागता ।
वारुणीसंगमावस्था भानुनाप्यनुभूयते ॥३॥

Sv. 1886
अनुष्टुप्

काश्मीरकसुरमूल्यस्य ।

1199 व्रजति कलितस्तोकालोको नवीनजवारुण-
च्छविरसौ बिम्बं विन्दन् दिश भृशमप्पतेः ।
ककुभि ककुभि प्राप्ताहाराः कुलायमहीरुहां
शिरसि शिरसि स्वैरं स्वैरं पतन्ति पतत्त्रिणः ॥४॥

Srk. 869
हरिणी

कस्यचित् ।

1196 (b) Srk. कण्ठाभि for कण्ठाति.
(c) Srk. नलिना for मलिना
(d) Srk. गण्डाव० for गण्डाभ०.
Srk —अचलसिंहस्य

1197 (b) S, I O गिरति for गलति

1198 (a) Ed., A सरागिता for सरागता
(b) Sv. सङ्गजावस्था for संगमावस्था
Sv. सुरभिचूलस्य (Sp. कस्यचित्) for काश्मीरक स्य.

1199 (b) Srk. च्छविरविरसो स्वेच्छादस्यो for च्छवि· विन्दन्
Srk —रघुनन्दनस्य

1200 रुचिरजनितताराहारचौरस्य भूभृ-
च्छिखरतरुनिवेशोल्लम्बितस्योर्ध्वपादम् ।
मालिनी
चिरमवनतमेतच्छोणितापूर्यमाणं
मुखमिव रविबिम्बं रज्यते वासरस्य ॥५॥

सङ्घश्रीमित्रस्य ।

१४६ सन्ध्या ।

1201 निशाकरकरस्पर्शहर्षोन्मीलिततारका ।
अनुष्टुप्
अहो रागवती सन्ध्या जहाति स्वयमम्बरम् ॥१॥

युवराजस्य ।

1202 दिक्कामिनीवदनकुङ्कुमपङ्कचर्चा
चक्राङ्गनाहृदयदावदवानलार्चिः ।
वसन्ततिलक
सन्ध्या रराज गगनान्तरतोयराशि-
बालप्रवालविटपाङ्कुरकन्दलश्रीः ॥२॥

कस्यचित् ।

1203 कौसुम्भवसनरुचिरां सन्ध्यां परिणीय
आर्या
मन्दमनुयान्तीम् ।
वासालयमिव जलधिं रागी पुरतो रविर्विशति ॥३॥

उमापतिधरस्य ।

1204 आकृष्टश्चक्रवाकैर्नयनकलनया बन्धकीभिर्निरस्तो
नास्त द्रागेति भानुर्निवसति
नलिनीबोधनिद्रान्तराले ।
स्रग्धरा
सन्ध्यादीपप्ररोहं बहुलतिलरसव्याप्तपत्रान्तरालं
वासागारे दिशन्ती हसति नववधूक्रोधदृष्टा
भुजिष्या ॥४॥

तस्यैव ।

1200 (b) Sp. ०ल्लङ्घितस्या० for ०ल्लम्बितस्यो०.
Ed. सङ्घश्रीमिवस्य (?) for ०मित्रस्य.

1205 अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः । Kuval. p. 108 Sk. III. 44 Sd under X. 128

अहो दैवगतिश्चित्रा तथापि न समागमः ॥५॥

कस्यचित् । अनुष्टुप्

१४७ अन्धकारः ।

1206 अक्ष्णोर्मञ्जुलमञ्जनं चरणयोर्नीलाश्मजौ नूपुरा-
वङ्गे नीलपटः स्फुटं मृगमदन्यास कपोलस्थले । शार्दूलविक्रीडित
यत्प्रीत्या परिशीलितं परदृशा रोधाय तत्सांप्रतं
नेपथ्यस्य विधावपीदमसतीजातस्य जातं तमः ॥१॥

वापीकस्य ।

1207 उत्सारितो हसितदीधितिभिः कपोला-
देकावलीभिरवधूत इव स्तनेभ्यः । Srk. 892
अङ्गेष्वलब्धपरिभोगसुखोन्धकारो वसन्ततिलक
गृह्णाति केशरचनासु रुषेव नारीः ॥२॥

गणपतेः ।

1208 अद्रिष्वञ्जनपुञ्जकान्ति जलदप्रायं च मूले दिशा-
मूर्ध्वं नीलवितानकल्पमवनौ जम्बाललेपोपमम् । शार्दूलविक्रीडित
तीरे नीरनिधेस्तमालविटपिच्छायं च सायं शनै-
रुद्गच्छत्यभिसारिकाप्रियतमप्रेमानुकूलं तमः ॥३॥

झञ्झानिलस्य ।

1206 (b) Sp. स्फुटे for स्फुट

1207 Srk.-anonymous.

1208 Ed. जल्हपालितस्य for झञ्झानिलस्य.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 533.

1209 यत्र तत्र रतिसज्ञवन्धकी-
प्रीतये मदनशासनादिव।
रथोद्धता
नीलकाण्डपटतामुपाययौ
सूचिभेद्यनिविड निशातमः ॥४॥

धोयीकस्य।

1210 उद्धूता धूमधारा विरहिजनमनोमाथिनो मन्मथाग्नेः
कस्तूरीपत्रमाला तिमिरततिरहो
दिक्पुरन्ध्रीमुखानाम्।
स्रग्धरा
निर्वाणाङ्गारलेखा दिवसहुतभुजः संचरच्चञ्चरीक-
श्रेणीयं भाति भास्वत्करलुलितनभः-
कन्दरेन्दीवरस्य ॥५॥

गोवर्धनस्य।

१४८ दीपः।

1211 वदनविधुसुधाभिषेकशीता-
न्नूसपरिभावनयेव लोलमौलिः।
पुष्पिताग्रा
त्वदधरमरुतो निपीय हास्य-
त्यपि सहजक्षणभङ्गिता प्रदीपः ॥१॥

तैलपाटीयगाङ्गोकस्य।

1212 निर्वाणगोचरगतोपि मुहुर्निशायां
Srk. 856
किं चेष्टितं तरुणयोः सुरतावसाने।
बसन्ततिलक
इत्येवमाकलयितुं सकलं कलावि-
दुद्ग्रीविकामिव ददाति रतिप्रदीपः ॥२॥

कस्यचित्।

1209 (c) Ed., A कान्त for काण्ड.

1212 (a) Srk. प्रदीपः for निशाया.

(b) Srk. वृत्तकं for चेष्टितं

(c) Srk. सकलङ्कलज्ज for सकलं कलावित्.

1213 बालां कृशाङ्गीं सुरतानभिज्ञां
गाढं नवोढामुपगूढवन्तम्।
विलोक्य जामातरमेष दीपो
वातायने कम्पमुपैति भीत ॥३॥

Srk. 857
उपजाति

कस्यचित्।

1214 हनूमानिव दीपोय दूरमुल्लासिताञ्जनः।
किं च राम इवाभाति विनिर्धूतदशानन ॥४॥

अनुष्टुप्

कस्यचित्।

1215 अतिपीतां तमोराजीं तनीयान्वोढुमक्षमः।
वमतीव शनैरेष प्रदीपः कज्जलच्छलात् ॥५॥

Srk. 855
अनुष्टुप्

कस्यचित्।

१४९ चन्द्रोदयः।

1216 अयमुदयति कोकीशोकशल्यैर्मयूखैः
शतमखपुरनारीनेत्रगण्डूषपेयः।
उदयगिरिमृगेन्द्रोद्गारभिन्नाङ्करङ्कु-
श्रवणरुधिरधारापाटलः पार्वणेन्दुः ॥१॥

मालिनी

मधोः।

1217 यस्त्रैलोक्यजितः स्मरस्य किमपि क्रीडातडागं महद्
यश्चाभोगभृतो भुवः प्रकटिताकारार्पणो दर्पणः।
सोयं सुन्दरि मन्दराद्रिमथितक्षीरोदसारोच्चय-
श्चन्द्रः कुङ्कुमपङ्कपिण्डलडहच्छायः समुद्गच्छति ॥२॥

शार्दूलविक्रीडित

राजशेखरस्य।

1214 (b) A विनिर्जित for विनिर्धूत.

1215 (a) Srk. सोढु for वोढुम्.

The verse has been quoted by Aufrecht in ZDMG, 36, p, 548.

1218 असावेकद्वित्रिप्रभृतिपरिपाट्या प्रकटय-
न्कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः ।
Srk. 909 पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां
शिखरिणी कटाक्षेभ्यो बिभ्यन्निभृत इव चन्द्रोऽभ्युदयते ॥३॥

तस्यैव ।

1219 देवः प्राचीमिदानीमयमुपचिनुते पञ्चबाणस्य सोऽयं
बिभ्राणः शाणलीलाममृतरुचिरिमां
लाक्षिकीभिः प्रभाभिः ।
स्रग्धरा किं चामुष्य प्रसङ्गान्निशितशरशिखा-
विस्फुरद्भिः स्फुलिङ्गैः
संध्यारागच्छलेनच्छुरितमिव तद्व्योमचक्रं
चकास्ति ॥४॥

हरेः ।

1220 आशाः संतमसोपलेपमलिनाः पीयूषगौरैः करै-
रालिम्पन्नयमुद्गतैर्दिवमिमां कर्पूरपूरं सृजन् ।
शार्दूलविक्रीडित चन्द्रश्चन्द्रशिलैककुट्टिममयं क्षोणीतलं कल्पय-
न्पश्योद्गच्छति पाकपाण्डुर-
शरच्छायोपमेयच्छविः ॥५॥

अनङ्गस्य ।

१५० प्रदोषः ।

1221 हंसाः संप्रति पक्षतौ सुनिभृतं कृत्वा शिरः शेरते
शार्दूलविक्रीडित ज्योत्स्नाभिस्तृषिताः समं सहचरैः
सुप्ताश्चकोरस्त्रियः ।

1218 (b) I. O. काण्डाङ्कुर for कन्दाङ्कुर.
(d) Srk. निभृतमिव for निभृत इव. Ed उदयति for उदयते.
Srk.-anonymous.

1220 (c) I. O. कम्पयन् for कल्पयन्.

घूर्णद्भिः कुमुदोदरेष्वपि मधुक्षीवैः स्थितं षट्पदै-
रप्युच्चैर्गिरिशृङ्गमूर्धनि भृशं निर्यान्त्यमी बर्हिणः ॥१॥

उमापतिधरस्य ।

1222 सैरन्ध्रीकरकृष्टपट्टकसरत्तारध्वनिर्दूरतो
दूतीसूत्रितसन्धिविग्रहविधिः सोल्लासलीलाचयः । — Vsb. II. 23, Spd 3591, Smv 68.2
वारस्त्रीजनसज्ज्यमानशयनः सनद्धपुष्पायुध-
श्रीखण्डद्रवधौतसौधमलिनो रम्यः क्षणो वर्तते ॥२॥ — शार्दूलविक्रीडित

कस्यचित् ।

1223 दिक् सरागमुखसंनिधापित-
स्फीतचन्द्रचषका शतक्रतोः ।
क्षीवभावमिव बिभ्रती रतौ — रथोद्धता
विश्लथोच्चतिमिरांशुकोच्चया ॥३॥

अभिनन्दस्य ।

1224 बाष्पैर्मानवती जनस्य कुलटासंकेतचिन्तोर्मिभिः
सम्प्राप्ता प्रियसंगमैकमनसामाकल्पनोपक्रमैः ।
दूतीसंचरणैरपि प्रणयिनोः संदेशवक्रोक्तिभिः — शार्दूलविक्रीडित
कृत्वायं कुरुते न मन्मथमनस्तोषं प्रदोषागमः ॥४॥

जलचन्द्रस्य ।

1225 उपरि गूढहिमांशुमरीचिभि- — Vik. III 6
स्तमसि दूरतरं प्रतिसारिते । — द्रुतविलम्बित

1222 (a) Vsb कङ्कण (Smv. पत्रक) for पट्टक, संचरन् (also Spd., Smv.) for दूरतो.
(b) Spd विधि० (Smv भरः) for चय०.
(c) Vsb. गण for जन, आयुध uncompounded.
(d) Vsb. तलको (Spd., Smv. शिखरो) for मलिनो.
Smv.—राजशेखरस्य.

1223 (b) S, I. O , क्षीरभारमिव for क्षीवभावमिव.

1225 (a) Vik. उदय for उपरि, शशाङ्क for हिमांशु.

अलकसंयमनादिव लोचने
हरति मे हरिवाहनदिङ्मुखम् ॥५॥
कालिदासस्य ।

१५१ वसन्तारम्भः ।

Vsb. I. 23
Sık. 166
शार्दूलविक्रीडित

1226 गर्भग्रन्थिषु वीरुधां सुमनसो मध्येङ्कुरं पल्लवा
वाञ्छामात्रपरिग्रहः पिकवधूकण्ठोदरे पञ्चमः ।
किं च त्रीणि जगन्ति जिष्णुदिवसैर्द्वित्रैर्मनोजन्मनो
देवस्यापि चिरोज्झितं यदि भवेदभ्यासवश्यं धनुः ॥१॥
राजशेखरस्य ।

शिखरिणी

1227 अतीता शीतार्तिः प्रसरति शनैरुष्मकणिका
दिनानि स्फायन्ते रविरपि रथं मन्थरयति ।
हिमानीनिर्मुक्तः स्फुरति नितरां शीतकिरण
शराणां व्यापारः कुसुमधनुषो न व्यवहितः ॥२॥
साम्पीकस्य ।

शार्दूलविक्रीडित

1228 निद्राशेषनिमीलितेक्षणतया प्राप्ते वसन्तोद्यमे
हस्तामर्पवशादसौ निजधनुः पञ्चेषुरन्विष्यति ।
चूताः कोरकगर्भनिर्भरदरोद्भिन्नस्फुरद्ग्रन्थयो
यात्यायाति च काकली पिकवधूकण्ठोपकण्ठं
मुहुः ॥३॥
प्राज्ञभूतनाथस्य ।

शार्दूलविक्रीडित

1229 एकद्वेषु रसालशाखिषु मनागुन्मीलितं कुड्मलैः
कर्णाकर्णिकया मिथः कथममी घूर्णन्ति विश्वेध्वगाः ।

1226 (c) तस्मात् for किंच.

1227 (a) Ed., A कलिका for कणिका.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 529.

द्वित्रैः क्वापि किल श्रुताश्रुतमपि स्पष्टान्यपुष्टारुतं
विष्वङ्मूर्छति दुःसहो विरहिणीगेहेषु हाहारवः ॥४॥
भट्टशालीयपीताम्बरस्य ।

1230 यातं मानैर्वधूनामिव दरशिथिलग्रन्थिभिः पूर्वपत्रै-
र्जातोपि क्वापि बालामदन इव वह्निर्नाङ्कुरो
व्यक्तिमेति । स्रग्धरा
आगारे नागराणामपि विहितबहुप्रार्थनाः
कण्ठसीमा
नीत्वा नीत्वा नवोढा इव वचनममूः कोकिलाः
कुण्ठयन्ति ॥५॥
आचार्यगोपीकस्य ।

१५२ वसन्तः ।

1231 जम्बूनां कुसुमोदरेष्वतिरसादाबद्धपानोत्सवाः
कीराः पक्वफलाशया मधुकरीश्चुम्बन्ति मुञ्चन्ति च । Srk. 157
एतेषामपि पश्य किंशुकतरोः पत्रैरभिन्नत्विषां Smv. 109 23
पुष्पभ्रान्तिभिरापतन्ति सहसा चञ्चूषु शार्दूलविक्रीडित
भृङ्गाङ्गनाः ॥१॥
राजशेखरस्य ।

1229 Ed. भट्टपालीय for भट्टशालीय in the poet's name.

1230 (a) I. O., A जातं for यातम् I O. पूर्णपात्रै for पूर्वपत्रै

(c) Ed., S कण्ठकण्ठं for कण्ठसीमाम्

(d) Ed, S कोकिला for कोकिला I O., Sp. कण्ठयन्ति for कुण्ठयन्ति

Sp.—anonymous.

1231 (a) Smv. नवमधुन्याबद्ध for ष्वतिरसादाबद्ध S आरब्ध for आबद्ध.

(b) Smv. मधुकरी for ०करी॰.

(c) Smv दलैरेभि समानत्विषा for तरो॰ .त्विषा.

(d) Smv. भृत॰ पिबन्ति for भिरापतन्ति

Smv. वसुकस्य for राजशेखरस्य.

Srk. 188
आर्या

1232 अङ्कुरिते पल्लविते कोरकिते विकसिते च सहकारे ।
अङ्कुरितः पल्लवितः कोरकितो विकसितश्च
मदनोसौ ॥२॥

कस्यचित् ।

शिखरिणी

1233 अमीषामारूढप्रसवविवराणां मधुलिहां
ध्वनिः पान्थस्त्रीणां प्रसरति वियोगज्वर इव ।
द्रुमालीनां यूनोर्मन इव सरागं किसलयं
परागः पुष्पाणां पतति मदनस्येव विशिखः ॥३॥

वसन्तदेवस्य ।

V.c. VII. 64
शार्दूलविक्रीडित

1234 लीलास्नानविधिक्षमं मधुलिहां पुष्पेषु जातं मधु
स्थायित्वं कलकण्ठकण्ठकुहरेष्वासेवते पञ्चमः ।
एकच्छत्रजगत्त्रयार्जनरुचेर्दैवस्य शृङ्गारिण-
श्चैत्रश्चित्रमकाण्ड एव समभूत्त्रैलोक्यमल्लो भटः ॥४॥

विल्हणस्य ।

Srk. 173
शार्दूलविक्रीडित

1235 वापी दन्तुरितोदरा कमलिनी पत्राङ्कुरग्रन्थिभि-
श्चूतानां कलिकामिलन्मधुलिहां कापि स्थितिर्वर्तते ।

1232 (a) A, om. च.
(b) A, om. असो. I. O., Srk. हृदि मदन॰ for मदनोसौ.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 548, with असौ omitted.

1233 (b) Ed. वियोगे for वियोग.
(d) S मनसिजस्येव for मदनस्येव

1234 (c) V. c. जय for त्रय.
(d) Ed. भर. for भट॰.
A, I. O., शिल्हणस्य for बिल्हणस्य.

1235 (a) Srk. वाप्यो दन्तुरितोदरा for वापी...दरा.

किं चान्यत्कुसुमायुधोद्य भगवान्धत्ते सगर्वं धनु-
र्ज्यामुन्मार्ष्टि च पञ्चभिश्च विशिखैर्जेतुं
जगद्वाञ्छति ॥५॥
वीर्यमित्रस्य ।

१५३ वसन्तवासरः ।

1236 आरक्ताङ्कुरदन्तुरा कमलिनी नायामिनी यामिनी
स्तोकोन्मुक्ततुषारमम्बरमणेरोपत्प्रगल्भं महः । Srk. 152
अप्येते सहकारसौरभमुचो वाचालिताः कोकिलै- शार्दूलविक्रीडित
रायान्ति प्रियविप्रयुक्तयुवतीमर्मच्छिदो वासराः ॥१॥
सङ्घश्रियः ।

1237 मन्दं दक्षिणमाह्वयन्ति पवनं पुंस्कोकिलव्याहृतैः
सस्कुर्वन्ति वनस्थलीः किसलयोत्तंसैर्निषण्णालिभिः ।
चन्द्रं सुन्दरयन्ति मुक्ततुहिनप्रावारया ज्योत्स्नया Srk. 161
वर्धन्ते च विवर्धयन्ति च शार्दूलविक्रीडित
मुहुस्तेमी स्मरं वासराः ॥२॥
कस्यचित् ।

1238 एते सप्रति वैमनस्यमनिशं निःशङ्कमातन्वते
कान्तारस्थलपद्मिनीपरिमलैरानन्दितेन्दिन्दिराः ।
उन्मीलत्सहकारकाननतटीवाचालपुंस्कोकिल-
ध्वानाकर्णनकांदिशीकपथिकावस्कन्दिनो शार्दूलविक्रीडित
वासराः ॥३॥
योगेश्वरस्य ।

1235 (c-d) Srk. दौर्भाग्योपनयाय साप्रतमयामल्पोऽपि मार्गश्रमः ।
शिक्षामुल्ललितुं ददाति रजसा गन्त्रीपथे मारुतः ॥
Srk. अभिनन्दस्य for वीर्यमित्रस्य.

1237 (b) Ed. वनस्थली for वनस्थली..

1239 धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि
धूताध्वनीनहृदयानि मधोर्दिनानि ।
वसन्ततिलक निस्तन्द्रचन्द्रवदनावदनारविन्द-
सौरभ्यसौहृदसगर्वसमीरणानि ॥४॥

कस्यचित् ।

1240 स्तोकस्तोकनिवर्तमानतुहिनोन्मीलन्नवाम्भोजिनी-
शार्दूलविक्रीडित संक्रान्तैरलिभिर्मुखेषु ककुभां क्लृप्तालकश्रेणयः ।
तत्तन्मन्मथबन्धुवार्तिकपिकप्रारब्धबीजाङ्कुर-
व्याख्यातक्षुभिताध्वनीनमनसो
धिन्वन्त्यमी वासराः । ५॥

हरे ।

१५४ वसन्ततरवः ।

1241 मिथः क्रीडालोलभ्रमरभरभग्नाङ्कुररस-
Srk. 187 प्रसेकप्रोन्मीलत्परिमलसमालब्धपवन ।
शिखरिणी इतोऽप्येष श्रीमानविरलमिदानीं मुकुलितः
प्रयच्छत्युन्मादानहह सहकारद्रुमयुवा ॥१॥

कस्यचित् ।

1242 साम्यं संप्रति सेवते विचकिलं षाण्मासिकैर्मौक्तिकै-
र्वाह्लीकीदशनव्रणारुणतरैः पत्रैरशोकोर्चितः ।
Vsb. I. 25
Srk. 165 भृङ्गीलङ्घितकोटि किंशुकमिदं किंचिद्विवृन्तायते
शार्दूलविक्रीडित माञ्जिष्ठैर्मुकुलैश्च पाटलितरोर्वृत्तैव काचिल्लिपिः ॥२॥

राजशेखरस्य ।

1241 (a) Srk. भङ्ग for भग्न.
(c) Srk. इतोऽस्त्येष for इतोऽप्येष.
1242 (b) Vsb. रदन for दशन A चलैः (Srk. तलैः) for तरैः.
(c) Srk. भृङ्गा for भृङ्गी Ed., A विवृत्तायते for विवृन्तायते
(d) Vsb. अन्येव (Srk. अन्यैव) for वृत्तैव.

1243 वह्निर्मन्ये हिमजलभयात्संश्रितः किंशुकेषु
श्यामं धूमैः स खलु कुरुते काननं कोरकाख्यैः । Srk. 176
संतापार्थं कथमितरथा पान्थसीमन्तिनीनां मन्दाक्रान्ता
पुष्पव्याजाद्विसृजति शिखाश्रेणिमुद्गाढशोणाम् ॥३॥

कस्यचित् ।

1244 इदानीं प्लक्षाणां जरठदलविश्लेषचतुर-
स्थितीनामाबन्धः स्फुरति शुकचञ्चुपुटनिभः ।
ततः स्त्रीणां हस्तक्षममधरकान्ति कलयितु शिखरिणी
समन्तान्निर्याति स्फुटसुभगरागः किसलयः ॥४॥

वामनस्य ।

1245 परागैरादिग्धाः परिमिलितपिष्टातकनिभै-
र्मरुल्लोलच्छाखं मधुपरवगीत विदधतः ।
पलाशैः काश्मीरारुणवसनकल्पैर्निवसिता शिखरिणी
द्रुमा राजन्त्येते मधुदिवसरस्योत्सवभृतः ॥५॥

वसन्तसेनस्य ।

1243 (a) Srk. मिपात् for भयात्.
(b) Srk. व्यामं for श्यामं
(d) Srk शोणीम् for शोणाम्
Srk. ascribes the verse to पौतायनि

1244 (a) Ed., Srk. जठर for जरठ. Srk चतुर for चतुर.
(b) A, I O, स्फुटति for स्फुरति.
(c) Srk हन्त for हस्त.
(d) A, I. O, Srk. ०रागं किसलयम् for ०रागः किसलय

1245 A, I. O., वसन्तसेनदेवस्य for ०सेनस्य.
Ed.—anonymous.

१५५ वसन्तकोकिलः ।

1246 एते नूतनचूतकोरकघनध्वानातिरेकीभव-
त्कण्ठध्वानजुषो हरन्ति हृदयं मध्येवनं कोकिलाः ।
Srk. 171
शार्दूलविक्रीडित
येषामक्षिनिभेन भान्ति भगवद्भूतेशनेत्रानल-
ज्वालाजालकरालितासमशराङ्गारस्फुलिङ्गा
इव ॥१॥

कस्यचित् ।

1247 अद्योन्मीलन्मलयपवनोद्धूतचूताङ्कुराग्र-
ग्रासास्वादादधिकमधुरैरुच्चरद्भिर्निनादैः ।
मन्दाक्रान्ता
क्वापि क्वापि स्मरहुतवहोद्दीपनायाध्वगानां
होतुं प्राणानृचमिव पिकः सामिधेनीमधीते ॥२॥

हरेः ।

1248 यश्चूताङ्कुरकन्दलीकवलनात्कर्णामृतस्राविणीं
छायामात्रपरिग्रहेण विदधे पाञ्चेषवीमस्त्रताम् ।
V.c. VII. 76
शार्दूलविक्रीडित
ताम्यत्तालुविटङ्कसंकटदरीसंचारतः पञ्चमः
सोयं कोकिलकामिनीगलविलादामूलमुन्मूलति ॥३॥

बिल्हणस्य ।

1249 यः शृङ्गाररसायनं मृगदृशां वैराग्यचिन्ताज्वरः
शार्दूलविक्रीडित
शान्त्युद्वासनडिण्डिमः स्मरगुरोस्तत्त्वोपदेशाक्षरम् ।

1246 (a) A, S ग्रासा for ध्वाना

1248 (a) I. O. ग्रामणी (V.c. ग्रामणीः) for स्राविणीम्.

(b) V. c. परिग्रहेपि for परिग्रहेण, जगृहे पञ्चेषुजैत्रेषुताम् for विदधे .. ...ताम्

(c) V. c. तटी for दरी.

(d) I. O. उन्मीलति for उन्मूलति

A, I. O, Sp. शिल्हणस्य for बिल्हणस्य.

Ed.—anonymous.

उद्भूतस्मरगौरवज्वरभराक्रान्ताध्वनीनाङ्गना-
चैतन्यत्रुटिकार्मणं विजयते रागः पिके पञ्चमः ॥४॥

कस्यचित् ।

1250 ओंकाराः कुसुमायुधोपनिषदां मन्त्रानुवादः स्मर-
स्वाध्यायस्य रतेः पुनर्भवविधौ गन्धाभिरामश्रुतिः ।
चित्ताकर्षणसाध्यसिद्धिरसतीनेत्रस्य कर्णज्वरः
पान्थानां सहकारकाननसुधासेकः पिकानां
ध्वनिः ॥५॥

शार्दूलविक्रीडित

१५६ वसन्तभ्रमरः ।

1251 आरक्तायतपुष्पबाणनयने स्निग्धाञ्जनश्यामिकां
काश्मीरारुणकर्णिकारकुसुमोत्तंसे महानीलताम् ।
उन्मीलत्तिलकान्तरे मृगमदक्षोदार्द्रबिन्दूपमां
धत्ते मुग्धतमालकान्ति मधुपीवृन्दं वसन्तश्रियः ॥१॥

शार्दूलविक्रीडित

उमापतिधरस्य ।

1252 पिकत्रोटीदात्तत्रुटितसहकाराग्रमुकुल-
स्रुतक्षीरक्षीवप्रसृतपवनान्दोलतरलः (ला ?) ।
इदानीं वासन्तीदलितकुसुमामोदमुदित-
भ्रमद्भृङ्गश्रेणी रणरणकमन्तर्वितनुते ॥२॥

शिखरिणी

कालिदासनन्दिनः ।

1253 निरानन्दाः कौन्दे मधुनि परिभुक्तोज्झितरसे
वनेष्वम्भोजानामविकृतसुखेषु प्रतिहताः ।
इदानीं चूतानां मुकुलमधुपु प्रेमसरसा
नवीनेष्वाकूतं दधति परिगाढं मधुलिहः ॥३॥

शिखरिणी

नवकरस्य ।

1252 (b) I. O. द्रुत for स्रुत , क्षारं for क्षीव

1253 The verse has been quoted by Aufrecht in ZDMG, 36, p. 535.

S d. under IV 9 Spd. 3786 अनुष्टुप्

1254 मल्लिकामुकुले भाति गुञ्जन्मत्तमधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥४॥

कस्यचित् ।

आर्या

1255 अविरलपरागसैकतमकरन्दतरङ्गिणीमनुवनान्तम् ।
पिकयुवतिजानुदघ्नीं गाहन्ते
मधुपयोपितस्तृषिताः ॥५॥

आवन्तिकजह्नोः ।

१५७ ग्रीष्मः ।

Srk. 200 शिखरिणी

1256 भुवां घर्मारम्भे पवनचलितं तापहृतये
पटच्छत्राकारं वहति गगनं धूलिपटलम् ।
अमी मन्दाराणां दवदहनसंदेहितधियो
न ढौकन्ते पातुं झटिति मकरन्दं मधुलिहः ॥१॥

भवभूतेः ।

हरिणी

1257 सलिलमखिलं वेशान्तानां लुलापकुलाकुलं
विशति बिसिनीपत्रच्छत्रे रथाङ्गविहङ्गमः ।
निजगजपतिं कुञ्जच्छायां नयन्ति पदे पदे
पृथुवमथुना सिक्त्वा सिक्त्वा करेण करेणव ॥२॥

कस्यचित् ।

1254 (a) Sd. चरिङ. bet. मुकुले and भाति, om. मत्त.
Spd. मञ्जु गुञ्जन् for गुञ्जन्मत्त.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 555.

1256 (b) A, I. O, पटच्छायाकारं for पटच्छत्राकारम्. I. O. रहति for वहति.

1257 (a) Ed. लुलाय for लुलाप.
(b) A, I. O., Sp. छत्रं for छत्रे

1258 प्रान्ते पङ्किनि पल्लवस्य विलुठन्पोत्रो नयत्यातपां-
स्तृष्णालुर्निभृतं ह्रदेषु महिषः शैवालमन्विष्यति ।
आचीर्णौषधिमूलशीतसुरभिश्वासानिलान्दोलयन्
प्रक्षीणोष्मणि लीयते वनगिरिश्वभ्रोदरे शल्लक ॥३॥ शार्दूलविक्रीडित

योगेश्वरस्य ।

1259 अम्भोधेर्जलयन्त्रमन्दिरपरिस्पन्देपि निद्राणयोः
श्रीनारायणयोर्घनं विघटयत्यूष्मा समालिङ्गनम् ।
किं चोत्तप्तवियत्कपालफलके कङ्कालशेषश्रिय
चन्द्र मर्मरयन्ति पर्पटकरक्रूरा रवेरंशवः ॥४॥ Srk 214 शार्दूलविक्रीडित

कस्यचित् ।

1260 पाषाणः कुलिशायते पुरपथं संतप्तलोहायते
निर्वातं दहनायते च निबिडाङ्गारायते शर्करा ।
एतस्मिस्तरुणप्रचण्डमहसः प्रौढातपे सर्वतः
क्षोणी शुष्यति वालुका च
सरितां वह्निस्फुलिङ्गायते ॥५॥ शार्दूलविक्रीडित

भवानन्दस्य ।

१५८ ग्रीष्मवेशः ।

1261 जलार्द्रं संव्यानं बिसकिसलयैः केलिवलयाः
शिरीषैरुत्तंसो विचकिलमयी हाररचना ।
शुचावेणाक्षीणां मलयजरसार्द्राश्च तनवो
विना तन्त्रं मन्त्रं रतिरमणमृत्युञ्जयविधिः ॥१॥ Vsb IV. 3. Sık. 212 शिखरिणी

कस्यचित् ।

1259 (a) A, I. O., S अम्भोधिः for अम्भोधे .
(d) A, I. O. रव (?) (Sık. मिव) for कर
Srk. ascribes the verse to नारायणलच्छि.
1260 (c) Ed. प्रौढालये for प्रौढातपे.
1261 (a) Vsb. जलार्द्रैः (Srk जलार्द्रा.) for जलार्द्रं
(b) Vsb उत्तंसा for उत्तसो
As the verse occurs in Vsb , we can read राजशेखरस्य for कस्यचित्. Srk. ascribes it to Rājaśekhara.

1262 तोयोत्तीर्णा श्रयति कवरी शेखरं सत्तलानां
शैत्यं सिञ्चत्युपरि कुचयोः पाटलाकण्ठदाम ।
Srk. 209
मन्दाक्रान्ता
कान्तं कर्णावभिनिविशते कोमलाग्रं शिरीषं
स्त्रीणामङ्के विभजति तपस्तत्र तत्रात्मचिह्नम् ॥२॥

मधुरशीलस्य ।

1263 कर्णोत्तंसः शिशुशुकवधूपिच्छलीलं शिरीषं
सान्तःसूत्राः परिमलमुचो मल्लिकानां च हाराः ।
मन्दाक्रान्ता
मुक्तागौरैर्वलयरचनाकन्दलाग्रैर्बिसानां
ग्रीष्मारम्भे रमयति नवं मण्डनं कामिनीनाम् ॥३॥

कस्यचित् ।

1264 अभिनवकुशसूत्रस्पर्धि कर्णे शिरीषं
कुरवकपरिधानं पाटलादाम कण्ठे ।
मालिनी
तनुसरसजलार्द्रोन्मीलितः सुन्दरीणां
दिनपरिणतिजन्मा कोपि वेशश्चकास्ति ॥४॥

कमलायुधस्य ।

1265 सद्यश्चम्पककञ्चुका कुचतटी वैकक्षके मल्लिकाः
काञ्चिर्वैचकिली बिसालिवलयाग्रैवेयकं केशरैः ।
शार्दूलविक्रीडित
चाम्पेयोत्तरपाटला च कवरी कर्णः शिरीषाञ्चितो
वेशश्चेद्यमङ्गनासु न तदानङ्गस्य के किङ्कराः ॥५॥

कस्यचित् ।

१५९ शृङ्गारात्मकग्रीष्मः ।

1266 तदात्वस्नातानां मलयजरसैरार्द्रवपुषां
कुचान्बिभ्राणानां दरविकचमल्लीमुकुलिनः ।

1262 (a) Srk. तोयोत्तीर्णाः......कवरी. for तो......री, शेखरः for ०रम्.
Srk. मधुशील for मधुरशील.

1266 (a) Srk. रसार्द्रार्द्र for रसैरार्द्र. Spd. दरदलितमल्लीमुकुलिता· for मलय ...वपुषा.

(b) Srk., Sp. कचान् (Spd. स्रजो) for कुचान्. Spd. मलयजरसार्द्रार्द्रवपुषा for दर...मुकुलिन·.

निदाघार्कप्रोषग्लपितमहिमानं मृगदृशां Srk. 192
परिष्वङ्गेनाङ्गं पुनरपि शनैरङ्कुरयति ॥१॥ Spd. 3834
मङ्गलार्जुनस्य । शिखरिणी

1267 अपां मूले लीनं क्षणपरिचितं चन्दनरसे
मृणालीहारादौ कृतलघुपदं चन्द्रमसि च । Srk. 201
मुहूर्तं विश्रान्तं सरसकदलीकाननतटे शिखरिणी
प्रियाकण्ठाश्लेषे निविशति पदं शैत्यमधुना ॥२॥
कस्यचित् ।

1268 एतस्मिन्घनचन्दनार्द्रवपुषो निद्राकषायेक्षणा
लीलालोलमृदूल्लसद्भुजलताव्याजृम्भमाणा मुहुः ।
निर्गच्छन्ति शनैरहःपरिणतौ मन्दा लतामन्दिरा- शार्दूलविक्रीडित
त्स्वेदाम्भःकणदन्तुरस्तनतटाभोगाः कुरङ्गीदृशः ॥३॥
कालिदासनन्दिनः ।

1269 हरन्ति हृदयानि यच्छ्रवणशीतला वेणवो
यदर्घति करम्बिता शिशिरवारिणा वारुणी । Vsb. IV. 4
भवन्ति च हिमोपमाः स्तनभुवो यदेणीदृशां Srk. 211
शुचेरुपरि संस्थितो रतिपतेः प्रसादो गुरुः ॥४॥ पृथ्वी
राजशेखरस्य ।

1270 शुचौ तप्ताङ्गानां बहलमकरन्दद्रवमुचः
कदम्बप्रालम्बाः स्तनपरिसरे पक्ष्मलदृशाम् । शिखरिणी

1266 (c) Spd. अग्नि for अर्क, ०मभिसायं for महिमानं.

Spd —anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 520.

1267 (c) A, I. O., Srk. तले for तटे.

(d) Ed., Srk. निवसति परं for निविशति पदम्.

1269 (b) Vsb. यदञ्चित for यदर्घति.

(c) Vsb. हिमावहाः for हिमोपमाः.

हठाल्लूनोष्माणः कमपि महिमानं विदधते
जलक्रीडातीर्णप्रियतमभुजाबन्धशिशिराः ॥५॥

कस्यचित् ।

१६० दवानलः* ।

1271 आरोहत्यवनीरुहः प्रविशति श्वभ्रं नगैः स्पर्धते
Sk. I. 82 खं व्यालेढि विचेष्टते क्षितितले कुञ्जोदरे लीयते ।
Smv 34. 7 अन्तर्भ्राम्यति कोटरस्य विरमत्यालम्बते वीरुधः
शार्दूलविक्रीडित किं तद्यन्न करोति मारुतवशं यातः कृशानुर्वने ॥१॥

योगेश्वरस्य ।

1272 विध्वस्ता मृगपक्षिणो विवशतां नीताः स्थलीदेवता
धूमैरन्तरिताः स्वभावमलिनैराशा महीतापिता ।
Spd. 1159 भस्मीकृत्य सपुष्पपल्लवफलांस्तांस्तान्महापादपा-
Smv. 34. 5 न्निर्वृत्तेन दवानलेन विहितं वल्मीकशेषं वनम् ॥२॥
Srk 1114
शार्दूलविक्रीडित

तस्यैव ।

1270 (d) S, I. O जलक्रीडोत्तीर्ण for जलक्रीडातीर्ण

* दावानलः

1271 (a) S. k. रुहं for रुह., नगैः for नागैः.

(b) I. O. मुञ्जोदरे for कुञ्जोदरे.

(c) I. O. विरसति (S निरसति) for विरमति Smv. विवरे व्यालम्बते for विरमत्यालम्बते

Smv. वसुन्धरस्य.

1272 (a) Ed. विश्वस्ता for विध्वस्ता. S, I O. विरसतां (Spd., Smv Srk. विधुरतां) for विवशता

(b) Srk. अन्तरिता for अन्तरिताः.

(c) Srk. दलान् for फलान्. Spd. फलैर्नम्रान् (Smv. फलानेतान्) for फलांस्तांस्तान्

(d) I. O कृतम् for वनम् Spd., Smv. read the line thus—उन्मत्तेन (Smv उद्वृत्तेन) दवानलेन विपिनं वल्मीकशेषं कृतम्. Srk. दुर्वृत्तेन for निर्वृत्तेन.

Srk, Smv., Spd-anonymous.

1273 अस्मिन्नीपद्वितत वलितस्तोकविच्छिन्नभुग्नः
किंचिल्लीलोपचितविनतः पुञ्जितश्चोत्थितश्च । Sk. I. 85
धूमोद्गारस्तरुणमहिषस्कन्धनीलो दवाग्नेः Srk. 1174
स्वैरं सर्पन्सृजति गगने गत्वरान्पत्रभङ्गान् ॥३॥ मन्दाक्रान्ता

बाणस्य ।

1274 बाले मालेयमुच्चैर्न भवति गगनव्यापिनी नीरदानां
किं तत्पक्ष्मान्तपातैर्मलिनयसि
मुधा वक्त्रमश्रुप्रवाहैः । S. k. II. 203
एषा प्रोद्वृत्तमत्तद्विपकषणक्षुण्णविन्ध्योपलाभा Spd. 3829
दावाग्नेः संप्रवृद्धा मलिनयति दिशां स्रग्धरा
मण्डलं धूमलेखा ॥४॥

कस्यचित् ।

1275 दिशः प्रोद्यत्संध्यागगनतलमुद्रक्तकुसुमं
तरूनाबद्धोरुस्तवकविकसत्किंशुकलतान् ।
विलोलत्कौसुम्भध्वजपटसमाश्लिष्टशिखराः शिखरिणी
प्रकुर्वन्वंशालीर्विकसति महीध्रेषु दहनः ॥५॥

कस्यचित् ।

1273 (a) Srk, S.k. transpose वितत and वलित A भग्नः for भुग्न
(b) Srk. विभवः for विनतः. S. k उच्छ्रित for उत्थित
(c) S. k. धूमोत्पीड for धूमोद्गार. A, I O. दवाग्नि॰ for दवाग्नेः.
(d) S. k अभ्र for पत्र

S. k., Srk.-anonymous.

1274 (b) Spd. त्व for तत्, वातै for पातै. A मृषा (S. k. सुधा) for मुधा.
(c) I. O. प्रोद्भूत for प्रोद्वृत्त. Spd. विन्ध्योपलानाम् for विन्ध्योपलाभा.
(d) S. k. व्योमलग्ना for संप्रवृद्धा, रेखा for लेखा.

Spd. attributes it to धाराकदम्ब.

१६१ वर्षारम्भः ।

1276 नेतुं वाञ्छति नीड एव दिवसं गर्भालसा वायसी
शार्दूलविक्रीडित रक्तो नीपलतासु भुक्तविरसामुज्झत्यलिः पाटलाम् ।
तेजः संप्रति संहरन्ति शिखिनो दग्धव्यापारं गता
जम्बूमाम्रवणादुपैति शनकैरासन्नपाकां पिकः ॥१॥
अभिनन्दस्य ।

1277 स्थलीभूमिर्निर्यन्नवकतृणरोमाञ्चनिचय-
प्रपञ्चैः प्रोन्मीलत्कुटजकलिकाजृम्भितशतैः ।
शिखरिणी घनारम्भे प्रेयस्युपगिरि गलन्निर्झरजल-
प्रणालप्रस्वेदैः कमपि मृदुभावं प्रथयति ॥२॥
नरसिंहस्य ।

1278 वातोद्धूतरजोमिलज्जललवैरुच्चित्रिताः शाखिन-
श्छत्रीकृत्य मृदां त्वचः स्थलभुवो निर्यन्ति
शष्पाङ्कुराः ।
शार्दूलविक्रीडित स्निग्धश्यामलकण्ठनालवलनव्यालोकिताम्भोमुचः
केकाभिः ककुभां मुखानि
शिखिनो वाचालयन्त्युत्सुकाः ॥३॥
अरविन्दस्य ।

Spd 3872 1279 किंचिन्मुद्रितपांशवः शिखिकुलैः सानन्दमालोकिता
शार्दूलविक्रीडित भग्नावासरुदद्दरिद्रगृहिणी श्वासानिलैर्जर्जराः ।

1277 (d) A, I O. कमिव for कमपि.
1278 (b) I O. चक्रीकृत्य for छत्रीकृत्य
(c) I. O रचना for वलन.
1279 (a) Spd. उत्कण्ठम् for सानन्दम्
(b) Spd. जीर्ण for भग्न.

एते ते निपतन्ति नूतनघनात्प्रावृड्भवारम्भिणो
विच्छायीकृतविप्रयुक्तवनितावक्त्रेन्दवो बिन्दवः ॥४॥
कस्यचित् ।

1280 वर्षारम्भसमुन्नमद्घनघटागर्जाभिरुत्त्रस्यता
ग्रीष्मेणापसृतं क्वचित् क्वचिदपि न्यस्तानि वस्तून्यपि ।
धूलिः केतककुड्मले विरहिणीचेतःसु दावानलः
खद्योतभ्रमिषूडुचक्रमरुणज्योतिस्तडिद्वल्लिषु ॥५॥
कस्यचित् ।

शार्दूलविक्रीडित

१६२ वर्षाः ।

1281 कामं कूले नदीनामनुगिरि महिषीयूथनीलोपकण्ठे
गाहन्ते शष्पराजीरभिनवशलभग्रासलोला बलाकाः ।
अन्तर्विन्यस्तवीरुत्तृणमयपुरुषत्रासविघ्नं कथंचि-
त्कापोतं कोद्रवाणां कवलयति
कणान्क्षेत्रकोणैकदेशे ॥१॥
योगेश्वरस्य ।

स्रग्धरा

1282 एतस्मिन्मदजर्जरैरुपचिते कम्बूरवाडम्बरैः
स्तैमित्यं मनसो दिशत्यनिभृतं धाराधरे मूर्छति ।
उत्सङ्गे ककुभो निधाय रसितैरम्भोमुचां घोरय-
न्मन्ये मुद्रितचन्द्रसूर्यनयनं व्योमापि निद्रायते ॥२॥
पातोकस्य ।

Sik 229
शार्दूलविक्रीडित

1283 स्मरविजयपदाङ्कं मत्तदात्यूहकण्ठ-
स्फुटितमधुरकूजा गीतयः संचरन्ति ।

मालिनी

1279 (c) Spd. भर for भव.
This is a doubtful verse of Amaru (See S K. De *Our Heritage*, II, p 71)

1281 (b) Ed ग्राम for ग्रास.

1282 (a) Sp. कर for रव.
(b) Ed., A नभसो for मनसो. Sik. रवे for धरे.

अपि च विततबर्हच्छत्रमुद्धूतपत्रं
नटति घननिनादोत्कण्ठितो नीलकण्ठः ॥३॥

भवानन्दस्य ।

1284 व्याप्तं वारिधरैरकाण्डमुदितैः कृत्स्नं वियन्मण्डलं
नाक्ष्णोर्वर्त्मनि शीतदीधितिरसौ नापि
त्विषामीश्वरः ।
शार्दूलविक्रीडित
भग्नावेव मलीमसैः किमधुना निर्मातुमर्थान्तरं
यत्सान्द्रं करकाः पतन्ति यदमी मुञ्चन्ति
विद्युच्छटाः ॥४॥

वातोकस्य ।

1285 सामोदा वकुलैः कदम्बमुकुलैः प्रीत्येव रोमाञ्चिता
नीरन्ध्रं पिहिताः पयोदपटलैः श्यामोत्तरीय इव ।
शार्दूलविक्रीडित
दूरीकृत्य च नूपुराविव रिपून्हंसान्समुत्कूजतो
याताः काप्यभिसारिका इव दिशो मेघागमे
सोत्सुकाः ॥५॥

१६३ वर्षामेघ ।

1286 त्रैलोक्याधिपतौ फणीन्द्रशयने निद्राति दैत्यद्रुहि
प्राप्य प्रावृषमन्धकाररजनीं प्रत्याशमायोजिताः ।
शार्दूलविक्रीडित
विद्युद्दीधितिदीपिकाभिरभितः संशोधयन्तो दिशां
भित्तीर्जाग्रति यामिका इव
धनुष्मन्तः स्वनन्तो घनाः ॥१॥

श्रीकण्ठस्य ।

1283 (c) I. O वर्ष for बर्ह, उद्धूत for उद्भूत.
(d) I. O., A नदति for नटति.

1285 The name of the poet is not given.

1286 (c) I O. संशोषयन्तो for संशोधयन्तो.

1287 क्षपां क्षामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं वनतरुगहनमुत्साद्य सकलम् ।
क्व संप्रत्युष्णांशुर्गत इति समन्वेषणपरा-
स्तडिद्दीपालोकैर्दिशि दिशि चरन्तीव जलदाः ॥२॥

Srk 251
Spd. 3869
Smv. 61.18
शिखरिणी

तस्यैव ।

1288 निपीय स्वच्छन्दं जलमुदरपूरं भरवशा-
द्विषण्णोतिक्लेशात्क्षितिधरशिलालम्बितवपुः ।
मुहुर्विद्युद्वल्लीवलितरसनो निस्वनमिषा-
द्भृशारब्धोद्गारं वमति जलभारं जलधरः ॥३॥

शिखरिणी

जलचन्द्रस्य ।

1289 व्याप्यान्तरीक्षककुभावनुभूभृदग्रं
सान्द्रान्धकारगहनासु निशासु गर्जन् ।
संवीक्षते विरहिणः क इह म्रियन्ते
वर्षासु विद्युदुरुदीपिकयेव मेघः ॥४॥

वसन्ततिलक

लोष्टसर्वज्ञस्य ।

1287 (a) Ed., Spd , Smv. क्षपा. for क्षपाम्.
(b) Ed., Srk सर्वां (Spd., Smv कृत्वा) for वन.
Srk. उच्छाद्य (Spd., Smv. उच्छोष्य) for उत्साद्य
(c) Ed. तदालोकन (Spd. तदन्वेषण) for समन्वेषण.
(d) Smv , Spd. दीपालोका for दीपालोकैः
I. O तरन्ति (S भवन्ति) for चरन्ति
Ed. इह for इव.
Srk.—anonymous.
Spd., Smv. attribute the verse to Pāṇini
1288 (c) I. O. वसनो for रसनो.
(d) I O., S भृशाबद्धोद्गारम् for ०रब्धोद्गारम्.

1290 असौ नास्तीवेन्दुः क्वचिदपि रविः प्रोषित इव
Srk. 262
शिखरिणी
ग्रहोडूनां चक्रं नभसि लिखितप्रोञ्छितमिव ।
अहर्वा रात्रिर्वा द्वयमपि विलुप्तप्रविचयं
घनैर्बद्धव्यूहैः किमिदमिति घोरं व्यवसितम् ॥५॥

कस्यचित् ।

१६४ वर्षानदी ।

1291 दात्यूहध्वनिभाञ्जि वेतसशिखासुप्तोरगाणि ध्वन-
Srk. 221
शार्दूलविक्रीडित
त्कादम्बानि कुरङ्गयूथकलितस्तूपान्युदम्भांसि च ।
तीराण्यद्य पिपीलिकासमुदयावर्जज्जटालोलुप-
व्याप्तान्युन्मदकुक्कुभानि सरितां
कुर्वन्ति लोलं मनः ॥१॥

योगेश्वरस्य ।

1292 एताः पङ्किलकूलरूढनलदस्तम्बाः क्वणत्कम्बवः
Srk. 254
शार्दूलविक्रीडित
क्रीडत्कर्कटचक्रवालविलसज्जम्बालतोयाविलाः ।
हृल्लेखं जनयन्त्यनूपसरितामुत्तुण्डगण्डूपदो-
त्कीर्णोद्गीर्णा मृदर्बुदस्थपुटितप्रान्तास्तटीभूमयः ॥२॥

परमेश्वरस्य ।

1293 विरतरजसां स्फूर्जत्सर्जप्रसूनसुगन्धिनी
हरिणी
मदवशलसत्केकिक्वाणप्रणादितसानुनी ।
अपहृतवनोद्देशोन्मेषास्तरङ्गितरंहसो
विदधति तटे भूभृन्नद्यः क्वणज्जलरङ्कुणी ॥३॥

कापालिकस्य ।

1290 (c) I O परिचय for प्रविचयम्.
(d) Srk. श्रति for इति.
1291 (c) Srk. लोलप for लोलुप.
1292 (d) Srk. कीर्णाङ्क्लिन्नमृदो नद for कीर्णा.. मृदर्बुद.
Srk. ascribes it to योगेश्वर.
1293 (a) Ed. विरतरजसी for ०रजसाम्.

1294 निदाघद्राघीयः क्लमकमठकण्ठाकुलभिदा-
मिदानीमुद्देशाः प्रतिपुलिनमर्घन्ति सरिताम् ।
समन्तादुन्मीलन्नवनिचुलकुञ्जेषु रभसा- शिखरिणी
दवस्कारक्रीडासुखमुखरदात्यूहसुहृदः ॥४॥

हरेः ।

1295 इह गुरुजलभारपूर्णगर्भा-
प्रदरदरीभ्रमभूरिभीमवेगाः ।
तटकटकनियुध्यमानवेणी- पुष्पिताग्रा
द्विगुणमहारवभैरवास्तटिन्यः ॥५॥

त्रिपुरारेः ।

१६५ वर्षादिवसः ।*

1296 तान्येतानि शिखण्डिताण्डवगुरूनम्भोधरानम्बरे
तन्वानानि दिनानि नूनममृतस्यन्दीनि वन्दामहे । शार्दूलविक्रीडित
उद्गाढा नवनीलनीरजदृशामत्यन्तमायासिनो
भिद्यन्ते स्वयमेव येषु विषमा मानग्रहग्रन्थयः ॥१॥

कस्यचित् ।

1297 हस्तप्राप्यदिशः प्रगाढजलदप्राग्भारसंकोचित-
व्योमानः पतयालुभिर्घनरसैराकीर्णभूमण्डलाः । शार्दूलविक्रीडित
अद्योद्दामनदन्नवाम्बुदव्रयप्रच्छन्नकीर्णोदर-
क्रूराः पान्थवधूभिरद्भुतममी सोढाः कथं
वासराः ॥२॥

कस्यचित् ।

1294 (b) I. O अर्दन्ति for अर्घन्ति.

1295 (a) Ed पूर for भार.

(b) I O. निगृह्यमाण for नियुध्यमान.

* I O. दिवसाः

1296 (c) I. O. आयामिनो for आयासिनो.

1298 एते ते दिवसा वियोगिगुरवः पूरोल्लसत्सिन्धवो
शार्दूलविक्रीडित विन्ध्यश्यामपयोदनीलनभसो नीपार्जुनामोदिन ।
आसन्नप्रसवालसां सहचरीमालोक्य नीडार्थिनीं
चञ्चुप्रान्तकिलिञ्जसंचयपरः काकोपि येष्वाकुलः ॥३॥

रन्तिदेवस्य ।

1299 धारोत्सिक्तस्तिमितरजसो भूमयः पुण्यगन्धा
घर्मच्छेदादुपचितमदाः केकिनः स्निग्धकेकाः ।
मन्दाक्रान्ता पीनामोदोन्मदमधुकरा मारुतस्य प्रवृत्तिः
प्रत्युत्कण्ठाप्रणयसुहृदो वासराः प्रावृषेण्याः ॥४॥

वागुरस्य ।

1300 एते कर्बुरितातपास्तत इतः संजायमानाम्बुद-
च्छेदैः संप्रति केतकीदलमिलद्भ्रांतिथेयोदयाः ।
शार्दूलविक्रीडित ग्रामान्तोद्गतशालिबीजयवसाश्लेषप्रहृष्यन्मनो-
गोवाह्रायतगीतिगर्भितदिशो रम्या॰ सखे
वासराः ॥५॥

कस्यचित् ।

१६६ वर्षारात्रि॰ ।

1301 आसारान्तमृदुप्रवृत्तमरुतो मेघोपलिप्ताम्बरा
Srk. 220 विद्युत्पातमुहूर्तदृष्टककुभः सुप्तेन्दुताराग्रहाः ।
शार्दूलविक्रीडित धाराक्लिन्नकदम्बसंभृतसुधामोदोद्वहाः प्रोषितै-
र्निःसंपातविसारिदर्दुररवा नीताः कथं रात्रय. ॥१॥

कस्यचित् ।

1298 (d) Sp चञ्चत्प्राञ्च for चञ्चुप्रान्त. Ed., A किलिञ्च for किलिञ्ज.
The verse has been quoted by Aufrecht in ZDMG, 36, p 521.

1299 (c) Sp. मधुकरं for ०करा.

1300 (b) I. O , S दर for दल.

1301 (c) I. O. ञ्जोषितै for प्रोषितै.
Srk. ascribes the verse to योगेश्वर.

1302 खद्योतच्छुरितान्धकारपटलाः स्पष्टस्फुरद्विद्युत
स्निग्धध्वानविभावितोरुजलदोन्नाहा रटत्कम्बवः । Sk. 228
एताः केतकभेदवासितपुरोवाता पतद्वारयो शार्दूलविक्रीडित
न प्रत्येमि जनस्य यद्विरहिणो यास्यन्ति
सोढुं निशाः ॥२॥
कस्यचित् ।

1303 विष्वग्वातविकीर्णशीकरकणा· स्फारस्फुरद्विद्युत-
स्तत्कालप्रतिबुद्धकेतकशिखागन्धोपदिग्धाम्बरा । शार्दूलविक्रीडित
दात्यूहप्रसवप्रणादितदिशः पान्थप्रियाणाममू-
रुन्मथ्नन्ति मनांसि मांसलघनध्वानोत्तरा
रात्रयः ॥३॥
कस्यापि ।

1304 अम्भःसंभृतिमन्थराम्बुदरवैः शालूरगर्जाभर-
प्रारब्धप्रियविप्रयुक्तयुवतीजीवग्रहे भीषणाः ।
विद्युद्दन्तुरितान्धकारपटला गाम्भीर्यबद्धारव- शार्दूलविक्रीडित
स्थैर्योन्मूलनशक्तयः कथममी निर्यान्ती
वर्षानिशाः ॥४॥
माधवस्य ।

1305 विद्युद्दीधितिभेदभीषणतमःस्तोमान्तराः संतत-
श्यामाम्भोधररोधसंकटवियद्विप्रोषितज्योतिषः । Srk. 252
खद्योतोन्नमितोपकण्ठतरवः पुष्णन्ति गम्भीरता- शार्दूलविक्रीडित
मासारोदकमत्तकीटपटलीक्वाणोत्तरा रात्रय ॥५॥
कस्यापि ।

1303 (b) A, I. O., S प्रतिबद्ध for प्रतिबुद्ध.
1304 (a) Sp. संवृत for संभृति.
(d) Sp. निर्यान्तु for निर्यान्ती.
1305 Srk. ascribes the verse to अभिनन्द.

१६७ शरदारम्भः ।

शार्दूलविक्रीडित

1306 शुभ्राभ्रं गगनं क्वचित्प्रविकसत्काशा वनाली क्वचि-
त्तोयोन्मुक्ततृणाग्रपङ्कजटिला क्षेत्रान्तभूमिः क्वचित् ।
किं च क्वापि चकोरचारुचरणन्यासार्द्रमुद्राभृतो
दृश्यन्ते तटिनीविमुक्तपुलिनच्छेदा मनोहारिण ॥१॥

संग्रामदत्तस्य ।

वसन्ततिलक

1307 आगत्य संप्रति शरत्समयः प्रसादा-
दीपद्विहस्य विकसत्कुमुदच्छलेन ।
उत्सार्य रोषमिव वारिधरोपरोध-
मेष प्रसादयति दिग्वनितामुखानि ॥२॥

कस्यचित् ।

Srk. 269
शार्दूलविक्रीडित

1308 धूम्रैः पक्षपुटैः पतद्भिरभितः पाण्डूदरैः खञ्जनै-
रायान्तीं शरदं किरन्ति रभसाल्लाजैरिवाशाङ्गनाः ।
मङ्गल्यं च कलङ्कपल्लवमुखं स्मेरानना शर्वरी
ज्योत्स्नादर्पणगौरमिन्दुकलशं व्योमाङ्गने
न्यस्यति ॥३॥

कस्यचित् ।

Srk. 284
शार्दूलविक्रीडित

1309 हंसानां निवहेषु यैः कवलितैरासज्यते कूजता-
मन्यः कोपि कषायकण्ठलुठनादाघर्घरो निस्वनः ।
ते संप्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो
निर्याताः कमलाकरेषु बिसिनीकन्दाङ्कुरग्रन्थय ॥४॥

कमलायुधस्य ।

1306 (a) S वनानी for वनाली

1308 (c) Srk. सखं for मुखं.

(d) Srk. तर्पण for दर्पण

1309 (a) Srk. निनदेषु for निवहेषु.

(d) Srk. कन्दाग्रिम for कन्दाङ्कुर.

1310 परावृत्ता हंसाः सपदि विगतं कल्मषमपां
प्रसन्नः शीतांशुः प्रसृतपटवः सूर्यकिरणाः ।
दिशो दीर्घीभूता गगनमसिवर्णं च विपुलं
नियन्ता विन्ध्याद्रेर्विदितमुदितोसौ मुनिवृपा ॥५॥

शिखरिणी

योगेश्वरस्य ।

१६८ शरत् ।

1311 यद्यप्यहं शशिमुखी विमलाम्बरश्री-
र्बन्धूकपुष्परुचिराधरपल्लवापि ।
धिङ्मां तथापि गलितोरुपयोधरत्वा-
दित्युच्चकैःशरदियं वहतीव तापम् ॥१॥

Srk 267
वसन्ततिलक

मनोविनोदस्य ।

1312 वराहानाक्षेप्तुं कलमकवलप्रीत्यभिमुखा-
निदानीं सीमानं प्रति विहितमञ्चाः स्वपतिभिः ।
कपोतैः पोतार्थं कृतनिबिडनीडा विटपिनः
शिवाभिर्वल्मीकाः खरनखरखातोदरमृदः ॥२॥

Srk. 285
शिखरिणी

शतानन्दस्य ।

1313 तीक्ष्णं रविस्तपति नीच इवाचिराढ्यः
शृङ्गं रुरुस्त्यजति मित्रमिवाकृतज्ञः ।
तोयं प्रसीदति मुनेरिव धर्मचिन्ता
कामी दरिद्र इव शोषमुपैति पङ्कः ॥३॥

Srk. 276
Sv 1821
Spd. 3907
Smv. 62. 3
वसन्ततिलक

भासस्य ।

1312 (a) I. O., S प्रत्यभिमुखा for प्रीत्यभिमुखा.
(b) Srk. सीमान॰ for सीमानं.

1313 (a) Smv. तीव्र॰ for तीक्ष्ण
(b) Smv. पिच्छं शिखी for शृङ्गं रुरुः॰
(c) Sv. चित्तमन्त॰ (Smv. चित्तवृत्तिः) for धर्मचिन्ता.
(d) Ed कामं for कामी.

1314 कान्तानां वदनेन्दुकान्तिमधुना धत्ते सुधादीधिति
खेलत्खञ्जनपंक्तयो मृगदृशां तन्वन्ति नेत्रश्रियम् ।
शार्दूलविक्रीडित
पद्मानि श्वसितस्य सौरभमभिद्रुह्यन्ति वामभ्रुवा-
मभ्यस्यन्ति च राजहंसवनिताः
पीनस्तनीनां गतिम् ॥४॥
लक्ष्मीधरस्य ।

1315 वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसंकाशकाशाः
काशाभा भान्ति तासां
स्रग्धरा
नवपुलिनगताः श्रीनदीहंसहंसाः ।
हंसाभाम्भोदयुक्तः शरदमलपदुमेंदिनीचन्द्र चन्द्र
श्चन्द्राङ्कः शारदस्ते जयकृदुपनतो
विद्विषां कालकालः ॥५॥
वामनस्य ।

१६९ शरन्नदी ।

1316 पारावारप्रकटपुलिनाभ्युद्गमोत्तारपाण्डु-
र्लीलावर्तस्तिमितचलनव्यञ्जितोद्देशनिम्ना ।
मन्दाक्रान्ता
क्रौञ्चीजानुद्वयसपयसामन्तरीपोदरेषु
स्वच्छा वेणिर्मदयति मनः शारदीनां नदीनाम् ॥१॥
कस्यचित् ।

1317 खेलत्खञ्जनलोचना· खगनखक्षुण्णान्तरीपोरवः
स्रस्तैः शैवलकुन्तलैरविरतस्मेरारविन्दाननाः ।
शार्दूलविक्रीडित
वर्षारात्रिघनोपभोगकथयेवालीमरालाङ्गनाः
प्रीणन्त्यद्य शरत्प्रभातमिलिता नीचस्वनैरापगाः ॥२॥
कस्यचित् ।

1314 (a) A, S, I. O. वदनस्य for वदनेन्दु
(c) Ed. अभिद्रव्यन्ति for अभिद्रुह्यन्ति
1315 (a) I. O. S. शत्रु (?) for शक्र
(b) Ed. केशाभा for काशाभा.
(d) I. O., S, उपगतो for उपनत.

1318 पूर्वं वारिधरप्रसङ्गसमये नापूरितैः कुक्षिभि-
र्या गर्भिण्य इवातिभारगुरवा निःसेव्यतामागता । Sv. 1825
एताः संप्रति ता विभान्त्यकलुषाः Smv. 62.21
क्षामाभिरामाङ्गिकाः शार्दूलविक्रीडित
कूजत्सारसपोतपीतपयसो नद्य प्रसूता इव ॥३॥
काश्मीरकभोगकर्मणः ।

1319 पूरापायप्रकटविटपाः पर्यटत्खञ्जरीटा-
क्रान्तप्रान्ताः प्रसभविलसद्राजहंसावतंसा ।
अद्यानन्दं दधति विचरच्चक्रवाकोग्रचञ्चु- Srk. 288
ग्रासत्रासप्रचलशफरस्मेरनीरास्तटिन्यः ॥४॥ मन्दाक्रान्ता
डिम्बोकस्य ।

1320 इमास्ताः कस्तूरीप्रखरखुरटङ्कक्षततटा-
स्तटिन्योरण्यानीमनु कमलिनीच्छन्नसलिलाः । शिखरिणी
जले यासां हंसा बिसकिसलयग्रासरसिकाः
सलीलं लीयन्ते युवतिगतिविद्यैकगुरवः ॥५॥
मन्मोकस्य ।

1318 (c) Ed. भान्ति. .कलुषक्षामाभिकामाङ्गिकाः for ता......ङ्गिकाः. Ed., however, supplies the lost word as वीत in the Errata. A कल्मष for कलुष.

S काश्मीर for काश्मीरक,

Sv. श्रीभोगिवर्मणः (Smv श्रीभोगवर्मणः) for काश्मीरकभोगकर्मणः.

1319 (a) Srk. दूरा for पूरा. Ed. खञ्जरीट for खञ्जरीटा.

Ed., I. O डिम्भोकस्य for डिम्बोकस्य.

(c) Srk. उपचञ्चु for उग्रचञ्चु.

1320 (d) Ed. रीत्येक for विद्यैक.

१७० शरत्खञ्जनः ।

1321 दूरोत्पुच्छः सलयचरणो लम्बलोलत्पतत्त्रः
Srk. 274 कण्ठेनोच्चैर्मदकलरुतस्तोकवाचालचञ्चुः ।
मन्दाक्रान्ता हर्षाश्रूर्मिस्तिमितनयनन्यस्तसोत्कण्ठदृष्टिः
कंचित्कालं नटति निकटे खञ्जरीटः प्रियायाः ॥१॥

मनोविनोदस्य ।

1322 मुहुरलसितपुच्छप्रेङ्खितैः प्रेयसीनां
मनसि मनसिजस्य प्रीतिमुद्द्योतयन्ति ।
मालिनी नवकनवकपत्रच्छत्रसूनानुकूल-
स्थलकवलितकीटाः खञ्जरीटाश्चरन्ति ॥२॥

अपिदेववामनदेवयोः ।

1323 अथ मेघव्यूहे बलिनि परिपन्थिन्यपसृते
शरज्जन्याः स्वैरं हसितमिव हर्षादविरतम् ।
शिखरिणी पयःपूरभ्रंशक्रमजनितसोपानसिकते
नदीतीरे धीरं चरति विशदः खञ्जनगणः ॥३॥

सुवर्णस्य ।

1324 सप्रति दिगङ्गनानां शरन्निराकृतघनान्धपटलानाम् ।
आर्या खञ्जनकटाक्षपातैः कर्वुरितं गगनमाभाति ॥४॥

कस्यचित् ।

1325 मधुरमधुरं कूजन्नग्रे पतन्मुहुरुत्पत-
हरिणी न्नविरलचलत्पुच्छः स्वेच्छं विचुम्ब्य चिरं प्रियाम् ।
इह हि शरदि क्षीवः पक्षौ विधूय मिलन्मुदा
मदयति रहः कुञ्जे मञ्जुस्थलीमधि खञ्जनः ॥५॥

जयदेवस्य ।

1322 (d) Sp. भवन्ति for चरन्ति.
1323 (d) Ed. धीरः for धीरम्.
1324 (a) Ed. दिङ्नागाना for दिगङ्गनानाम्.
1325 (b) Ed. अविरत for अविरल.

१७१ हेमन्तः ।

1326 यात्रालग्नं शिशिरमरुतां बान्धवः कुन्दलक्ष्म्याः
कालः सोयं कमलसरसां संपदः कालभूतः ।
निद्राव्याजाज्जडिमविधुरा यत्र गाढे हिमर्तौ
रामाः कण्ठग्रहमशिथिलं प्रेयसामाद्रियन्ते ॥१॥

Srk. 293
मन्दाक्रान्ता

कस्यचित् ।

1327 गर्वायन्ते पलालं प्रति पथिकशतैः
पामराः स्तूयमाना
गोपान्गोगर्भिणीनां सुखयति
बहलो रात्रिरोमन्थवाष्पः ।
प्रात पृष्ठावगाढप्रथमरविरुचिर्ग्रामसीमोपशल्ये
शेते सिद्धार्थपुष्पच्छदनिचितहिमक्लिन्नपक्ष्मा
महोक्षः ॥२॥

Srk. 297
स्रग्धरा

योगेश्वरस्य ।

1328 दिग्भागेषु हिमावृतिः प्रतिदिन सान्द्रापि सान्द्रायते
प्रालेयैः पिहितप्रभो दिनपतिर्मन्दोपि मन्दायते ।
भर्तुर्मान्द्यशुचेव हन्त दिवसः क्षीणोप्ययं क्षीयते
तत्संकोचनिरर्गलेव रजनी दीर्घापि दीर्घायते ॥३॥

शार्दूलविक्रीडित

लक्ष्मीधरस्य ।

1329 पाकं यत्र न याति पाणिजभिदा यत्रातिशीतार्तिभि-
र्मानच्छेदनिवेदनं रतिकलावृत्तिक्षमा यत्क्षपा ।

शार्दूलविक्रीडित

1326 (a) Srk. तुहिन for शिशिर
(b) Srk. दूत. for भूतः
(c) Srk. गाढेऽपि मन्तौ for गाढे हिमर्तौ
(d) Srk. वामा॰ for रामा

1327 (d) Srk. ॰च्छदनचित for ॰च्छदनिचित

1328 (d) Ed., A निराकुलेव for निरर्गलेव.

जारन्यस्तरदच्छदव्रणसमाधानाय यन्मारुत-
स्तेमी संततकूटक्लृप्तकुलटामोदा मुदे वासराः ॥४॥

आचार्यगोपीकस्य ।

1330 उद्ग्रीवा विवृतारुणास्यकुहरास्तृष्णाचलत्तालवः
Srk. 1151
शार्दूलविक्रीडित
पक्षासंभववेपमानतनवः प्रोड्डीय किंचिन्मुहुः ।
अन्योन्याक्षमिणः शरारिशिशवः प्रातर्नदीरोधसि
प्रालेयाम्बु पिबन्ति वीरणदलद्रोणी-
प्रणालीस्नुतम् ॥५॥

कस्यचित् ।

१७२ हेमन्तरात्रिः ।

1331 अन्तर्मन्युविभिन्नदीर्घरसितप्रोद्भूतकण्ठव्यथै-
राक्रुष्टास्तटिनीषु कोकमिथुनैर्यावन्निशीथं मिथः ।
शार्दूलविक्रीडित
शीतोज्जागरजम्बुकौघमुखरग्रामोपकण्ठस्थलाः
कृच्छ्रेणोपरमन्ति पान्थगृहिणी चिन्तायता
रात्रयः ॥१॥

अभिनन्दस्य ।

1332 विश्रामं भज तालवृन्त सुमनोवैकक्षक क्षम्यतां
श्रीखण्डद्रव वन्दितोसि सुमनोहाराः पुनर्दर्शनम् ।
शार्दूलविक्रीडित
दीपे संप्रति कर्मसाक्षिणि परीरम्भाय वामभ्रुवा-
मेकेपि प्रभवन्ति हैमननिशायामा
निशायामिनः ॥२॥

शुभाङ्कस्य ।

1330 (a) Ed. नयना for कुहरा. I. O. ज्वलत् for चलत्

(b) Srk. भुवः for मुहुः.

(c) Srk. अन्योन्याक्रमिणः for °क्षमिणः.

(d) I. O., S द्रुतम् for स्नुतम्. Srk. प्रणाल for प्रणाली.

1332 (a) A, I. O. सुहृदो for सुमनो.

I. O., S सुभाङ्गस्य for शुभाङ्कस्य.

1333 प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृति विदलत्कुन्दमाद्यद्द्विरेफे
काले प्रालेयवातप्रचलविकसितोद्दाममन्दारदाम्नि ।
येषां नो कण्ठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी
तेषामायामियामा यमसदनसमा यामिनी याति यूनाम् ॥३॥
कस्यचित् ।

Sv. 1843
Spd. 3924
स्रग्धरा

1334 विलासिनां भाग्यविजृम्भितेन
यस्मिन्द्वयं साधु कृतं विधात्रा ।
यदङ्गनानां विपुलस्तनोष्मा
व्यधायि दीर्घाश्च कृता रजन्यः ॥४॥
पुरुषोत्तमदेवस्य ।

उपजाति

1335 हिमधवलकान्तिकेशी मन्दद्युतितारका बृहत्तिमिरा ।
द्विगुणीभूता रजनी वृद्धेव शनैः शनैर्याति ॥५॥
कस्यचित् ।

Sv. 1832
Spd. 3919
Smv. 63.6
आर्या

१७३ हेमन्तहालिकः ।*

1336 लघुनि तृणकुटीरे क्षेत्रकोणे यवानां
नवकलमपलालस्रस्तरे सोपधाने ।

Dr. under IV. 22
Sv. 1840

1333 (a) Spd. प्रौढारविन्द for प्रौढप्रियङ्गु.
(d) Sv. नून for यूनाम्.
1334 Ed., I. O. पुरुषोत्तमस्य for ०देवस्य.
1335 (a) Spd., Smv., Sv. दन्त for कान्ति. Spd. केशा for केशी.
Spd. attributes it to बीजक (Smv. भट्टबीजक).
* Ed. om. हेमन्त.
1336 (b) Sv. यवस for कलम.

Srk. 299
Spd 3922
Smv. 63.15
मालिनी

परिहरति सुपुप्तं हालिकद्वन्द्वमारा-
त्स्तनकलशमहोष्माबद्धरेखस्तुषारः ॥१॥

भवभूतेः ।

Srk. 314
शिखरिणी

1337 इदानीमर्घन्ति प्रथमकलमच्छेदमुदिता
नवीनान्धस्थालीपरिमलमुचो हालिकगृहाः ।
उदञ्चद्दोर्लीलारणितवलयाभिर्युवतिभि-
र्गृहीतप्रोत्क्षिप्तभ्रमितमसृणोद्गीर्णमुसलाः ॥२॥

योगेश्वरस्य ।

S. k. III 8
Srk. 305
Spd. 581
Smv. 96 2
शार्दूलविक्रीडित

1338 भद्रं ते सदृशं यदध्वगशतैः कीर्तिस्तवोद्गीयते
स्थाने रूपमनुत्तम सुकृतिना दानेन कर्णो जितः ।
इत्यालोक्य चिरं दृशा कृपणया दूरागतेन स्तुतः
पान्थेनैकपलालमुष्टिरुचिना गर्वायते हालिकः ॥३॥

तस्यैव ।

स्रग्धरा

1339 आहूतो हालिकेनाश्रुतमिव वचनं तस्य कृत्वा क्षणैकं
तिष्ठासुस्तब्धरोमा कथमपि विटपं
निःसमीरं विहाय ।

1336 (c) Sv. सुगुप्त, for सुपुप्त
(d) Sv., Spd. कुच for स्तन.
Sv., Smv., Spd कमलायुधस्य.

1337 (b) Srk. नवाम्रान्न for नवीनान्ध. Sp. स्थले for स्थाली.
(c) Srk. वल्ली for लीला. I. O. वलित for रणित.
(d) I. O. उदीर्ण for उद्गीर्ण.

1338 (a) Sk., Spd., Smv. उद्घुष्यते for उद्गीयते.
(c) Spd. भृशं for चिरं. Sk., Spd., Smv. करुणया for कृपणया, शीतातुरेण for दूरागतेन.
Smv., Spd.—anonymous.

1339 (b) I. O. शुष्क for स्तब्ध.

दोर्भ्यामावृत्य वक्षःस्थलमलसगतिर्दीनपादप्रचारः
शीत्कारोत्कम्पभिन्नस्फुटदधरपुटः पामरः
क्षेत्रमेति ॥४॥

कस्यचित् ।

1340 क्षेत्रोपान्तपलायमानशशकद्वन्द्वं निरीक्ष्यापरा-
नाहूयातिरसेन कर्षकजनानारब्धकोलाहलाः । Srk. 300
हस्तावापितदात्ररज्जुलगुडैर्वृद्धैरवृद्धैः सह शार्दूलविक्रीडित
त्यक्त्वा शालिचिकर्तिषामित इतो
धावन्त्यमी पामराः ॥५॥

कस्यचित् ।

१७४ हेमन्तपथिकः ।

1341 मातर्धर्मपरे दयां कुरु मयि श्रान्ते च वैदेशिके Sv. 2416
द्वारालिन्दककोणकेषु निभृतं स्थित्वा Spd. 580
क्षिपामि क्षपाम् । Smv. 96. 3
इत्येवं गृहिणीप्रचण्डवदनावाक्येन निर्भर्त्सितो Srk. 1316
हस्तन्यस्तपलालमुष्टिविभवः पान्थः शनैर्गच्छति ॥१॥ शार्दूलविक्रीडित

शतानन्दस्य ।

1340 (a) Srk परीक्ष्य for निरीक्ष्य.
(b) Ed., A, Srk. आबद्ध for आरब्ध
(c) Srk., I. O. हस्तारोपित for हस्तावापित

1341 (a) Sv transposes कुरु and मयि, श्रान्तोऽद्य (also Spd., Smv) for श्रान्ते च.
(b) Sv. कोणकेऽथ for कोणकेषु, यातास्मि सुप्त्वा निशि (also Smv.) for स्थित्वा· ·क्षपाम्. Spd. कोणके सुनिभृत for कोणकेषु निभृतं.
(c) Sv., Smv. इत्युक्त्वा सहसा प्रचण्डगृहिणी for इत्येव···वाक्येन.
(d) Sv , Smv. स्कन्ध (Srk. स्कन्धे) for हस्त, पुनः for शनैः, प्रस्थित for गच्छति.

Spd., Sv. रविदत्तस्य. Smv. रविगुप्तस्य.
Srk.—anonymous.

1342 स्वैरं संचरति प्रदोषमरुति त्वङ्गत्तुपारे जर-
त्तन्तुच्छेदविशीर्णसन्धिशकलव्याकृष्टकन्थाञ्चल'।
शीतार्तः करुणार्द्रहालिकविनिर्दिष्टे क्षिपामि क्षपा-
मित्युच्चार्य पलालकूटकुहरे श्रान्त' प्रसुप्तोऽध्वगः ॥२॥ शार्दूलविक्रीडित

कस्यचित्।

1343 रुन्धानः कर्णसन्धी शिशिरभरभयात्पाणियुग्मेन गाढं
वाढं विन्यस्य बाहुद्वयमुरसि
रणद्दन्तपंक्तिः समन्तात्। स्रग्धरा
अष्ठीवद्ग्रां विचुम्बन्निपतितचिबुकं पृष्ठमात्रं हिमर्तौ
शेते संछाद्य सद्यस्त्रुटितचिरजरत्कन्थया
पान्थरङ्कः ॥३॥

सुव्रतदत्तस्य।

1344 पुण्याग्नौ पूर्णवाञ्छः प्रथममगणितप्लोषदोषः प्रदोषे
पान्थस्तप्त्वा प्रसुप्तः प्रतततनुतृणे धामनि ग्रामदेव्याः।
उत्कम्पी कर्पटार्धे जरति पदहतिच्छिद्रिते च्छिन्ननिद्रो
वाते वाति प्रकामं हिमकणिनि कणन्कोणतः
कोणमेति ॥४॥

Sv. 1857
Spd. 3946
Smv. 64 12
Srk. 1305
स्रग्धरा

बाणस्य।

1342 (d) I. O. इत्यत्युच for इत्युच्चार्य S, I. O भ्रान्तः for श्रान्त.

1343 (a) I. O. कर्णसन्धा for ०सन्धी

(b) I. O. वाचं for वाढम्.

1344 (a) Ed., I. O. पुराय for पूर्ण. Ed प्रोषदोष for प्लोषदोष..

(b) Sv., Smv. सुप्त्वा for तप्त्वा। यथेच्छं (Smv. यथेष्ट') for प्रसुप्त', तरल (Spd., Smv. तदनु) for प्रतत. Srk तदनुतत for प्रतत. Srk. तदनुतत for प्रतततनु.

(c) Sv परिजडेदभ्रनिरछिद्रनिद्रे (Spd., Smv., Srk. परिजडे छिद्रिणि) for पद...निद्रो

(d) Sv हिमकणनिहत for हिम...कणन्. Spd. कणात् for कणन्.

1345 संविष्टो ग्रामदेव्यास्तृणघटितकुटीकुड्यकोणैकदेशे
शीते संवाति वायौ हिमकणिनि
कणद्दन्तपंक्तिद्वयाग्रः । Spd 3947
पान्थः कन्थां निशीथे Smv. 64.13
परिकलितजरत्तन्तुसन्तानगुर्वी स्रग्धरा
ग्रीवापादाग्रजानुद्वयघटनरटत्कर्पटां प्रावृणोति ॥५॥
तस्यैव ।

१७५ शिशिरः ।

1346 धन्यानां वरपूरितमुखश्यामाङ्गनालिङ्गन-
प्राप्तानेकसुखप्रमोदवपुषां रम्यस्तुषारोद्गमः । Srk. 312
अस्माकं तु विदीर्णखण्डितपटप्रच्छादितोद्धाटित- शार्दूलविक्रीडित
क्रोडस्वीकृतजानुवेपथुमतां चेत परं सीदति ॥१॥
कस्यचित् ।

1347 विरहिवनितावक्त्रौपम्यं बिभर्ति निशापति- Srk. 317
र्गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवेः । हरिणी

1345 (a) Spd. कुट (Smv कट) for तृण
(b) Spd. रणत् for कणत्
(c) Spd., Smv. कुथित for कलित.
(d) Spd., Smv. ग्रहणचटचटत्कर्पटं for द्वय ...कर्पटा
Spd —मयूरस्य.
Smv.-anonymous

1346 (a) I. O., Srk नव for वर. I O. आलिङ्गने for आलिङ्गन.
Srk. आगमः for उद्गम.
(c) Srk. दलित for खण्डित, पटी for पट

1347 (a) Srk. व्यथित for विरहि.

अभिनववधूरोषस्वादुः करीषतनूनपा-
दसरलजनाश्लेषक्रूरस्तुषारसमीरणः ॥२॥

भासस्य ।

1348 एते वामविलोचनाकुचसखैः सोढव्यशीतार्तयः
शार्दूलविक्रीडित
प्राप्ताः पश्चिमसैन्धवस्य मरुतः प्रेमच्छिदो वासराः ।
यत्रापास्य पुराणपङ्कजमयं देवः सशृङ्गारभू-
राधत्ते नवकुन्दकुड्मलशिखानिर्माणमन्यद्धनु ॥३॥

प्रभाकरस्य ।

1349 कम्पन्ते कपयो भृशं जडकृशं गोजाविकं ग्लायति
S.k. III. 10
Srk. 313
Smv. 63.17
शार्दूलविक्रीडित
श्वा चुल्लीकुहरोदरं क्षणमपि क्षिप्तोपि नैवोज्झति ।
शीतार्तिव्यसनातुरः पुनरयं दीनो जनः कूर्मव-
त्स्वान्यङ्गानि शरीर एव हि
निजे निह्नोतुमाकाङ्क्षति ॥४॥

शतानन्दस्य ।

1350 पाकक्षामतिलाः समुत्सुकयितुं शक्ताः कपोतान्भुवः
Srk. 315
शार्दूलविक्रीडित
श्यामत्वं फलपीड्यमानकुसुमानापद्यते सर्षपान् ।
वायुर्व्यस्तशणस्तुषारकणवानभ्येति कम्पप्रदः
पान्थैः शुष्कविवादबद्धकलहैः पुण्याग्निरासेव्यते ॥५॥

योगेश्वरस्य ।

1347 Srk. अभिनन्दस्य for भासस्य

The verse has been quoted by Aufrecht in ZDMG, 36, p. 371.

1348 (d) A, I. O. निर्वाण for निर्माण. I. O. असमद्धनु for अन्यद्धनु .

1349 (a) Srk. जल for जड. Smv. कृतजडं गोजालकं for जड.. ...विकं, म्लायति for ग्लायति.

(b) Smv. प्राप्तो for क्षिप्तो.

Smv , Srk. लक्ष्मीधरस्य for शतानन्दस्य.

१७६ शिशिरग्रामः ।

1351 आभोगिनः किमपि संप्रति वासरान्ते
संपन्नशालिफलपल्लवितोपशल्याः । Srk. 303
ग्रामास्तुषारभरबन्धुरगोमयाग्नि- वसन्ततिलक
धूमावलीवलयमेखलिनो हरन्ति ॥१॥

अभिनन्दस्य ।

1352 उद्वेगं जनयन्ति संचितवृषव्याप्ताजिरोपान्तकाः
प्रातः शीर्णकुटीरपुञ्जितलताशिम्बीतुषाराविलाः । शार्दूलविक्रीडित
ग्रामा गोमयधूमसंततिपरिक्लिष्टारुणश्मश्रुभि-
र्वृद्धैः कुड्यनिवातलीननिभृतैरभ्यर्थ्यमानातपाः ॥२॥

योगेश्वरस्य ।

1353 शालिच्छेदसमृद्धहालिकगृहाः संसृष्टनीलोत्पल-
स्निग्धश्यामयवप्ररोहनिविडव्यादीर्घसीमोदराः । शार्दूलविक्रीडित
मोदन्ते परिवृत्तधेन्वनडुहच्छायाः पलालैर्नवैः
संसक्तध्वनदिक्षुयन्त्रमुखरा ग्रामा गुडामोदिनः ॥३॥

कस्यचित् ।

1354 जातोक्षोत्सुकगृष्टिभीषितशिशुत्रासार्तनारीगणाः
खिन्नास्तीर्णनवीनशालिसुरभिस्फीतोपलिप्ताजिराः । शार्दूलविक्रीडित
नेदीयःखलमृद्यमानमृदितस्तूपीकृतव्रीहय
पान्थप्रार्थ्यपलालगोपनपराः प्रायोद्य पल्लीगृहाः ॥४॥

विरिञ्चेः ।

1355 सीमान्तास्तुहिनागमे हलहतव्यासर्पिशस्याटवी-
नष्टप्रावरणा यवाङ्कुरचयं रोमाञ्चवद्बिभ्रति । शार्दूलविक्रीडित
ग्रामाः शालिपलालपिङ्गलखलप्रान्तज्वलत्पावक-
प्रोद्यन्मांसलधूमकम्बलमलं शीतालवो भेजिरे ॥५॥

पियाकस्य ।

1351 (b) Srk. खल for फल.
1352 (a) Ed., A उपान्तिका. for उपान्तकाः.
1355 A प्रियाकस्य for पियाकस्य.

१७७ शिशिरशस्यानि ।

1356 माषीणं मुषितं यवेषु यवसश्यामच्छविः शीर्यते
ग्रामान्ताश्च मधूकधूसरभुव. स्मेरं यवानीवनम् ।
Srk. 321 पुष्पाढ्याः शतपुष्पिकाः फलभृत
शार्दूलविक्रीडित सिद्ध्यन्ति सिद्धार्थकाः
स्निग्धाः वास्तुकवास्तवः स्तवकितस्तम्बा
च कुस्तुम्बरी ॥१॥
शुभाङ्कस्य

1357 सिद्धार्थाः फलसूचिबन्धगुरुभिर्लोलन्त्यमी पल्लवै-
Srk.316 रुच्छिन्दन्त्यध एव बन्धुरतया कोलीफलान्यर्भका ।
शार्दूलविक्रीडित पाकप्रश्लथपत्रकोपदलनव्यक्ताङ्कुरग्रन्थयो
निष्ठीवन्त्यपि हस्तयन्त्रकलिताः
पुण्ड्रेक्षुयष्ट्यो रसम् ॥२॥
वाचस्पतेः ।

1358 ईषल्लोमशभावभाञ्जि कपिशश्यामानुबन्धच्छवी-
शार्दूलविक्रीडित लिप्तत्वञ्चि चकोरकीरहरितोन्मेषीणि माषीलताः ।
एतास्तर्कय बालवानरवधूहस्ताङ्गुलीलब्भ्रिम-
स्पर्धावन्ति फलानि बिभ्रति
परीणामाभिरामश्रियः ॥३॥
वसुकल्पदत्तस्य ।

1356 (a) Srk. श्यामा छविः for श्यामच्छविः
(b) Srk. मसूर for मधूक यमानी for यवानी.
(d) I. O.; S कुस्तुम्बुरी (Srk. कुस्तुम्बिनी) for कुस्तुम्बरी.
Srk , I. O., S शुभाङ्गस्य.

1358 (c) Ed. drops the syllable between ल and म in the last word, and suggests in the Errata that the word is लालिम.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 545.

1359 सिद्धार्थयष्टिषु यथोदयहीयमान-
संतानबद्धफलसूचिपरंपरासु । Sik. 1184
विच्छिद्यमानकुसुमासु जनिक्रमेण वसन्ततिलक
पाकक्रमः कपिशिमानमुपादधाति ॥४॥

लक्ष्मीधरस्य ।

1360 यवानीवल्लीभिः कपिशहरिताभिर्दिशि दिशि
श्रयन्ते सीमानः किमपि कमनीयत्वमधुना ।
प्रथन्ते प्लक्षाणामपि च कुटिलाः काननभुवां शिखरिणी
विलीनाशाबन्धाः शुकशिशुकतुण्डच्छविमुपः ॥५॥

भूषणस्य ।

१७८ शिशिरसुखम् ।

1361 द्वारं गृहस्य पिहितं शयनस्य पार्श्वे
वह्निर्ज्वलत्युपरि तूलपटो गरीयान् । Sv. 1853
अङ्केनुकूलमनुरागवशात्कलत्र- Spd. 3940
मित्थं करोति किमसौ स्वपतस्तुषारः ॥१॥ वसन्ततिलक

बाणस्य ।

1362 उष्मायमाणस्तनमण्डलीभि-
र्वराङ्गनाभिः स्फुटविभ्रमाभिः ।
आलिङ्गिता रात्रिषु शैशिरीषु इन्द्रवज्रा
ते शेरते यैः प्रणतो शशाङ्कः ॥२॥

कस्यचित् ।

1359 (a) Srk. यथोत्तर for यथोदय.
(b) Srk. सस्थान for संतान.
Srk.—anonymous

1360 (a) I. O., S यमानी for यवानी.

1361 (c) Spd. वशं for वशात्.
Spd.—anonymous.

1363 मसृणघुसृणालेपस्तल्प मरालतनूरुहैः
हरिणी कुवलयदृशां गाढाश्लेषो विधूमहुताशनः ।
शिशिरसमये यद्येतानि प्रयान्ति सहायतां
सुरपतिपदारोहे वाञ्छा मनस्तव लाञ्छनम् ॥३॥

शङ्करस्य ।

1364 सद्यो धूपितमुत्प्रदीपमभितः संरुद्धवातायनम्
शार्दूलविक्रीडित शुभ्रं वेश्म मरालपक्ष्ममृदुला शय्या सचन्द्रातपा ।
अङ्के कुङ्कुमपिञ्जरा च रमणी पूगं मुखे नूतनं
स्याच्चेत्तद्विधिवञ्चितः स्पृहयति
प्रावारभाराय कः ॥४॥

विरिञ्चेः ।

1365 चूडागर्भनिवेशिदामविकलं मुक्ताफलैर्भूषणैः
Br. V 36 स्त्रीणां कुङ्कुमपिच्छिला स्तनभुवो गूढोदरं मन्दिरम् ।
शार्दूलविक्रीडित द्वित्रास्तूलपटाः प्रसर्पदगुरुग्रामाश्च धूमोद्गमाः
संभोगाय भवन्ति चात्र कृतिनां
दीप्ता विशालाग्नयः ॥५॥

राजशेखरस्य ।

१५९ उच्चावचम् ।

1366 पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
Kuval, p. 185 किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
As 23 इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
शार्दूलविक्रीडित सव्याजं हसितं मया धृतिहरो मुक्तश्च वाष्पस्तया ॥१॥

अमरोः ।

1365 (a) Br. भूषण for भूषणैः.
(b) Br. पिच्छिल. स्तनभरो for पिच्छिलाः......भुवो
(c) Br. स्थूलपटाः for तूलपटा, ०ग्रामश्च धूमोद्गमः for ग्रामाश्च धूमोद्गमाः
(d) Sp विलासाग्नयः (Br. विलासाग्नय) for विशालाग्नय·

1366 (a) Kuval. किमियं for मयि किं.
(d) A, S, As. वाष्पस्तु मुक्तः for मुक्तश्च वाष्पः.

1367 परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे
तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा
स्वभावो वाष्पेण स्तनतटविशीर्णेन कथितः ॥२॥

As. 24
Sv. 1608
Smv. 58. 1
शिखरिणी

तस्यैव ।

1368 गते प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्
न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥३॥

As. 39
Sv. 1141
Spd 3545
Smv. 84.1
Srk. 697
शिखरिणी

तस्यैव ।

1369 श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविरतिः किं कृता किं विनष्टः ।

Sv 2143
As. 52

1367 (c) Sv. पक्ष्मान्तान्त श्लथ for पक्ष्म व्रज
Smv ध्वजपट for व्रजपुट
(d) As., Ed , Sv. प्रसादो for स्वभावो
Sv —anonymous

1368 (a) Sv., Srk. हृदय for प्रणय
A, S, विलुलिते (Sv., ऽपिगलिते) for विगलिते.
(c) Sv. तथा चेवोत्प्रेक्ष्य for तदुत्प्रेक्ष्य, drops second उत्प्रेक्ष्य. Srk. गतास्ते च दिवसा for गता · दिवसान्.
(d) Srk स्फुटति for दलति.
Sv. attributes the verse to विज्जका
Srk.—anonymous.

1369 (a) I. O., S मुग्धया for मूढया.
(b) Sv. विकृति (As. विनति.) for विरति॰, न दृष्टः (also Sv. and As.) for विनष्टः.

नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती

मन्दाक्रान्ता

पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥४॥

तस्यैव ।

1370 यावत्त्वच्चरितं प्रसंगत इव प्रस्तौमि तावत्तया

शार्दूलविक्रीडित

वन्दे तानहमित्युदीर्य शिरसा न्यस्तः प्रणामाञ्जलिः ।

तद्यावच्च रुषेव दोषमपि ते पृच्छामि नाभाष्य मां

निःश्वासैः कियदश्रुभिश्च कियदाख्यातं तवागस्तया ॥५॥

गोतिथीयदिवाकरस्य ।

इति[1] श्रीधरदासकृते सदुक्तिकर्णामृते द्वितीयोस्मिन् ।

मदयतु सहृदय हासं[2] शृङ्गाराख्यः प्रवाहोयम् ॥

इति श्रीमहामाण्डलिकश्रीधरदासकृते[3] सदुक्तिकर्णामृते

शृङ्गारप्रवाहो नाम द्वितीयः ॥ वीचयः १७९ ।

श्लोकाः ८९५ ॥

1369 (c) Sv. वधूश्चेष्टितं for वधूचेष्टितं.

(d) Sv. तरुणे for तरुणी.

Sv.—anonymous.

1370 (b) I. O. शिरसि for शिरसा.

1 I. O, S श्री for इति.

2 S हृदयं for हासम्.

3 I. O. कृतौ for कृते.

चाटुप्रवाहवीचयः* ।

चाटुः संमुखचाटुर्विद्यागुणधर्मरूपमथ दृष्टिः ।
भुजकरचरणं प्रेयोभिधानमत्युक्तिचित्रोक्ती ॥१॥
अपि कार्यगती देशाश्रयौ च दानं दरिद्रभरणं च ।
अतिदानमपि च विक्रमपौरुषशौर्यप्रतापतेजांसि ॥२॥
गजवाजिनावनीकं खड्गोद्धतखड्गकुपितकृपाणौ ।
चापं प्रयाणभोगावलितूर्यस्वानसैनिकरजांसि ॥३॥
अश्वरजोरणधूलिर्युद्धं युद्धस्थली च दिग्विजयः ।
रिपुरिपुनगरी-संभ्रमवैरिवधूवैरियोपिदश्रूणि ॥४॥
अरिनगरवैरिभवने यशसा वीर्यं यशः प्रशस्तयशः ।
कीर्तिः सवीर्यकीर्तिः प्रशस्तकीर्तिश्च कीर्तिगीतिश्च ॥५॥
उच्चावच चतुर्भिर्युतया पञ्चाशताथ वीचीनाम् ।
श्रीधरदासेन कृत कृतिना चाटुप्रवाहोयम् ॥६॥

---

* Omitted in S, I. O.

4 (a) I O, A, S अश्वरजोरण for ०रण A, S दुर्ग for युद्धं.

5 (a) I. O., S प्रशस्ति for प्रशस्त.

(b) S, Sp. प्रशस्ति for प्रशस्त. I. O. प्रशस्तकीर्तिश्च for ०कीर्तिश्च.

१ सामान्यचाट्टुः ।

1371 स्वामिन्नम्बुजनाथ धूर्जटिशिरश्चूडामणे चन्द्रमः
पादौ वां प्रणतोस्मि साधु वदतं क्षत्रप्रसूती युवाम् ।
राजा यद्युपसेविताङ्घ्रिरखिलक्ष्मापालचूडाशतै- शार्दूलविक्रीडित
रासीदस्ति भविष्यति क्षितितले
श्रीभोजदेवोपमः ॥१॥
छित्तिपस्य ।

1372 कालिन्दि ब्रूहि कुम्भोद्भवजलधिरहं
नाम गृह्णासि कस्मा-
च्छत्रोर्मे नर्मदाहं त्वमपि वदसि
मे नाम कस्मात्सपत्न्याः ।
मालिन्यं तर्हि कस्मादनुहरसि मिलत्कज्जलैर्मालवीनां Kuval., p. 87
बाष्पाम्भोभिः किमासां समजनि स्रग्धरा
कुपितः कुन्तलक्षोणिपालः ॥२॥
तस्यैव ।

1373 ....
पाथोदेषु तदाभिघातदिवसादारभ्य नस्ताम्यति ।
नूनं मालवराजदिग्जयविधौ तैः पीतमम्भोनिधे- शार्दूलविक्रीडित
र्माद्यद्गन्धगजस्रवन्मदनदीगन्धानुविद्धं पयः ॥३॥
तस्यैव ।

1371 Ed. छित्तपस्य for छित्तिपस्य.

1372 (c) Kuval. भवसि for हरसि.

(d) Kuval. नेत्र for बाष्प.

1373 (a) I. O. begins the verse with वाचां, but does not give the rest of the line. This portion is corrupt in S. Ed. supplies the lost portion thus in the Errata:—

दस्तोद्दामकरीन्द्रवृन्दशितिमच्छायेषु नीरार्थिषु.

1374 आवाचां व्यक्ततायाः

कविपदविषयेष्वाचचष्टे समन्यो

मुक्तास्माभिर्न कोपि स्मरपदमवनौ संस्तुतः सत्यमेतत् ।

मिथ्यैतद्धोः कथं रे ननु

शतमकृथाः कुन्तलेन्द्रस्य तत्त- स्रग्धरा

त्काव्यस्तोत्राणि धिक्त्वां

जडमय न मनोरेव मूर्तिप्रभेदः ॥४॥

उमापतिधरस्य ।

1375 क्रूरे कद्रु किमात्थ दासि विनते मुक्तास्मि दत्त्वामृतं

तेनानायि सुधा मुधा तृणलिहो

नागास्त्वया वञ्चिता ।

त्वत्पापैर्मुषिताः सुताः शृणु तृणं दत्त्वाद्य यावन्मुखे शार्दूलविक्रीडित

वङ्गक्ष्मापतिसंगरेपि यदमी जीवन्ति भूमीभुजः ॥५॥

आचार्यगोपीकस्य ।

२ संमुखचाटुः ।

1376 पूर्वः कृतात्मनामसि भग्नानां

समिति पश्चिमो द्विषतां । आर्या

त्वं दक्षिणः प्रणमतां तथापि सर्वोत्तरस्त्वमसि ॥१॥

योगेश्वरस्य ।

1377 यस्य द्वीपं धरित्री स च जलधिरभूद्यस्य गण्डूषतोयं

तस्याश्चर्यैकमूर्तेरपि नभसि Srk. 1389

वपुर्यत्र दुर्लक्ष्यमासीत् । स्रग्धरा

तत्पीतं त्वद्यशोभिस्त्रिभुवनमभजंस्तानि विश्रामहेतो-

स्तच्चान्तः कैटभारेः स च

तव हृदये वन्दनीयस्त्वमेव ॥२॥

तथागतदासस्य ।

1374 (a) Sp. विषमैराचचष्टे for विषयेष्वाचचष्टे.

1377 (d) Ed. देव वन्द्य for वन्दनीय. Srk. एक for एव.

Srk. 1387
शिखरिणी

1378 न लोपो वर्णानां न खलु परतः प्रत्ययविधि-
विकारो नास्त्येव क्वचिदपि न भग्नाः प्रकृतयः ।
गुणो वा वृद्धिर्वा सततमुपकाराय जगतां
मुनेर्दाक्षीपुत्रादपि तव समर्थः पदविधि ॥३॥

शब्दार्णवस्य ।

शार्दूलविक्रीडित

1379 त्वं षाड्गुण्यजुषां शिरोमणिरसि त्रैगुण्यमूर्तेरसा-
विन्दुस्तत्र च षोडश त्वयि चतुःषष्टिर्विलन्ते कलाः ।
तस्यैकं ननु मण्डलं तव नव क्ष्मामण्डलीसिद्धय-
स्तेजश्चन्द्रमसो नृचन्द्र भवतश्चैवं दवीयोन्तरम् ॥४॥

लङ्गदत्तस्य ।

शार्दूलविक्रीडित

1380 पीयूषं विषमप्यसूत जलधिः कान्तेः कलङ्कस्य च
स्थानं शीतरुचिः स्वभावकठिनो दाता च कल्पद्रुमः ।
अक्षीणप्रणयामृतस्य कलुषैरस्पृष्टमूर्तेरसं-
क्षितत्यागरसोदयस्य भवतः साम्यं समभ्येतु कः ॥५॥

शरणदेवस्य ।

३ विद्या ।

शार्दूलविक्रीडित

1381 वाचं निष्प्रथयन्ति मेयमखिलं पुष्णन्ति मुष्णन्ति च
प्रज्ञालाञ्छनमद्वयं प्रसुवते सारस्वतः ब्राह्मणः ।
सौभाग्यं दुहते श्रियं विदधति श्वः श्रेयसे तन्वते
भिन्दन्ति भ्रममुक्तयस्तव सतामष्टौ महासिद्धयः ॥१॥

भट्टवामदेवस्य ।

1378 Srk. पाणिने for शब्दार्णवस्य.

1379 (c) A तनु for ननु.

1381 (b) I. O., A, S ब्रह्मणः for ब्राह्मणः.

(c) A, S, Sp. श्रेयसं for श्रेयसे.

1382 जाताः स्मः प्रतिवेशिनः पदविदां
जानन्ति नः श्रोत्रियाः
षट्कर्माध्वनि गच्छतां च विदुषां सार्थे
प्रपन्ना वयम् । शार्दूलविक्रीडित
दृष्टाः स्मः कविविद्यया मुकुलितैर्नेत्रत्रिभागैश्चिरं
किं विद्मः कियदन्यथास्तु
निकषग्रावा भवादृग्जन ॥२॥
विद्यापतेः ।

1383 अग्राह्यं श्रवणस्य भूषणमलंकारो न भावोचितः
कण्ठस्याञ्जनमुज्ज्वलं नयनयोः सूक्ष्मत्वमावेक्षितुम् ।
वक्त्रस्य क्षणिकोधिवासनविधिः कान्ते प्रिये नाभव- शार्दूलविक्रीडित
सौभाग्यप्रतिकर्मनिर्मितमहाविद्यैव येनात्मनः ॥३॥
शुक्लोकस्य ।

1384 कश्चिद्वाचो रचयितुमलं वोढुमेवापरस्ताः
सा कल्याणी मतिरुभयथा विस्मयं नस्तनोति ।
नन्वेकस्मिन्नतिशयवतां सन्निवेशो गुणाना- Srk. 1723
मेकः सूते कनकमनलस्तत्परीक्षाक्षमोन्यः ॥४॥ मन्दाक्रान्ता
कालिदासस्य ।

1385 देवः सर्वविवेचनैकनिपुणो देवः कवित्वे गुरु-
र्देवस्तर्कनिशातनिर्मलमतिः श्रीराजचूडामणिः । शार्दूलविक्रीडित

1382 (b) A, S स्वार्थे (Sp. सर्वे) for सार्थे

1383 (a) I. O अश्रान्तं for अग्राह्यम्. Sp. भारोचित. for भावोचित..
(d) Ed. om. सौभाग्य.

1384 (a) Srk. वाचं for वाचो, श्रोतुं for वोढुम् , ताम् for ताः.
(b) Srk. कल्याणी ते for सा कल्याणी, उभयतो for उभयथा.
(c) Srk. नहि for ननु, सन्निपातो for संनिवेशो
(d) Srk. उपल for अनल.

इत्याकर्ण्य विजृम्भमाणपुलकस्फीता विरिञ्चेर्मुखा-
त्सङ्क्षेष्वद्य सरस्वती कृच्छ्रेण संमास्यति ॥५॥

वसुकल्पस्य ।

४ गुणः ।

1386 आबाल्याधिगमान्मयैव गमितः कोटिं परामुन्नते-
Smv 97.14 / Srk. 1433 / शार्दूलविक्रीडित
रस्मत्संकथनेन पार्थिवसुतः संप्रत्यसौ लज्जते ।
इत्थं खिन्न इवात्ययेन यशसा दत्तोवलम्बोम्बुधे-
र्यातस्तीरतपोवनानि भवतो वृद्धो गुणानां गणः ॥१॥

श्रीहनूमतः ।

1387 सूर्यो धामवतां न किं न किमयं प्रह्लादकश्चन्द्रमा
गम्भीरो न किमम्बुधिः
शार्दूलविक्रीडित
क्षितिभृतां रामः स जेता न किम् ।
किं त्वेकैकगुणस्तुतौ न हि वयं शक्तास्तदेतद्गुण-
श्रोतॄणां सुमहोत्सवाय नृपते त्वामेकमेव स्तुमः ॥२॥

छित्तिपस्य ।

1388 एते शारदकौमुदीकुलभुवः क्षीरोदधेः सोदराः
शार्दूलविक्रीडित
शेषाहेः सुहृदो विनिद्रकुमुदश्रेणीमहःस्राविणः ।

1385 (d) I. O. अन्य for अद्य.

1386 (b) Smv. संकथयापि (Srk. संकथयैव) for संकथनेन, पतिः संप्रत्यहो (Srk. संप्रत्ययं) for सुतः..... सौ.

(c) Smv. रुष्ट for खिन्न. Smv., Srk. आत्मजेन for अत्ययेन.

(d) Smv. पारे for यातः. भजते for भवतो.

Srk.-anonymous.

1387 (a) I O., S धामवत for धामवताम्, प्रह्लादन for प्रह्लादक

(d) I.O. reads ननु bet. श्रोतॄणां and सुमहोत्सवाय.

Ed. छित्तपस्य for छित्तिपस्य,

1388 (b) Ed. सह for महः.

शीतांशोः सहपांशुखेलनसखा· स्वःसिन्धुसंबन्धिनः
प्रालेयाचलबन्धवस्तव गुणाः कैर्नेह कर्णार्पिताः ॥३॥
हरेः ।

1389 देवस्य त्रिपुरारिहासमहसि प्रस्तूयमाने गुणे
प्रीत्या च श्रुतिकौतुकेन च बलादाकृष्यमाणः स्वयम् ।
एकं संनतपक्ष्म पन्नगपतिर्धत्ते सहस्रं दृशा- शार्दूलविक्रीडित
मन्यन्मन्थरतारकाविलुठनादत्यन्तविस्फारितम् ॥४॥
कस्यापि ।

1390 मेरुर्दण्डो यदि च पटलं मेदिनीमण्डलं स्या- मन्दाक्रान्ता
च्छेषः सूत्रं समधरणमप्येष विन्ध्यो महीध्रः ।
तन्माता च त्रिपुरविजयी केशवो वा यदा स्या-
दुन्मीयेत क्षितिपतनय त्वद्गुणानां समूहः ॥५॥
प्रवरसेनस्य ।

५ धर्मः ।

1391 भ्रान्तं येन चतुर्भिरेव चरणै सत्याभिधाने युगे
त्रेतायां त्रिभिरंघ्रिभिः कथमपि Srk. 1455
द्वाभ्यां ततो द्वापरे । शार्दूलविक्रीडित
न स्यास्त्वं यदि देव पङ्गुलगुडः काले कलावुत्कले
सोयं पङ्गुरवस्थितैकचरणो धर्मः कथं भ्राम्यति ॥१॥
कस्यचित् ।

1388 (d) Ed. कर्णोर्पिता. for कर्णार्पिताः

1389 (d) I. O., S विलुठनान्नात्यन्त for विलुठनादत्यन्त

1390 (b) Ed. महीन्द्रः for महीध्रः.

(d) A समुद्र. for समूह .

1391 (c) ZDMG उत्कुले for उत्कले.

Srk.-चित्तूकस्य.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 554.

1392 उच्छन्नेव कलौ वृषस्य चरणश्रेणी नवीनां पुन-

शार्दूलविक्रीडित स्तां निर्माय कृतस्त्वया पुनरपि न्यस्तः पदस्यन्दनः।

भिन्दानैस्तरणि त्वदस्त्रनियतैरेतत्किलोदीरितं

श्रुत्वानूरुरसौ विहाय मिहिरं त्वां देव सेविष्यते ॥२॥

आचार्यगोपीकस्य।

1393 पदैश्चतुर्भिः सुकृते स्थिरीकृते

Nc I. 7 कृतेमुना केन तपः प्रपेदिरे।

वंशस्थविल भुवं यदेकांघ्रिकनिष्ठया स्पृशा-

न्दधावधर्मोपि कृशस्तपस्विताम् ॥३॥

श्रीहर्षस्य।

1394 यूपैरुत्कटकण्टकैरिव मखप्रोद्भूतधूमोद्गमै-

रप्यन्धंकरणौषधैरिव पदे नेत्रे च जातव्यथैः।

शार्दूलविक्रीडित यस्मिन्धर्मपरे प्रशासति तपःसंभेदिनीं मेदिनी-

मास्तामाक्रमितुं विलोकितुमपि व्यक्त न

शक्तः कलिः ॥४॥

जयदेवस्य।

1395 अश्रान्तविश्राणितयज्ञयूप-

स्तम्भावलीर्द्राग्गवलम्बमानः।

इन्द्रवज्रा यस्य स्वभावाद्भुवि संचचार

कालक्रमादेकपदोपि धर्मः ॥५॥

उमापतिधरस्य।

1392 (a) A उच्छन्नैव (I. O. तच्छन्नैव) for उच्छन्नेव

1394 (c) I. O. कर्म for धर्म.

1395 (c) S, I. O यस्यानुभावाद् for यस्य स्वभावाद्.

(d) S कलि for काल.

६ रूपम् ।

1396 श्रीमद्रूपविटङ्कदेव सकलक्ष्मापालचूडामणे
युक्तं संचरणं यदत्र भवतश्चन्द्रेण रात्रावपि ।
मा भूत्त्वद्वदनावलोकनवशाद्व्रीडाविलक्ष शशी
मा भूच्चेयमरुन्धती भगवती दुःशीलताभाजनम् ॥१॥ शार्दूलविक्रीडित

त्रिभुवनसरस्वत्याः ।

1397 आवक्त्रेन्दु तदङ्गमेव सृजतः स्रष्टुः समग्रस्त्विषां
कोषः शोषमगादगाधजगतीशिल्पेपि नाल्पायितः ।
निःशेषद्युतिमण्डलव्ययवशादीषल्लभै (?) स्तत्तनू-
शेषः केशमयः किमन्धतमसस्तोमैरभून्निर्मितः ॥२॥ शार्दूलविक्रीडित

श्रीहर्षस्य ।

1398 एतत्ते मुखमक्षतेन्दुलडहच्छायं भवल्लोचनं
नीलेन्दीवरनिर्विशेषमधरस्ते बन्धुजीवारुण ।
भ्रूवल्लिस्तव कामकार्मुकलता लीलासहाध्यायिनी
न ध्यायन्तु कथं नु देव कथय त्वामेकमेणीदृशः ॥३॥ शार्दूलविक्रीडित

हरेः ।

1399 किं वातेन विलङ्घिता न न महाभूतार्दिता किं न न
श्रान्ता किं न न संनिपातलहरीप्रच्छर्दिता किं न न ।
तत्किं मुह्यति रोदिति श्वसिति च स्मेरं च धत्ते मुखं
दृष्टः किं कथमप्यकारणरिपुः श्रीभोजदेवोनया ॥४॥ Srk 749 शार्दूलविक्रीडित

छित्तपस्य ।

1396 (b) S, I. O. मुक्तं for युक्तम्
(d) A, S तेयं for चेयम्

1399 (b) Srk भ्रान्ता for श्रान्ता. I. O , A, नु न for न न in both the places. Srk प्रच्छादिता for प्रच्छर्दिता.
(c) Srk. transposes मुह्यति and रोदिति, reads किं for first च.
(d) Ed. कथयाम्यकारणरिपुः for कथमप्यकारणरिपुः. Srk. भोज्य for भोज.

1400 रूपासवं तव नृपेन्द्र यदेणनेत्रा
मात्रां व्यतीत्य नयनाञ्जलिभिः पिबन्ति ।
स्वेदच्छलादथ वमन्ति कदम्बकल्पै-
रङ्गैरनङ्गशरजर्जरितैर्भ्रमन्ति ॥५॥

वसन्ततिलक

शंकरदेवस्य ।

७ दृष्टिः ।

1401 जनयति जननाथ दृष्टिरेषा
तव नवनीलसरोरुहाभिरामा ।
प्रणयिषु सुसमाश्रितेषु लक्ष्मी-
मरिषु हि भङ्गमनङ्गमङ्गनासु ॥१॥

पुष्पिताग्रा

विद्यायाः ।

1402 प्रत्यञ्चत्खलरोहणाद्रिषु हठादामूलमुन्मूलय-
·· · कल्पशाखिषु सुधासान्द्राः सुहृन्मण्डले ।
प्रौढारातिचमूवनेषु दहनज्वालावलीभास्वराः
शृङ्गारैकरसायनानि सुभग त्वद्दृष्टिपाताः पुनः ॥·॥

शार्दूलविक्रीडित

माधवस्य ।

1403 यतो यतो नृपवर पद्मपाटलं
विलोचनं चलति तव प्रसीदतः ।
ततस्ततो नलिनवनाधिवासिनी
तदीप्सया किल कमलानुधावति ॥२॥

Srk. 1450
रुचिरा

कस्यचित् ।

1400 (b) I. O., S मात्रा for मात्राम्.

1401 (d, Ed. च for हि, अङ्गनानाम् for अङ्गनासु.

1402 (c) I. O. भासुराः for भास्वराः.

1403 (a) A, S मृगनखयुग्म (I O. नृपनखयुग्म, Srk. नृपनखपृष्ठ) for नृपवर पद्म

Srk.—परमेश्वरस्य.

1404 ते कौपीनधनास्त एव हि परं धात्रीफलं भुञ्जते
तेषां द्वारि नदन्ति
वाजिनिवहास्तैरेव लब्धा क्षितिः । Spd. 1224
Srk. 1410
तैरेतत्समलंकृत निजकुलं किं वा बहु ब्रूमहे शार्दूलविक्रीडित
ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा ॥४॥
जयादित्यस्य ।

1405 तेषां द्वारि द्विरदपतयस्तद्वशा विश्वधात्री
तद्गेहिन्यस्तरलिततुलाकोटिसौधा नटन्ति । मन्दाक्रान्ता
हेमच्छत्रच्छुरितहरितो भूतयस्तान्भजन्ते
येषु प्रीत्या भवति भवतो दृष्टिपातप्रसादः ॥५॥
कस्यचित् ।

८ भुजः ।

1406 वाल्मीकेः कतमोसि कस्त्वमथवा व्यासस्य येनैप भोः
श्लाघ्यः स्यात्तव भोजभूपतिभुजस्तम्भस्तुतावुद्यमः । शार्दूलविक्रीडित
पङ्गु पर्वतमारुरुक्षसि विधुस्पर्शं करेणेहसे
दोर्भ्यां सागरमुत्तितीर्षसि
यदि ब्रूमः किमत्रोत्तरम् ॥१॥
छित्तपस्य ।

1407 अत्युच्चाः परितः स्फुरन्ति
गिरयः स्फारास्तथाम्भोधय- Kp 118
Kuval, p. 183
स्तानेतानपि बिभ्रती किमपि Smv. 97.10
न क्लान्तासि तुभ्यं नमः । शार्दूलविक्रीडित

1404 (d) Spd., Srk. transpose तुष्टेन and रुष्टेन.
Spd.-anonymous.

1406 (b) A, S उद्यत. for उद्यम .

1407 (b) A transposes किमपि and न. Kuval श्रान्ता for क्लान्ता.

आश्चर्येण पुनः पुनः स्तुतिमिमां प्रस्तौमि यावद्भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव
भुजो वाचस्ततो मुद्रिताः ॥२॥
तस्यैव ।

1408 मिथ्या देव भुजेन तैलपविभवः कल्पद्रुमः स्पर्धते
S.k III. 101 नह्येनं भुवनत्रयाभयमहासत्री कृपाणोर्चति ।
शार्दूलविक्रीडित चिन्त्यस्तत्र भवान्सकल्पविटपी यस्यैतदेकार्णवे
कल्पान्ते विनिवेश्य विश्वमखिलं
छायासु शेते हरिः ॥३॥
तस्यैव ।

1409 शैलेन्द्रो दशकन्धरेण तुलितस्तं चार्जुनो हैहयः
काराधाम्नि बबन्ध तस्य च
भुजारण्यं मुनिश्छिन्नवान् ।
शार्दूलविक्रीडित इत्थं ग्रन्थिनिबद्धविक्रमकथासन्देहशल्याकुल-
त्रैलोक्यप्रतिपत्तिचुम्बक-
शिलास्तम्भस्तदीयो भुजः ॥४॥
भिक्षोः ।

(c) Ed., Kuval., Kp. मुहुर्मुहु for पुन. पुन, इति (also Smv.) for इमाम्.

(d) A, I. O. संभ्रमसं for बिभ्रदिमां. Kuval. भुजौ for भुजो
Smv -श्रीहनूमत· for तस्यैव

1408 (b) I O न त्वेनं (Ed. नह्येतं) for नह्येनम्.
S. k. अश्चति for अर्चति

(c) I. O. चिन्त्यस्त्वत्र (S k. तुल्यस्तत्र) for चिन्त्यस्तत्र. S. k. प्रयाग for सकल्प.

(d) S. k. कायान्त. for कल्पान्ते.
A, S. k. शाखासु for छायासु.

1410 प्रेतान्त्रोष्णीषवद्भिर्विकटकरिशिर कर्पराक्रान्तहस्तैः
पार्श्वस्थाभिः प्रियाभिर्मदविकलपदं
यत्तदप्युच्यमानैः। स्रग्धरा
हेलानिर्वारितारे यममुसलपृथुः श्लाघ्यते दक्षिणस्ते
वेतालैः प्रस्तुतासु प्रति-
समरमसृक्पानगोष्ठीषु बाहुः ॥५॥
कस्यचित्।

९ करः।

1411 उद्दण्डकोकनदकोमलकोषकान्ति-
कान्ताकुचग्रहणकण्टकितप्रकोष्ठ। Smv. 97.50 वसन्ततिलक
मित्रद्विजातिरिपुबन्धुषु कामिनीषु
संमानदानभयभोगकरः करस्ते ॥१॥
विद्यायाः।

1412 निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटावट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायं करः। Nc. XII.66 शार्दूलविक्रीडित
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरङ्गक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशः
क्षौणीजबीजव्रजम् ॥२॥
श्रीहर्षस्य।

1413 अस्माभिः स्मयलोलमौलिफलकैर्मुक्ताविसाराधिपं
वेदोद्धारपरः करस्तव परं दानाम्बुपूतः स्तुतः।
किंतु क्ष्मातिलक क्षमस्व शार्दूलविक्रीडित
कविभिः किं नाम नालोक्यते
दृष्टः स्पष्टतरं तवापि निभृतः पाणौ स वैसारिणः ॥३॥
आचार्यगोपीकस्य।

1411 (c) Smv. वर्गविलासिनीना for बन्धुषु कामिनीषु.
1412 (c) A, I. O. त्वग (?) for क्षुर.
(d) Ed. क्षौणीश for क्षौणीज. A व्रतम् for व्रजम्.
1413 (d) Ed. स्पष्टतया for स्पष्टतरं.

1414 तेषामल्पतरः स कल्पविटपी तेषां न चिन्तामणि-
श्चिन्तामप्युपयाति कामसुरभि-
शार्दूलविक्रीडित स्तेषां न कामास्पदम्।
दीनोद्धारधुरीणपुण्यचरितो येषां प्रसन्नो मना-
क्पाणिस्ते धरणीन्द्र सुन्दरयशः-
संरक्षिणो दक्षिणः ॥४॥
जयदेवस्य।

1415 देव त्वत्करपल्लवो विजयतामश्रान्तविश्राणन-
शार्दूलविक्रीडित क्रीडास्कन्दितकल्पवृक्षविभव कीर्तिप्रसूनोज्ज्वलः।
यस्योत्सर्गजलच्छलेन गलिताः स्यन्दानदानोदक-
स्रोतोभिर्विदुषां ललाटलिखिता दैन्याक्षरश्रेणयः ॥५॥
तस्यैव।

१० चरणः।

1416 लक्ष्मीवशीकरणचूर्णसहोदराणि
Sk. V. 467 त्वत्पादपङ्कजरजांसि चिरं जयन्ति।
Srk 1391 यानि प्रणाममिलितानि नृणां ललाटे
वसन्ततिलक लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥१॥
अभिनन्दस्य।

Srk. 1416 1417 लक्ष्मीसद्मसरोजरेणुसुहृदः सेवावनम्रीभव-
शार्दूलविक्रीडित द्भूमीपालकिरीटरत्नकिरणज्योत्स्नानदीवालुकाः।

1415 (c) Ed. तिल for जल.
1416 (a) A, S चूर्णि for चूर्ण.
1417 (a) I. O. हृदय· for सुहृदः.
(b) Srk. बालिका· for वालुका·.

जीयासुः कलिकालकर्णनृपते दारिद्र्यदारूदर-
व्याघूर्णद्द्रूणवृन्दलङ्घनमुषस्त्वत्पादयोः पांशव ॥२॥
वल्लणस्य ।

1418 देवस्याघ्रिनखप्रभासु निजया मौलीन्द्रनीलत्विषा
निर्माय त्रिदशापगायमुनयोः संभेदमत्यद्भुतम् । शार्दूलविक्रीडित
वन्द्य त्वत्पदवन्दनान्यघमिलद्दुष्कर्मनिर्मज्जन-
प्रायश्चित्तमिवाचरन्नरपति को नाम नो पुप्लुवे ॥३॥
प्रशस्तस्य ।

1419 लक्ष्मीविभ्रमसद्मसुभगं के नाम नोर्वीभुजो
देव त्वच्चरणं व्रजन्ति शरणं श्रीरक्षणाकांक्षिणः ।
छायायामनुगम्य सम्यगभयास्त्वद्वीर्यसूर्यातप- शार्दूलविक्रीडित
व्यासामप्यवनीमटन्ति रिपवस्त्यक्तातपत्राः
सुखम् ॥४॥
जयदेवस्य ।

1420 आ पूर्वस्माद्विडौजःकरिवमथुपयः-
सिक्तसानोर्गिरीन्द्रा-
दा च प्रत्यक्पयोधेर्वरुणवरवधूनाभिनिष्पीतवारः ।
आमेरोरा च सेतोरवनितलमिलन्मौलिविस्रंसमान- स्रग्धरा
स्रग्दामानो यदीयं चरणमशरणाः
पर्युपासन्नरेन्द्राः ॥५॥
वसुकल्पस्य ।

1417 (c) Srk. कजगत् for नृपते I. O., A दारूदरे for ०र.
(d) Srk. चूर्णलङ्घिमजुष॰ for वृन्दलङ्घनमुष..
Srk. changes the order of lines as c d a b.

1419 (b) I. O जयन्ति for व्रजन्ति
(c) A यत् छायाम् for छायायाम्
(d) Sp. कथम् for सुखम्.

११ प्रियाख्यानम् ।+

1421 सौजन्याम्बुनिधे बुधप्रिय गुणप्राकारधर्मद्रुम-
प्रारोहप्रतिपन्नवत्सलमहात्यागिन् विवेकाश्रय ।
लक्ष्म्यावासमनस्विनी मनसिजव्यापारदीक्षागुरो
स्वामिन्मुञ्च किमित्यमुं जनमुपस्प्रष्टुं
दृशा नार्हसि ॥१॥
भोजदेवस्य ।

Sk. I. 86
शार्दूलविक्रीडित

1422 सौजन्याङ्कुरकन्दसुन्दरकथासर्वस्व सीमन्तिनी-
चित्ताकर्षणमन्त्रमन्मथसुहृत्कल्लोलवाग्वल्लभ ।
सौभाग्यैकनिवेश पेशलगिरामाधार धैर्याम्बुधे
धर्माद्रिद्रुम राजशेखरकवे दृष्टोसि यामो वयम् ॥२॥
अभिनन्दस्य ।

Srk. 1714
शार्दूलविक्रीडित

1423 संकल्पेङ्कुरितं द्विपल्लितमथ प्रस्थानवेलागमे
मार्गे पल्लवितं पुरं प्रविशतः शाखाशतैरुद्गतम् ।
भ्रातर्भाविनि दर्शने मुकुलितं दृष्टे तु देवे त्वयि
प्रोत्फुल्लं फलितं च संप्रति मनोराज्यद्रुमेणाद्य मे ॥३॥
छित्तपस्य ।

Srk. 1435
शार्दूलविक्रीडित

1424 द्वीन्द्रं भाति जगत्त्रिधाम गगनं विश्वं चतुर्दैवतं
पञ्चाम्नायमिदं च वाङ्मयमयं षट्सायको मन्मथः ।

शार्दूलविक्रीडित

+ Ed. प्रियाव्याख्यानम्.

1422 (b) Srk. सरित् for सुहृत्.
(d) Srk. सखे for कवे.
Srk —anonymous.

1423 (c) Srk. प्रात· for भ्रातः Ed. तदेव for तु देवे Srk. देव for देवे.
(d) I. O. वाह्य for राज्य.
Srk.—anonymous.

सप्तांशः परिवत्सरोष्ट जलधिस्फारं धरामण्डलं
दिक्चक्रं नवनायकं क्षितिपतिश्रेष्ठ त्वयि भ्राजति ॥४॥
तस्यैव ।

1425 लक्ष्मीकेलिभुजङ्ग जङ्गमहरे सकल्पकल्पद्रुम
श्रेयःसाधकसङ्ग सङ्गरकलागाङ्गेय वङ्गप्रिय ।
गौडेन्द्रप्रतिराजराजकसभालंकारकर्णार्पित-
प्रत्यर्थिक्षितिपाल पालक सतां दृष्टोसि
तुष्टा वयम् ॥५॥ शार्दूलविक्रीडित
जयदेवस्य ।

१२ अत्युक्तिः ।

1426 मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमं
चक्राङ्क वह पादपद्मवनिं दोष्णा समभ्युद्धर । Sk I 90
लक्ष्मीं भ्रू निकटे निवेशय भव ज्यायान्दिवौकस्पते- Smv 97 6
र्विश्वान्तःकरणैकचौर तदपि ज्ञातो शार्दूलविक्रीडित
हरिः खल्वसि ॥१॥
छित्तपस्य ।

1427 हंसज्योत्स्नाकुमुदविशदे सैकतेस्मिन्सरय्वा
वादद्यूतं चिरतरमभूत्सिद्धयूनो कयोश्चित् । मन्दाक्रान्ता
एको ब्रूते प्रथमनिहतं कैटभं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ॥२॥
तस्यैव ।

1424 (d) S भास्वति (I O त्वातरि) for भ्राजति
1425 (b) I. O. रङ्ग for वङ्ग
1426 (b) Smv. युग्म for पद्म
Smv चित्तपस्य for छित्तपस्य.
1427 (b) A सुचिरमभवत् for चिरतरमभूत्.
(d) A सत्यं for तत्त्वम्.

1428 हस्ते कल्पतरुं मुखे हिमकरं बाह्वोरनन्ताह्वयं
रोषे तत्किल कालकूटगरलं तोषे हरिप्रेयसीम् ।
ओजस्यावृणु नाम वाडवमिमामुद्धाट्य मर्यादितां
घोपोयं तव नीरधे वनपते लक्ष्मावतारे श्रमः ॥३॥

शार्दूलविक्रीडित

मदिन्नस्य ।

1429 उन्निद्रेण मयाद्य चिन्तितमभूद्यन्नावतारा हरे-
राख्याता दश कीर्तितोसि न कथं तत्र त्वमेकादशः ।
त्वच्चारित्रमगोचरं कविगिरां जानन्नपि क्ष्मापते
न प्रस्तौमि भयेन भारतकवे कस्तादृशं वक्ष्यति ॥४॥

शार्दूलविक्रीडित

आचार्यगोपीकस्य ।

1430 भूत्या रञ्जय विश्वमुद्वह नखच्छन्नार्धचन्द्रं पदं
दृष्टिं धेहि हृदि स्फुट भव वृषाधारो द्विजिह्वं त्यज ।
संक्रुद्धो दह विद्विषां पुरशतं दुर्गानुरागोज्झित
क्षोणीनाथ तथाप्युदारचरितैर्ज्ञातो भवानीश्वरः ॥५॥

शार्दूलविक्रीडित

वसन्तदेवस्य ।

१२ चित्रोक्तिः ।

1431 सन्तः कण्टकिताः कथं यदि कृता निष्कण्टका मेदिनी
प्रख्याता यदि ते गुणाः कथमथ प्रस्तौति दोषं जनः ।
नीतावाद्यधुरंधरो यदि भवान्कस्मादनीतिः प्रजा
वृत्तं देव न चित्रमेव हि न चेच्चित्रं विधत्ते कथम् ॥१॥

शार्दूलविक्रीडित

समन्तभद्रस्य ।

1428 (d) Ed. नव for तव
1429 (b) A व्याख्याता for आख्याता.
(c) I. O स्वच्छाविक्रमगोचर॰ for त्वच्चा . चरम्.
1431 (b) I. O. असौ for अथ.

1432 क्षौणीन्द्र त्यजति क्षमां त्वयि रणे दोःशालिनोप्यक्षमाः
प्रत्यर्थिष्वथ कम्पमानतनुषु त्वं चापि कम्पाकुलः । शार्दूलविक्रीडित
त्वं गृह्णासि भुवः करं मृगदृशामेतेपि च स्वर्भुवां
तेभ्यस्तेभ्यधिकं नु किं गुणिभिरप्युद्गीयते
यद्भवान् ॥२॥
धोयीकस्य ।

1433 एकस्त्रिधा हृदि सदा वससीति चित्रं
यो विद्विषां च विदुषां च मृगीदृशां च । Srk. 1438
तापं च संमदरसं च रतिं च तन्वन् वसन्ततिलक
शौर्योष्मणा च विनयेन च लीलया च ॥३॥
श्रीहनूमतः ।

1434 त्व द्वित्राणि पदानि गच्छसि महीमुल्लङ्घ्य यान्ति द्विप-
स्त्वं बाणान्दश पञ्च मुञ्चसि बहून्यस्त्राणि मुञ्चन्ति ते । Sv 2516
ते देवीपतयस्तवासिनिहतास्त्वं मानुषीणां पति- शार्दूलविक्रीडित
स्ते निन्द्यास्तव वर्णनं कथमिति श्रीकर्ण
निर्णीयताम् ॥४॥
विद्यापतेः ।

1435 कर्णः सर्वशिरोगतस्त्रिभुवने कर्णेन किं न श्रुतं
विश्राम्यन्ति मृगीदृशामपि दृशः कर्णेन चित्रं क्वचित् । शार्दूलविक्राडित

1432 (b) I O चात्म (Sp , A चानु) for चापि.

1433 (a) Srk. स्म for इति.

(c) Ed., S भर for रस and पुष्णन् for तन्वन्.

Srk —anonymous.

1434 (b) Sv. निजान्मुञ्चन्ति शस्त्राणि ते for बहून्य ते. Ed. ०न्यस्त्रापि for ०न्यस्त्राणि.

(c) Sv त्वदस्त्र (A, I O. त्वयासि) for तवासि.

(d) Sv. निन्दा तेषु कथं स्तुतिस्त्वयि कथं for ते इति

Sv. कस्यचिद्दाक्षिणात्यस्य for विद्यापते .

आश्चर्यं पुनरेतदेव यदयं निश्छिद्रसन्मण्डलः
सप्ताम्भोनिधिमेखलां वसुमतीं धत्ते जगन्मण्डनः ॥५॥

कस्यापि ।

१४ कार्यगर्वः ।+

1436 पृथुरसि गुणैः कीर्त्या रामो नलो भरतो भवा-
न्महति समरे शत्रुघ्नस्त्वं सदैव युधिष्ठिरः ।
इति सुचरितैर्बिभ्रद्रूपं चिरन्तनभूभृतां
कथमसि न मान्धाता देव त्रिलोकविधाय्यपि ॥१॥

Sv. 2502
Srk. 1417
हरिणी

वीर्यमित्रस्य ।

1437 त्वं चेन्नाथ कलानिधिः शशधरस्तत्तोयनाथा वय
मर्यादानिधिरम्भसां पतिरथ त्वं चेद्वयं वारिदाः ।
सर्वाशापरिपूरको जलधरस्त्वं चेद्वयं भूरुह
सन्मार्गस्थितिविश्रुतस्त्वमिति चेच्छाखी वयं
चाध्वगाः ॥२॥

Srk 1392
शार्दूलविक्रीडित

कस्यचित् ।

1438 लभ्यन्ते यदि वाञ्छितानि यमुनाभागीरथीसंगमे
देव प्रेष्यजनस्तवैव भवतो भर्तव्यतां वाञ्छति ।

\+ S, A, I. O. कार्यगर्भ- ।

1436 (b) Sv. क्षितौ जनक· स्थितः for सदैव युधिष्ठिर
(c) Sv. कीर्तिं बिभ्रत् for बिभ्रद्रूपं. Srk. भुभुजा for भूभृता
(d) A, I O, Sv. अपि for असि Srk. विजयी for विधायी.
A, Sv., Srk.—anonymous.

1437 (d) Srk. सुन्दरस्त्वमिह for विश्रुतस्त्वमिति.
A drops the verse.
Srk. attributes the verse to दक्ष.

1438 (b) I. O.तदैव (S. k. तदेष) for तवैव.

नन्वेतन्मरणान्न किं नु मरणं कायान्मनोविच्युति-
दीर्घं जीव मनस्त्वदङ्घ्रिकमले कायोत्र नः
केवलम् ॥३॥ Sk. II 356 शार्दूलविक्रीडित
छित्तपस्य ।

1439 सेव्यश्चिन्तामणिर्वा सुरतरुरथवा रोहणो वा गिरीणां
भर्ता वा जातकोपे त्वयि निखिल-
महादाननिर्व्याजवीरे ।
एकश्चैतन्यशून्यस्त्यजति कठिनतां नापरश्छेदखेदं
धत्तेन्यः किंनराणामधिपतिरपरः
कस्त्वयाभ्यर्थनीय ॥४॥ स्रग्धरा
शरणस्य ।

1440 प्रीतस्त्वं वेदवादैर्मम तु निरवधिर्नाथ निर्वेदवादः
साकूतस्त्वं कलासु प्रतिदिनविकला वृत्तिरेका ममैव ।
साध्यस्त्वं भावशुद्ध्या मम तु
विजयते कोप्यभावस्तदित्थं
लीलारामो गुणानां मम
विगुणनिधेः कैरुपायैरुपास्यः ॥५॥ स्रग्धरा
तस्यैव ।

१५ देशाश्रयः ।

1441 भूपालाः शशिभास्करान्वयभुवः के नाम नासादिता
भर्तारं पुनरेकमेव हि भुवस्त्वामेव मन्यामहे ।

1438 (c) Sk. मरणेन (Sp मरणात्तु) for मरणान्न
(d) Sk. ०स्त्वदङ्घ्रि for ०स्त्वदङ्घ्रि, तिष्ठति for केवलम्.
1439 (a) A, I. O , Sp. निधीना for गिरीणाम्
1440 (d) A. I O विधेः for निधेः
1441 (a) I. O. भास्करोदय for भास्करान्वय
(b) Sv त्वा देव for त्वामेव

येनाङ्गं परिमृद्य कुन्तलमपाकृष्य व्युदस्यायत
Sv. 2515 चोलं प्राप्य च मध्यदेशमचिरात्काञ्च्यां करः
शार्दूलविक्रीडित
पातितः ॥१॥
विद्यायाः ।

1442 हेलानिर्जितकामरूप सहसा कृत्वाकुलान्कुन्तलां-
श्चोलध्वंसनमङ्गमर्दनमपि द्रागेव सपाद्यते ।
शार्दूलविक्रीडित निर्जित्यैव च मध्यदेशमचिरात्काञ्च्यां करः पातितो
नीत्वैव वशतां प्रियेण भवताभीकेन भूर्भुज्यते ॥२॥
शब्दार्णवस्य ।

1443 देव त्वं किल कुन्तलग्रहरुचिः काञ्चीमपासारयन्
क्षिप्तः क्षिप्तकरग्रहः प्रहणनं प्रारब्धमङ्गेष्वपि ।
Srk 1430 इत्याकूतजुपस्तव स्तवकृता वैतालिकेनोदिते
शार्दूलविक्रीडित लज्जन्ते प्रमदाः परस्परमभिप्रेक्ष्यारयो बिभ्यति ॥३॥
कस्यचित् ।

1444 भ्रूक्षेपाद्गौडलक्ष्मीं जयति विजयते
केलिमात्रात्कलिङ्गां-
श्चेतश्चेदिक्षितीन्द्रोस्तपति वितपते सूर्यवद्दुर्जनेष ।
स्रग्धरा स्वेच्छाम्लेच्छान्विनाशं नयति विनयते कामरूपाभि-
मानं
काशीभर्तुः प्रकाश हरति विहरते मूर्ध्नि यो
मागधस्य ॥४॥
शरणदेवस्य ।

1441 (c) Sv. परिमृष्य for ०मृद्य, अथाकृष्य for अपाकृष्य.
(d) Sv. अधुना for अचिरात्.
Sv. मयूरस्य for विद्यायाः.
1443 (b) Srk. ततः for ग्रह..
1444 (d) A, I. O. विकाशं for प्रकाशम्.

1445 त्वं चोलोल्लोललीलां कलयसि
कुरुषे कर्षणं कुन्तलानां
त्वं काञ्चिन्यञ्चनाय प्रभवसि रभसादङ्गसङ्गं करोषि । स्रग्धरा
इत्थं राजेन्द्र वन्दिस्तुतिभिरुपहितोत्कम्पमेवाद्य
दीर्घं
नारीणामप्यरीणां हृदयमुदयते त्वत्पदारा-
धनाय ॥५॥
जयदेवस्य ।

१६ दानम् ।

1446 कतिषु न कृता सेवा के वा न वाग्विभवैः स्तुता-
स्तृणमपि गुणप्रीतः प्रादान्न कोपि विपश्चिताम् । हरिणी
अयमिह परं दुःखज्वालाकलापमखण्डय-
त्कनकपयसां धारादण्डैरकाण्डघनाघनः ॥१॥
सिल्हनस्य ।

1447 पूर्णाग्रे कलसो विलासवनिता स्मेराननं कन्यका
दानक्लिन्नकपोलपद्धतिरिभो गौरद्युतिर्गौर्वृषः । Srk. 1449
क्षीरिक्ष्मारुहि वायसो मधुरवाग्वामा शिवेति ध्रुवं शार्दूलविक्रीडित
त्वां प्रत्युच्चलतां नरेन्द्रतिलक प्रादुर्भवन्त्यर्थिनाम् ॥२॥
परमेश्वरस्य ।

1448 विस्तीर्णः परिपन्थिकण्टकशतास्तीर्णो दुरध्वान्तरः
क्रूरश्वापदकोटिसंकटशिला शैलाटवी लङ्घिता ।
प्राप्ता त्वत्कटकोपकण्ठतटिनी दत्तो निवापाञ्जलि- शार्दूलविक्रीडित
र्दारिद्र्याय नकारमूकनृपते दृष्टोसि तुष्टा वयम् ॥३॥
राजोकस्य ।

1446 Ed. बिह्लणस्य for सिल्हनस्य

1447 (a) S पूर्णो य for पूर्णाग्रे. Srk. वनिता for बनिता. स्मेरानना. for ॰ननं.

(c) Srk. क्षीर for क्षीरि.

1449 वासः स्वर्णगृहेषु सख्यममरैः कल्पद्रुमाणां वने
क्रीडा स्वर्गवधूगणैः सह सुधाकण्ठं मुदा पीयते ।
शार्दूलविक्रीडित — रुष्टेनेदमकारि देव भवता हत्वा रणे वैरिणां
तुष्टः प्रेष्यजनाय वेद्मि न परं गौडेन्द्र किं दास्यसि ॥४॥

धर्मयोगेश्वरस्य ।

1450 त्वन्नेत्रेपि तवाननेपि भवतः पाणावपि त्वत्पदे-
प्यस्ति स्मेरसरोजसौहृदसमाकृष्टैव पद्मालया ।
शार्दूलविक्रीडित — यन्नीता निजभावमर्थिभिरसौ त्वद्दृष्टिपातैस्त्वदा-
देशात्त्वत्करविभ्रमैरपि भवत्पादप्रसादादपि ॥५॥

शरणस्य ।

१७ दरिद्रभरणम् ।

1451 येषां वेश्मसु कम्बुकर्परचलत्तर्कुध्वनिर्दुःश्रवः
Srk. 1394 — प्रागासीन्नरनाथ संप्रति पुनस्तेषां तवानुग्रहात् ।
शार्दूलविक्रीडित — षड्जादिक्रमरङ्गदङ्गुलिचलत्पाणिस्खलत्कङ्कण-
श्रेणीनिस्वनमांसलः कलगिरां वीणारवः श्रूयते ।१॥

भासोकस्य ।

1452 कार्पासास्थिप्रचयनिचिता निर्धनश्रोत्रियाणां
Srk. 1390 — येषां वात्याप्रविततकुटीप्राङ्गणान्ता बभूवुः ।
मन्दाक्रान्ता — तत्सौधानां परिसरभुवि त्वत्प्रसादादिदानीं
क्रीडायुद्धच्छिदुरयुवतीहारमुक्ताः पतन्ति ॥२॥

शुभाङ्कस्य ।

1453 बालास्तालमहीरुहो घनदलस्निग्धा गृहप्राङ्गणे
सूक्ष्मेभ्यस्तव संदिशन्ति सुचिरं जीव प्रसन्ने त्वयि ।

1451 (a) Ed., I. O. वेश्मनि for वेश्मसु

Srk.—anonymous.

1452 S, I. O., Srk. शुभाङ्गस्य for शुभाङ्कस्य

कर्णालंकृतकेन कोमलदल मुञ्चन्ति नो निर्दया
निःस्वश्रोत्रियवल्लभाः श्रुतियुगे
हैमस्फुरत्कुण्डलाः ॥३॥ शार्दूलविक्रीडित
उमापतेः ।

1454 उच्छिद्राणि दिगम्बरस्य वसनान्यर्धाङ्गनास्वामिनो
रत्नालङ्कृतिभिर्विशोपितवपुःशोभाशतं सुभ्रुवः ।
पौराढ्याश्च पुरीः श्मशानवसतेर्भिक्षाभुजोप्यक्षमा शार्दूलविक्रीडित
लक्ष्मीं न व्यतनोद्दरिद्रभरणेष्वज्ञो हि सेनान्वयः ॥४॥
उमापतिधरस्य ।

1455 मुक्ताः कार्पासवीजैर्मरकतशकल शाकपत्रैरलाबू-
पुष्पैरूप्याणि रत्न परिणतिभिदुरैः
कुक्षिभिर्दाडिमीनाम् ।
कूष्माण्डीवल्लरीणां विकसितकुसुमैः स्रग्धरा
काञ्चनं नागरीभिः
शिक्ष्यन्ते त्वत्प्रसादाद्बहुविभवजुषां
योषित श्रोत्रियाणाम् ॥५॥
तस्यैव ।

१८ अतिदानम् ।

1456 कूजत्कोकिलकाकलीश्रुतिसुखो निद्राति कल्पद्रुम- शार्दूलविक्रीडित
स्तृप्ता बालतृणेन कामसुरभी रोमन्थमभ्यस्यति ।

1453 (c) I. O लुञ्चन्ति for मुञ्चन्ति.
1454 (a) I. O उच्चिन्नाणि for उच्छिद्राणि.
(c) Sp. अच्यमा for अच्यमा
(d) Sp. व्यतनो र्दरिद्र for व्यतनोद्दरिद्र
1455 (a) S, A, मुक्ता for मुक्ता .

दातुं नाथ सदा समीहितफलं लग्नोसि नेत्रेर्थिनां
बद्धस्तर्हि चिराय रोहणगिरेष्टङ्कव्रणेरङ्कुरः ॥१॥

कामदेवस्य ।

1457 अर्थिभ्रंशवहूभवत्फलभरव्याजेन कुब्जायितः
Nc. XII 67 सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।
Sv. 2517 आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथ याचक-
शार्दूलविक्रीडित श्रेणीवर्जनदुर्यशोनिबिडितव्रीडस्तु रत्नाचलः ॥२॥

श्रीहर्षस्य ।

1458 जाने विक्रमवर्धन त्वयि धनं विश्राणयत्यर्थिनां
भावी शोण इवोपलैरुपचितो रत्नैरगाधोम्बुधिः ।
Srk. 1437 उत्पश्यामि च रोहणैर्मणिभरैर्वाष्पायमाणोदरः
शार्दूलविक्रीडित पाकोत्पीडितदाडिमीफलदशां कैश्चिद्दिनैर्यास्यति ॥३॥

डिम्बोकस्य ।

1459 भ्रातश्चक्र व्यपनय शुचं प्रेयसीविप्रयोगा-
दाधिव्याधिर्न खलु रजनौ प्राप्य भावो पुनस्ते ।
मन्दाक्रान्ता दानैर्नान्यः कलय कुरुते कांचनाद्रेः समाप्ति-
र्भाविन्यस्मद्दिनकतिपयैर्वासराद्वैतसिद्धिः ॥४॥

सागरस्य ।

1460 अन्विष्यद्भिरयं चिरात्कथमपि प्रार्थ्येत यद्यर्थिभि-
शार्दूलविक्रीडित र्नाथ त्वं पुनरर्थिनः प्रतिदिनं यत्नात्समन्विष्यसि ।

1456 Quoted by Aufrecht in ZDMG, 36, p. 530

1457 (b) Sv देव त्वय्यति for सत्यस्मिन्नति

1458 (c) Srk तत् for उत्. Sp., Srk. रोहणो for रोहणै Ed., Srk. आध्मायमानोदरः for वाष्पायमाणोदर.

(d) Srk. दशा for दशां.

Srk.—anonymous.

1460 (a) Ed., प्राप्येत for प्रार्थ्येत.

(b) Ed. समन्विष्यति for ०सि.

प्राप्तौ चिन्तितमात्रकं ददद्सौ चिन्तातिरिक्तप्रदं
त्वामालोक्य विदीर्यते यदि
न तद्ग्रावैव चिन्तामणिः ॥५॥
छित्तपस्य ।

१९ विक्रमः ।

1461 देवे निर्भरसाहसैकरसिके निःशङ्कवीरेऽधुना
निःसीमप्रसरे निरङ्कुशमतौ ज्ञाते मनाङ् निर्दये । शार्दूलविक्रीडित
निःसंपत्ति निरायुधं निरशनं निर्भूमि निःसैनिकं
निस्तेजश्च निराश्रयं च निखिल तद्राजकं वर्तते ॥१॥
वसुकल्पस्य ।

1462 मत्पर्यन्तवसुन्धराविजयिने मुक्तादिरत्नं मया- Srk. 1397
त्वय्यं ढौकितमेव सोहमधुना जातोस्मि निष्किञ्चनः । शार्दूलविक्रीडित
इत्युल्लासितबाहुवीचिरुदयान्मार्तण्डबिम्बच्छला-
त्प्रातस्तप्तकुठारमेष वहते देव त्वदग्रेऽम्बुधिः ॥२॥
कस्यापि ।

1463 शस्त्रैः शत्रुशिरोधितक्षण-
कलातीक्ष्णोज्ज्वलैः किंतरा-
मद्यापि क्षितिपाललक्षणधरौ क्लिश्नासि कान्तौ करौ । शार्दूलविक्रीडित
तादृक्क्रूरकटाक्षवीक्षणमिलन्मौर्वीकमुर्वीतले
सोढा कस्तव देव कोपकुटिलं भ्रूकार्मुकं भूपतिः ॥३॥
करञ्जयोगेश्वरस्य ।

1460 (d) I. O., S tianspose यदि and न.

1462 (b) Srk. तुभ्यम् for सोहम्.

(c) A, I. O. Srk. transpose बाहु and वीचि.

(d) Ed. प्राप्त for प्रात.

Srk. वसुकल्पस्य.

1463 (a) A, S स्रस्तै स्रस्त for शस्त्रैः. शत्रु.

(b) A, S क्लिष्टासि for क्लिश्नासि.

(d) Ed. विशिखं for कुटिलम्.

1464 यद्यङ्केषु कराः शत प्रतिकर यद्यङ्गुलीनां शतं
प्रत्येकं यदि पर्वसंधिषु भवन्त्येतासु रेखाः शतम् ।
शार्दूलविक्रीडित
शक्यन्ते निपुणैस्तदा गणयितुं येन स्वदोर्विक्रमै-
रुत्खाताः कति रोपिताः कति
कति व्यापादिता क्ष्माभुजः ॥४॥
वामदेवस्य ।

1465 शिक्षन्ते चाटुवादान्विदधति यवसानानने काननेषु
भ्राम्यन्ति ज्याकिणाङ्कं
विदधति शिविरं कुर्वते पर्वतेषु ।
स्रग्धरा
अभ्यस्यन्ति प्रणामं त्वयि
चलति चमूचक्रविक्रान्तिभाजि
प्राणत्राणाय देव त्वदरिनृपतयश्चक्रिरे कार्मणानि ॥५॥
जयदेवस्य ।

२० पौरुषम् ।

1466 समाजे सम्राजां सदसि विदुषां धाम्नि धनिनां
निकाये नीचानामपि च रमणीनां परिषदि ।
शिखरिणी
कथंचिद्यत्र स्मः क्षणमतिथयस्तत्र शृणुमः
स्फुरद्रोमोद्भेदा सुभग भवतः पौरुषकथाः ॥१॥
छित्तपस्य ।

1467 दैवेन त्वदरेस्तवापि सदृशी प्रायः पराजेष्यते
नान्येनेति किल द्वयोरपि लिपिर्न्यस्ता ललाटे ध्रुवम् ।
शार्दूलविक्रीडित
भूयानर्थकृतस्तु संप्रति तयोर्भेदोयमुन्मीलति
स्थाने पौरुषमाश्रयन्ति कृतिनो दैवे निरस्यादरम् ॥२॥
लङ्गदत्तस्य ।

1465 (a) I. O. शिक्ष्यन्ते for शिक्षन्ते
(c) I. O. विभ्रान्ति for विक्रान्ति
1467 (c) Ed. भेदः समुन्मीलति for भेदोयमुन्मीलति

1468 बाहू द्वाविदमेकमेव भुवनं कस्तत्र वीरो रसः
साम्राज्यस्य च पूर्वपूरुषभुजक्षुण्णस्य किं न प्रियम् । शार्दूलविक्रीडित
इत्यूर्जस्वलपौरुषस्य पुरुषप्रायं जगत्पश्यतो
यस्यात्मापि न मानिनो बहुमतः कुत्रेतरे क्षत्रियाः ॥३॥

गुङ्गोकस्य ।

1469 गन्धेभस्कन्धकण्डूमदगुरुमरुदुल्लोललौहित्यखेल
द्वीचीवाचालकालाचलरिपुशशिना
केलितल्पे निषण्णाः ।
कामिन्यः सैनिकानां विधुतविधुरताभीतयो स्रग्धरा
गीतबन्धै-
र्यस्य प्राग्ज्योतिषेन्द्रप्रणतिपरिगतं
पौरुषं प्रस्तुवन्ति ॥४।

उमापतिधरस्य ।

1470 भीष्मः क्लीवकृतां दधार समिति द्रोणेन मुक्तं धनु-
र्मिथ्या धर्मसुतेन जल्पितमभूद् दुर्योधनो दुर्मदः ।
छिद्रेष्वेव धनंजयस्य विजयः कर्णः प्रमादी ततः शार्दूलविक्रीडित
श्रीमन्नस्ति न भार्गवेपि भवतो यः पौरुषैर्वर्धते ॥५॥

जयदेवस्य ।

२१ शौर्यम् ।

1471 व्यायामोचितबाहुसाहसवशादेकोपि कोपोत्कटं
वक्षस्युत्कटसोढसायकभरो भिन्दन्बहून्विद्विषः । शार्दूलविक्रीडित
त्वं यस्मादपशरत एव समिति त्रस्तो न शस्त्रक्षतै-
स्तेनैवायशसः परिग्रहममी मुक्तायुधा कुर्वते ॥१॥

कमलगुप्तस्य ।

1469 (b) I O विपुलशिला for रिपुशशिना
(c) Ed. बद्धै for बन्धै.
(d) Ed. र्यत्र for र्यस्य
1471 (c) I. O. क्षते for क्षतै.
(d) I. O. तेनैवापयशसः for स्ते०.

1472 अथ सेनोत्तंसः करकृतकृपाणो रणभुवि
शिखरिणी द्विषद्भूमीपालाः किमपसरत प्राणकृपणाः।
किमभ्यर्थ्यः पृथ्वीधरकुहरवासोद्य भवतां
न किं दृष्टा विद्याधरनगरनीलोत्पलदृशः॥२॥

कस्यचित्।

1473 क शैलान्गिलति क्षमां चलयति क्षाराम्बुधौ धावति
शार्दूलविक्रीडित को वा चुम्बति सूर्यविम्बमनलज्वालां समालिङ्गति।
लीलोल्लासितकृत्तमस्तकमिव व्यालोलजिह्वालतं
कस्त्वां काञ्चनभृङ्गसङ्गरजयश्रीघोषणाघोषणाः॥३॥

करञ्जधनञ्जयस्य।

1474 देव त्वत्तत्प्रतापज्वलनकवलिताः सर्वतो दह्यमानै-
स्रग्धरा रङ्गैर्युक्तं यदेते हिमगिरिशिखरोत्सङ्गमीयुर्नरेन्द्राः।
किं तु त्वच्छौर्यलीलामनुहरति पुरः सिंहयूनां निकाये
तत्राप्यातङ्कभाजः क ननु विधिहताः
स्थैर्यमासादयन्ति॥४॥

युवराजदिवाकरस्य।

1475 This verse is missing.

२२ प्रतापः।

1476 कूर्मः पादोस्य यष्टिर्भुजगपतिरसौ भाजनं भूतधात्री
Spd. 1248
Smv. 97.47
तैलोत्पूराः समुद्राः कनकगिरिरयं वृत्तवर्तिप्ररोहः।

1473 (c) Ed. कृत for कृत्त.

Sp. करञ्जस्य for करञ्जधनञ्जयस्य.

1474 (d) S, आसादयन्तु for ०न्ति

Sp. om. युवराज in the poet's name.

1476 (a) Spd., Srk. अत्र for अस्य.

(b) Spd. तैलापूरः (Srk. तैलोत्पूरः) for तैलोत्पूराः Ed. दीप्त for वृत्त.

अर्चिश्चण्डांशुरोचिर्गगनमलिनिमा कज्जलं दह्यमाना Srk. 1457
शत्रुश्रेणी पतङ्गा ज्वलति रघुपते त्वत्प्रतापप्रदीपः ॥१॥ स्रग्धरा

श्रीहनूमतः ।

1477 तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयः पूरोदरे वाडवः । Nc XII 11
तत्तादृक्प्रतिपक्षराजकयशस्तारा: पराभावुकः Sv 2527 Smv. 97 48
कासामस्य न स प्रतापतपनः पारं गिरां गाहते ॥२॥ शार्दूलविक्रीडित

कविपण्डितश्रीहर्षस्य ।

1478 निष्पिष्टप्रतिराज राजति सजातीयत्रयं तेजसा-
मौर्वश्चाग्निरिरंमदश्च भवतश्चैष प्रतापानलः । शार्दूलविक्रीडित
आद्यो माद्यति वारिभिर्जलनिधेरम्भोमुचां मध्यमः
प्रत्यर्थिक्षितिपालयौवनदशामुद्गत्वरैरन्तिमः ॥३॥

हरेः ।

1479 वंशोत्तंसमशोकसंकुलमतिप्रोद्दामबाणासनं
दृप्यद्द्वीपि चमच्चमूरु निनदद्दन्ति भ्रमत्खड्गि च । शार्दूलविक्रीडित
यस्योज्जागरनागरङ्गमभितः पुंनागपुण्याश्रयं
जग्राह प्रतिराजकं वनमभि क्रुद्धः प्रतापानलः ॥४॥

शुङ्गोकस्य ।

1470 (c) I. O ज्योति for अर्चि Srk. तिग्मांशु for चण्डांशु Smv. दह्यमान for ०माना
(d) Smv पतङ्गो for पतङ्गा. Spd. जयति for ज्वलति. Srk नरपते for रघुपते.

Smv. चित्तपस्य Srk खिपाकस्य.

1477 (a) Sv विरिञ्च for विरिञ्चि
(b) A, I O. अम्बुनिधयः for अम्बुधिपयः.
(c) Sv, Smv., Nc व्योमव्यापिविपक्ष for तत्.....पक्ष
(d) Sv. देव for अस्य.

Smv., Ed. om. कविपण्डित.

1480 एकद्वित्रिकलाक्रमेण शशिनं गृह्णन्विमुञ्चन्नयं
शार्दूलविक्रीडित यच्चण्डद्युतिरातनोति भगवानद्यापि चान्द्रायणम् ।
देवैतद्भवदीयभास्वरभुजस्तम्भप्रतापानल
स्पर्धायै क्रमभुक्तकलाञ्छनपशोर्नैतत्पुनः सेत्स्यति ॥५॥
आचार्यगोपीकस्य ।

२३ तेजः ।

1481 शुष्यन्त्येव पयोधयो न मणयः कुर्युः पदं चेदधः
शार्दूलविक्रीडित शुष्यत्यण्डमपीदमम्बुजभुवो मन्त्रा भवेयुर्न चेत् ।
किं चैते कणशः स्फुटन्ति गिरयो दध्युर्न चेदोषधी-
स्तेजोभिस्तव देव भूरपि
भुजच्छायासु विश्राम्यति ॥१॥
हरेः ।

1482 त्वत्तेज सविता पितामहपुरीमध्यास्त यल्लीलया
शार्दूलविक्रीडित यच्चक्रे भुजगेन्द्रसद्मसु तमश्छेदं न तत्राद्भुतम् ।
चित्रं यत्परिपन्थिपार्थिवमुखाम्भोजान्यनुज्ञागरी-
कुर्वाणस्त्रिजगद्विलङ्घनपरो नास्ताचलं चुम्बति ॥२॥
श्रीकरस्य ।

1483 पीत्वा सान्द्रतमं तमस्तिमिरहा देवः प्रसूते यमं
शार्दूलविक्रीडित कालिन्दीं च शनैश्चरं च तिमिराहारानुसारादिव ।
तेजस्त्वस्य पुनर्विरोधिवसुधापालाङ्गनाकज्जला-
न्याचामद्रुगर्भहूणतरुणीगण्डावदात यशः ॥३॥
आचार्यगोपीकस्य ।

1479 (d) Ed वनमति for वनमभि, क्रूर for क्रुद्ध
1480 (c) I. O भासुर for भास्वर
(d) I. O , A, S यशो for पशो
1481 (c) Ed., S शतशः for कणश .
1482 (b) A तमश्वेदं for तमश्वेदम्.
1483 (b) I. O., A इह for इव

1484 एकं धाम शमीषु लीनमपरं सूर्योपलज्योतिषां
व्याजादद्रिषु गूढमन्यदुदधौ संगुप्तमौर्वायते ।
त्वत्तेजस्तपनांशुमांसलसमुत्तापेन दुर्गं भया-
द्धार्क्षं पार्वतमौदकं यदि ययुस्तेजांसि
कि पार्थिवाः ॥४॥ शार्दूलविक्रीडित

जयदेवस्य ।

1485 व्योमन्युल्केत्यरण्ये दव इति वडवावह्निरित्यम्बुराशौ
पक्षेषु क्ष्माधराणां पविरिति
तडिदित्यम्बुवाहावलीषु ।
भालोत्सङ्गे पुरारेर्नयनमिति पुनर्भाविकल्पान्तकाले
कालाग्निश्चेति देव त्रिजगति भवतस्तेजस
स्फूर्जितानि ॥५॥ स्रग्धरा

शुभाङ्कस्य ।

२४ हस्ती ।

1486 भूर्भूदाररदाङ्कुरेण जलधेरन्त: पुरैवोद्धृता
प्रागेवाभ्रमुवल्लभस्य दशनैर्भिन्नो हिमानीगिरिः ।
इत्थं देव निजोष्मणा तव गज क्षुण्णं वपुर्वीजय-
न्कर्णाभ्यां करयन्नमुक्तवमथुस्यन्दैरयं सिञ्चति ॥१॥ शार्दूलविक्रीडित

भट्टशालीयपीताम्बरस्य ।

1487 एतद्देव यशस्करं नरपतेर्यत्तस्करे निग्रहो
दीर्घं जीव यथापराधमधुरं दण्डं जगत्यावहन् ।
येनायं परिपन्थिपार्थिववधूसिन्दूरचौरस्त्वया
बद्धश्च प्रतिदण्डभैरवकरी क्षिप्तश्च कारागृहे ॥२॥ शार्दूलविक्रीडित

शुङ्गोकस्य ।

1485 I. O. शुभाङ्गस्य for शुभाङ्कस्य.

1486 Ed. om. भट्टशालीय in the poet's name.

1488 उग्रावग्राहमग्नाङ्कुशधुवनधुताधोरणास्फालिताङ्गैः
स्रग्धरा प्रत्यग्रोद्दण्डशुण्डोड्डमरणसमरत्रस्तदिङ्नागचक्रैः।
आलोक्यालोक्य शैलानुरुचरणरणच्छृङ्खलाघट्टयद्भि-
र्यस्याशाभित्तिजेतुर्मदकलकरिभिः
क्वापि न प्रापि रङ्गः ॥३॥

महानिधिकुमारस्य।

1489 अयमयमसावाकर्ण्यारात्प्रतिद्विपडिण्डिमं
मदकलुषिते नेत्रे मार्जन्नुदस्तकरार्गलः।
हरिणी अगणितसृणिः क्रोधस्तब्धायतश्रुतिपल्लवः
प्रविशति नृपस्यान्तःकक्षां जवादरिमुद्गरः ॥४॥

विरिञ्चेः।

1490 सिन्दूरद्युतिमुग्धमूर्धनि धृतस्कन्धावधिश्यामिके
Nc. XII 36 व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति।
Smv. 101. 8 जानीमोनुपदप्रदोषतिमिरव्यामिश्रसंध्याधिये-
शार्दूलविक्रीडित वास्तं यान्ति समस्तबाहुजभुजातेजः
सहस्रांशवः ॥५॥

कविपण्डितश्रीहर्षस्य।

२५ अश्व.।

1491 आकर्षन्निव गां वमन्निव खुरान्पश्चार्धमुज्झन्निव
स्वीकुर्वन्निव खं पिबन्निव दिशश्छायाममर्षन्निव।

1488 (a) I. O. धुवनधृता॰ for धुवनधुता.
(d) After रङ्ग. Ed. adds भङ्ग within brackets.

1490 (b) I. O. सिन्धुरोऽस्य (Ed सिन्धुरस्य) for सिन्धुरेस्य.
(c) I. O., Nc यदि (Smv. पदं) for पद

1491-93. Om. in A.

1491 (a) Sv. धमन् for वमन्, खुरैः (Spd खुरौ) for खुरान्.
(b) Sv. वायून् समश्नन्निव (Spd. वायूंश्च मुष्णन्निव) for छायाममर्षन्निव

साङ्गारप्रकरां स्पृशन्निव धरां वातं समश्नन्निव Sv. 2419
श्रीमन्नाथ स वाजिराट् तव कथं Spd. 583
माद्दग्गिरां गोचर ॥१॥ शार्दूलविक्रीडित

छित्तपस्य ।

1492 कियत्पदं विष्णुपदं मम क्रमे
धरा वराकी च पयोधिरोधिता ।
इतीव हेलाविनतोरुकन्धरः
करोत्ययं मण्डलिकारयं हयः ॥२॥

Smv. 102. 1
वशस्थविल

हरिदत्तस्य ।

1493 प्रयातुमस्माकमियं कियत्पदं
धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधक्षममुद्धतं रज ॥३॥

Nc. I. 69
Smv 102 8
वंशस्थविल

श्रीहर्षस्य ।

1494 धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवै-
र्वातं सयति खञ्जयञ्जवजयैः स्तोतॄन्गुणैर्मूकयन् ।

Nc. XII. 99
Sv. 2601

(c) Sv. मही छायाममृष्यन्निव (Spd. भुवं छायाममृष्यन्निव) for धरा····· इव.

(d) Sv, Spd, read the line thus—चञ्चच्चामर (Spd. प्रेङ्ख-च्चामर). वीज्यमानवदन. श्रीमान् हयो धावति.

I. O. चित्तपस्य. Sv., Spd. सिंहदत्तस्य

1492 (a) Smv. क्रमोस्य मे for मम क्रमे.

(c) Smv. परिनम्र for विनतोरु

Smv. उमापतिधरस्य.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 548

1493 (b) Ed. वराकी च पयोधिरोधिता for तद ...स्थलायताम्

(d) S उद्धृतं for उद्धतम्.

1494 (b) Ed. जवैः for जयै..

Smv. 102.10 धर्माराधनसंनियुक्तजगता राज्ञामुनाधिष्ठितः
शार्दूलविक्रीडित सान्द्रोत्फालमिषाद्विगायति
पदा स्प्रष्टुं तुरङ्गोऽपि गाम् ॥४॥
तस्यैव ।

1495 क्षौणी नः क्षितिपालमौलिमहिषी द्यौर्देवकीनन्दन-
स्याङ्घ्रिः काङ्घ्रिरिहास्यतामिति
शार्दूलविक्रीडित मनश्चिन्तानमत्कन्धरः ।
अङ्गान्यङ्गलतासु भङ्गुरखुरन्यासैः समावेशय-
न्नुत्क्रोशन्निव वारिधीनधि-
चलत्युच्चैस्तवायं हयः ॥५॥
आकाशपालीयशालूकस्य ।

२६ नौका ।

1496 भृङ्गैर्नाविकसंनिभैः परिगतं शुद्धान्तवामभ्रुवां
कर्णभ्रष्टमवेक्ष्य केतकदलं वापीजले संतरत् ।
शार्दूलविक्रीडित श्रीमत्साहसमल्लवीर भवतो नौसार्थमन्तःस्मर-
न्नुत्त्रस्तोद्य पुनः करोति
सलिलक्रीडां न गौडाधिपः ॥१॥
वसुकल्पस्य ।

1497 जितपवनजवाभिर्नौभिरास्कन्द्य सद्य-
स्त्रिदिवमपि विजेतुं नाक्षमः क्षत्रियोयम् ।
मालिनी यदि न शिरसि भर्गः स्वर्गिणां भागधेयै-
र्दधदमरधुनीं स्यादन्तरालेन्तरायः ॥२॥
शुङ्गोकस्य ।

1495 (c) Sv. धर्मोपार्जन for धर्माराधन, देव त्वयाधिष्ठित for राज्ञा...धिष्ठितः.
1495 (a) I. O., A महसी for महिषी.
Ed. om. आकाशपालीय in the poet's name.

1498 नौकाभिनीतजलकेलिपु केनिपात-
पातोच्छलत्सलिलशीकरसंचयेन ।
देव त्वया विरचितो नभसि प्रगल्भ-
वाचालवीचिवलितः प्रचलः पयोधिः ॥३॥

वसन्ततिलक

हरिवंशस्य ।

1499 नखाङ्कं नारीणामनिलल्लुलितं केतकदलं
कलामिन्दोः पत्रं परिणतिविशीर्णजलरुहाम् ।
निरीक्षन्ते यस्य द्रुतमिलितनौकाटकघटा-
हठाकृष्टिभ्रष्टाश्चकितमिव काशीजनपदाः ॥४॥

शिखरिणी

उमापतिधरस्य ।

1500 नौकानिर्गमकेनिपातपतनोदञ्चत्पयोविन्दुभि-
र्धारालैर्विपरीतवृष्टिषु कथावृद्धो न वृद्धश्रवाः ।
किं च द्वेपिपुरे पुरन्दरपुरीवस्त्राञ्चलीकुङ्कुम-
क्षोदक्षालनवारिपातरुधिरभ्रान्तो जनस्ताम्यति ॥५॥

शार्दूलविक्रीडित

नरसिंहस्य ।

२७ सेना ।

1501 भूर्भूपालचमूपदेषु गगनं सेनारजोराजिषु
श्रान्तद्वेषिकलेवरेषु मरुतो नौकातलेष्वब्धयः ।
तेजस्तेजसि लीनमस्तु भवतः किंत्वन्यदाचक्ष्महे
सृष्टिः स्रष्टुरिहास्तमेष्यति महाभूतैर्विना पञ्चभिः ॥१॥

शार्दूलविक्रीडित

श्रीकण्ठस्य ।

1502 नित्यं निस्तृणपल्लवे पथि निरालम्बे व्रजन्वाजिभिः
खिन्नखिन्नतुरङ्गतुङ्गकरुणाकृष्टो विवस्वानयम् ।
यायादप्यवतीर्य निर्जरपथादेषा समन्तान्न चे-
दद्य त्वद्व्रजतागलन्मदजलैर्जम्बालिनी मेदिनी ॥२॥

शार्दूलविक्रीडित

करञ्जयोगेश्वरस्य ।

1502 (b) I. O. वसुना for करुणा.

1503 त्वत्सैन्यग्लपितस्य पन्नगपतेरच्छिन्नधाराक्रमं
विस्फारायतशालिनि प्रतिफणं
फेनाम्भसि भ्रश्यति ।
देव क्ष्मावलयप्रभो फणिकुलैः प्रत्यग्रमेकोत्तर-
स्थूलस्तम्भसहस्रधारितमिव क्ष्माचक्रमालोक्यते ॥३॥
वसुकल्पस्य ।

Srk. 1425
शार्दूलविक्रीडित

1504 शेषं क्लेशयितुं दिशः स्थगयितुं पेष्टुं धरित्रीभृतः
सिन्धून्धूलिभरेण कर्दमयितुं तैरेव रोद्धुं नभः ।
नासीरे च मुहुर्मुहुश्चलचलेत्यालापकोलाहला-
न्कर्तुं नाथ वरूथिनीयमवनीं जेतुं पुनस्त्वद्भुजौ ॥४॥
तस्यैव ।

Srk. 1426
शार्दूलविक्रीडित

1505 अहो स्थैर्यं तेषां प्रकृतिनियमेभ्यः सुकृतिनां
प्रतिज्ञातत्यागो नहि भवति कृच्छ्रेऽपि महति ।
तथाहि त्वत्सेनाभरनमितधात्रीभरदल-
त्कटाहोपि स्वाङ्गं किमु कमठनाथश्चलयति ॥५॥
कस्यचित् ।

शिखरिणी

२८ खड्गः ।

1506 देव त्वं मलयाचलोसि भवतः श्रीखण्डशाखी भुज-
स्तस्मिन्कालभुजङ्गमो निवसति
स्फूर्जत्कृपाणच्छलात् ।
एष स्वाङ्गमनर्गलं रिपुतरुस्कन्धेषु संघट्टय-
न्दीर्घं व्योमविसारिनिर्मलयशो
निर्मोकमुन्मुञ्चति ॥१॥
छित्तपस्य ।

Smv. 97. 33
शार्दूलविक्रीडित

1503 (c) Ed. फणैः for कुलै . Sp., Srk. प्रव्यक्रम् for प्रत्यग्रम्.
Srk.—anonymous.

1505 (c) Ed. नमत् for दलत्.

1506 (d) Ed. विसाति for विसारि.
Smv.—anonymous.

1507 तुल्या वाणकृपाणयोरनुगतिः क्षीणाननो न क्वचि-
त्कोषं मे हरति प्रयच्छति सदा लक्षं रणे पत्तिणे । Smv. 97. 51
इत्थं देव कुनायकत्वमसकृद्बुद्धेव युद्धेष्वसिः शार्दूलविक्रीडित
कृत्वा सन्धिमुपोढवेपथुरतिक्रोधाद्विवेश द्विषः ॥२॥

लङ्गदत्तस्य ।

1508 द्वाभ्यामेव जित द्वयोः परममून्यङ्गानि भूमिभर-
श्लाघ्यश्रीणि गृणन्ति संप्रति भवत्खड्गस्य कूर्मस्य च ।
यत्कम्पे क्षितिपालशत्रुवसुधाचक्रं समुत्कम्पते शार्दूलविक्रीडित
निर्व्याजं निपतन्ति च क्षितिभृतां

चिक्कक्शिरःश्रेणयः ॥३॥

चूडामणेः ।

1509 यशः पुत्रं देव त्वदसिलतिकासूत समरे
समीरस्तद्धूलीपटलपटवासं विकिरति ।
शिवा गायन्त्युच्चैरटति च कबन्धावलिरभू- शिखरिणी
दरातीनां मोक्षः सपदि भवबन्धव्यतिकरात् ॥४॥

विद्यायाः ।

1510 This verse is missing.

२९ आश्चर्यखड्गः ।

1511 देव स्वस्तुतिरस्तु नाम हृदि नः सर्वे च सन्त्वागमा- Smv. 97 68
स्तीर्थं न क्वचिदीदृगत्र भवति त्वत्खड्गधारा यथा । Sik. 1396

1507 (a) Smv. क्षीणा न नो कुत्रचित् for क्षीणा·· क्वचित्.
(b) Smv. पुन for सदा.
(c) Smv. बुद्धेव बुद्धैव
(d) Smv. अथ for अति, द्विषि for द्विष·
Smv —anonymous.

1509 (b) I. O. राशिं for वासम्.

1511 (a) Smv. वः for नः, वसन्त्वागमा (also Srk.) for वसन्त्वागमा.
(b) Smv. ईदृशं for ईदृगत्र, inserts कि bet. भवति and त्वत्.

शार्दूलविक्रीडित

यामेकः स्वशरीरशुद्धिरसिको मूर्ध्ना प्रतीच्छन्नरि-
र्द्वैविध्यादनु पञ्चतां तदनु च वैदग्ध्यमाप क्षणात् ॥१॥
रथाङ्गस्य ।

शार्दूलविक्रीडित

1512 शाखाः पञ्च तवोद्गता भुजतरोस्ताभिस्तथैकं धृतं
संभूयैव किलासिपत्रमभवत्तत्रापि चित्रान्तरम् ।
विश्वव्यापियशःप्रसूनमखिलव्यापच्छिदे श्रीफलं
छायां किं कथयामि यत्र
निखिलं विश्राम्यति क्ष्मातलम् ॥२॥
लङ्गदत्तस्य ।

Srk. 1015
हरिणी

1513 अपनय महामोहं राजन्ननेन तवासिना
कथय कुहकाश्चर्यं क्वेदं कथं क्व च शिक्षितम् ।
यदरिरुधिरं पायं पायं कुसुम्भरसारुणं
झटिति वमति क्षीराम्भोधिप्रवाहसितं यशः ॥३॥
दक्षस्य ।

शार्दूलविक्रीडित

1514 उद्यात्येव सुहृत्कुलं प्रतिबलं यात्येव नीचैस्तरा-
मायान्त्येव यशःश्रियः
प्रतिदिशं यान्त्येव सत्कीर्तयः ।
येनैकेन मुखाग्रपाटिततनूभूतार्द्रकोटिश्रिया
सर्वाश्चर्यमयः स एव जयति त्वत्खड्गधारापथः ॥४॥
शुङ्गोकस्य ।

1511 (c) Smv. मूर्ध्नि for मूर्ध्ना, व्रणं (Srk. रिपुः) for अरि.
Smv. धर्माशोकस्य.

1513 (b) Srk. कुहकक्रीडाश्चर्यं for कुह......क्वेदं. Ed. नु च for क्व च.
(d) Srk. झगिति for झटिति.

1514 (b) Ed. जय for यशः.
Ed. तुङ्गोकस्य for शुङ्गोकस्य.

1515 श्रीखण्डमूर्तिः सरलाङ्गयष्टि-
र्माकन्दमामूलमहो वहन्ती ।
श्रीमन्भवत्खड्गतमालवल्ली
चित्रं रणे श्रीफलमातनोति ॥५॥ इन्द्रवज्रा

जयदेवस्य ।

३० कुपितखड्गः ।+

1516 पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गो
भग्नप्रत्यर्थिवंशोल्वणविजयकरिस्त्यानदानाम्बुपट्टः । स्रग्धरा
संग्रामत्रासताम्यन्नरपतिसुयशोराजहंसाम्बुवाहः
खड्गः क्ष्मासौ विदल्लः समिति
विजयते मालवाखण्डलस्य ॥१॥

1517 वीरश्रीवेणिबन्धो भुजभुजगफणा शत्रुषु भ्रूपताका
देवस्य प्रेतभर्तुः स्फुरदुरुपृतना-
द्विपिनी वीचिदण्डः । Br. III. 48
क्रोधाग्नेर्धूमवर्तिः सुरयुवतिदृशां शृङ्खलादाम दीर्घं स्रग्धरा
लक्ष्मीलीलाकटाक्षः प्रतिसमरमभूद्यस्य
जैत्रः कृपाणः ॥२॥

राजशेखरस्य ।

1518 दृप्यत्प्रत्यर्थिपृथ्वीपतिविततयशःकौमुदीकृष्णपक्षो
लक्ष्मीसंचारदूतः सुरनरनगरारम्भनिर्विघ्नयष्टिः । स्रग्धरा

1515 (a) A, S वल्ली for यष्टि.
+ A, I. O., S रूपित for कुपित.
1516 (d) A, S क्वासौ for क्ष्मासौ.
1517 (b) Br. पृथुतर for स्फुरदुरु, लेखा for दण्ड
(d) S, यत्र (अस्य) for यस्य
1518 (b) Ed. नगराम्भ, an obvious error, for नगरारम्भ.

संग्रामाम्भोधिमाद्य-
द्भुजभुजगफणा तल्पकल्पान्तकृष्ट
खड्गस्ते देव जीयादयमुदितमहीमण्डला-
खण्डलस्य ॥३॥

शान्त्याकरस्य ।

1519 अस्यासिर्भुजगः स्वकोषशुषिराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदरालनीलरसनः केषां भिये न द्विषाम् ।
Nc. XII. 96 संग्रामेषु निजाङ्गुलीमयमहासिद्धौषधिवीरुधः
Smv. 97. 49 पर्यास्ये विनिवेश्य जाङ्गलिकता
शार्दूलविक्रीडित यैर्नाम नालम्बिता ॥४॥

कविपण्डितश्रीहर्षस्य ।

1520 लीलोत्तंसतमालवल्लिरवनेरेतत्प्रतापानल-
स्फूर्जद्धूमशिखा क्षुधाकुलतनोः
शार्दूलविक्रीडित कालस्य जिह्वाञ्चलः ।
वैरिस्त्रैणविलोचनाञ्जनलिपिस्तेनस्तमोमन्दिरं
निद्राणस्य कलेः स तस्य नृपतेः
खड्गो न वाग्गोचरः ॥५॥

युवराजदिवाकरस्य ।

३१ चापः ।

1521 ज्यां बिभ्रद्भुजगो भुजङ्गमयुवा चापस्तवास्मिन्पुनः
शार्दूलविक्रीडित शेते कुण्डलिते विपक्षकषणो नाराचनारायणः ।

1518 (c) Ed. कृष्णः for कृष्ट .

1519 (b) Nc., Smv. लील (Smv. नील) वलनस्तेषां भिये भूभुजाम् for नील···द्विषाम्.

(c) Smv. वीरुधा for वीरुधः.

(d) I. O. नालम्भिता for नालम्बिता.

Smv., Ed. om. कविपण्डित in the poet's name.

बिभ्राणा हृदयेन यं क्षणमपि क्षोणीभुजो भेजिरे
भित्त्वाम्भोरुहबन्धुबिम्बमचिरादानन्दसान्द्रं महः ॥१॥

आचार्यगोपीकस्य ।

1522 यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्ति यश्च किरति क्रूरध्वनिं निष्ठुरः । Nc. XII. 97
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं Sv. 2508
विख्यातः स्फुटमेक एष नृपतिः शार्दूलविक्रीडित
सीमा गुणग्राहिणाम् ॥२॥

कविपण्डितश्रीहर्षस्य ।

1523 भुजेऽपसर्पत्यपि दक्षिणे गुणं
सहेषुणादाय पुरः प्रसर्पिणे । Nc. XII 64.
धनुःपरीरम्भमिवास्य संमदा- Sv. 2525
न्महाहवे यच्छति वामबाहवे ॥३॥ वंशस्थविल

तस्यैव ।

1524 भ्रूचापप्रहितेन दृष्टिविशिखेनैवास्य विद्वेषिणो
ध्वस्ता पूर्वमतस्तदीयदलने संभावि मे दुर्यशः । शार्दूलविक्रीडित
इत्यालोच्य कराम्बुजार्चितमपि न्यस्तं पुरस्तादपि
द्राग्जातं समरेषु यस्य निविडव्रीडाविनम्रं धनुः ॥४॥

गोतिथीयदिवाकरस्य ।

1525 प्रागष्टादशपर्व भारतमिदं निर्माय कर्माद्भुतं
भूपानामनपायपौरुषमिह व्यासेन यत्कीर्तितम् । शार्दूलविक्रीडित

1522 (b) Sv. त्वा प्रत्येव for अस्मिन्नेव.
(d) Sv. एव for एष, हि भवान् for नृपतिः.
Ed. Om. कविपण्डित in the poet's name.

1523 (a) Sv. महेषुणा for सहेषुणा.
(b) Sv. इवाति for इवास्य, तवाहवे for महाहवे, दिरसति for यच्छति.

1524 (a) Ed. भ्रूचापे निहितेन for भ्रू॰ ॰न.

1525 (b) Ed. अपि for इह.

संग्रामाङ्गणसीम्नि सम्यगधुना देव त्वदीयो भुज-
स्तत्पर्वत्रयबन्धुरेण धनुषा व्याकर्तुमेष क्षमः ॥५॥

जलचन्द्रस्य ।

३२ प्रयाणम् ।

1526 नृपतिमुकुटरत्न त्वत्प्रयाणप्रशस्तिं
प्रबलभरनिमज्जद्भूधराक्रान्तभोगः ।
लिखति दशनटङ्कैरुत्पतद्भिः पतद्भि-
र्जरठकमठभर्तुः कर्परे सर्पराजः ॥१॥

मालिनी

त्रिपुरारिपालस्य ।

1527 दिग्यात्रासु तदीयसैनिकभरक्षुब्धाब्धिकोलाहल-
त्रस्तश्रीपरिरम्भमीलितदृशो देवस्य कंसद्विषः ।
सस्वेदालसपाणिपल्लवगलत्कौमोदकीमादरा-
दुद्गृह्यानमत्फणः फणभृतां
भर्ता बिभर्ति क्षितिम् ॥२॥

शार्दूलविक्रीडित

तस्यैव ।

1528 राजन्दुःसहदोःप्रतापदलिताशेषक्षितीशस्य ते
वेलालोकनकौतुकेन भवतः कोयं प्रयाणे रसः ।
यद्दन्तीन्द्रचमूमहाभरनमन्नेमिः क्रमादेकतो
भूरन्यत्र समुन्नता फणिपतेर्मौलौ न वर्तिष्यते ॥३॥

शार्दूलविक्रीडित

गदाधरनाथस्य ।

1529 ते दिक्पालविलासिनीकुचतटे कस्तूरिकाकान्तयो
वैरिस्त्रीवदनेषु साञ्जनगलन्नेत्राम्बुमैत्रीधराः ।

शार्दूलविक्रीडित

1526 (b) S., A read the line thus—प्रबलबलतरङ्गभूभराक्रान्तभोगः
Sp. प्लवग for प्रबल.

1528 (d) Ed. कथं स्थास्यति for न वर्तिष्यते.

स्वर्गङ्गाकमलेषु भृङ्गरुचयो यस्य प्रयाणे बभु-
र्निर्धूताः पवनेन मत्तकरिणां
दानाम्भसां बिन्दवः ॥४॥
विश्वेश्वरस्य ।

1530 अम्भः कर्दमतामुपैति सहसा पङ्कद्रवः पांशुतां
पांशुर्वारणकर्णतालपवनैर्दिक्प्रान्तनीहारताम् । Srk. 1428
निम्नत्वं गिरयः समं विषमतां शून्यं जनस्थानतां शार्दूलविक्रीडित
निर्याते त्वयि राज्यपाल भवति त्यक्तस्वभावं
जगत् ॥५॥
महोदधेः ।

३३ भोगावली ।

1531 राजन्नुद्दामनिद्राभरविवशभुजावल्लरीणामिदानीं
विश्राम्यन्तु त्वदन्तःपुरहरिणदृशां
चामरभ्रामणानि । स्रग्धरा
सेवन्ते देवमेते तुहिनकणभृतः सौधजालान्तराल-
प्राप्ताः प्रत्यग्रजाग्रन्नलिन-
वनरजोग्राहिणो गन्धवाहाः ॥१॥
उमापतिधरस्य ।

1532 भिन्दानः सुन्दरीणां पतिषु रुषमयं हर्म्यपारावतानां
वाचालत्वं दधानः कवितृषु Vsb. I 12
च गुणं प्रातिभं संदधानः । Sv. 2223

1529 (d) S, I. O. निर्धौता for निर्धूता..

1530 (c) Srk. जनस्थानकं for ०स्थानता.

1531 (b) I. O., S भ्रामराणि for भ्रामणानि.

1532 (a) Spd. मानिनीना for सुन्दरीणां. Vsb., Sv., Spd. पारावतेभ्यः for पारावतानां.

(b) Vsb. ददानः for दधानः, कवयितृषु for कवितृषु च. Spd. कविता for च गुणं.

Spd. 3722
स्रग्धरा

प्रातस्त्यस्तूर्यघोषः स्थगयति
गगनं मांसलः पांशुतल्पा-
दस्वल्पादुत्थितानां नरवर
करिणां शृङ्खलाशिञ्जितेन ॥२॥
राजशेखरस्य ।

शार्दूलविक्रीडित
1533 निद्राजिह्मदृशः सखीष्वपि सवैलक्ष्या नखाङ्कव्रण-
व्याजदृष्टांशुकलेखया प्रतिपदं सीत्कारिवक्त्रेन्दवः ।
त्वत्सेवासमुपागतक्षितिभुजां निर्यान्ति लीलागृहा-
देताः प्रौढरतिश्रमप्रशिथिलैरङ्गैः कुरङ्गीदृशः ॥३॥
धोयीकस्य ।

शार्दूलविक्रीडित
1534 अम्लानस्तवकन्ति कुन्तलभरे सीमन्तसीमास्विमाः
सिन्दूरन्ति कपोलभित्तिषु मिलन्मैरेयरागन्ति च ।
प्रौढेर्ष्यद्युतिविभ्रमन्ति नयनोपान्ते कुरङ्गीदृशः
विम्बोष्ठे क्षितिपाल
वालतरणेर्लाक्षारसन्ति त्विषः ॥४॥
साञ्चाधरस्य ।

शार्दूलविक्रीडित
1535 उत्कर्णं करिणां गणेन विकसन्मोदं चिराद्बर्हिभिः
क्रीडाकेशरिभिश्च पञ्जरगतैः कोपस्फुरल्लोचनम् ।
कुञ्जोत्सङ्गभुवि प्रकम्पतरलं सीमन्तिनीभिः क्षणा-
त्पीतः श्रोत्रपुटेन देव परितः प्रातर्मृदङ्गध्वनिः ॥५॥
तस्यैव ।

३४ तूर्यध्वनिः ।

शार्दूलविक्रीडित
1536 हेरम्बध्वनिडम्बरप्रतिनिधिः क्रीडन्नृपञ्चानन-
क्ष्वेडोत्पीडसुहृन्नदीपतिनदद्वेलोर्मिगर्जासखः ।

1532 (c) Vsb., Sv., Spd. नाद· for घोष,
Spd.—anonymous.

1534 (c) Ed., A दृशाम् for दृश .

संवर्ताम्बुदवृन्दमन्द्रसितस्पर्धी तवायं मृधे
शत्रुश्रोत्रदरीषु मूर्च्छति चमूभेरीरवो भैरवः ॥१॥

हरेः ।

1537 देव त्वद्विजयप्रयाणसमये ढक्का हताः सैनिकै-
र्मन्द्रं दध्वनुरद्रिकुक्षिषु जरत्पारीन्द्रनिद्राद्रुहः । शार्दूलविक्रीडित
तन्वाना मलयाद्रिषु प्रतिरवं ध्यानक्षतिं योगिषु
क्रोधं दिक्करिषु प्रकम्पमरिषु त्रासं रवेर्वाजिषु ॥२॥

कस्यचित् ।

1538 गुञ्जत्क्रौञ्चनिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वराः
प्राक्प्रत्यग्धरणीन्द्रकन्दरजरत्पारीन्द्रनिद्राद्रुहः । Srk. 1567
लङ्काङ्कत्रिककुत्प्रतिध्वनिघना पर्यन्तयात्राजये शार्दूलविक्रीडित
यस्य भ्रेमुरमन्दमन्दररवैराशारुधो घोषणाः ॥३॥

जयदेवस्य ।

1539 यस्याविर्भूतभीतिप्रतिभटपृतनागर्भिणीभ्रूणभार-
भ्रंशभ्रेशाभिभूत्यै प्लवनमिव
भजन्नम्भसाम्भोनिधीनाम् । स्रग्धरा
संभारं संभ्रमस्य त्रिभुवनमभितो भूभृतां बिभ्रदुच्चैः
संरम्भोज्जृम्भणाय प्रतिरणमभवद्
भूरिभेरीनिनादः ॥४॥

तस्यैव ।

1540 विघट्टयन्नेष हठादकुण्ठ-
वैकुण्ठकण्ठीरवकण्ठगर्जाम् । उपजाति
भयकरो दिक्करिणां रणाग्रे
भेरीरवो भैरवदुःश्रवस्ते ॥५॥

तस्यैव ।

1536 (c) I. O., A संवृत्ताम्बुद for संवर्ताम्बुद. Ed. मन्द for मन्द्र.

1538 (a) Srk. कुञ्ज for क्रौञ्च. कुटीर for निकुञ्ज.

(b) Srk. दरी for जरत्.

Srk.—anonymous.

३५ धूलिः ।

1541 यस्योद्योगे बलानां दिशि दिशि
वलतामुज्जिहानै रजोभि-
Srk. 1565 र्जम्बालिन्यम्बरस्य स्रवदमरधुनीवारिपूरेण मार्गे ।
स्रग्धरा संसीदच्चक्रशल्याकुलतरणिकरोत्पीडिताश्वीयदत्त-
द्वित्रावस्कन्दमन्दः कथमपि चलति
स्यन्दनो भानवीयः ॥१॥
बाणस्य ।

1542 सप्तद्वीपकुटुम्बभूतलभुवो निष्पीतसप्ताब्धय-
स्तन्मार्गेण च सप्तपन्नगफणारत्नावलोकच्छिदः ।
शार्दूलविक्रीडित क्रीडा दिग्विजये च सप्तजगतीभाजो यदक्षौहिणी-
जन्मानः प्रसरन्ति सप्तपवनस्कन्धस्पृशो धूलयः ॥२॥
मुरारेः ।

1543 यस्याशाविजयप्रवृत्तपृतनाचक्रे परिक्रामति
क्षुण्णक्ष्मातलधूलिसंकुलमभून्मर्त्यस्थलाभं नभः ।
शार्दूलविक्रीडित एतस्यामदसीयसंप्लवपरिक्षीणाम्भसि प्रावृषि
प्रायः संभवति स्म भूपरिसरे भूयानिवावग्रहः ॥३॥
तिलचन्द्रस्य ।

1544 अब्धौ मज्जन्ति मीना इव फणिन इव
क्षौणिरन्ध्रं विशन्ति
क्रामन्त्यद्रीन्विहङ्गा इव कपय इव
क्वाप्यरण्ये चरन्ति ।
स्रग्धरा देव क्ष्मापालशक्र प्रसरदनुपमत्वच्चमूचक्रवाह-
व्यूहव्याधूतधूलीपटलहतदृशः कान्दिशीकाः
क्षितीशाः ॥४॥
विश्वेश्वरस्य ।

1541 (a) Srk. सकृदपि चलताम् for दिशि···वलताम्.
(b) Srk. सरित्तोय for धुनीवारि.
Srk.—भवभूतेः.

1545 भूतिस्नानप्रमोदं तनुभिरलभत स्पष्टमष्टाभिरीशो
भूयस्तुङ्गत्वमापुः पिहितगिरिगुहागह्वराः
क्ष्माधरेन्द्राः ।
यात्रायां यस्य खेलत्तुरगखरखुरोत्खातधूलीभरेण स्रग्धरा
प्रापुर्वर्षाभ्रलक्ष्मीमतिमलिनतया
शारदास्तोयवाहाः ॥५॥
तस्यैव ।

३६ अश्वधूलिः ।

1546 यात्रा नेहसि यस्य दिग्विजयिनः काम्बोजवाहावली- Srk. 1381
विङ्खोल्लेखविसर्पिणि क्षितिरज पूरे वियच्चुम्बति । शार्दूलविक्रीडित
भानोर्वाजिभिरङ्गकर्षणरसानन्द· समासादितो
लब्धः किं त्र नभस्तलामरधुनीपङ्केरुहैरन्वयः ॥१॥
वसुकल्पस्य ।

1547 देव त्वद्विजये तुरङ्गमखुरव्रातक्षतक्ष्मातल-
प्रोद्भूते परितः परागपटले दिक्चक्रमाक्रामति । शार्दूलविक्रीडित
अक्ष्णां पंक्तिशतानि निन्दति निजं हस्तद्वयं निन्दति
स्वां निन्दत्यनिमेषतां परिपतद्बाष्पाम्बुधारो हरिः ॥२॥
जयोकस्य ।

1548 वाहव्यूहखुराग्रटङ्कविहतिक्षुण्णक्ष्माजन्माभि- Srk. 1447
धूलिभिः पिहिते विहायसि भवत्प्रस्थानकालोत्सवे । शार्दूलविक्रीडित

1545 (a) A भूमि for भूति.
(b) I. O. गुरु for गिरि , A क्ष्मानरेन्द्रा· for क्ष्माधरेन्द्राः.
1546 (a) Srk. देव त्वद्विजयप्रयाणसमये for यात्रा· ·विजयिनः.
(b) Ed. रिङ्खो for विङ्खो.
(c) Srk. रसास्वादः for रसानन्द·.
Srk.—anonymous.

दिङ्मोहाकुलसूरसूतविपथभ्राम्यत्तुरङ्गावली-
दीर्घायुः प्रतिवासरं प्रतिदिशं व्यस्तो
रविर्भ्राम्यति ॥३॥

महोदधेः ।

1549 त्वद्वाहावलिडापटङ्कविगलद्भूगोलधूलीभरै-
रुत्पत्यापतयालुभिः स्थलमये जातेद्य नीराम्बुधौ ।
शार्दूलविक्रीडित
शङ्के सेतुकथैककर्मठभुजाशौटीरशाखामृगा-
हंकारस्तुतिभिर्भविष्यति
कथं न व्रीडितो मारुतिः ॥४॥

हीरोकस्य ।

1550 सप्ताम्भोधीन्पिबद्भिर्दिशि
दिशि सरितः स्वादयद्भिस्तडाग-
स्रग्धरा
व्यूहं गण्डूपयद्भिर्गगनतलगतां जाह्नवीमुल्लिहद्भिः ।
यात्रायां यस्य हेलाचलतुरगचमूशश्वदुद्भूतधूली-
पूरैरैकाब्धिमात्रव्ययजनितमदो
लज्जितः कुम्भजन्मा ॥५॥

छित्तपस्य ।

३७ संग्रामधूलिः ।

1551 यस्याहवे हयचमूखुरखण्डितोर्वी-
पांशुप्रसारपरिपूर्तिभिया वहन्ति ।
वसन्ततिलक
नेत्राणि नित्यविकचानि मरुत्तरुण्यो
नीरन्ध्रपाणिपुटयुग्मपिधानवन्ति ॥१॥

राजशेखरस्य ।

1548 (c) Ed मोहादनु for मोहाकुल.
(d) Srk. कुतवासरः for प्रतिवासरं, ताम्यति for भ्राम्यति.
Srk.—anonymous.

1550 (d) Ed. पात्र for मात्र

1551 (a) Ed., A हरि for हय.

1552 त्वङ्गत्तुरङ्गमखुरोच्छलितैरजोभि-
र्लग्नैरजस्रगलदस्रसहस्रनेत्रः ।
पाणिग्रहे समरभूमिजयश्रियस्ते
स्वाराडयं नृपतिनाथ सहस्रधारः ॥२॥ — वसन्ततिलक

पजोकस्य ।

1553 त्वङ्गद्वैरिकरीन्द्रकुम्भनिपतन्निस्त्रिंशलेखोल्लस-
द्वह्निज्वालतडित्करम्बिततनुर्व्यभ्रत्विषो रुन्धती ।
राजंस्तर्पितवर्हिणा सरभसैरालोकिता चातकै-
र्वेलात्त्वद्बलधूलिजालजलदश्रेणी समुत्सर्पति ॥३॥ — शार्दूलविक्रीडित

सुरभेः ।

1554 एतत्कृत्तोत्तमाङ्गप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि
समरसमालोकिलोकास्पदेऽपि । — Nc XII. 100
अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षुसङ्क्षुभ्यमाण-
क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरण-
धुराधूलिधारान्धकारात् ॥४॥ — स्रग्धरा

कविपण्डितश्रीहर्षस्य ।

1555 मातङ्गाम्भोदवीथीविकसितमहसि प्रौढसेनापराग-
ध्वान्तोद्गारे गरीयस्युपनयति
मुहुर्विश्वदिङ्मोहमुद्राम् ।
कीर्तिर्वेलावनेषु भ्रमति भुजमथालम्बते वीरलक्ष्मी-
र्दैव त्वत्खड्गधारासरणिपरिसरे
वैरिणो निष्पतन्ति ॥५॥ — स्रग्धरा

जलचन्द्रस्य ।

1554 (a) Nc. एतेनोत्कृत्तकण्ठ for एतत् . माङ्ग
(b) Ed. दंष्ट्रापि for द्रष्टैव
(c) Sp. विक्षुभ्यमाण for संक्षुभ्यमाण
(d) Ed. धरा for धुरा. Nc. रेणु for धूलि
Ed. om. कविपण्डित in the poet's name..

1555 (c) I. O. भुजसखी नन्दते for भुजमथालम्बते.

३८ युद्धम् ।

1556 राजन्वाजिपदातिकुञ्जरशिरश्छिन्नं रणे यत्त्वया
नृत्यद्योधकबन्धकण्ठमिलितं तेनारिवीरव्रजः ।
हेरम्बीयति किनरीयति शिरोराहूयतीति क्षणं
निर्माणं तव वङ्गनायक कथापाण्डित्यमुन्मीलति ॥१॥

शार्दूलविक्रीडित

उदयादित्यस्य ।

1557 संग्रामाङ्गणसंगतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरनघा
कीर्त्या च लोकत्रयम् ॥२॥

Sk. I. 115
Srk. 1407
शार्दूलविक्रीडित

कर्कराजस्य ।

1558 शत्रूणां कालरात्रौ समिति समुदिते बाणवर्षान्धकारे
प्राग्भारे खड्गधारां सरितमिव
समुत्तीर्य मग्नारिवंशाम् ।
अन्योन्याघातमत्तद्विरदघनघटादन्तविद्युच्छटाभिः
पश्यन्तीयं समन्तादभिसरति
मुदा सांयुगीनं जयश्रीः ॥३॥

स्रग्धरा

जयदेवस्य ।

1557 (a) Sk. ०मागतेन for संगतेन.
(b) Srk. महसा for सहसा.
(c) Srk. अरि for रिपु
(d) Sk. सप्ताब्धयः for लोकत्रयम्.

Srk. संग्रामाङ्गणस्य.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 364, with संग्रामाङ्गणमागतेन for सं...संगतेन, अतुला for अनघा.

1559 यदस्त्रव्यापारादभिमुखहतैः क्षत्रियभटैः
स्वसत्त्वेन क्रीतं भुवनमभिसर्पद्भिरभितः ।
कृतच्छिद्रश्रेणीविधुरपरिभोगं भगवतो
गभस्तीनां पत्युस्तितउतुलनां मण्डलमगात् ॥४॥ — शिखरिणी

मुरारेः ।

1560 यन्निस्त्रिंशहतोद्गतैररिशिरश्चक्रैर्बभूव क्षणं
लोके चान्द्रमसे विधुन्तुदघटावस्कन्दकोलाहलः । — Srk 1570
किं चामीभिरपि स्फुरन्मुखतया शीतांशुकोटिभ्रमं — शार्दूलविक्रीडित
बिभ्राणैरुदपादि राहुभुवने भूयान्सुभिक्षोत्सवः ॥५॥

तस्यैव ।

३९ युद्धस्थली ।

1561 देव त्वद्भुजयोर्बलं न गदितुं वाचा वयं शक्नुमः
कुर्वाणा हृदयेपि तत्पुलकिताः प्रत्यङ्गमेते वयम् । — शार्दूलविक्रीडित
शक्ता सैव पुनस्तवासिपतनच्छिन्नद्विषत्कन्धरा-
रन्ध्रोद्भ्रान्तसमीरभैरवरवा युद्धस्थली जल्पितुम् ॥१॥

छित्तपस्य ।

1562 रक्तस्रोतोवहायास्त्वरितमवतरन्स्नानतृष्णालुरेको
वीर त्वद्वैरिसेनाघनपिशितवसापङ्कमग्नैकजङ्घः । — स्रग्धरा
साक्रन्दक्राणमासीत्प्रसरदपसरत्पाणिभिः कृष्टमुक्त-
स्तीरस्थैरुत्तितीर्षुः
परिहसितपरैस्तृप्तिभिः प्रेतवृद्धः ॥२॥

नीलस्य ।

1563 श्लाघन्ते नहि तानि यस्य भुजयोरद्यापि युद्धस्थली-
सीमान्ते रिपुकीकसोत्थितकुशव्याजेन रोमाञ्चिताः । — शार्दूलविक्रीडित

1559 (b) A उप for अभि.

1560 (c) Srk मणि for मुख, चण्डांशु for शीतांशु.

Srk —anonymous.

1563 (b) Sp सीमान्तो for सीमान्ते.

पूर्वाभ्यासगताभिरङ्कपलभुग्दंष्ट्रावलीचर्वणा-
न्निर्मांसास्थितयोच्चरत्कटकटस्पष्टाक्षरश्रेणयः ॥३॥
गोतिथीयदिवाकरस्य ।

1564 निर्यन्नाराचधाराचयखचितपतन्मत्तमातङ्गजातं
जातं यस्यारिसेनारुधिरजलनिधावन्तरीपभ्रमाय ।
स्रग्धरा सुप्ता यस्मिन्नृतान्ते सह च सहचरैर्नीलवन्नागनासा-
रन्ध्रद्वन्द्वैकपाले रुधिरमधुरसं
प्रेतकान्ताः पिबन्ति ॥४॥
जयदेवस्य ।

1565 कृष्टे घोटकटापसंपुटघटाफालाग्रसंघट्टनै-
श्छिन्नारातिकबन्धरन्ध्रविगलद्रक्तेन सिक्ते रणे ।
शार्दूलविक्रीडित मूलेन त्वदसिप्रहारपतिता वैरीभदन्तव्रजा
राजन्ते जगदग्रपल्लवियशोबीजप्ररोहा इव ॥५॥
वीरदत्तस्य ।

४० दिग्विजयः ।

1566 क्षिप्तः क्षीरगृहे न दुग्धजलधिः कोषे न हेमाचलो
दिक्पाला अपि पालिपालन-
Srk. 1446 विधावानीय नारोपिता ।
शार्दूलविक्रीडित नो वा दिक्करिणः क्वणन्मधुलिहः पर्यायपर्याणन-
क्रीडायां विनियोजिता
वद कृतं किं किं त्वया दिग्जये ॥१॥
कस्यचित् ।

1567 देवे दिग्विजयोद्यते धृतधनुर्विद्वेषिसीमन्तिनी-
शार्दूलविक्रीडित वैधव्यव्रतदायिनी प्रतिदिशं रोषादुपक्रामति ।

1563 A गोपतीय (S गोपथीय) for गोतिथीय in the poet's name.
1565 Om. in A.
1566 Srk—दत्तस्य.

किं ब्रूमोन्यदितोधिकं रतिरतिव्रासान्न पौष्पं करे
भर्तुर्भर्तुर्मदान्मदान्धमधुपीनीलीनिचोलं धनुः ॥२॥

नारायणदत्तस्य ।

1568 तत्तद्विक्रमदोहदेन विलसद्दोर्दण्डदम्भोलिना
विक्षेपिव्ययकर्मठेन दिशता निर्वीरमुर्वीतलम् ।
किं ब्रूमश्चतुरब्धिसीमभुवनं राजन्वदातन्वता — शार्दूलविक्रीडित
येनाभूर्विजिगीषुणा विदधिरे
दिक्पालशेषा दिशः ॥३॥

वसुकल्पस्य ।

1569 आकौमारं समरजयिना कुर्वतोर्वीमवीरा-
मेतेनामी कथमिव दिशामीशितारो विमुक्ताः ।
अन्तर्ज्ञातं वपुषि कलया तस्य तेष्टौ प्रविष्टाः — मन्दाक्रान्ता
प्रह्वीभूते प्रभवति नहि क्षत्रियाणां कृपाणः ॥४॥

उमापतिधरस्य ।

1570 एकः संग्रामरिङ्गत्तुरगखुररजोराजिभिर्नष्टदृष्टि-
र्दिग्यात्राजैत्रमत्तद्विरदभरनमद्भूमिभग्नस्तथान्यः ।
वीराः के नाम तस्मात्त्रिजगति — स्रग्धरा
न ययुः क्षीणतां काणकुब्ज-
न्यायादेतेन मुक्तावभयमभजतां
वासवो वासुकिश्च ॥५॥

जयदेवस्य ।

४१ रिपुः ।

1571 यान्त्येके परपुष्टतां बलिभुजो भ्राम्यन्ति केचिन्महीं — Sv. 2582
केचिद्बिभ्रति लावकत्वमपरे जाता वने वर्तकाः । — शार्दूलविक्रीडित

1569 (c) I. O. प्रतिष्ठाः for प्रविष्टा .

1570 (b) I. O , A भुग्न for भग्न.

1571 (b) Sv. अन्ये for केचित्.

केचित्खञ्जनकीभवन्ति सततोन्माथप्रमाथैरहो
तिर्यक्तामपि लम्भितैस्त्वदरिभिर्लब्धा
न पक्षोन्नतिः ॥१॥

1572 निर्भीकभ्रान्तभोगिन्यनलसमशके
मांसलध्वान्तराशा-
स्रग्धरा
वासारक्लिन्नकुड्ये वृषभनिकषणावर्जितद्वारदारौ।
प्रत्यग्रोदीर्णगर्भे गलति वनगिरिग्रामदेवीगृहान्ते
संत्रस्ताः शत्रवस्ते कथमपि रजनीं प्रावृषि
प्रेरयन्ति ॥२॥
योगेश्वरस्य।

1573 पङ्क्तयामूरुयुगं विभज्य भुजयोर्मध्यं निपीड्योरसा
पार्श्वेषु प्रसभं प्रहृत्य नखरैर्दन्तैर्विलुप्याधरम्।
Sk. V. 500
शार्दूलविक्रीडित
संसुप्तानवबोध्य युष्मदहितान्भूयोपि भुंक्ते वने
किं कान्ता सुरतैषिणी
नहि नहि व्याघ्री करालानना ॥३॥
छित्तपस्य।

1574 मौखर्यं वरमस्तु देव तदपि प्रसूयते विस्मया-
दैश्वर्याणि परित्यजन्ति भवतो नाद्यापि ते वैरिणः।
शार्दूलविक्रीडित
मन्यूनां शतमाचरन्ति कटकं क्रामन्ति भूमीभृतां
पत्रालीं बलयन्ति च स्तनयुगाभोगे
कुरङ्गीदृशाम् ॥४॥
जलचन्द्रस्य।

1571 (c) Sv. खञ्जनका for ०की, सभयैर्मार्गप्रयाणै for सततो.. प्रमाथै.
1572 (c) Ed. दीर्णे for गर्भे.
1573 (b) A विदस्य (श्य ?) [S, K विलूय] for विलुप्य
(c) S. k. सुप्तानप्यवबोध्य for सं. ध्य.
1574 (d) I. O. रमयन्ति for बलयन्ति.

1575 पदहीनान्बिलवसतीन्भुजगानिव
जातभोगसंकोचान् । Srk. 1393
व्यथयति मन्त्राक्षरमिव नाम आर्या
तवारीन्वनेचरैर्गीतम् ॥५॥
दक्कस्य ।

४२ रिपुसंभ्रमः ।

1576 कोपान्गेहेषु मुञ्चन्पथि करितुरगं बान्धवानर्धमार्गे
दुर्गेष्वन्तःपुराणि प्रतिबलचकिताः स्रग्धरा
पर्वतेभ्यो निवृत्ताः ।
यस्योद्योगे भ्रमन्तः समसमयसमारम्भगम्भीरभेरी-
भाङ्काराकीर्णकर्णज्वरभरतरलप्रेक्षिताशाः
क्षितीशाः ॥१॥
विश्वेश्वरस्य ।

1577 श्रुत्वा यं सहसागतं निजपुरात् त्रासेन निर्गच्छतां
शत्रूणामवरोधनैर्जललवप्रस्यन्दतिम्यत्पुटाः । Sk. I. 83
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि शार्दूलविक्रीडित
क्रीडाद्रौ च सशाद्वले
विवलितग्रीवैर्विमुक्ता दृशः ॥२॥
धनपतेः ।

1575 (a) Ed. संकोचात् for संकोचान्.
Srk—दच्चस्य

1576 (b) Ed. लव for बल.
(d) Ed प्रोज्झिताशाः for प्रेक्षिताशाः.

1577 (b) I. O. प्रस्यन्दितमुत्पुटा for प्रस्यन्दतिम्यत्पुटाः.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 534.

शार्दूलविक्रीडित

1578 मुग्धे किं शुकपञ्जरेण रसिके किं सारिकान्वेषणैः
सुस्थे मुञ्चसि किं न चित्रफलकं किं वीणया रागिणि।
नायं भूषणसंग्रहस्य समयो लीलावति त्वर्यता-
मित्यासन्पुरविद्रवे भवदरिस्त्रीणां वयस्यागिरः ॥३॥

राजशेखरस्य।

शार्दूलविक्रीडित

1579 वन्से मालति मालिका न रचिता पुष्पैस्त्वदीयैर्मया
रक्ताशोकतरो तवाप्यभिनवो नोत्तसितः पल्लवः।
व्यालोलालिकुलावलीढमुकुलस्त्वं चूत नालोकितो
हा धिक्कष्टमिति ब्रुवन्ति नगरत्यागे तवारिस्त्रियः ॥४॥

गदाधरस्य।

मन्दाक्रान्ता

1580 मातर्मातर्जनक जनक प्रेयसि प्रेयसीति
भ्रातर्भ्रातस्तनय तनय ज्यायसि ज्यायसीति।
यत्रासीरप्रचुरतुरगव्यूहवित्रस्तवैरि-
स्त्रीपुंसानां विदलति दलद्दिक्कलापो विलापः ॥५॥

दाक्षिणात्यस्य।

४३ अरिवधूः।

शार्दूलविक्रीडित

1581 कान्तारेषु करावलम्बिशिशवः पादैः स्रवल्लोहितै-
रर्चन्त्यः पदवीं विलोचनजलैरावेदयन्त्यः शुचम्।
दृष्टाः पान्थजनैर्विवृत्य सकृपं हाशब्दगर्भं मुखै-
र्यन्त्यह्ना सकलेन योजनतुरीयांशं तवारिस्त्रियः ॥१॥

पुरुषोत्तमस्य।

1578 (b) S, I. O. स्वस्थे for सुस्थे.

1579 A, S गदाधरनाथस्य for गदाधरस्य

1580 (d) Ed. कपालो for कलापो.

1581 (c) A निवृत्य for विवृत्य.

A पुरुषोत्तमदेवस्य for पुरुषोत्तमस्य.

1582 पारेकन्दरमिङ्गुदीवनमितो नीवारकेदारिका
स्वच्छन्दं सरसस्तटे कमलिनीवृन्दाढ्यमन्दानिलः ।
स्वच्छं निर्झरवारिवारणरदोत्खातास्ततो भूरुहा शार्दूलविक्रीडित
इत्थं व्याधवधूर्विबोध्य नयति त्वद्वैरिवीराङ्गना ॥२॥
विभाकरस्य ।

1583 घ्रातं तालफलाशया स्तनयुगं बिम्बभ्रमेणाधरो
दष्टं पाकविदीर्णदाडिमधिया लीढाः स्फुरन्तो रदाः । शार्दूलविक्रीडित
भ्राम्यन्ती श्रमनिःसहानुविपिनं यद्वैरिसीमन्तिनी
निद्राणा मुहुराहता मुहुरधिक्षिप्ता
च शाखामृगैः ॥३॥
धनञ्जयस्य ।

1584 कुरु तरुषु गृहास्थां तल्पबुद्धिं तृणेषु
त्वचि निवसनवाञ्छामन्नतृष्णां फलेषु ।
इति विनयति देव प्रेयसीं त्वद्रिपूणा- मालिनी
मभिनववनवासोद्वेगमुग्धां किराती ॥४॥
वीरभद्रस्य ।

1585 न्यञ्चद्ग्रीवीनिबद्धान्यकलिततिलकान्यक्वणत्कङ्कणानि
भ्रश्यन्मञ्जीरशिञ्जान्यचलितवलयस्रञ्जि धौताञ्जनानि । स्रग्धरा
अप्रेङ्खत्तारहाराण्यवसितहसितश्रीणि शीर्णालकानि
त्रुट्यत्सिन्दूरबिन्दून्यसकृदकृत यः
शात्रवान्त पुराणि ॥५॥
उमापतिधरस्य ।

1583 (d) A आगता for आहता.
The verse has been quoted by Aufrecht in ZDMG, 36, p 533.
1584 Quoted by Aufrecht in ZDMG, 36, p. 545.
1585 (a) Ed. निबन्धानि for निबद्धानि
Sp उमापतेः for उमापतिधरस्य.

४४ अरिवधूवाष्पः ।

1586 हा चित्राङ्गि कुरङ्गि हा राजहसप्रिये
हा चूतद्रुम हा प्रियङ्गुलतिके त्यक्ताः
स्थ हा धिक्कथम् ।
इत्थं त्वत्परिपन्थिपार्थिवपुरन्ध्रीणां वनप्रस्थितौ
धाराधौतकपोलयोर्नयनयोरस्रं न विश्राम्यति ॥१॥

शार्दूलविक्रीडित

गदाधरनाथस्य ।

1587 संदिष्टं मरुभूमिभूरुहचयैर्भूयाद्भवान्भूपति-
निर्जेता नवखण्डमण्डलभुवो यत्त्वत्प्रसादाद्वयम् ।
प्रत्यासन्नविपन्नहूणतरुणीनेत्रप्रणालीगल-
द्बाष्पाम्भःप्लवपूरपिच्छिलतलाः
श्रीमुञ्ज मोदामहे ॥ ॥

Srk. 1398
शार्दूलविक्रीडित

कस्यचित् ।

1588 एतद्भीतारिनारीगिरिबिलविगलद्वासरा निःसरन्ती
स्वक्रीडाहसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा ।
यच्चक्रन्दोच्चकैस्तन्नयनजलमिलच्चन्द्रहंसानुविम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितै-
राश्वसीन्न्यश्वसीच्च ॥३॥

Nc. XII. 28
स्रग्धरा

कविपण्डितश्रीहर्षस्य ।

1586 (a) I. O. S ०हंसि for ०हंस
Ed. गदाधरनारायणस्य (Sp. गदाधरस्य) for गदाधरनाथस्य

1587 (a) Srk. भूपाल भूयाद्भवान् for भूयात् ..भूपति
(c) Srk. वारवधू for हूणतरुणी
(d) Srk. पङ्क for पूर.

1588 (a) A निःस्रवन्ती for निःसरन्ति.
(c) Nc. आक्रन्दद्भूरि यत्तन्नयन for यच्च...नयन
(d) Nc. अश्वसच्च for अश्वसीच्च.
Ed. om. कविपण्डित in the poet's name.

1589 गम्भीरनीरसरसीरपि पङ्कशेषाः
कुर्वन्ति ये दिनकरस्य करास्त एव ।
त्वद्वैरिवीरवनितानयनाम्बुलेश-
शोषे कथं प्रतिहता इति मे वितर्कः ॥४॥

कल्पदत्तस्य ।

Srk. 1424
वसन्ततिलक

1590 के यूयं मुनय· किमत्र तपसे स्थानं समीहामहे
नीवाराङ्कुरदन्तुरा नियमितव्याधास्ति विन्ध्याटवी ।
सा संप्रत्यवनीमहेन्द्र भवतो विद्वेषिवामभ्रु वा-
मश्रान्तच्युतलोललोचनपयोवन्याभिरन्यादृशी ॥५॥

कविराजसोमस्य ।

शार्दूलविक्रीडित

४५ अरिपुरम् ।

1591 अधाक्षीन्नो लङ्कामथमयमुदन्वन्तमतरद्
विशल्यं सौमित्रेरयमुपनिनायौषधिवरम् ।
इति स्मारं स्मारं त्वदरिनगरीसौधलिखितं
हनूमन्तं दन्तैर्दशति कुपितो राक्षसभटः ॥१॥

परिमलस्य ।

Spd 1267
शिखरिणी

1589 (b) Srk. transposes वैरि and वीर.

Srk—anonymous.

1590 (b) Ed. व्यालास्ति for व्याधास्ति.

(d) S, I. O. लोचनद्वय for लोललोचन.

Sp —anonymous.

1591 (b) Ed विशल्या for विशल्यं, वराम् for वरम्.

(c) Spd. भित्ति for सौध.

(d) Spd. गण· for भट

Ed. परिमलभटस्य (Spd. कस्यापि) for परिमलस्य.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 517, with the same variants as in Spd.

शार्दूलविक्रीडित

1592 लूतातन्तुपटावनद्धशिरसो वेल्लल्लतासंतते-
रन्योन्यं मिलनाच्चिरस्पृहमिव व्यासक्तकण्ठग्रहाः ।
क्रीडानिर्वृतघूकघूत्कृतिरवैः साक्रन्दवद्धारवं
क्रन्दन्ति त्वदरातिराजनगरीरथ्याभुवो वीरुधः ॥२॥

युवराजस्य ।

Srk. 1401
शार्दूलविक्रीडित

1593 वर्षासंभृतपीतिमानमनवं स्तब्धाङ्घ्रिहस्तद्वयं
भेकं मूर्ध्नि निगृह्य कज्जलरजःश्यामं भुजङ्गं स्थितम् ।
मुग्धाव्याधवधूस्तवारिनगरे शून्ये चिरात्संप्रति
स्वर्णोपस्कृतमुष्टिसायकधिया साकूतमाकर्षति ॥३॥

छित्तपस्य ।

शार्दूलविक्रीडित

1594 लीलाचूततमालकेशरतरुस्कन्धे प्रवृद्धालय-
स्वच्छन्दोन्मदकर्कटेट्टुरद्रितैर्भीमं वहिःकाननम् ।
अन्तर्वेश्मविलोलचर्मचटकापक्ष्माञ्चलोद्वीजन-
क्रीडासुप्तपिशाचदम्पतिपुरं राजन्भवद्विद्विषाम् ॥४॥

विश्वेश्वरस्य ।

स्रग्धरा

1595 क्रूरोत्कूजत्करेट्टुप्रतिरवविरसज्जर्जरग्रन्थिवन्धाः
स्थानार्थिप्रेतमल्लद्वयकलहसमावर्जितस्थूलशाखाः ।
गोलोमीच्छन्नमातृप्रतिकृतिविरतप्रत्यभिज्ञा दिवापि
त्वच्छत्रुग्रामदेवीनिलयनतरवस्त्रासमुत्पादयन्ति ॥५॥

1592 (c) Ed. घूत्कृति for घूत्कृत.

1593 (a) Srk. सारमवशं for मानमनवं.

(c) Ed. साप्रतम् for संप्रति.

(d) Srk. उपस्कृति for ०स्कृत, आदित्सति for आकर्षति

Srk.-anonymous.

1595 (a) I O., S दूरोत्कूजत् for क्रूरोत्कूजत्; विसरत् for विरसत्.

(b) S, I. O. स्थानार्थे for स्थानार्थि.

The poet's name is not given.

४६ अरिगृहम् ।

1596 द्वारं खड्गिभिरावृतं वहिरपि प्रस्विन्नगण्डैर्गजै- Kuval, p. 161
रन्त· कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः । Sv. 2569
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे Smv. 97.78
राजन्सैव चिरन्तनप्रणयिनी- Srk. 1403
शून्येपि राज्यस्थितिः ॥१॥ शार्दूलविक्रीडित

योगेश्वरस्य ।

1597 वन्यो हस्ती स्फटिकघटिते भित्तिभागेषु विम्बं
दृष्ट्वा रुष्टः प्रतिगज इति त्वद्द्विषां मन्दिरेषु ।
दन्ताघाताकुलितदशनस्तत्पुनर्वीक्षमाणो मन्दाक्रान्ता
मन्दं मन्दं स्पृशति करिणीशङ्कया साहसाङ्कः ॥२॥

वेतालस्य ।

1598 रन्ध्रे संन्यस्तदृष्टिः क्षितिनिहिततनुः
क्रोडसंलीनपुच्छः
प्रत्याशायोजितात्मा ग्रहणपरिणतः
स्तब्धकर्णो विशङ्कः । स्रग्धरा
संकोचाबद्धदेहो नियमितचरणः प्रस्फुरच्छ्मश्रुजाल·
शून्ये राजन्विडालस्तव रिपुभवने
मूषिकानुच्छिनत्ति ॥३॥

योगेश्वरस्य ।

1596 (a) Sv. वेत्रिभिः for खड्गिभिः, प्रक्लिन्न (also Smv.) for प्रस्विन्न.
Smv , Spd.—anonymous.
Srk —विजयपालस्य

1597 (a) Ed. भित्तिभागे स्वविम्बम् for भित्ति...विम्बम्
(b) Ed. रति for इति.

1598 (b) I.O., S करण्डो for कर्णो
(d) I. O., S मूषिकान् न for मूषिकानु.
Ed. तस्यैव for योगेश्वरस्य.

1599 वत्से माधवि तात चम्पक शिशो माकन्द कौन्दि प्रिये
Srk. 1412 हा मातर्मदयन्ति हा कुरबक भ्रातः खसर्मालति ।
शार्दूलविक्रीडित इत्येवं रिपुमन्दिरेषु भवतः शृण्वन्ति नक्तंचरा
गोलाङ्गूलविमर्दसंभ्रमवशादुद्यानदेवीगिरः ॥४॥

शुभाङ्कस्य ।

1600 स्नातः संप्रति वारिवाहसलिलैः संरूढशष्पाङ्कुर-
व्याजेनात्तकुशाः प्रणालसलिलैर्दत्त्वा
शार्दूलविक्रीडित निवापाञ्जलिम् ।
प्रासादास्तव विद्विषां परिपतत्कुड्यस्य पिण्डच्छला-
त्कुर्वन्ति प्रतिवासरं निजपतिप्रेताय
पिण्डक्रियाम् ॥५॥

महादेवस्य ।

४७ यशः ।

1601 मूलं फणाः फणिपतेर्गगनं च मध्यः
वसन्ततिलक शाखा दिशो जलधिमण्डलमालवालम् ।
त्रैलोक्यनाथ तव देव यशोद्रुमस्य
तारागणाः सुमनसः फलमिन्दुबिम्बम् ॥१॥

श्रीहनूमतः ।

Smv. 97.39 1602 मातुः खेदमयं ततान पृथुकः क्रोडेन धात्र्यामसौ
शार्दूलविक्रीडित रागाढ्यस्तरुणः पुरन्दरपुरस्त्रीन्यस्तकण्ठग्रहः ।

1599 (a) Srk कौन्ति for कौन्दि.

Srk—शुभाङ्गस्य.

1601 (a) I. O., S काल for फणि.

1602 (a) Smv. धात्र्याश्चरन् for धात्र्यामसौ.

(b) Ed. रागाद्यः for रागाढ्यः. Smv. श्री for स्त्री.

ज्यायानप्यभिनत्पितामहपदं नित्याविनीतस्तनू-
जन्मा ते यशसां गणस्तदुचितव्रीडोसि
तत्कीर्तने ॥२॥
छित्तपस्य ।

1603 बद्धो नैष न लङ्घितो न मथितः पीतो न वा वाडव-
व्यग्रो नापि यशोमयो यदुपतेरम्लायमानोम्बुधिः ।
अब्धीँल्लुब्धपराभवानधरयन्नर्वागथोर्वीभृतः — शार्दूलविक्रीडित
कुर्वन्गर्वैविलङ्घितावधिरधिब्रह्माण्डमारोहति ॥३॥
वाचस्पतेः ।

1604 ऐरावणन्ति करिणः फणिनोप्यशेषाः
शेषन्ति हन्त विहगा अपि हंसितारः । — Srk 1011
नीलोत्पलानि कुमुदन्ति च सर्वशैलाः — वसन्ततिलक
कैलासितु व्यवसिता भवतो यशोभिः ॥४॥
महाशक्तेः ।

1605 देव स्वस्ति वय द्विजास्तत इतस्तीर्थेषु निष्कल्मषाः
कालिन्दीसुरसिन्धुसङ्गपयसि स्नातुं समीहामहे ।
तद्याचेमहि सप्तविष्टपशुचीभावैकतानव्रतं — Srk. 995
संयच्छ स्वयश सितासितपथो- — शार्दूलविक्रीडित
भेदाद्विवेकोस्तु नः ॥५॥
रथाङ्गस्य ।

1602 (c) Smv. अभजत् for अभिनत्.
(d) Smv. कीर्तनात् for कीर्तने.

1604 (c) I O., S नीलोत्पलन्ति for नीलोत्पलानि.
Srk.—anonymous.

1605 (a) Srk. सिन्नासव for निष्कल्मषा
(c) Srk पिष्टप for विष्टप.
(d) Ed. स्वंयच्छस्व for संयच्छ.
Srk.—anonymous.

४८ सवीर्ययशः ।

1606 न तच्चित्रं चित्ते विततकरवालोग्ररसनो
Srk.1013 महीभारं सोढुं भुजभुजगराजः प्रभवति ।
शिखरिणी यदुद्भूतेनेदं नवबिसलतातन्तुशुचिना
यशोनिर्मोकेण स्थगितमवनीमण्डलमभूत् ॥१॥

संघश्रियः ।

1607 श्रीमन्पातालकुक्षिंभरि भरितसुरस्थानमम्भोधिरोधो-
रोधि क्ष्माशोधि शुद्धं प्रसरति यदिदं
त्वद्यशस्तत्किमाहु ।
स्रग्धरा तद्ब्रू मस्त्वत्प्रतापानलमिलनकृतक्वाथसंभारदूर-
स्फारोत्तालोर्यमभ्रंलिहलहरिभरो वर्धते
दुग्धसिन्धुः ॥२॥

श्रीकण्ठस्य ।

1608 चन्द्राभैर्भवतो यशोभिरमलैर्विस्तारितायां दिशि
ज्योत्स्नायां तव वैरिवर्गवदने विश्रान्तमन्धं तमः ।
शार्दूलविक्रीडित किं च भ्रूलतिकान्तपातमिलितश्रीभारसंवर्धित-
प्रेमाणि प्रहसन्ति बन्धुकुमुदान्यामोदवन्ति
स्फुटम् ॥३॥

गोसोकस्य ।

1609 दृष्टं संगरसाक्षिभिर्निगदितं वैतालिकश्रेणिभि-
Srk. 1000 र्न्यस्तं चेतसि खञ्जनैः सुकविभिः
शार्दूलविक्रीडित काव्येषु संचारितम् ।

1606 (a) Srk. यत्ते for चित्ते
(b) Srk. वोढुं for सोढुं.
1607 (b) I. O. किलाच्छः for किमाहु..
1608 (d) Ed. प्रसरन्ति for प्रहसन्ति.

उत्कीर्णं कुशलैः प्रशस्तिषु सदा गीतं च नाकेषदां
दानैर्निर्जितवैरिवीर भवतश्चन्द्रावदातं यशः ॥४॥
राजशेखरस्य ।

1610 मुक्ताशीकरनिर्भरासु सदसि क्षुण्णासु कुम्भस्थली-
ष्वादन्तः स्फुटकर्णचामरदशास्वावर्जिनां दन्तिनाम् । शार्दूलविक्रीडित
क्षेत्रीकृत्य वरूथिनीं युधि जयश्रीकर्षकेण द्विषां
येनोप्ता इव मुष्टिभिर्निजयशोबीजच्छटा रेजिरे ॥५॥
भिक्षो ।

४९ प्रशस्तयश ।+

1611 आक्षिप्ता चामरश्रीः प्रसभमपहृतः
पौण्डरीको विलासः
प्रच्छन्नो वीरकम्बुः समजनि
विहितः कण्ठभाराय हारः । स्रग्धरा
लुप्तो हासप्रकाशः कमपि परिभवं
प्रापितः पुष्पराशि-
श्चन्द्राभैर्यद्यशोभिः प्रतिधरणिभुजां
निह्नुता किं च कीर्तिः ॥१॥
श्रीमत्केशवसेनदेवस्य ।

1612 अम्भोधिक्षिप्तमुक्तारुचिहरिचरणोद्गीर्णगङ्गाम्बुतुल्यं
कालिन्दीफनकान्तिस्फुरितफण-
धरोन्मुक्तनिर्मोकरोचिः । स्रग्धरा

1609 (d) Srk. दारेरुज्जयनीभुजङ्ग for दानै...वीर
Srk.—anonymous.

\+ A प्रशस्ति for प्रशस्त

1611 (d) I. O., S निह्नुता for निह्नुता
Ed. केशवस्य for श्रीमत्केशवसेनदेवस्य

कर्णाटीकुन्तलान्तर्विगलितसुमनोदामरम्यं समन्ता-
च्छ्रीखण्डालेपलक्ष्मीमुपनयति यशो
यस्य खड्गप्रसूतम् ॥२॥

जलचन्द्रस्य ।

1613 भूचक्रं कियदेतदावृतमभूद्यद्वामनस्यांघ्रिणा
शार्दूलविक्रीडित नागानां कियदास्पदं यदुरसा लङ्घन्ति गूढाङ्घ्रयः
एकाहाद्यदनूरुरश्नुति कियन्मात्रं तदप्यम्बरं
यस्येतीव यशो ह्रिया त्रिभुवनं
व्याप्यापि नो तृप्यति ॥३॥

उमापतिधरस्य ।

1614 गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् ।
पृथ्वी गिरेर्गिरिमधिश्रितं तरति वारिधिं वारिधे-
र्यदीयमरिसुन्दरीनिकरपृष्ठलग्नं यशः ॥४॥

तस्यैव ।

1615 आस्ते दामोदरीयामुदरदरदरीं याधिशय्य त्रिलोकी
संमातुं शक्नुवन्ति प्रथिमभरवशात्तत्र नैतद्यशांसि ।
Nc. XII. 95 तामेतां पूरयित्वा निरगुरिव मधुध्वसिनः श्वेतपद्म-
Sv. 2520
Smv 97.23 च्छद्मापन्नानि तानि द्विपदशनसनाभीनि
स्रग्धरा नाभीपथेन ॥५॥

कविपण्डितश्रीहर्षस्य ।

1615 (a) Ed दरी for दरीम् Smv., Sv दामोदरीयामियमुदरदरीं for दा···री.
Nc., Sv. यावलम्ब्य for याधिशय्य.
(b) Sv. शक्तिमन्ति for शक्नुवन्ति. Nc., Sv, Smv. अत्र for तत्र.
Sv. नोत्थत् for नैतत्.
(c) Nc. एनां for एतां. Smv., Sv. पाण्डु for श्वेत.
Smv. attributes it to खण्डनकारश्रीहर्ष.

५० कीर्तिः ।

1616 का त्वं कुन्तलमल्लकीर्तिरहह क्वासि स्थिता न क्वचित्
सख्यस्तास्तव कुत्र कुत्र वद वाग्लक्ष्मीरुचः संप्रति । Srk. 1005
वाग्याता चतुराननस्य वदनं लक्ष्मीर्मुरारेरुरः शार्दूलविक्रीडित
कान्तिर्मण्डलमैन्दवं मम पुनर्नाद्यापि विश्रामभूः ॥१॥
छित्तपस्य ।

1617 रामः सैन्यसमन्वितः कृतशिलासेतुर्यदम्भोनिधेः
पारं लङ्घितवान्पुरा तदधुना नाश्चर्यमुत्पादयेत् ।
एकाकिन्यपि सेतुबन्धरहितान्सप्तापि वारां निधी- Srk. 1012
न्हेलाभिस्तव देव कीर्तिवनिता शार्दूलविक्रीडित
यस्मात्समुल्लङ्घति ॥२॥
तस्यैव ।

1618 किं वृत्तान्तैः परगृहगतैः किंतु नाहं समर्थ-
स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः । Sv. 2544
देशे देशे विपणिषु तथा चत्वरे पानगोष्ठ्या- Srk 996
मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः ॥३॥ Spd. 1227
तुतातितस्य । मन्दाक्रान्ता

1619 अनन्तासौ कीर्तिः कविकुमुदबन्धोः क्षितिपते-
स्त्रिलोकीयं क्षुद्रा तदिह कथमस्याः स्थितिरिति । शिखरिणी

1616 (b) Srk तथा कान्तयः for रुच संप्रति
Srk—anonymous.

1617 Srk.—anonymous.

1618 (c) Sv. गेहे गेहे for देशे देशे.
(d) Spd. देव for हन्त. Sv. Spd. मातङ्गदिवाकरस्य (Srk विद्यायाः) for तुतातितस्यः.

मुधेयं वः शङ्का कलयत कियद्दर्पणतलं
विशाला किं तत्र स्फुरति न कवीन्द्रप्रतिकृतिः ॥४॥

पञ्चाक्षरस्य ।

1620 ध्यायन्ती निरपाशनायकगुणं त्वत्कीर्तिरम्भोनिधे-
शार्दूलविक्रीडित भ्राम्यन्ति विपिनान्तरेषु विरहव्यग्रेव पाण्डुच्छवि ।
चन्द्रं निन्दति चन्दनं न सहते द्वेष्टि श्रियं शारदीं
दूरादेव निराकरोति करकाकर्पूरहारस्रजं ॥५॥

शरणस्य ।

५१ सवीर्यकीर्तिः ।

1621 वीरक्षीरसमुद्रसान्द्रलहरीलावण्यलक्ष्मीमुप-
Smv. 97 30 स्त्वत्कीर्तेस्तुलनां कलङ्कमलिनो धत्ते कथं चन्द्रमाः ।
शार्दूलविक्रीडित स्यादेव त्वदरातिसौधशिखरप्रोद्भूतशष्पाङ्कुर-
ग्रासव्यग्रमनाः पतेद्यदि पुनस्तस्याङ्कशायी मृगः ॥१॥

शाक्यरक्षितस्य ।

1622 निःसृत्याहवसागरादथ पुनः संसृत्य पृथ्वीतलं
Smv. 97 44 कृत्वाधो हिमशैलमीश्वरशिरःशीतांशुलेखामपि ।
शार्दूलविक्रीडित गङ्गेव स्मृतजन्मभूमिरमरैः साश्चर्यमालोकिता
कीर्तिस्ते प्रतिलोमलङ्घितवियद्ब्रह्माण्डमारोहति ॥२॥

वाक्पतेः ।

1619 (d) Ed. करीन्द्र for कवीन्द्र
The verse has been quoted by Aufrecht in ZDMG., 36, p. 538.

1621 (c) Smv. दूर्वा for शष्प.
(d) Smv. मतिः for मना..

1622 (a) Smv अनु for अथ. A संसृज्य for संसृत्य.
(d) Smv. त्वत्कीर्ति for कीर्तिस्ते, परं for पुनः. Smv.—anonymous.

1623 आसीदुत्त यदेतद्रणभुवि भवता वैरिमातङ्गकुम्भा-
न्मुक्ताबीजं विमुक्तं त्रिजगति जनयामास
कीर्तिद्रुमं ते ।
शेषो मूलं प्रकाण्डं हिमगिरिरुदधिर्दुग्धपूरालवालं Srk. 1006
ज्योत्स्नाशाखाप्रतानः कुसुममुडुचया यस्य चन्द्रः स्रग्धरा
फलं च ॥३॥
हरेः ।

1624 एका गङ्गा प्रयागे मलयपरिसरे चन्दनं मौक्तिकाली
कान्ताकण्ठे हिमांशुर्वियति सरसि च
श्वेतमब्जं तथास्याः ।
कालिन्दी कालसर्पा मरकततरलो लाञ्छनं भृङ्गमाले- स्रग्धरा
त्येवं ते यत्र कीर्तिं परिणमति युता
यत्र शत्रोरकीर्त्या ॥४॥
रामस्य ।

1625 सा चन्द्रादपि चन्दनादपि दरव्याकोषकुन्दादपि
क्षीराब्धेरपि शेषतोपि फणिनश्चण्डीशहासादपि । Srk. 997
कर्णाटीसितदन्तपत्रमहसोप्यत्यन्तमुद्द्योतिनी शार्दूलविक्रीडित
कीर्तिस्ते भुजवीर्यनिर्जितरिपोर्लोकत्रय भ्राम्यति ॥५॥
राजशेखरस्य ।

1623 (b) Srk तदेतत् for विमुक्तं.
(c) A पूर्णालवालम् for पूरालवालम्.
(d) A, Srk. उडुचयो for चया Srk.—anonymous.

1624 (b) Ed. तथान्या for तथास्याः
(d) Sp. तत्र for second यत्र.

1625 Srk. वार्तिककारस्य.

५२ प्रशस्तकीर्तिः ।*

1626 अन्तः सन्तोषबाष्पैः स्थगयति नयनं
न श्रुतिभ्रंशभीरु-
Nc. XII 39
Smv. 97·24
स्रग्धरा
र्नाङ्गेनानस्तिरोमा रचयति
पुलकश्रेणिमानन्दकन्दाम् ।
न क्षौणीभङ्गभीरुः कलयति च शिरःकम्पनं तत्र विघ्नः
शृण्वन्नेतस्य कीर्तीः कथमुरगपतिः
प्रीतिमाविष्करोति ॥१॥
कविपण्डितश्रीहर्षस्य ।

1627 क्षीरोदन्वानलीकः कपटमयतनुस्त्र्यम्बकस्याट्टहासो
मिथ्यानीहारसंपत्त्रिभुवनविवरे कृत्रिमा पौर्णमासी ।
स्रग्धरा
संवृत्ताम्भोदवृन्दस्फुरदुरुकरकासारसंदेहदायी
दायादः कुन्दभासां दिशि विदिशि
बभौ यस्य कीर्तिप्रतानः ॥२॥
वसुकल्पस्य ।

1628 कैलासे निह्नुतश्रीः परिपिहितवपुः
पार्वण श्वेतभानुः
स्रग्धरा
शेषः प्रच्छन्नवेशः कलयति न रुचिं
जाह्नवीवारिवेणिः ।

* I. O., S प्रशस्ति for प्रशस्त.

Ed. om. कविपण्डित in the poet's name.

1926 (a) Sp. गगनं for नयनं.

(a-b) Nc., Smv. न दृशस्ताभिराकर्णयिष्यन्नङ्गे for नयन नाङ्गे.

Smv. attributes it to खण्डनकारश्रीहर्ष.

1627 (b) Ed. संपत्ति for सपत्त्रि.

(c) Ed. संवर्ताम्भोद for संवृत्ताम्भोद.

1628 (a) Sp. मिलित for पिहित.

पीतः क्षीराम्बुराशिः प्रसभमपहृतः कुञ्जरो देवभर्तु-
र्यत्कीर्तीनां विवर्तै रजनि स
भगवानेकदन्तोप्यदन्त ॥३॥
श्रीमत्केशवसेनदेवस्य ।

1629 यद्धर्मोद्याति रोद्धुं त्रिपुरहरगिरिग्रामणीस्तन्नियन्तु
कौवेरीं कुम्भजन्मा व्रजति यदि तदा
दुर्धरा विन्ध्यवृद्धि । स्रग्धरा
इत्थं यत्कीर्तिराशौ त्रिदशपतिपुराक्रान्तिदत्तप्रयाणे
चिन्ताग्निः क्रूरकर्मा व्यथयति हृदयं
तेजसामीश्वरस्य ॥४॥
तस्यैव ।

1630 मलिनयति वैरिवदनं स्वजनं रञ्जयति आर्या
धवलयति धात्रीम् ।
अपि कुसुमविशदमूर्ति र्यत्कीर्ति श्चित्रमाचरति ॥५॥
जयदेवस्य ।

५३ कीर्तिगीतिः ।

1631 लीलालोलकराङ्गुलीहतिरणद्वीणागुणप्रोच्चर-
द्गान्धारध्वनिसंवदन्मृदुकलास्निग्धस्वरोद्गारिभिः । शार्दूलविक्रीडित
लोलन्मौलिभिरर्धमीलितलसन्नेत्रैर्वलद्भ्रूलतै-
र्गीयन्ते गगनेचरैः सुरपतेरग्रे भवत्कीर्तयः ॥१॥
सुरसेः ।

1632 भोगीन्द्रः प्रमदोत्तरङ्गमुरगीसंगीतगोष्ठीषु ते
कीर्तिं देव शृणोतु विंशतिशती यच्चक्षुषां वर्तते । Ar VII. 79

Sp. केशवस्य for श्रीमत् देवस्य.

1629 (c) Ed om दत्त

1630 (a) Ed सुजनं for स्वजनम्

1631 (c) I. O., A, S भ्रूतलै. for भ्रूलतैः.

Sv. 2638
शार्दूलविक्रीडित

रक्ताभिः सुरसुन्दरीभिरभितो गीतां तु कर्णद्वयी-
दुःस्थः श्रोष्यति नाम किं स हि
सहस्राक्षो न चक्षुःश्रवाः ॥२॥
मुरारेः ।

शार्दूलविक्रीडित

1633 गीयन्ते यदि पन्नगीभिरनिशं त्वत्कीर्तयस्तद्वयं
तुष्टा एव परं तु चेतसि चमत्कारोऽयमारोहति ।
तासां तादृशभावभङ्गिवलना संस्थानसंदर्शिनि
व्यालेन्द्रे रसधूतमूर्धनि महीचक्रं पुनर्भ्रंक्ष्यते ॥३॥
तस्यैव ।

Srk. 1007
शार्दूलविक्रीडित

1634 अद्य स्वर्गिवधूगणे गुणमय त्वत्कीर्तिमिन्दूज्ज्वला-
मुच्चैर्गायति निष्कलङ्किमदशामादास्यते चन्द्रमाः ।
गीताकर्णनमोदमुक्तयवसग्रासाभिलाषो वद
स्वामिन्नङ्कमृगः कियन्ति हि
दिनान्येतस्य वर्तिष्यते ॥४॥
तस्यैव ।

Kuval. p. 146
Nc. XII. 106
शार्दूलविक्रीडित

1635 अस्य क्षौणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥५॥
कविपण्डितश्रीहर्षस्य ।

1633 (a) Ed. अनघा for अनिशम्.
1634 (a) Srk. स्वर्ग for स्वर्गि
(c) Ed. वर for वद.
1635 (b) Kuval. बधिरश्राव्या for तिमिरप्रख्या°.
Ed. om कविपण्डित in the poet's name.

५४ उच्चावचचाटुः ।

1636 अभ्युद्धृता वसुमती दलितं रिपूरः
क्षिप्तक्रमं कवलिता बलिराजलक्ष्मीः ।
एकत्र जन्मनि कृतं तदनेन यूना
जन्मत्रये यदकरोत्पुरुषः पुराणः ॥१॥ Sk. I. 98 ; V. 471 Smv. 97.5 वसन्ततिलक

श्रीहनूमतः ।

1637 कर्णं चक्षुरजीगणत्तव पितुस्तातः पिता ते पुनः
शक्राधार कुमारमध्यजगणत्त्वं कातरत्वेन सः ।
देवोगान्महिषीति पश्यति जगत्त्वेव विवेक्तुं पुनः
प्रागल्भ्यं प्रथयन्ति वस्तदपि च
प्रजाधना साधवः ॥२॥ शार्दूलविक्रीडित

विद्यापतेः ।

1638 प्रभुरसि वयं मालाकारव्रतव्यवसायिनो
वचनकुसुमं तेनास्माभिस्तवादरढौकितम् ।
यदि तद्गुणं कण्ठे मा धास्तथोरसि मा कृथा
नवमिति कियत्कर्णौ धेहि क्षणं फलतु श्रमः ॥३॥ Srk. 1418 हरिणी

वीर्यमित्रस्य ।

1639 वक्त्रं साक्षात्सरस्वत्यधिवसति
सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः । स्रग्धरा

1636 (b) Sk , Smv. क्रोडीकृता बलवता for क्षिप्त.. लिता.
(c) Sk अत्रैक for एकत्र.
1637 (c) I. O., S तत्त्वं for त्त्वेवम्
1638 (c) Sp. मादा for माधा.
(d) Srk. कर्णे for कर्णौ.

वाहिन्यः पार्श्वमेताः क्षणमपि
भवतो नैव मुञ्चन्ति राज-
न्स्वच्छेऽतो मानसेस्मिन्नवतरति
कथं तोयलेशाभिलाषः ॥४॥

हरिश्चन्द्रस्य ।

1640 देवः कुप्यतु वा विचिन्त्य विनयं प्रीतोस्तु वा मादृशै-
र्वाञ्छद्भिः प्रभुकीर्तिमप्रतिहतां वक्तव्यमेवोचितम् ।
शार्दूलविक्रीडित सेवाभिर्यदि सेनवंशतिलकादासादनीयाः श्रियः
संकल्पानुविधायिनः सुरतरोस्तत्केन हार्यो मदः ॥५॥

शरणदेवस्य ।

श्रीधरदासकृतेस्मिन्सदुक्तिकर्णामृते तृतीयोयम् ।
चाटुप्रवाह ईप्सितफलप्रदो भवतु संततं कृतिनाम् ॥
इति श्रीमहामाण्डलिक-
श्रीधरदासकृतौ सदुक्तिकर्णामृते
चाटुप्रवाहो नाम तृतीयः ॥

वीचयः ५४ । श्लोकाः २७० ॥

1639 Ed. हरिचन्द्रस्य for हरिश्चन्द्रस्य.
Quoted by Aufrecth in ZDMG, 36, p 375, with स्वेच्छातो for स्वच्छेऽतो under Haricandra.

1640 I. O, S शरणस्य for शरणदेवस्य.

+अपदेशप्रवाहवीचयः ।

विष्णुर्महेशगणरविशशिनः शशिभास्करौ सरिन्नाथः ।
उत्कर्षोस्य घट्टितोद्भवमितोयमब्धेरुपालम्भः ॥१॥
निन्दा च वाडवयुतो जलधिः कंसोद्भवो जलं शङ्खः ।
मणिमरकते च नानारत्नं स्वर्णं च नदनद्यौ ॥२॥
सरसी शुष्कतडागः पूर्णसरो मीनसर्पमण्डूकाः ।
पद्मं मधुपोमरपुरसरसीरुहचूतकेतकीभ्रमरा· ॥३॥
पर्वतमलयौ शरभः सिंहः सिंहात्मजो जरत्सिंहः ।
हस्ती वन्यमतङ्गो मत्तगजः पङ्कपतितवद्धेभौ ॥४॥
हरिणो व्याधदवानलभीतकुरङ्गौ मृगी विविधपशवः ।
तरुकल्पविटपिचन्दनपिप्पलसहकारकङ्केल्यः ॥५॥
शाल्मलिरध्वतरुर्मरुविटपी नानापलाशिनो धन्वा ।
मेघो जलदश्लाघा पयोदनिन्दा च सारङ्गः ॥६॥
अपि दैवोपहतोसावनन्यगतिकोपि मानवानपि च ।
हंसोथ राजहंसः पिककीरौ विविधविहगाश्च ॥७॥
उच्चावचमिति वीचिभिरिह सतत्या द्वयेन संयुतया ।
श्रीधरदासेन कृतः सतापदेशप्रवाहोयम् ॥८॥

\+ Om. in A, S, I. O

Verse 1 (b) Ed. घटोद्भव for घट्टितोद्भव

,, 2 (a) Sp. कलसोद्भवो for कंसोद्भवो

,, 4 (a) To this line A adds च.

(b) Ed बद्धगजौ for बद्धेभौ

,, 5 (b) S, I. O. कङ्केल्लि for कङ्केल्यः.

,, 7 (b) A, I. O. om. च.

,, 8 (b) S, I. O. सताम् for सता.

१ वासुदेवः।

1641 भूता यत्र तिमिङ्गिलप्रभृतयो ये यादसामग्रिमा-

शार्दूलविक्रीडित स्ते वैसारिणवेशकेशवशिशोर्जाता न रात्नौ पुनः।

पृष्ठप्रोञ्छिततोयतुच्छजलधेरापूर्य येनान्तरं

ताः कल्लोलपरम्परा इव परं देहत्वचो दर्शिताः ॥१॥

क्षियाकस्य।

1642 भ्रमति गिरिराट् पृष्ठे गर्जत्युपश्रुति सागरो

Srk. 118 दहति विततज्वालाजालो जगन्ति विषानलः।

Smv. 108.2 स तु विनिहितग्रीवाकण्ठ· कटाहपुटान्तरे

हरिणी स्वपिति भगवान्कूर्मो निद्राभरालसलोचनः ॥२॥

चिरन्तनशरणस्य।

1643 जायन्ते बहवोऽत्र कच्छपकुले किं तु क्वचित्कच्छपी

नैकाप्येकमसूत सूनुमपरं सूतेन वा सोष्यते।

Srk. 1105 आकल्पं धरणीधरोद्वहनतः सन्तापखिन्नात्मनो

शार्दूलविक्रीडित यः कूर्मस्य दिनानि नाम

कतिचिद्विश्रामदानक्षमः ॥३॥

शतानन्दस्य।

1641 (b) Ed. राज्ञौ for रात्नौ

Ed. क्षियंकस्य for क्षियाकस्य

1642 (b) Smv. जालैः for जालो Ed, A विषानन· for विषानलः

(c) Smv. काण्डः for कण्ठः

Smv. शरण्यैकस्य for चिरन्तनशरणस्य.

Srk —anonymous.

1643 (b) Srk. नापि च पुनः for सूनुमपरं

(c) Srk. संकोच for संताप

Srk. हनूमत· for शतानन्दस्य.

1644 निष्कन्द्रामरविन्दिनीं स्थपुटितोद्देशां स्थलीं पल्वले
जम्बालाविलमम्बु कर्तुमपरा सूते वराही सुतान्।
दंष्ट्रायां चतुरर्णवोर्मिपटलैराप्लावितायामियं
यस्या एव शिशोः स्थिता विपदि भू
सा पुत्रिणी पोत्रिणी ॥४॥
अभिनन्दस्य।

Sk IV. 94
Spd. 1214
Smv. 366
शार्दूलविक्रीडित

1645 अपत्यानि प्रायो दश दश वराही जनयति
क्षमाभारे धुर्यः स पुनरिह नासीन्न भविता।
पदं कृत्वा यः स्वं फणिपतिफणाचक्रवलये
निमज्जन्तीमन्तर्जलधि वसुधामुद्वलयति ॥५॥
वराहस्य।

Srk 1206
शिखरिणी

२ महादेवः।

1646 देवैर्दुग्धपयोधिरोधसि पुरा कैर्नाम मन्थाचल-
क्षोभप्रोद्गतचन्द्रमःप्रभृतये न प्रेषिताः पाणयः।
स्वीचक्रे परमेक एव भगवानुद्विग्नलोकत्रयी-
रक्षार्थे कटुकालकूटगरलग्रासं स गौरीश्वरः ॥६॥
वासुदेवसेनस्य।

शार्दूलविक्रीडित

1647 छिन्ते ब्रह्मशिरो यदि प्रथयति प्रेतेषु सख्यं यदि
क्षीबः क्रीडति मातृभिर्यदि रतिं
धत्ते श्मशाने यदि।

शार्दूलविक्रीडित

1644 (a) Spd., Smv. कसेरुस्थलीम for स्थली पल्वले.
(b) Spd., Smv इतरा for अपरा
(d) Spd. वसुमती for विपदि भू. Sp. पौत्रिणी for पोत्रिणी. Spd. transposes the last two words.

Smv, Spd.—anonymous

1645 (d) Srk. उत्तुलयति for उद्वलयति.

1646 Ed. वसुदेवस्य for वासुदेवसेनस्य.

सृष्ट्वा संहरति प्रजा यदि तदाप्याधाय भक्त्या मन-
स्त्वं सेवे करवाणि किं त्रिजगती शून्या
स एवेश्वरः ॥२॥

उमापतिधरस्य ।

1648 त्वं चेत्संचरसे वृषेण लघुता का नाम दिग्दन्तिनां
Kuval. p. 154 Smv. 36 I शार्दूलविक्रीडित व्यालैः कङ्कणकुण्डलानि कुरुषे हानिर्न हेम्नामपि ।
मूर्धन्यं तनुषे जडांशुमयशः किं नाम लोकत्रयी-
दीपस्याम्बुजबान्धवस्य जगतामीशोसि
किं ब्रूमहे ॥३॥

शैलसर्वज्ञस्य ।

1649 आहारो गरलं तृतीयमलिके चक्षुः कपालं करे
वासः कुञ्जरचर्म भस्मनि रतिर्भूषा भुजङ्गाधिपः ।
शार्दूलविक्रीडित जन्मालक्ष्यमसाक्षिकं कुलमविज्ञाता च जातिं कथं
सेव्योस्माभिरसौ पिशाचपरिषद्भर्ता
हताः स्म वयम् ॥४॥

धर्मयोगेश्वरस्य ।

1650 पाणौ ब्रह्मकपालमस्थिभिरलंकारोङ्गरागश्चिता-
भस्माव्याहतमुत्तरीयमुरगः क्रीडा समं मातृभिः ।
शार्दूलविक्रीडित यस्यैतान्यसमञ्जसानि तमनाचारैः पिशाचैर्वृतं
कः स्थाणुं फलवाञ्छया
वद वृषादन्यो जनः सेवते ॥५॥

तस्यैव ।

1648 (b) Kuval. भूषणानि for कुण्डलानि. Smv. हेम्न. पुन for हेम्नामपि.
(c) Kuval. कुरुषे for तनुषे.
Smv. मूर्ध्ना चेद्वहसे for मूर्धन्यं तनुषे. Kuval. जलांशु for जडांशु.
Smv. उमापतिधरस्य for शैलसर्वज्ञस्य.

३ गणा ।

1651 तुल्येऽपीश्वरसेवा कर्म न विद्मः पुराकृतं कीदृक् ।
भृङ्गी यदस्थिशेषो भृशतरमकृशश्च कूष्माण्डः ॥१॥ आर्या
वाचपतेः ।

1652 एको गिरिशः स्वामी गणता तुल्यैव वल्लभत्व च । आर्या
किं कुर्मः कर्मगतौ शुष्यति
भृङ्गी विनायकः पीनः ॥२॥
कस्यचित् ।

1653 कपर्दी भूतिसम्पन्नो जगतीपतिरद्वयः । अनुष्टुप्
धिग्दैवमव्ययः सोपि भृङ्गी शुष्यत्यतो भृशम् ॥३॥
अमोघस्य ।

1654 स्कन्दे मन्दावधानं चरति गणपतौ मौलिपातं न धत्ते
वृन्दे वृन्दारकाणां विनयवति
भृशं नादरानातनोति ।
किं भूम्ना यश्च देवीं न
नमति गिरिजां तस्य निर्व्याजवृत्तेः स्रग्धरा
क्षीणस्याप्येकनिष्ठा जयति
भगवती भृङ्गिणस्तस्य भक्तिः ॥४॥
उमापतिधरस्य ।

1655 कूटस्थं श्रवणोपकण्ठविलसत्क्रूरद्विजिह्वाश्रयं
दक्षद्वेषिणमंघ्रिलङ्घितवृषं वैषम्यभीमेक्षणम् । शार्दूलविक्रीडित
ईशं निर्गुणमव्ययप्रकृतिकं संसेव्य भृङ्गी चिरा-
द्यज्जीवत्यतिदुर्बलेन वपुषा मन्ये स एवोत्सवः ॥५॥
कस्यचित् ।

1653 S अमोघदेवस्य for अमोघस्य

1654 (d) S, I. O. भृङ्गिणो भर्ग for भृङ्गिणस्तस्य.

Sp. उमापते॰ for उमापतिधरस्य. Ed. om. poet's name.

1655 (b) Sp. भाल for भीम.

४ सूर्यः ।

1656 किं नैव सन्ति सुबहूनि महामहांसि
चन्द्रोप्यलं भुवनमण्डलमण्डनाय ।
Srk 1202 सूर्यादृते न तदुदेति न चास्तमेति
वसन्ततिलक येनोदितेन दिनमस्तमितेन रात्रिः ॥१॥

आनन्दवर्धनस्य ।

1657 रात्रावोषधयो ज्वलन्ति कलयन्त्यौज्ज्वल्यमप्यग्नयो
शार्दूलविक्रीडित ज्योत्स्नाश्चन्द्रमसि स्फुरन्ति
दधति ज्योतींषि तेजस्विताम् ।
अन्यच्च क्रिमयोपि बिभ्रति महोलेशानमुष्यैव ताः
सर्वा एव निधेस्त्विषां
भगवतो दीप्तिप्रतिच्छायिका· ॥२॥

उमापतिधरस्य ।

1658 अस्यामोषधयो ज्वलन्तु दधतु ज्योतींषि कीटा अपि
प्रोन्मीलन्तु भुजङ्गमौलिमणयः क्रीडन्तु दीपाङ्कुराः ।
शार्दूलविक्रीडित प्रष्टव्या खलु यूयमेव यदि कोप्यस्तं गते भास्वति
प्रौढध्वान्तपयोधिमग्नजगतीहस्तावलम्बक्षमः ॥३॥

जलचन्द्रस्य ।

1659 अस्मिन्नक्रमहविवेकविकले कालाधमे नीरदैः
शार्दूलविक्रीडित संनद्धैरभितो निरुद्धगगनाभोगासु दिग्भित्तिषु ।

1656 (a) Srk. उद्यन्तु नाम for किं...सन्ति.

Srk.—anonymous.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 364.

1657 (b) I. O. चन्द्रमभि for चन्द्रमसि.

(c) I. O., S महावेशानमुष्यैव for महो...व.

(d) Ed. छायिका for छायिकाः.

भानोर्न प्रसरन्तु नाम किरणाः किं त्वस्य तेजस्विनः
सत्तामात्रपरिग्रहेण विकसन्त्यद्यापि पद्माकराः ॥४॥
वासुदेवस्य ।

1660 जगन्नेत्रश्रेणीतिमिरहरसिद्धाञ्जनसखा
मयूखा यस्यैते त्रिभुवनममोघं विदधति ।
अये कर्मालङ्घ्यं कलय किमपीदं तनुभृता-
मुलूकानामन्धंकरणकिरणः सोम्बरमणिः ॥५॥ शिखरिणी
रविगुप्तस्य ।

५ चन्द्रः ।

1661 सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका
विधातुर्दोषोयं न च गुणनिधेस्तस्य किमपि ।
स किं नात्रेः पुत्रो न किमु हरचूडार्चनमणि-
र्न वा हन्ति ध्वान्तं जगदुपरि किं वा न वसति ॥१॥ शिखरिणी
दङ्कस्य ।

1662 अस्मिन्नभ्युदिते जगत्त्रयदिशामुल्लासहेतौ दिशा-
मास्यम्लानिहरे सुधारसनिधौ देवे निशास्वामिनि ।
वक्रं मुद्रितमम्बुजन्म भवता चेत्किं ततः शाश्वतं
नैतस्येश्वरमौलिमण्डनमणेर्गायन्ति विश्वे यशः ॥२॥ शार्दूलविक्रीडित
वैद्यगदाधरस्य ।

1663 अजनि भगवानस्माद्वेधाः शिरःसु सुधाभुजां
कृतपदमिदं चैतद्देव्याः श्रियो धृतिमन्दिरम् ।
तदिह भुवनाभोगश्लाघ्ये सरोरुहि यच्चिरं
शशधर तव द्वेषारम्भः स एष जडग्रहः ॥३॥ हरिणी
तस्यैव ।

1664 नयनमसि जनार्दनस्य शम्भो-
र्मुकुटमणि सुदृशां त्वमादिदेवः । Spd. 755 पुष्पिताग्रा

1663 (c) Ed. सिरोरुहि for सरोरुहि.

त्यजसि न मृगमात्रमेतदिन्दो
विरमति येन कलङ्ककिंवदन्ती ॥४॥

रामदासस्य ।

वसन्ततिलक

1665 आशाः प्रसादयतु पुष्यतु वा चकोरा-
न्कामं तनोतु कुमुदेषु मुदं सुधांशुः ।
एकः स एव परमुत्कटराहुदन्त-
पत्रप्रवेशसमदुःखसुखः कुरङ्गः ॥५॥

योगेश्वरस्य ।

६ चन्द्रसूर्यौ ।

शार्दूलविक्रीडित

1666 चारित्राणि रवेर्जयन्ति जगतामग्रे तमो दुर्गतिं
दृष्ट्वास्तं व्रजतापि येन शशभृत्यारोपिता दीप्तयः ।
प्रीताः स्मः पुनरस्य संप्रति सदाचारेण शीतद्युते-
र्यत्तद्बन्धुषु पङ्कजेषु किमपि प्रारम्भि दुर्नाटकम् ॥१॥

जलचन्द्रस्य ।

हरिणी

1667 दिवसरजनीनाथौ पुंसः परस्य विलोचने
कमलकुमुदानन्दग्रन्थी तमःपरिपन्थिनौ ।
तपनशशिनौ सृष्ट्वा राहुग्रहं सृजता त्वया
कथमपयशस्तादृग्धातः स्वहस्तितमात्मनः ॥२॥

वैद्यगदाधरस्य ।

1668 विरम तिमिर साहसादमुष्माद्
Spd. 763 दिनमणिरस्तमुपागतस्ततः किम् ।

1664 (c) Spd. एकम् for एतत्
1667 (c) S, I. O. बाहु (?) for राहु
1668 (b) Smv., Spd. यदि रविरस्तमितः स्वतः for दिन...गत..

कलयसि न पुरो महो महोर्मि- Smv. 11.6
प्लुतवियदभ्युदयत्ययं सुधांशुः ॥३॥ पुष्पिताग्रा

श्रीवल्लालसेनदेवपादानाम् ।

1669 तत्तावदेव शशिनः स्फुरितं महीयो
यावन्न तिग्मरुचिमण्डलमभ्युदेति । Sk. II. 87
अभ्युद्गते सकलधामनिधौ तु तस्मि- Sv. 555
न्निन्दोः सिताभ्रपटलस्य च को विशेषः ॥४॥ Srk. 1205
वसन्ततिलक

मधुकूटस्य ।

1670 विश्वेषां दधता प्रबोधपदवीं येनानुषङ्गात्कृताः
स्वेषामम्बुरुहां श्रियः स भगवानुष्णोपि
सेव्यो रविः । शार्दूलविक्रीडित
शीतेनापि किमिन्दुना यदुदये तस्यैव यद्बान्धवै-
रुद्बुद्धं कुमुदैरिदं तु शिरसा
कृत्स्नं जगद् घूर्णते ॥५॥

उमापतिधरस्य ।

1668 (c) Smv. महा for महो.
(d) Smv., Spd. द्युतिनिधिर० for प्लुत वियद०, शशाङ्कः for सुधांशुः.
Spd., Ed वल्लालसेनस्य for श्री ..पादानाम्.

1669 (b) Sv. तीक्ष्ण for तिग्म उपैति (Srk. उदैति) for उदेति.
(c) Sk. अभ्युद्यते for अभ्युद्गते.
(d) Sv. उद्यते for उद्गते, च for तु. Sk., Sv. शकलस्य for पटलस्य.
Sv. ascribes the verse to प्रकाशदत्त.
Srk.—anonymous.

1670 (a) S, I. O. वदरी for पदवीम् ; येनोन्नताङ्गात् for येनानुषङ्गात्
(b) I. O , S नष्टो for उष्णो

७ समुद्रः ।

1671 आच्छिद्य लक्ष्मीमित एव पूर्व-
मत्रैव विस्रम्भसुखप्रसुप्तः ।
इन्द्रवज्रा
एकः परं वेद स कैटभारि-
र्महाशयत्वं मकरालयस्य ॥१॥

दशरथस्य ।

1672 यद्यपि स्वच्छभावेन दर्शयत्यम्बुधिर्मणीन् ।
Spd. 1079
Sv. 855
तथापि जानुदघ्नोऽयमिति चेतसि मा कृथाः ॥२॥
अनुष्टुप्

भाष्यकारस्य ।

1673 उच्चैरुन्मथितस्य तेन बलिना दैवेन धिक्कर्मणा
लक्ष्मीमस्य निरस्यतो जलनिधेर्जातं किमेतावता ।
Srk. 1055
गाम्भीर्यं किमयं जहाति किमयं
शार्दूलविक्रीडित
पुष्णाति नाम्भोधरा-
न्मर्यादां किमयं भिनत्ति किमयं न त्रायते पत्रिणः ॥३॥

लक्ष्मीधरस्य ।

1674 अये वारां भर्तः कुलिशकरकोपप्रतिभया-
शिखरिणी
दयं पक्षप्रेम्णा गिरिपतिसुतस्त्वामुपगतः ।

1671 (a) S, I. O. इदमेव for इत एव.
(b) S, I. O. महाशमत्वम् for महाशयत्वम्.

1672 (a) Sv. उदधि for अम्बुधि.
Sv., Spd.—anonymous,
This verse has been quoted by Aufrecht in ZDMG, 36, p. 370.

1673 (b) I. O. निरस्यता for निरस्यतो. I. O. यातं for जातम्.
(d) Ed. जहाति for भिनत्ति. Srk. वाडवम् for पत्रिणः.
Srk.—anonymous.

1674 (b) A अनुगतः for उपगतः.

त्वदन्तर्वास्तव्यो यदि पुनरयं वाडवशिखी
प्रदीप्तः प्रत्यङ्गं ग्लपयति ततः कोऽस्य शरणम् ॥४॥

विभोकस्य ।

1675 कियानिन्दुस्तस्मिन्नसति भवतः कैव गणना
त्वमेतेनैवेह प्रसभमसि रत्नाकर इति । शिखरिणी
दिशो विस्फायन्तां भवतु कृतकृत्यः स्मरहरो
हरेरास्तां चक्षुः प्रसरतु यशस्ते दिशि दिशि ॥५॥

शुङ्गोकस्य ।

८ समुद्रोत्कर्षः ।

1676 मर्यादैकपरायणस्य जलधेर्वेलातटक्ष्मारुहां
यल्लक्ष्मीरनपायिनी भगवतो माहात्म्यमस्यैव तत् । शार्दूलविक्रीडित
एतस्मिन्क्षुभिते तु वीचिवलनैर्विश्वं निपीय स्थिते
सूर्याचन्द्रमसोरपीह न कथा केमी तदान्तद्रुमाः ॥१॥

धीतोकस्य ।

1677 एकेनैव पयोधिना जलमुचस्ते पूरिताः कोटिशो
जातो नास्य कुशाग्रलीनतुहिनस्वल्पोऽपि तोयव्ययः । Srk. 1047
आहो शुष्यति दैवदुर्विलसितैरम्भोधिरम्भोमुचः शार्दूलविक्रीडित
संभूयापि विधातुमस्य रजसः
स्तैमित्यमप्यक्षमाः ॥२॥

शब्दार्णवस्य ।

1674 (c) A शिखा for शिखी.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 543, with राशे for भर्तः (a).

1676 (c) I. O., S रमणै for वलनै.

1677 (a) Srk. अपि for एव.
(c) Srk. दृष्टिवलनादम्भोभि. for दुर्विलसितैरम्भोधिः.
(d) Srk. रजसि for रजसः.

Srk.—anonymous.

1678 किं ब्रूमो जलधेः श्रियं स हि खलु श्रीजन्मभूमिः स्वयं
वाच्यः किं महिमास्य यस्य हि
किल द्वीपं महीति श्रुतिः ।
Smv. 104.10
Srk. 1196
शार्दूलविक्रीडित
त्यागः कोपि स तस्य विश्रुति
जगद्यस्यार्थिनोप्यम्बुदाः
शक्तेः कैव कथापि यस्य भवति
क्षोभेण कल्पान्तरम् ॥३॥
तस्यैव ।

1679 एतस्माज्जलधेर्जलस्य कणिकाः काश्चिद् गृहीत्वा ततः
पाथोदाः परिपूरयन्ति जगतीं रुद्धाम्बरा वारिभिः ।
अस्मिन्मन्दरकूटकोटिघटनाभीतिभ्रमत्तारकां
प्राप्यैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः ॥४॥
Smv 104.9
Srk. 1197
शार्दूलविक्रीडित
हरेः ।

1680 मर्यादाभङ्गभीतेरमृतमयतया धैर्यगाम्भीर्ययोगा-
न्न क्षुभ्यन्त्येव तावन्नियमितसलिलाः
सर्वदैते समुद्राः ।
आहो क्षोभं व्रजेयुः क्वचिदपि समये दैवयोगात्तदानीं
न क्षोणी नाद्रिवर्गो न च रविशशिनौ
सर्वमेकार्णवं स्यात् ॥५॥
Srk. 1048
स्रग्धरा
सुवर्णरेखस्य ।

1678 (b) Smv., Srk अपि for अस्य, नव for किल

(c) Smv. त्यागस्तस्य स कोपि for त्याग ..तस्य. Srk जगन्त्यस्यार्थिनो for जगद्यस्यार्थिनो.

(d) Smv. शक्तिः कापि तथा हि for शक्तेः....कथापि.

Smv.—anonymous.

Srk —वाचस्पतेः

1679 Smv. जलमानुषीरुद्रस्य (Srk. मुञ्जराजस्य) for हरेः.

1680 (a) Srk. अमितरसतया for अमृतमयतया.

(d) Srk. वर्गा for वर्गो.

Srk.—anonymous.

९ अगस्त्यहस्ते समुद्रः ।

1681 व्याप्याशाः शयितस्य वीचिवलनैरुल्लिख्य खं प्रेङ्खत
सिन्धोर्लोचनगोचरः स महिमा तेषां तनोत्यद्भुतम् । Srk. 1058
संश्लिष्टाङ्गुलिरन्ध्रलीनमकरग्राहावलिर्नीरवो शार्दूलविक्रीडित
यैर्नीयं करशुक्तिकोदरगतो दृष्टो मुनेरञ्जलौ ॥१॥
अभिनन्दस्य ।

1682 उद्दामार्कमरीचिमूर्छितदृशां येनाध्वगानामयं
वेलालम्बनजागरूकमनसामारम्भि कर्णज्वरः ।
क्लेशोच्छृङ्खलचेतसः प्रविशतो गण्डूषगर्भं मुने- शार्दूलविक्रीडित
र्लीनः कुत्र महार्णवस्य स पुनः कल्लोलकोलाहलः ॥२॥
जलचन्द्रस्य ।

1683 अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः । Kuval. p 108
क एवं जानीते निजकरपुटीकोटरगतं Smv. 27.18 Srk. 1025
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनि ॥३॥ शिखरिणी
विद्यापतेः ।

1684 अये वारां राशे कतिपयपयोबिन्दुविभवै-
रमीभिर्मा गर्वं वह निरवलेपा हि कृतिनः । शिखरिणी
न किं लोपामुद्रासहचरकरक्रोडकुहरे
भवान्दृष्टः कष्टं प्रचलजलजन्तुव्यतिकरः ॥४॥
विश्वेश्वरस्य ।

1681 (a) Srk. शिखरै for वलनै.
(b) Srk. गोचरस्य for गोचर स
(d) Sp. कुण्डिक for शुक्तिक Srk. लघु for गतो.

1683 Smv. वररुचे. (Srk. कविनन्दस्य) for विद्यापते.. According to Kuval., the verse occurs in the *Bhallata-śataka*.

1684 (d) A, I. O. प्रवल for प्रचल.

1685 तावद्वेला विषमसलिलावर्तनाभीनिकुञ्ज-
क्रोडभ्राम्यन्मकरशिखरिग्रावरौद्रः समुद्रः ।
दृष्टो यावन्न खलु चुलुकीभूतनिष्पन्दमूर्ति-
र्लोपामुद्रासहचरकरस्वस्तिकोत्सङ्गवर्ती ॥५॥

मन्दाक्रान्ता

लोपामुद्राकवेः ।

१० समुद्रोपालम्भः ।

1686 दूरीभूतरतिश्चिरं मरकते मुक्तासु मुक्तस्पृहः
सानन्दोसि न चेन्द्रनीलमणिषु त्यक्तादरो विद्रुमे ।
त्वां संसेव्य समुद्र संप्रति पुनर्दृष्टस्वभाग्यक्षय-
क्षीणोहं सकलार्थिसार्थसुलभामभ्यर्थये

शार्दूलविक्रीडित

शुक्तिकाम् ॥१॥

इन्द्रदेवस्य ।

1687 प्रमोदादुद्बाष्पः पुलकपटलैरर्चिततनुः
शिरो धूत्वा धूत्वा किमिति जलधेर्गायसि यशः ।
किमेतेनास्माकं फणिमकरनक्रप्रणयिना
नमस्तेभ्यो लभ्या य इह गुणभाजोऽपि मणयः ॥२॥

शिखरिणी

वैद्यगदाधरस्य ।

1688 विगर्जामुन्मुञ्च त्यज तरलतामर्णव मना-
गहंभावः कोयं कतिपयमणिग्रावगुडकैः ।
दृशं मेरौ दद्याः स हि मणिमयप्रस्थमहितो
महामौनः स्थैर्यादथ भुवनमेव द्रढयति ॥३॥

Srk. 1122
शिखरिणी

शतानन्दस्य ।

1687 (a) Sp., S, I. O. अर्घित (A अन्वित ?) for अर्चित.
(b) A गायति for गायसि.

1688 (b) Srk. अहंकार. for अहंभावः.
(c) A, S भृशं for दृशम्.
(d) Srk. स्थिरयति for द्रढयति.

Srk.—anonymous.

1689 अजायन्तैतस्मादमृतशशिलक्ष्मीप्रभृतयः
परित्राताश्चेन्द्रात्कुलशिखरिणः पूर्वममुना ।
उपेता इत्येवं तव जलनिध तीरमधुना शिखरिणी
विगर्जाभिः किं नः श्रुतिपुटमहो जर्जरयसि ॥४॥

सरोरुहस्य ।

1690 श्रमपरिगतैर्विस्तीर्णश्रीरसीति परं पयः
कतिपयमितं त्वत्तोस्माभिः समुद्र समीहितम् । Srk. 1081
किमसि नितरामुत्क्षुब्धोर्मिः प्रसीद नमोस्तु ते हरिणी
पथि पथि शिवाः सन्त्यस्माकं शतं कमलाकराः ॥५॥

कमलगुप्तस्य ।

११ समुद्रनिन्दा ।

1691 ग्रावाणो मणयो हरिर्जलचरो लक्ष्मीः पयोमानुषी Sv. 864
मुक्तौघाः सिकताःप्रबाललतिकाः शैवालमम्भ सुधा । Spd. 1084
तीरे कल्पमहीरुहः किमपरं सर्वत्र नामाम्बुधे- Smv. 104. 1
र्दूरात्कर्णरसायनं निकटतस्तृष्णापि नो शाम्यति ॥१॥ शार्दूलविक्रीडित

कस्यचित् ।

1692 उपाद्ध्वं तत्पान्थाः पुनरपि सरो मार्गतिलकं Sk. IV. 97
यदासाद्य स्वेच्छं विहरथ विनीतक्लमभराः । Smv. 31. 12

1689 Quoted by Aufrecht in ZDMG, 36, p. 528.

1690 (a) A, S भ्रम for श्रम. Srk. transposes परं and पयः.
(b) Srk. कतिपयमपि for कतिपयमितं

Srk.—अचलस्य.

1691 (b) Sv. मुक्तौघ for मुक्तौघाः, सिकता for सिकताः.
(c) Spd, Sv. महीरुहाः for ०रुहः, नामापि (Spd. नाम्नापि) रत्नाकरो (Smv. नामाम्बुधेर्वर्ण्यते) for सर्वत्र...धेः.
(d) Spd. दूरे for दूरात्.

1692 (a) Smv. कथमपि for पुनरपि.
(b) Smv., Srk. स्वच्छं for स्वेच्छं. S, A, I. O. विहरत, (Sk. Smv., Srk. विलसथ) for विहरथ. Sk., Smv. विलीन for, विनीत.

Srk. 1069 इतस्तु क्षाराब्धेर्जरठकमठक्षुण्णपयसो
शिखरिणी निवृत्तिः कल्याणी न पुनरवतारः कथमपि ॥२॥

पापाकस्य ।

1693 यद्वीचीभिः स्पृशसि गगनं यच्च पातालमूलं
Spd. 1090 रत्नैरुद्दीपयसि पयसा यत्पिधत्से धरित्रीम् ।
Smv. 27 14 धिक्तत्सर्वं तव जलनिधे यद्विमुच्याश्रुधारा-
Srk. 1044
मन्दाक्रान्ता स्तीरे नीरग्रहणविमुखैरध्वगैरुज्झितोसि ॥३॥

शुभाङ्कस्य ।

1694 कस्त्वं कोपि कुतोसि रत्नवसतेस्तीरादहं नीरधे-
र्लब्धं किंचन गर्जितैर्बधिरता दुर्व्याहति सैकतैः ।
शार्दूलविक्रीडित मा खेदं कुरु तादृगौर्वदहनज्वालावलीदुःसहं
क्षारोदं यदुपास्य जीवसि
सखे श्लाघ्यं न तन्मन्यसे ॥४॥

कस्यचित् ।

1695 धिग्गाम्भीर्यं धिगमृतमयत्वं च जलधे-
Srk. 1108 र्धिगेतद्द्राघीयःपृथुलतरकल्लोलभुजताम् ।
शिखरिणी यदेतस्यैवाग्रे कवलिततनुर्दावदहनै-
र्न तीरारण्यानी सलिलचुलुकेनाप्युपकृता ॥५॥

कपालेश्वरस्य ।

1692 (c) Sk. क्षिप्त for क्षुण्ण. Smv. मकर for कमठ.
Smv.—यायाकस्य.

1693 (b) उद्योतयसि for उद्दीपयसि, transposes पिधत्से and धरित्रीम्.
(c) Spd., Smv. transpose तत् and सर्वं. Smv. धारां for धारा.
(d) Spd., Smv. रसिकै for विमुखै.
I. O., S शुभाङ्कस्य. Spd. गौडाभिनन्दस्य.
Smv., Srk.—anonymous.

1695 (b) Srk. एतां for एतत्, प्रचल for पृथुल.
(d) ZDMG अभ्युपकृता for आप्युपकृता.
Srk. कर्णिकाकारस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 510

१२ सवाडवसमुद्रः ।

लोला श्री शशभृत्कलङ्कमलिनः क्रूरो मणिग्रामणी-
र्माद्यत्यभ्रमुवल्लभोपि सततं तत्कालकूट विषम् । Srk 1045
इत्यन्तःस्वकुटुम्बदुर्णयपरामर्शाग्निना दह्यते शार्दूलविक्रीडित
गाढं वाडवनामधेयदहनव्याजेन वारां निधिः ॥१॥

वाणीकुटिललक्ष्मीधरस्य ।

विस्तारो यदि नेदृशो न यदि तद्गाम्भीर्यमम्भोनिधे-
र्न स्याद्वा यदि सर्वसत्त्वविषयस्तादृग्दयानुग्रहः । Smv 27.17 Srk. 1210
अन्तः प्रज्वलता पयांसि दहता ज्वालावलीं मुञ्चता शार्दूलविक्रीडित
के न स्युर्वडवानलेन बलिना भस्मावशेषीकृताः ॥२॥

केशटस्य ।

धिग्वाडवं दहनमर्थितया विपक्ष-
मभ्येति यः स्वजठरप्रतिपूरणाय ।
धिग्वारिराशिमपि यो हि तथाविधस्य Sv. 978
शत्रोर्जलैरपि न पूरयतेभिलाषम् ॥३॥ वसन्ततिलक

तस्यैव ।

आश्चर्यं वडवानलः स भगवानाश्चर्यमम्भोनिधि-
र्यत्कार्यातिशयं विलोक्य हृदये कम्पः समुत्पद्यते । Sv. 884

(b) Srk. माद्यत्यनभ्रमु for माद्यत्यभ्रमु.

(d) Srk. बाढं for गाढं.

Srk.—anonymous.

(b) Srk. कृपा for दया.

(c) Srk ज्वालावलोः for वलीं I. O., A, S दधता for दहता.

(c) Sv. यस्तु for यो हि.

Sv. quotes the verse anonymously.

(b) Srk., Sv. कर्म for कार्य, विचिन्त्य for विलोक्य. Sv. मनसि for हृदये

Srk. 1198 एकस्याश्रयघस्मरस्य पिबतस्तृप्तिर्न जाता जलै-
शार्दूलविक्रीडित रन्यस्यापि महात्मनो न वपुषि
स्वल्पोऽपि तोयव्ययः ॥४॥
तस्यैव ।

1700 अयमलघुविसारिस्फारिजिह्वाकलापो
मालिनी ज्वलति यदि न मध्ये वाडवो हव्यवाहः ।
मुहुरुपचितसारो वारिभिर्निम्नगानां
त्रिभुवनमपि किं न प्लावयत्यम्बुराशिः ॥५॥
धर्मपालस्य ।

१३ अगस्त्यः ।

1701 श्वासोन्मूलितमेरुरम्बरतलव्यापी निमज्जन्मुहु-
Srk. 1201 र्यत्रासीच्छिशुमारविभ्रमकरः क्रीडावराहो हरिः ।
शार्दूलविक्रीडित वीचीव्याप्तदिगन्तरः स हि तथा वारांपति पीयते
पीतः सोपि न पूरितं च
जठरं तस्मै नमोऽगस्तये ॥१॥
शब्दार्णववाचस्पतेः ।

1702 किं ब्रूमो हरिमस्य विश्वमुदरे
Spd. 4025 किं वा फणां भोगिनः
Smv. 109.49 शेते यत्र हरिः स्वयं जलनिधेः सोप्येकदेशे स्थितः ।

1699 (d) Sv. वपुषः for वपुषि, जात. श्रमः for तोयव्यय .

1700 (a) Ed. स्फार for स्फारि.

1701 (c) Srk. सीमा सर्वमहाद्भुतेषु स for वीची…हि.
Ed. शब्दार्णवस्य for शब्दार्णववाचस्पतेः. Srk. वाचस्पते .

1702 (a) Spd. फणान् for फणां.
(b) Smv. देश for देशे.

आश्चर्यं कलसोद्भवो मुनिरयं यस्यैकहस्तोदरे
गण्डूषीयति पङ्कजीयति
फणी भृङ्गीयति श्रीपतिः ॥२॥
कस्यचित् ।

Srk. 1209
शार्दूलविक्रीडित

1703 आज्ञामेव मुनेः प्रणम्य
शिरसा विन्ध्याचल स्थीयता-
मत्युच्चैः पदमिच्छता पुनरियं नो लङ्घनीया त्वया ।
मैनाकादिमहीध्रलब्धवसतिं यः पीतवानम्बुधिं
तस्य त्वां गिलतः कपोलफलके
क्लेशोपि किं जायते ॥३॥
शालूकस्य ।

Srk. 1123
शार्दूलविक्रीडित

1704 निद्रालुर्न हरिः स्मृतो न गणितो दग्धव्यविश्वः शिखी
तास्ता लीढविहायसः किमपरं नालोचिता वीचयः ।
सद्यः संमिलिताङ्गुलित्रयपुटे क्षीणोदरेण व्रतै-
श्चित्रं नः श्रुतिविभ्रमो नु मुनिना पीतः
स पाथोनिधिः ॥४॥
कस्यचित् ।

शार्दूलविक्रीडित

1705 आस्तां चक्षुरिदं तिरोभवति कियच्चेतोपि यद्वैभवै-
र्निष्प्रत्याशमयं मुने जलनिधिर्गण्डूषितः सत्तपः ।

शार्दूलविक्रीडित

1702 (c) Ed., A अम्बुधि for मुनि. Srk सजलधि for मुनिरयं Spd., Smv. असौ for अयं, हस्तेम्बुधिः for हस्तोदरे.

1703 (a) Srk. निधाय for प्रणम्य,
(b) Ed. नोल्लङ्घनीया for नो लङ्घनीया.
(d) A, S, I. O., गिलितः for गिलतः. Srk. मिलन for फलके.
Srk.—anonymous.

एतेनैव विरन्तुमर्हसि न ते गण्डूषपानाधिका
काचित्ख्यातिरतःपरं परमसौ पर्जन्यनीवीव्यय. ॥५॥

तैलपाटीयगङ्गोकस्य ।

१४ जलम् ।

1706 गाम्भीर्यं भयदायि ते रसवशान्नानात्वमप्यद्भुतं
न स्थैर्यं शिरसा धृतस्य च मुखं दुर्वारमेकान्ततः । शार्दूलविक्रीडित
शक्तिस्ते महतोचलानपि भिदां नेतु पयो ब्रूहि मे
सोदर्यास्तव किं खला विभजता
लब्धास्त्वया यद्गुणाः ॥१॥

केशटस्य ।

1707 स्वातन्त्र्यं तव नीचसर्पणमथो पात्रे स्थितौ नेयता
तच्चित्रं प्रकटीकरोति कलुषीभावोन्यजन्यस्तव । शार्दूलविक्रीडित
स्नेहो हन्त तवान्तरं न लभते पृच्छामि तत्त्वां पयः
शिष्यः किं नु दुरीश्वरस्तव सखे किं वा
त्वदीयो गुरुः ॥२॥

तस्यैव ।

1708 चातुर्वर्ण्यविहारिणस्तव पयः स्पर्शो न गर्हाकरः
पात्रे सत्यकुलीनता न भवति त्वल्लाघवाद्गौरवम् । शार्दूलविक्रीडित
इत्थं लोकविनिन्दितेऽपि चरिते त्वं मूर्तिरीशस्य चे-
त्प्रायेणेश्वरभूषितस्य चरितं
शक्नोति को गाहितुम् ॥३॥

तस्यैव ।

1705 (c) Ed. पुनः for नते.
S, I.O. तैलपाटीयगाङ्गोकस्य (Sp. only गाङ्गोकस्य) for ॰गङ्गोकस्य.

1708 (b) Sp. पाते for पात्रे.
(c) Ed. च for अपि.

1709 अब्जं त्वब्जमथाब्जभूस्तत इतो ब्रह्माण्डमण्डादभू-
द्विश्वं स्थावरजङ्गमात्मकमिदं त्वन्मूलमित्थं पय । Spd. 1166
धिक्त्वां चौर इव प्रयासि निभृतं निर्गत्य जालान्तरै- Smv. 36.19
र्बध्यन्ते विवशास्त्वदेकगतयस्त्वामाश्रिता शार्दूलविक्रीडित
जन्तवः ॥४॥

तस्यैव ।

1710 शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे । Spd. 1165
किं चातःपरमस्ति ते स्तुतिपदं यज्जीवनं देहिनां Smv. 36.20
त्वं चेन्नीचपथेन गच्छसि पयः शार्दूलविक्रीडित
कस्त्वां निरोद्धुं क्षमः ॥५॥

तस्यैव ।

१५ शङ्खः ।

1711 रत्नाकराज्जनिरनुष्णकरावदाता
कान्तिः स्वभावकुटिलं कठिनं च वक्षः । वसन्ततिलक
शङ्खस्य दक्षिणगतेर्महनीयताभू-
द्वामात्मनस्तदपि च क्रकचप्रहारः ॥१॥

कस्यचित् ।

1709 (a) Spd., Smv. इदं for इतो, पुनः for अभूत्
(b) Spd., Smv. जङ्गमं तदितरं for जङ्ग...दं.
(d) Ed. वेध्यन्ते for बध्यन्ते Spd., Smv. शरणा for गतय.
Smv., Spd.—anonymous.

1710 (a) Spd., Smv. तदनु for सहज .
(b) Smv. व्रजन्त्यशुचयः सङ्गेन for भवन्ति ..स्पर्शेन.
(c) Spd. परमुच्यते for परमस्ति ते. Ed. जीविना (Smv. प्राणिना) for देहिनाम्.
(d) Smv. पुनः for पय . A निषेद्धुं for निरोद्धुं.
Spd., Smv.—anonymous.

1711 (d) Sp. चक्कर for च क्रकच.

1712 विदितधवलिमासि श्रूयमाणो ध्वनिस्ते
मालिनी रमयति रमणीया जन्मभू सिन्धुराजः।
तदपि निभृतमेकं वाच्यमस्त्येव कम्बो
हृदयकुटिलिमानं कस्तवापह्नवीति ॥२॥

नीलस्य।

1713 शङ्खाः सन्ति सहस्रशो जलनिधेर्वीचिच्छटाघट्टिताः
पर्यन्तेषु लुठन्ति ये दलशतैः कल्मापितक्ष्मातलाः।
Sv. 917
Spd. 1119
Smv. 297
शार्दूलविक्रीडित
एकः कोपि स पाञ्चजन्य उदभूदाश्चर्यभूतः सतां
यः संवर्तभरक्षमैर्मधुरिपोः श्वासानिलैः पूर्यते ॥३॥

कविरत्नस्य।

1714 संभूताश्च भवन्ति च प्रतिपदं भूयो भविष्यन्ति च
शार्दूलविक्रीडित प्रायः कम्बुनिधेर्न कुक्षिकुहरे संख्यातिगाः कम्बवः।
एकोप्यत्र स तादृशः किमभवत्कः पाञ्चजन्यादृते
यन्नादेन भवन्त्यमूर्भयगलद्भ्रूणाः सुरारिस्त्रियः ॥४॥

गोसोकस्य।

1715 सिन्धोरुच्चैः पवनचलनादुच्छलद्भिस्तरङ्गै-
स्तीरं नीतो हतविधिवशाद्दक्षिणावर्तशङ्खः।
Srk. 1118
मन्दाक्रान्ता
दग्ध किं वा भवति न मसी वेति संदेहिनीभिः
शम्बूकाभिः सह परिचयान्नीयते पामरीभिः ॥५॥

अनुरागदेवस्य।

1713 (c) Smv. एकस्तेषु for एक कोपि. Spd. धामा for भूत..
Sv. कविरत्नकस्य for कविरत्नस्य.

1714 (c) Ed. समभवत् for किमभवत्.

1715 (a) Srk. उत्सलद्भि for उच्छलद्भि..
(b) Srk. कूलं for तीरं.
(c) Srk. transposes भवति and न, चेति for वेति.
(d) Srk. परिचितो for परिचयात्.

Srk.—सुचरितस्य.

१६ मणिः ।

1716 कनकभूपणसंग्रहणोचितो | Sv. 898
यदि मणिस्त्रपुणि प्रतिरुध्यते । | Srk. 1672
न स विरौति न चापि न शोभते | द्रुतविलम्बित
भवति योजयितुर्वचनीयता ॥१॥

अचलस्य ।

1717 अपि वज्रेण संघर्षमपि पङ्क्त्रां पराभवम् । | Srk. 1485
सहन्ते गुणलोभेन त एव मणयो यदि ॥२॥ | अनुष्टुप्

वाचस्पतेः ।

1718 समुद्रेणान्तस्थस्तटभुवि तरङ्गैरकरुणैः
समुत्क्षिप्तोस्मीति त्वमिह परितापं त्यज मणे । | Srk. 1073
अवश्यं कोपि त्वद्गुणपरिचयाकृष्टहृदयो | शिखरिणी
नरेन्द्रस्त्वां कुर्यान्मुकुटमकरीचुम्बितरुचिम् ॥३॥

कस्यचित् ।

1719 न त्याज्या जनिभूमिरित्यलमिह भ्रातर्मणीनां गणै-
र्यैरेवायमकारि वारिधिरधो गत्वापि रत्नाकरः । | शार्दूलविक्रीडित
नैषामत्र गुणग्रहो न गरिमख्यातिर्न वार्घक्रमो
जातास्ते पुनरन्यतः क्षितिभृतां मूर्धानमध्यासते ॥४॥

तिलचन्द्रस्य ।

1720 उपादाता यावन्न भवति भवादृग्गुणवता-
मसत्कल्पास्तावत् त्रिभुवनमहार्हा अपि गुणाः । | शिखरिणी

1716 (b) I. O Sv., Srk. प्रतिबध्यते for प्रतिरुध्यते.
(c) Srk पलायते for न शोभते Sv. हि for second न.
Sv पञ्चतन्त्रे for अचलस्य. Srk—anonymous.

1717 (a) I. O, S रुद्रेण for वज्रेण.

Srk.—anonymous.

1719 (a) Ed. निज for जनि.
(d) Ed. यातास्ते for जातास्ते.

अपि प्राग्दैत्यारेर्हृदयवसतेः कौस्तुभमणिः
स किं नासीदब्धौ श्रुतिरपि किमस्य क्वचिदभूत् ॥५॥
धर्माधिकरणिकरुद्रस्य ।

१७ मरकतम् ।

1721 वणिगधिपते किं चिद्ब्रूमस्त्रपामिह मा कृथाः
हरिणी कथमनिभृतं केयं रीतिः पुरे तव संप्रति ।
मरकतमणिः काचो वायं भवेदिति संशये
लवणवणिजां यद्व्यापारः परीक्षितुमर्पितः ॥१॥
नारायणाब्धेः ।

1722 इह परिचिता जात्यन्धानामियं न तवोन्नति-
हरिणी र्गुणपरिचये चक्षुष्मन्तो त्वयाऽतिविडम्बिताः ।
कृपणवणिजामल्पीकर्तुं गुणांस्तव केवलं
मरकत मृषा दोषोद्गारः करिष्यति दुर्यशः ॥२॥
जलचन्द्रस्य ।

1723 त्यज निजगुणाभिमानं
Spd. 1104 मरकत पतितोसि मत्सरे वणिजि ।
आर्या काचमणेरपि मूल्यं यल्लभसे तदपि ते श्रेयः ॥३॥
कस्यचित् ।

1724 दुरर्थैर्यत्काचभ्रमभवकलङ्कस्त्वयि कृतो
जगच्चूडाचुम्बिन् मरकत स कस्ते परिभवः ।
शिखरिणी यदस्माभिस्तूष्णीं स्थितमिह तवालोचनपथे
तदन्तर्दुष्पूरोदरभरणदैन्यव्यवसितम् ॥४॥
वल्लणस्य ।

1720 Sp. रुद्रस्य for धर्मा……रुद्रस्य.
1723 (a) Spd. पामरे for मत्सरे.
(b) Spd. मौल्यं for मूल्यं, लभसे यत्नादपि for यत्……अपि
1724 (a) Ed. त्वविकृतो for त्वयि कृतो.

1725 केनासीनः सुखमकरुणेनादरादुद्धृतस्त्वं
विक्रेतुं वा कथमुपनतः केन देशान्तरेस्मिन् ।
अस्मिन्वित्तव्ययभरसहो ग्राहकस्तावदास्तां
नास्ति भ्रातर्मरकतमणे त्वत्परीक्षाक्षमोपि ॥५॥

Spd. 1110
Smv. 28. 11
Srk. 1023
मन्दाक्रान्ता

मङ्गलस्य ।

१८ नानारत्नानि ।

1726 कथय किमिदं जात्या ख्यातं वराटकैः
कतिभिरथवा लभ्यं चैतत्प्रयोजनमस्य किम् ।
प्रतिपदमिति ग्रामीणानां गणेन लघूकृतं
वत करतले रत्नं कृत्वा विषीदति वाणिजः ॥१॥

हरिणी

वैद्यगदाधरस्य ।

1727 स्फटिकशकलः किं वा नेय शिला किमु सैन्धवी
किमिति विहितस्तम्भो न स्यादयं करकोपल ।
इति कथामिह ग्रामीणानामकाण्डविकल्पनैः
शशधरमणे यास्यन्त्येते विडम्बनवासराः ॥२॥

हरिणी

जलचन्द्रस्य ।

1728 आघ्रातं परिचुम्बितं प्रतिमुहुर्लीढं च यच्चर्वितं
क्षिप्तं वा यदि नीरसत्वकुपितेनासि
व्यर्थां मा कृथाः ।

Kuval. p. 153
शार्दूलविक्रीडित

1725 (a) Spd, Smv., Srk आकरात् for आदरात्.
(b) Spd., Smv. समभिलषितः (Srk. त्वमभिलषितः) for कथमुपनतः,
वास्मिन् कुदेशे for देशान्तरेस्मिन्.
(c) Smv, Srk यस्मिन् for अस्मिन्.
Smv, Spd.—शर्व (Smv. सर्व) वर्मणः.
Srk.—anonymous.

1727 (b) I. O, S विदितस्तेऽन्तो for विहितस्तम्भो

1728 (a) Kuval. पुनः for यत्.
(b) Kuval. त्यक्तं वा भुवि नीरसेन मनसा तत्र for क्षिप्तं ··नासि.

हे माणिक्य तवैतदेव कुशलं शाखामृगेणामुना
यत्त्वं तत्त्वनिरूपणव्यसनिना चूर्णीकृतं नाश्मना ॥३॥
दूनोकस्य ।

1729 जठरपिठरीमन्ये वारांनिधेरधिशेरते
हरिणी
कठिनमणयो येषां छायाकलापजितं जगत् ।
त्रिजगति पुनः कोयं कोलाहलः कमलापति-
प्रणयसुहृदो रत्नस्योच्चैरहो सदुपग्रह. ॥४॥
गोपोकस्य ।

1730 अये मुक्तारत्न प्रसर बहिरुद्गोतय गृहा-
Srk. 1019
शिखरिणी
नपि क्षौणीन्द्राणां कुरु फलवतः स्वानपि गुणान् ।
धिगत्रैवात्मानं जरयसि मुधा शुक्तिकुहरे
महागम्भीरोयं जलधिरिह कस्त्वां गणयति ॥५॥
मुरारेः ।

१९ स्वर्णम् ।

1731 एते नर्तितमौलयो गुणगणप्रस्तावनाभिर्मणे-
शार्दूलविक्रीडित
जीयन्तां वणिजो वयं तु कनक त्वत्कीर्तिवैतालिकाः ।
ते चाम्लानमुखेन हन्त भवता दाहच्छिदा वेदना-
मङ्गीकृत्य नरेन्द्रशेखर सुखासीनाः क्रियन्ते यत ॥१॥
जलचन्द्रस्य ।

1732 स्तोत्राक्षराणि पठितानि बलिः प्रणीतः
वसन्ततिलक
क्लृप्तोञ्जलिर्विरचितो बहुशः प्रणामः ।

1728 (c) Kuval. सद्रत्न for माणिक्य, यद्वानरेणादरात् for शाखा . मुना
(d) Kuval. अन्तःसारविलोकन for यत्त्वं तत्त्वनिरूपण.
I. O., S दुलोकस्य(?) for दूनोकस्य.
1729 (b) Sp. छायाकणापलितं for छाया...जितं.
1730 (c) A, I. O., S जनयसि for जरयसि.
1732 (b) S, I. O. कृतो for क्लृप्तो.

किं कुर्महे तदपि हेमनिधे भवन्तं
दत्ते न वीक्षितुमपीह स दग्धयक्षः ॥२॥
वैद्यगदाधरस्य ।

1733 अदयं घर्ष शिलायां दह वा दाहेन भिन्धि लौहेन । आर्या
हे हेमकार कनकं मा मां गुञ्जाफलैस्तुलय ॥३॥
कस्यचित् ।

1734 दाहच्छेदननिकषैरतिशुद्धस्यापि रे वृथा गरिमा । Srk. 1117
यदसि तुलामधिरूढ काञ्चन गुञ्जाफलैः सार्धम् ॥४॥ आर्या
बाणस्य ।

1735 यद्धृष्टं निकषोपलेऽप्यमलिनं यट्टङ्किकानिर्दय-
व्यापारेऽप्यविकारि यच्च शिखिनि क्षिप्तं
च न म्लायसि । शार्दूलविक्रीडित
एतस्यामपि शुद्धिसंपदि तुलामारोप्य यत्साधुभि-
र्गुञ्जाभिः समकक्षामित्यवधृतं हा
स्वर्ण किं चेष्टताम् ॥५॥
बलभद्रस्य ।

२० नदनद्यौ ।

1736 केनेयं श्रीर्व्यसनरुचिना शोण विश्राणिता ते Srk. 1509
जाने जानुद्वयसजल एवाभिरामस्त्वमासीः । मन्दाक्रान्ता
वेगभ्रश्यत्तटरुहवनो दुस्तरावर्तवीचिः
कस्येदानीं कलुषसलिलः कूलभेदी प्रियोसि ॥१॥
शतानन्दस्य ।

1734 (a) Srk. छेद for छेदन, निकाषै for निकषै, परिशुद्धस्य for शुद्धस्यापि.
Srk. सुरभे for बाणस्य.

1736 (d) Ed. कूप for कूल. S, I. O., श्रियोसि(?) for प्रियोसि.

Spd. 1122
Smv. 30 5
Srk. 1028
शार्दूलविक्रीडित

1737 आजन्मस्थितयो महीरुह इमे कूले समुन्मूलिताः
कल्लोलाः क्षणभङ्गुराश्च सहसा नीताः परामुन्नतिम्।
अन्तः प्रस्तरसंग्रहो बहिरपि भ्रश्यन्ति गन्धद्रुमा
भ्रातः शोण न सोऽस्ति
यो न हसति त्वत्संपदां विप्लवे ॥२॥
अमरसिंहस्य।

Spd. 1124
Smv. 30 2
Srk. 1110
आर्या

1738 कतिपयदिवसस्थायी पूरो दूरोन्नतोऽपि भविता ते।
तटिनि तटद्रुमपातनपातकमेकं चिरस्थायि ॥३॥
भोजदेवस्य।

शार्दूलविक्रीडित

1739 नेत्रायातपथव्यतीतपयसः सन्त्येव नद्यः शतं
प्रायश्चित्तमुपाचरन्ति कृतिनः स्पृष्ट्वैव यासां पयः।
या दृष्टैव पुनाति विश्वमखिलं सेयं पुनर्जाह्नवी
विच्छिन्ना क्वचिदाविला
क्वचिदतिस्वल्पाम्बुशोच्या क्वचित् ॥४॥
उमापतिधरस्य।

1737 (a) Spd., Smv. कामं for कूले.
(b) Spd. Smv., Srk. पुनरमी for च सहसा.
(c) Spd., Smv., अन्तर्ग्राहपरिग्रहो for अन्तः..... संग्रहो, भ्राम्यन्ति for भ्रश्यन्ति, द्विपा for द्रुमा.
(d) Smv. संपदो for संपदा. Spd., Smv. विप्लवात् for विप्लवे.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 362.
Srk., Smv., Spd.—anonymous.

1738 (a) Smv. चण्डरव· for भविता ते.
Srk., Smv., Spd —anonymous.

1739 (b) I. O. स्पृष्ट्वापि for स्पृष्ट्वैव.
(d) Ed. स्वच्छाम्बुशोष्या for स्वल्पाम्बुशोच्या.

1740 प्रशान्ताः कल्लोलाः स्तिमितमसृणं वारि विमलं
विनीतोयं वेशः शममिव नदीनां कथयति । Smv. 30.4
तथाप्यासां तैस्तैस्तरुभिरभितस्तीरपतितैः Srk. 1111
स एवाग्रे बुद्धौ परिणमति रुद्धोप्यविनयः ॥५॥ शिखरिणी

कस्यचित् ।

२१ सरः ।

1741 मञ्जुस्वनाः शकुनयः सुभगोवतारो
रम्यं च शाद्वलमधस्तटपादपानाम् । वसन्ततिलक
इत्यादि साधु सकलं कमलाकरस्य
किं त्वाविलं जनितमम्बु नवोदकेन ॥१॥

मङ्गलस्य ।

1742 प्रतिविपिनमनिन्द्यस्वादुविस्फारवारि-
प्रविचरदुरुपत्रिव्यूहनिर्वाहभाजः । मालिनी
कति न कति तडागाः सन्ति किंत्वस्य हंस-
प्रवर वहति कस्ते मानसस्य प्रतिष्ठाम् ॥२॥

कस्यचित् ।

1743 वारां धारणमध्वनीनविधुरच्छेदाय भृङ्गस्रजां
हर्षायाम्बुजसंचयः सितगरुत्प्रीत्यै मृणालग्रहः । शार्दूलविक्रीडित
का वा तस्य कथार्घितस्य सरसो यत्तीरजन्माप्यसौ
दूरादेव दृशोः श्रमं हरति
नः स्निग्धावलोकस्तरुः ॥३॥

वैद्यगदाधरस्य ।

1744 अमीषामुष्णांशोः किरणनिकराणां परिचया-
त्सरस्तीक्ष्णं माभूत्तव किल निसर्गः शिशिरिमा । शिखरिणी
दुरात्मानो ह्येते कतिपयपयोबिन्दुरसिका-
न्निरस्यन्तः पान्थांस्त्वयि किमपि विदधति ॥४॥

उमापतिधरस्य ।

1740 Srk—शब्दार्णवस्य

1745 सलीलं हंसानां पिबति निवहो यत्र विमलं
Srk. 1070 जलं मोहात्तस्मिन्सरसि रुचिरे चातकयुवा ।
शिखरिणी स्वभावाद्गर्वाद्वा न पिबति पयस्तस्य शकुने
किमेतेनोच्चैस्त्वं भवति लघिमा वापि सरसः ॥५॥

शकटीयशबरस्य ।

२२ शुष्कसरः ।

1746 निःसारितेम्भसि कृषीवलमण्डलेन
कोलव्रजैः कवलितासु मृणालिकासु ।
वसन्ततिलक तीरद्रुमे दवहतेद्य सखेध्वनीन
शोकाय केवलमलोकि सरस्त्वयेदम् ॥१॥

वैद्यगदाधरस्य ।

1747 कासारे मदमत्तवारणगणैराकुम्भमग्नं पयः
पीतं यत्प्रभवोरुवीचिवलनैर्व्याप्तं समस्तं जगत् ।
शार्दूलविक्रीडित तस्मिन्नेव रवेः प्रचण्डकिरणश्रेणीनिपीताम्भसि
प्राप्ताः पान्थनखंपचाः प्रतिपदं मध्यस्थलीभूमयः ॥२॥

माधवस्य ।

1748 स्थलं पाशैर्व्याप्तं प्रबलपवनैरम्बुजवनं
शिखरिणी जलं क्षीणप्रायं विवरशरणं चाण्डजकुलम् ।
इदानीमेतस्मिन्सरसि चिरसेवाप्रणयिनां
विहङ्गानां भावी स खलु पुटपाकव्यतिकरः ॥३॥

कस्यचित् ।

1745 (b) Srk. transposes मोहात् and तस्मिन्
(d) Ed. चापि for वापि.

Srk.—anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 526.

1746 (a) Sp. निःसारितो for ०ते.

1747 (b) Sp. यत्प्रसवा for यत्प्रभवो.

1749 वातैः शीकरवर्षिभि श्रुतिसुखैर्हंसावलीनिस्वनै-
रुन्निद्रैः कमलैः पयोभिरमलैर्नीत्वा परां निर्वृतिम्। Srk. 1657
पश्चात्क्षीणधनां वहन्निजतनुं धन्यो मृणालीच्छला- शार्दूलविक्रीडित
दर्थिभ्यः प्रददौ नवेन्दुविशदान्यस्थीनि पद्माकरः ॥४॥

भव्यस्य।

1750 मदोष्णप्रागल्भ्याद्घनकरिघटा यत्र विमले
ममज्जुर्निःशङ्कं तटनिकट एवोन्नतकराः।
गते शोषं दैवाद्धरसरसि तत्रैव तरला Srk. 1043
बकग्रासत्रासाद्विशति शफरी पङ्कमधुना ॥५॥ शिखरिणी

मधुरशीलस्य।

२३ पूर्णसर।

1751 घनसमयसरः क्व भृङ्गमालाः
स्सरसि तदा विहगाः क्व बन्धुवाचः। पुष्पिताग्रा
अकरुण सहशोषिणी मृणाली
पुनरपि सेयमधस्त एव मूर्ध्नि ॥१॥

विरिञ्चेः।

1749 (a) Srk. बन्धुभि. for वर्षिभि .
(b) Srk. प्रोत्फुल्लैः for उन्निद्रै .
(c) Srk. बहिर्निजदशा दृष्ट्वा for वह· ·धन्यो, मृणाल for मृणाली.
Srk —anonymous.

1750 (a) Srk. मदोष्मासंतापात् for मदोष्णप्रागल्भ्यात्.
(b) Srk. नि शेष for नि शङ्कं
(c) Srk. transposes शोष and दैवात्.
Srk.—anonymous.

1751 (a) I. O , S स्फुरन्तु for क्व बन्धु.
(c) I. O., S शोकिनी for शोषिणी

1752 तीव्रार्कद्युतिदह्यमानवपुषा दावानलस्योष्मणा
शार्दूलविक्रीडित शोषं दूरमुपागतेन पथिक क्लेशान्मुहुर्मूर्छता।
भ्राम्यद्दीनदृशा तृषातुरतया कौपीरपोपीच्छता
मज्जदन्ति पतत्पतत्रि सुकृतैरेतन्मयाप्तं सरः ॥२॥

क्षितीशस्य।

1753 आस्तामेव सरोवरेण्य भवतो दुग्धोदलब्धामृत-
शार्दूलविक्रीडित स्वादस्पर्धि सरोजवृन्दखचितं हंसावतंसं पयः।
स्फारोल्लोलसुशीतशीकरचयासारप्रसिक्तानिल-
स्पर्शैरेव मनोहरैरपगता. संतापशोषक्लमाः ॥३॥

गोसोकस्य।

1754 यत्कूपेष्वपि दूरनिह्नुतपयोलेशेषु नीतं मनो
शार्दूलविक्रीडित यत्खातेष्वपि पङ्कदुर्गसलिलस्तोकेषु दृष्टिः कृता।
स्मेरोद्दण्डितपुण्डरीकमसकृत्कल्लोललीलामयं
त्वामासाद्य तडाग संप्रति स मे
शान्तो निदाघज्वरः ॥४॥

वैद्यगदाधरस्य।

1755 भेकैः कोटरशायिभिर्मृतमिव क्ष्मान्तर्गतं कच्छपैः
Bp. 201 Sv. 843 पाठोनैस्तनुपङ्कपीठलुठनाद्यस्मिन्मुहुर्मूर्छितम्।

1752 Ed छितीशस्य for क्षितीशस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 511.

1753 (b) I. O. स्वादु for स्वाद
(d) Ed. क्लमाः for क्रमा .

1754 Ed. वैद्यस्य for वैद्यगदाधरस्य.

1755 (b) Srk., Spd., Sv., Bp. पृथु for तनु. A, I. O. transpose पङ्क and पीठ. Sv. कूट for पीठ, लुठितैः for लुठनात्. Srk. अस्मिन् for यस्मिन्.

तस्मिन्नेव सरस्यकालजलदेनागत्य तच्चेष्टितं Spd. 777
येनाकुम्भनिमग्नवन्यकरिणां यूथैः पयः पीयते ॥५॥ Srk. 1059
शार्दूलविक्रीडित
छित्तपस्य ।

२४ मीनः ।

1756 पाठीन मुञ्च कुनदं यदिहाम्बु पीत्वा
मिश्रं निरन्तरपतत्तटभूमिपङ्कैः ।
उन्मज्जतस्तव पतिष्यति कोमलायां
गाढं तनौ कुररचञ्चुशरप्रहारः ॥१॥
वसन्ततिलक
वसन्तदेवस्य ।

1757 क्व शकुलशिशो गम्भीराम्भः सरस्तव जन्मभूः
क्व च नवजलक्रीडारम्भादियं तटसंगतिः ।
तदिह विवरे नीत्वात्मानं कुलीरविवर्जिते
विगमय दिनं यावच्चास्ते बकोटकुटुम्बकम् ॥२॥
हरिणी
भास्करदेवस्य ।

1758 विषमविषधरप्रगाढघोरे
सरसि सरस्यपि निःस्पृहोसि जीवे ।
शफर परिहरेदमात्मदेह-
स्थितिमनुचिन्तयतः क्व नास्ति सौख्यम् ॥३॥
पुष्पिताग्रा
कविचक्रवर्तिनः ।

1755 (c) Sv., Spd., Bp शुष्क for एव.
(d) Spd., Bp. यत्र for येन. Sv., Spd. कण्ठ for कुम्भ.
Sv. दाक्षिणात्यस्य.
Spd. अकालजलदस्य.
Srk. द्रन्दूकस्य.

1757 Sp. भास्करस्य for भास्करदेवस्य.

1759 शफर संहर चञ्चलतामिमां
चिरमगाधजलप्रणयी भव ।
इह हि कोमलवञ्जुलजालके
वसति दुष्टबकोटकुटुम्बकम् ॥४॥

द्रुतविलम्बित

अभिनन्दस्य ।

1760 सरोरत्नादस्मात्सफर तव तीरावतरण-
प्रणालीसंचारव्यसनमशुभं ते कथमभूत् ।
अहो मुग्धेदानीं निजदुरुपचारव्यवसितां
कुवेणीबद्ध सन्ननुभव दशामुत्फलसि किम् ॥५॥

शिखरिणी

कस्यचित् ।

२५ सर्पः ।

1761 छिद्रानुसारनिपुणत्वमिदं त्वदीयं
दृष्ट्वा गतौ कुटिलतां वदने विषं च ।
मन्ये सरीसृप भवानुचितं मनुष्य-
प्राणापहारविषये विधिना नियुक्तः ॥१॥

वसन्ततिलक

कस्यचित् ।

1762 एतस्य जाङ्गुलिक नार्पय मन्त्रदर्पा-
दास्ये निजाङ्गुलिमयं खलु कोपि सर्पः ।
अत्रैव यस्य विषमेण विषेण दग्धा-
स्ते त्वादृशा निरसव· पतिताः सहस्रम् ॥२॥

वसन्ततिलक

नाचोकस्य ।

1760 (a) Ed., A नीवारतरल for तीरावतरण

1761 (c) Sp तव for भव.

1762 (a) Ed. जाङ्गलिक for जाङ्गुलिक.
The verse has been quoted by Aufrecht in ZDMG. 36, p. 538.

1763 यद्वीक्षसे शिखिनमग्निभुव सहेलं
यद्वा विलोकयसि तार्क्ष्यमवज्ञयैव ।
लीढौषधिपरिवृढोसि यदृच्छया तद्-
वन्दामहे हरभुजङ्ग तवैव जन्म ॥३॥ वसन्ततिलक

वैद्यगदाधरस्य ।

1764 अलमभिमुखैर्बद्धैर्भोगैरलं भ्रमिभिर्दृशो-
रलमविरलैर्गर्जोद्गारैरलं विषवृष्टिभिः ।
किमिह भुजगाः कोपावेगैरमीभिरमुद्रितै-
र्ननु भगवतस्ताक्ष्यस्यैते वयं स्तुतिपाठकाः ॥४॥ हरिणी

तस्यैव ।

1765 क्षुद्रास्ते भुजगाः शिरांसि नमयत्यादाय येषामिदं
भ्रातर्जाङ्गुलिक त्वदाननमिलन्मन्त्रानुविद्धं रजः ।
जीर्णस्त्वेष फणी न यस्य किमपि त्वादृग्गुणीन्द्रव्रजा-
कीर्णक्ष्मातलधावनादपि भजत्यानम्रभाव शिरः ॥५॥ शार्दूलविक्रीडित

उमापतिधरस्य ।

२६ भेकः ।

1766 अपि नदथ निकामं दर्दुराः किं सुवर्ण-
द्युतिभरमुपनीता नूतनैर्वारिपूरैः ।
अयमचिरविनाशी शोचनीयस्तु भावी
स चिरमवटसीम्नि प्राच्य एव क्रमो वः ॥१॥ मालिनी

नाकोकस्य ।

1767 इयत्पृथ्वीमात्रं तदनु च नभोमण्डलमिय-
दियान्पातालान्तो जलमपि पृथिव्यामियदिति । शिखरिणी

1763 (d) I. O., A, S तयैव for तवैव
Sp. वैद्यस्य for वैद्य……स्य.

1766 The verse has been quoted by Aufrecht in ZDGM, 36, p. 535, with अयि for अपि (a).

1767 (a) Ed. पात्रं for मात्रं.

इति ज्ञात्वा कूपे विदितविषयो नायमपरः
परं मुग्धो भेकः प्रबलतररावं प्रकुरुते ॥२॥

जयनन्दिनः ।

Smv. 36.49
वसन्ततिलक

1768 किं नाम दर्दुर दुरध्यवसाय सायं
कायं निपीड्य निनदं कुरुषे रुषेव ।
किं तानि केलिरसितानि सितच्छदाना-
माकर्ण्य कर्णमधुराणि न लज्जितोसि ॥३॥

कस्यचित् ।

शार्दूलविक्रीडित

1769 श्रुत्वा कुम्भभुवो मुनेरिह दुराचारं कमप्यद्भुतं
सिन्धोरम्बुकुटुम्बि दर्दुरकुलं हर्षादिदं ध्यायति ।
गाम्भीर्याद्यदि ते न बिभ्यति न वा
त्रस्यन्ति भेकीशिशो-
रत्रागत्य सुखं वसन्तु तिमयो जातानुकम्पा
वयम् ॥४॥

जलचन्द्रस्य ।

Sv. 1019
Spd. 1177
शार्दूलविक्रीडित

1770 भेकेन क्वणता सरोषपरुषं यत्कृष्णसर्पानने
दातुं कर्णचपेटमुज्झितभिया हस्तः समुल्लासितः ।
यच्चाधोमुखमक्षिणी विदधता नागेन तूष्णीं स्थितं
तन्मन्ये विषमन्त्रिणो भगवतः
कस्यापि लीलायितम् ॥५॥

तस्यैव ।

1767 This verse has been quoted by Aufrecht in ZDMG 36, p. 532, with इह for इति (b).

1768 Smv. attributes it to मङ्खण.

1769 (d) A, S अभ्यागत्य for अत्रागत्य.

1770 (c) Sv. तत्र for तूष्णीं.

(d) Sv., Spd. सर्वं for मन्ये.

Sv. ascribes the verse to भल्लट.

Spd.—anonymous.

२७ पद्मम् ।

1771 दर्पोत्सेकभृतामसाधु चरितं प्रायेण लक्ष्मीभृता-
मामूलं गुणसंग्रहात्तु नलिन त्वच्चेष्टितं किं स्तुमः ।
यच्छुष्के सरसि प्रयासि विदशां संवासमर्यादया
संपूर्णं कमनीयकोमलदलं भासि प्रवृद्धाङ्कुरम् ॥१॥ शार्दूलविक्रीडित

वसन्तदेवस्य ।

1772 कासारशोषिणि नवोदयमानमुग्ध-
सद्वर्तिकानिवहदाहिनि दारुणेपि ।
मध्यंदिनोष्णकिरणे प्रतिपन्नसख्य-
स्मेरं मुखं जयति चित्रचरित्रमब्जम् ॥२॥ वसन्ततिलक

योगेश्वरस्य ।

1773 धिक्कुर्मोस्य मधुव्रतस्य चरितं दोषाननीं दुर्दशां
दृष्ट्वा यस्तव पद्मषण्डकुमुदैर्धत्ते रहस्ताण्डवम् ।
श्लाघ्यस्त पुनरेक एव यदिह प्रातः समभ्यागते
तान्येवोल्लसितानि सैव
सविता तच्चैव कोपार्पणम् ॥३॥ शार्दूलविक्रीडित

वैद्यगदाधरस्य ।

1774 अत्रैव सरसि जातं विकसितमत्रैव निर्भरं नलिनै ।
कालवशागततुहिनैर्विलीनमत्रैव हा कष्टम् ॥४॥ आर्या

कस्यचित् ।

1775 कान्तिस्ते यदि निर्मला यदि
गुणा लक्ष्मीर्यदि स्थायिनी शार्दूलविक्रीडित
मागाः पद्म मदं तथापि गलिता ह्येते शरद्वासराः ।

1772 (b) Ed, A संवर्तिका for सद्वर्तिका.

1773 (c) Sp. त्वं for त

Sp. वैद्यस्य for वैद्य ..स्य.

1775 (b) I. O, S गलितास्ते ते for ०ह्येते.

संस्पर्शेन तुषारवारिपृषतामालूनमूर्तेः सरो-
मध्येऽत्रैव वराटकेन भवतः स्थेयं पुनः केवलम् ॥५॥

उमापतिधरस्य ।

२८ भ्रमरः ।

1776 शाखिनि शाखिनि कुसुमं कुसुमे
कुसुमे मधुकरकुलानि ।
आर्या
विरलं सन्मधु कुसुमं विरलो रसतत्त्वविन्मधुपः ॥१॥

वीरस्य ।

1777 अन्यासु थावदुपमर्दसहासु भृङ्ग
Kuval. p. 89 लोलं विनोदय मनः सुमनोलतासु ।
Dr. under IV. 33 मुग्धामजातरजसं कलिकामकाले
Sd. under III. 177 व्यर्थं कदर्थयसि किं नवमालिकायाः ॥२॥
वसन्ततिलक

विद्यापतेः ।

1778 मधुकरगणश्चूतं त्यक्त्वा गतो नवमालिकां
पुनरपि गतो रक्ताशोकं कदम्बतरुं ततः ।
Sv. 740 Spd. 829 तदपि सुचिरं स्थित्वा कुन्दे प्रयाति सरोरुहं
हरिणी परिचितगुणद्वेषी लोको नवं नवमीहते ॥३॥

कस्यचित् ।

1779 येनामोदिनि केसरस्य मुकुले पीतं मधु स्वेच्छया
Sv. 749 नीता येन निशा शशाङ्कधवला पद्मोदरे शारदी ।

1776 Quoted by Aufrecht in ZDMG, 36, p. 525

1777 (c) Kuval., Dr. बालाम् for मुग्धाम्.
(d) Kuval. मल्लिकायाः for मालिकाया..
Dr., Kuval. ascribe the verse to विकटनितम्बा

1778 (a) Spd. मल्लिका for मालिकां.
(c) Sv., Spd. तेभ्यः for कुन्दे
(d) Spd. जन for गुण.

1779 (b) Sv. शारदे for शारदी.

भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोयं भृङ्गयुवा करीरविटपे बध्नाति दृष्टिं कुतः ॥४॥ Spd. 837 शार्दूलविक्रीडित

कस्यचित् ।

1780 अशोके शोकार्तः किमपि बकुले व्याकुलमना
निरानन्दः कुन्दे सह च सहकारैर्न रमसे । Srk. 1074 शिखरिणी
कुसुम्भे विस्रम्भं यदिह भजसे कण्टकशतै-
रसंदिग्धं मुग्धभ्रमर भवितासि क्षतवपुः ॥५॥

कस्यचित् ।

२९ स्वर्गभ्रमरः ।

1781 मीलन्तु पङ्कजवनानि दलन्तु वृक्षाः
शुष्यन्तु दानसरितः करिणां कपोले । वसन्ततिलक
तेमी वयं मधुलिहो भगवान्स येभ्यः
पातुं समर्पयति गण्डतटं गजास्यः ॥१॥

वैद्यगदाधरस्य ।

1782 नन्दनजन्मा मधुपः सुरतरुकुसुमेषु पीतमकरन्दः । आर्या
दैवादवनिमुपेतः कौटजकुसुमेषु समीहते वृत्तिम् ॥२॥

कस्यचित् ।

1779 (c) Ed , A सलिले for मलिने.
(d) Sv. बध्नातु तुष्टि for बध्नाति दृष्टि Spd तुष्टि for दृष्टि.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 555.

1780 (b) Ed., A कौन्दे for कुन्दे.
(d) Srk. दग्ध
The verse has been quoted by Aufrecht in ZDMG, 36, p 551.

1781 (d) Ed. तलं for तटं.

1782 (b) Ed. कुसुमे for कुसुमेषु
The verse has been quoted by Aufrecht in ZDMG, 36, p. 553.

शार्दूलविक्रीडित

1783 छायाशीतलितात्सकाञ्चनशिलात्खेलत्कृतार्थार्थिन-
स्तत्तन्निर्मितचित्रमञ्जरिगृहात्क्रीडामिलत्खेचरात् ।
घ्रात्वाप्यद्भुतसौरभोरुलहरीः कल्पद्रुमान्नैव य-
द्वेगाद्धावति मञ्जु गुञ्जति परं तत्कोयमिन्दिन्दिरः ॥३॥

वल्लनस्य ।

हरिणी

1784 अनभिलषतः श्रीलीलाब्जे परागविलेपनं
त्रिदशकरिणः पातुं दानप्रवाहमवाञ्छतः ।
त्रिदशसुमनोगन्धासक्तिं विमुक्तवतः सखे
बत खलु शिवा सन्तुष्टस्य द्विरेफ तव स्थितिः ॥४॥

मङ्गलस्य ।

Sk. l. 81
Smv. 19.8
शिखरिणी

1785 निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
रसाले सालम्बो लवमपि लवङ्गे न रमते
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरंल्लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥५॥

छित्तपस्य ।

३० पङ्कजमधुपः ।

शार्दूलविक्रीडित

1786 त्वल्लीलातरलेन मत्तकरिणा रुग्णे च पद्माकरे
प्राणास्ते यदि वल्लभास्तदपि किं निष्पङ्कजा मेदिनी ।
दूरीकृत्य तु पङ्कजं मधुप हे तस्यैव यद्गण्डयो-
र्दानाम्भो निरतोसि तद्वयमहो वक्तुं च लज्जामहे ॥१॥

जलचन्द्रस्य ।

1783 (b) I. O., S गृहक्रीडा for गृहात्क्रीडा.
Ed. वल्लभस्य for वल्लनस्य ।

1785 (a) I. O., S मधुरो for विधुरो.
(b) Sk., Smv. न साले for रसाले. Smv. सालम्बे for सालम्बो.
(c) Smv. नो सङ्गं for नासङ्गं.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 535, with न साले for रसाले (b).

1787 हुताशज्वालाभे स्थितवति रवावस्तशिखरे
पिपासुः किञ्जल्कं प्रविशति सरोजं मधुकरः । Sv. 1917
तदन्तःसंरोधं न गणयति संध्यासमयजं शिखरिणी
जनोर्थी नायासं गणयति किलैकान्ततृषितः ॥२॥

कस्यचित् ।

1788 विगलतु नाम मधूकं परिणतिमभ्येतु हन्त सहकारः ।
न मधुदरिद्रो मधुपः शङ्के पङ्केरुहे जयति ॥३॥ आर्या

जह्नोः ।

1789 अमीषामामोदप्रणयसुभगं सगतमभू-
त्प्रसूनैरुन्निद्रैः सह बहुभिरेव प्रतिवनम् ।
उदन्या न क्वापि व्यरमदरविन्दे परममी शिखरिणी
पिबन्ति स्वच्छन्दं रसमुदरपूरं मधुलिहः ॥४॥

शाटोकस्य ।

1790 इह परिमलो यत्र व्यक्तो न तत्र मधुश्रियो
मधु समधिकं यस्मिंस्तस्मिन्न गन्धसमृद्धयः ।
इति मरुवकं निन्दन्कुन्दादपेतकुतूहलः हरिणी
कमलमधिकं स्मारं स्मारं विषीदति षट्पदः ॥५॥

उमापतिधरस्य ।

1787 (c) Sv. transposes न and गणयति.
(d) Sv. नापायं for नायासं, विमृषति for गणयति. फल for किल.
Sv विष्णुशर्मणः for कस्यचित्.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 556.

1788 (a) Sp मधूकः for मधूकं

1789 (a) I. O , S आमोदं for आमोद.
(c) I. O., S लब्धापि for न क्वापि
I. O., S साटोकस्य for शाटोकस्य.

1790 (b) I. O., S मधुजमधिकं for मधु समधिकम्.

३१ चूतभ्रमरः ।

1791 धन्यस्त्वं सहकार संप्रति फलैः काकान् शुकान्पूरय-
Srk. 1103 न्पूर्वं तु त्वयि मुक्तमञ्जरिभरोन्निद्रे य इन्दिन्दिर ।
शार्दूलविक्रीडित आक्रीडन्ननिशं स नैति फलितं यत्त्वां विकशैकभुक्
तद्धर्मोऽस्य फलाशया परिचयः
कल्पद्रुमेष्यस्ति किम् ॥१॥

वल्लभस्य ।

1792 निश्चेतुं मकरन्दबिन्दुजनितानन्दारविन्दाकर
क्रीडानिःस्पृहयालुमानसतया मन्दायमानादर ।
शार्दूलविक्रीडित स्फारोद्गच्छदपूर्वमञ्जरिभरप्रादुर्भवत्सौरभं
श्रद्धालुर्न कथं प्रयातु सहसा माकन्दमिन्दिन्दिरः ॥२॥

तस्यैव ।

1793 अयमिह मुग्धो मधुपः परिहृतसहकारमञ्जरीपुञ्जः ।
आर्या असरलमरसमसारं शाकोटकविटपमनुसरति ॥३॥

कस्यचित् ।

1794 स्वादयन्तु चिरं नाम कोकिलाश्चूतकोरकान् ।
अनुष्टुप् तादृक् परिमलं वेत्ति यदि धन्यो मधुव्रतः ॥४॥

वसुकल्पस्य ।

1795 वसन्ते सन्त्येव प्रतिवनमनिद्रालुसुमनो-
मनोज्ञप्रारम्भा मधुरमधुसंभारसुहृदः ।
शिखरिणी परोलक्षा वृक्षाः परमिह रसालेषु रसिकः
सलीलं रोलम्बः पिबति मधुसारं सरभस ॥५॥

वनमालिनः ।

1791 (c) Srk. निमिषं for अनिशं, मुत् for भुक्.
Ed., A वल्लणस्य.

1792 (c) I. O., S स्फारोद्यत् for स्फारोद्गच्छत्.

1793 Quoted by Aufrecht in ZDMG, 36, p 550.

३२ केतकीभ्रमरः ।

1796 त्वं त्यक्त्वा मकरन्दमन्दिरममुं फुल्लारविन्दाकरं
चुम्बन्नूतनकेतकीं प्रतिमुहुर्यत्कण्टकैः कीलितः । शार्दूलविक्रीडित
उद्भ्रान्तस्य मलीमसस्य मुखरस्योन्मत्तचित्तस्य ते
रे रे चञ्चलचञ्चरीक तदिदं कर्मानुरूपं फलम् ॥१॥

अशोकस्य ।

1797 त्यक्त्वा सरोजमधुपानरसं च रम्यं
यद्धाविनोऽसि कुसुमं प्रति केतकीनाम् ।
अस्यैव ते फलमहो अनयस्य भूतं वसन्ततिलक
किं खिद्यसे मधुप कण्टकविद्धपक्षः ॥२॥

कस्यचित् ।

1798 पत्राणि कण्टकसहस्रदुरासदानि
वार्तापि नास्ति मधुनो रजसान्धकारम् । Spd. 1012
आमोदमात्ररसिकेन मधुव्रतेन वसन्ततिलक
नालोकितानि तव केतकि दूषणानि ॥३॥

सरस्वत्याः ।

1799 हित्वा तन्मधुसद्मपद्मविपिनं सौरभ्यमात्राहृत
किं रे भृङ्ग मुधैव धावसि मधुप्रत्याशया केतकीः । शार्दूलविक्रीडित

1796 (a) Ed. त्वा for त्वम्, हित्वा (also Sp.) for त्यक्त्वा; फुल्लारविन्दं बलात् for फुल्ला.. करम्

The verse has been quoted by Aufrecht in ZDMG, 36, p. 509.

1797 Quoted by Aufrecht in ZDMG, 36, p. 509.

1798 (a) Spd शतैः परिवेष्टितानि for सहस्र...सदानि.

(b) Spd. ०कार for ०कारम्

Spd.—anonymous.

1799 (a) Ed. माला for मात्रा.

एताः कण्टककोटिसंकटदलद्रोणीपुटोत्पीडितं
गर्भं बिभ्रति धूलिजालकलिलैरापूरितं केशरैः ॥४॥

नरसिंहस्य ।

1800 आमोदो बहल शशाङ्ककिरणच्छायो दलानां चयो
शार्दूलविक्रीडित मृद्वी केशरसंहतिर्मलयजक्षोदोपमा रेणवः ।
केतक्याः कुसुमस्य साधु सकलं दोपस्त्वयं केवलं
विद्धा न प्रविशन्ति यन्मधुलिहो
द्वारि स्थितैः कण्टकैः ॥५॥

कस्यचित् ।

३३ पर्वतः ।

1801 कैलास रे पशुपतिस्थितिपात्रमात्र-
वसन्ततिलक संरूढगर्वमिह पर्वत संत्यजाशु ।
दृष्टोसि किं नहि सलीलसमुत्थितैक-
पौलस्त्यहस्तकमलोपरि पुष्कराभ ॥१॥

दामोदरस्य ।

1802 मुरारातिर्लक्ष्मीं त्रिपुरविजयी शीतकिरण
Spd. 1068 करीन्द्रं पौलोमीपतिरपि च लेभे जलनिधेः ।
शिखरिणी त्वया किं तल्लब्धं कथय मथितो मन्दरगिरे
शरण्यः शैलानां यदयमदयं रत्ननिलयः ॥२॥

कामदेवस्य ।

1803 दृष्टा न द्विरदावली न चमरीपुच्छानिलः सेवितो
शार्दूलविक्रीडित नैवासादि कदापि मौलिसविधे छत्रायमाणः शशी ।

1800 (d) Ed. प्रसरन्ति for प्रविशन्ति.

1802 (c) ZDMG, Spd. वालब्धं for तल्लब्धम्.

Spd.—anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 531, with वालब्धं for तल्लब्धं (c).

नीताः क्षौणिभृतो न पादपदवीं धिग्दैवमम्भोनिधौ
मग्नस्यैव गिरीन्द्रपुत्र भवतो मैनाक यातं वयः ॥३॥
वैद्यगदाधरस्य ।

1804 एकस्यायमुदेति मूर्धनि गिरेरन्यस्य चैष क्रमा-
दस्तं याति कलानिधिस्तदनयोरस्तः प्रशस्तोचलः । Spd. 1070
को नामोदयिनं करोति न शिरोमाणिक्यमस्तं पुन- Smv. 36.15
र्यान्तं यः कुरुते भवानिव शार्दूलविक्रीडित
स दुष्प्रापोयमुच्चैःशिराः ॥४॥
पुण्डरीकस्य ।

1805 ध्वान्तास्कन्दितलोकलोचनजगज्जीवातुमुद्यत्वरं शार्दूलविक्रीडित
सूरं मूर्ध्नि दधातु पूर्वशिखरी नैवात्र चित्रोदयः ।
प्राप्तास्तं दिवसे गतायुषि परिक्षीणांशुमेतं पुनः
कुर्वन्मौलिगतं करोति चरमश्चित्रं धरित्रीधरः ॥५॥
मुद्राङ्कस्य ।

३४ मलयः ।

1806 किं तेन हेमगिरिणा रजताद्रिणा वा Sv. 1006
यत्र स्थिता हि तरवस्तरवस्त एव । वसन्ततिलक

1803 (c) Ed. भुजो for भृतो.
(d) जातं for यातम्.

1804 (b) Spd उभयो for अनयो.
(d) I. O, S यातुं (Smv., Spd. यात) for यान्तम्. Spd. दुष्प्रापोस्ति पृथ्वीतले for दुष्प्रापो शिरा॰.
Sp, I. O, S पुण्ड्रोकस्य for पुण्डरीकस्य
Smv., Spd.—anonymous.

1805 (c) I. O, A एतं for एवं

1806 (b) Sv. यस्याश्रयेण for यत्र.. हि.

वन्दामहे मलयमेव यदाश्रयेण
शाकोटनिम्बकुटजा अपि चन्दनानि ॥१॥

कस्यचित् ।

1807 चम्पकतरुणा सार्धं स्पर्धा शाकोटकस्य युक्तैव ।
आर्या अस्मिन्मलयमहीभृति सर्वे किल चन्दनं तरवः ॥२॥

मुष्टिकस्य ।

1808 मातङ्गाञ्छतशः पुषाण शतशो व्यालीसुतान्संवृणु
प्रीणीथाः शतशस्तु गण्डदृषदः श्रीखण्डशैलेच्छया ।
शार्दूलविक्रीडित आस्वर्गस्थलमामहीतलमथापातालमाविष्कृतं
त्वत्कीर्तिस्तु न चन्दन-
क्षितिरुहादन्यः समालोक्यते ॥३॥

भट्टवेतालस्य ।

1809 भ्रातश्चन्दनशैल मुञ्च जडतां विस्तारयन्सौरभं
गच्छन्नेव विलासिभिर्मरुदयं निर्व्याजमालिङ्ग्यताम् ।
शार्दूलविक्रीडित तिष्ठन्नेव पटीरकोटरदरीदर्वीकरोत्तम्भित-
स्फारोत्फुल्लफणासहस्रचुलुकग्रासेन निर्वर्त्यते ॥४॥

कस्यचित् ।

1810 इतस्तावन्नेत्रे वलय मलयाद्रे निधिरपा-
शिखरिणी मपारस्त्वत्पादप्रणयपरतन्त्रो निवसति ।

1806 (c) Sv. मन्यामहे for वन्दामहे, यदाश्रितानि for यदाश्रयेण.
(d) Sv. शाहोट for शाकोट A, Sv. कुटजान्यपि for कुटजा अपि.
1807 (b) Ed. चन्दनाः for चन्दनम् (See Errata)
I. O., S स्वस्तिकस्य for मुष्टिकस्य
The verse has been quoted by Aufrecht in ZDMG, 36, p. 529.
1808 (a) I. O., S शतान् for सुतान्
1810 (a) Ed. पति for निधि.

अथात्मानं किं न स्मरसि कुलशैलं किमयशः-
पताकाः सपौघैः प्रतिशिखरिशिखासु वहसि ॥५॥

वसुकल्पस्य ।

३५ शरभः ।

1811 उन्मुक्तक्रमहारिशैलशिखरात्क्रामन्तमन्यो धरः
कोऽत्र त्वां शरभीकिशोरपरिषद्धौरेय धर्तुं क्षमः । Srk. 1056
तस्मादुद्भमकेलिलङ्घनकलादुर्वीतलादुद्व्रज शार्दूलविक्रीडित
त्वद्ध्वासाय स एव कीर्तिकनकज्योत्स्नो
गिरीणां पतिः ॥१॥

वल्लणस्य ।

1812 यस्यानुद्धुरगन्धवातकणिकातङ्कार्तिनानादरी-
कोणोदञ्चदुरोनिगूहितशिरःपुच्छा हरीणां गणाः । Srk. 1046
हृष्यद्दुर्जयगन्धसिन्धुरजयोत्खातेन का मे स्तुतिः शार्दूलविक्रीडित
स्मेरोऽयं शरभः परां हृदि घृणामायाति जातस्मयः ॥२॥

तस्यैव ।

1810 (d) Ed. शाखासु for शिखासु. I. O., S शिखासूद्वहसि for शिखासु वहसि.
Ed. वसु .. for वसुकल्पस्य.

1811 (a) Srk., A मेरु for शैल.
(c) Srk. दुर्गमश्रृङ्ग for उद्भमकेलि. Ed. लङ्घित for लङ्घन. I. O., S कला दुर्लीलता न (Srk. दुर्ललितात्मन्) for कला...दुद्.
(d) Srk कीर्णां for कीर्ति Ed. ज्योत्स्ना for ज्योत्स्नो.

1812 (a) Srk. यन्मार्गो० for यस्यानु०.
(c) Srk. दुर्दम for दुर्जय, जयोत्खातोऽपि for ०त्खातेन, कार्यं for का मे.
(d) Ed. परं for परां Srk. जातिस्मरः for जातस्मयः ।

Srk.—anonymous.

1813 अपि मृगपतिना करीन्द्रकुम्भ-
स्थलदलनोद्धतपौरुषेण यस्य ।
भयचकितदृशा प्रनष्टमुच्चैः
स हि शरभीकुलराजचक्रवर्ती ॥३॥

पुष्पिताग्रा

माधवस्य ।

1814 यः पृथ्वीवलयेषु विक्रमकथासीमास्थितिर्लाघव-
क्रीडान्यक्कृतमारुतिर्मृगपतेर्निःसीमदर्पज्वरः ।
तादृक्तादृगुदश्चदञ्चितचर्यैराश्चर्यकारी दिशा-
मीशानां सरभः कथं स हि
भवेदर्वाग्गिरां गोचरः ॥४॥

शार्दूलविक्रीडित

मकरन्दस्य ।

1815 नखज्योत्स्नागुच्छस्नपितगजगण्डस्थलभिदां
मृगेन्द्राणां जेतुस्तव समरभूमीषु शतशः ।
हते वा नीते वा वत लघुतरां शोच्यपदवीं
शुनीनां नाथेस्मिन्सरभ रभसस्यानवसरः ॥५॥

शिखरिणी

कस्यचित् ।

३६ सिंहः ।

1816 मृगेन्द्रं वा मृगारिं वा हरिं व्याहरतां जनः ।
तस्य द्वयमपि क्रीडा क्रीडादलितदन्तिनः ॥१॥

Spd. 901
अनुष्टुप्

कस्यचित् ।

1813 (a) I. O., S दन्त for कुम्भ.
1814 (a) Ed. पृथ्वीवलये सुविक्रम for पृथ्वीवलयेषु विक्रम.
1815 (b) Ed. जेतः for जेतु°.
1816 (a) Spd. द्वयं for हरिं.
(b) Spd. व्रीडा for क्रीडा.

1817 किं जातैर्बहुभिः करोति हरिणी पुत्रैरकार्यक्षमै
पत्रेणापि वनान्तरे विचलता यैः सार्धमुत्त्रस्यति । शार्दूलविक्रीडित
एकेनापि करीन्द्रकुम्भदलनव्यापारशक्तात्मना
सिंही दीर्घपराक्रमेण बलिना पुत्रेण गर्वायते ॥२॥

भानोः ।

1818 उत्क्रान्तं गिरिकूटलङ्घनसहं ते वज्रसारा नखा-
स्तत्तेजश्च तदूर्जितं स च नगोन्माथी निनादो महान् । Srk. 1035
आलस्यादविमुञ्चता गिरिगुहां सिंहेन निद्रालुना शार्दूलविक्रीडित
सर्वं विश्वजयैकसाधनमिदं लब्धं न किंचित्कृतम् ॥३॥

कस्यचित् ।

1819 विस्रं वपुः परवधप्रवणं च कर्म
तिर्यक्तयैव विदित सदसद्विवेकः । Srk. 1091
इत्थ न किंचिदपि चारु मृगाधिपस्य वसन्ततिलक
तेजस्तु तत्किमपि येन जगद्धराकम् ॥४॥

वसुन्धरस्य ।

1820 असंज्ञाः खल्वेते जलशिखिमरुद्भूमनिचयाः
प्रकृत्या गर्जन्ति त्वयि तु भुवन निर्मदमद । Srk. 1071
प्रसीद प्रारम्भाद्विरम विनयेथाः क्रुधमिमां शिखरिणी
हरे जीमूतानां ध्वनिरयमुदीर्णो न करिणाम् ॥५॥

अमरसिंहस्य ।

1817 (a) A क्रमै for क्षमैः.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 519

1819 (b) Srk कथितः for विदित.
Srk —anonymous

1820 (b) Srk. निर्मदमिदम् for निर्मदमद.
(c) Ed. विजयेथा.
Srk. changes the order of the lines as c d a b.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 362.

३७ सिंहशावः ।

1821 नाभ्यस्तमाक्रमणमङ्कुरिता न दंष्ट्रा
स्फीतं न वर्ष्म नखरैर्द्रढिमा न लब्धः ।
वसन्ततिलक
नादस्तथापि मृदुरेव स कोपि सिंह-
शावस्य येन विमदाः करिणो भवन्ति ॥१॥

नाकोकस्य ।

1822 संप्राप्य केशरिकिशोरमरण्यमेत-
दित्युद्भयं भ्रमति यूथमनेकपानाम् ।
वसन्ततिलक
एषोप्यजातसटमंसतटं विधूय
तन्मांसगृध्नुरसतोपि नखान्नियुङ्क्ते ॥२॥

मङ्गलस्य ।

1823 व्याधूयांसावनुदितसटौ तारमङ्गु ध्वनन्त
पाणी नातिस्फुटकररुहौ ग्राविण कण्डूयमानाः ।
मन्दाक्रान्ता
चक्षुः कोपात्कुटिलमरूणं बिभ्रतः सिंहशावा
दिष्ट्या चण्डध्वनितजलदं व्योम निर्भालयन्ति ॥३॥

तस्यैव ।

1824 अनुदितसटावंसौ नातिस्फुटाः करजाङ्कुरा
दशनमुकुलोद्भेदः स्तोको मुखे मृदु गर्जितम् ।
हरिणी
मृगपतिशिशोर्नास्त्यद्यापि क्रिया स्वकुलोचिता
मदकृतमहागन्धस्यान्ध्यं व्यपोहति दन्तिनाम् ॥४॥

तस्यैव ।

1821 Quoted by Aufrecht in ZDMG, 36, p. 536

1822 (d) Ed. असटोपि for असतोपि.

1823 (a) Ed., A भाव for तार.

(d) Ed. दृष्ट्या for दिष्ट्या.

1824 (a) Ed. ०सटावसौ for ०सटारंसौ.

(b) Ed. दशनमुकुलोद्भेदस्तोको for ०द्भेदः स्तोको.

(d) Ed. महो for महा.

1825 हंहो सिंहकिशोरक त्यजसि चेत्कोप वदामस्तदा
हत्वैवं करिणां सहस्रमखिलं किं लब्धमायुष्मता । Srk. 1060
इत्थं कर्तुमहं समर्थ इति चेद्धिङ्मूर्ख किं सर्वतो शार्दूलविक्रीडित
नालं प्लावयितुं जगज्जलनिधिर्यद्धैर्यमालम्बते ॥५॥

वीर्यमित्रस्य ।

३८ जरत्सिंहः ।

1826 शक्तिर्नाक्रमणस्य दन्तनखरं तून्मूलमांसावलि-
ग्लानं लोचनमन्धमुद्धतवलिव्यासङ्गशीर्णं वपुः । शार्दूलविक्रीडित
तद्भोः क्रीडत कुञ्जराधिपतयः स्वच्छन्दमन्तर्मृगाः
कम्पं मुञ्चत केशरी
विधिवशात्प्राप्तो जरादुर्दशाम् ॥१॥

नाकोकस्य ।

1827 नभसि चरतामम्भोदानां निशम्य रवं मना-
गनिभृतगुरुध्वानैर्यस्य प्रभिन्नमभूज्जगत् । हरिणी
वत परिणतः कालः कोयं करेणुघटाहत-
क्षितिरुहमटत्कारान्पार्श्वे शृणोति स केशरी ॥२॥

वैद्यगदाधरस्य ।

1825 (a) Ed. त्वया for तदा.
(b) Srk. एनं for एवं.
(c) Srk., A एवं for इत्थम्.
(d) Srk. transposes यद् and धैर्यम्. I. O., S समालम्बते for आलम्बते.

Srk.—anonymous.

1826 (a) Ed. आक्रमणेस्य for आक्रमणस्य. Ed. तन्मूल for तून्मूल.
(b) Ed. उद्धतवलिन्यासाङ्ग
The verse has been quoted by Aufrecht in ZDMG, 36, p. 537.

1827 (b) Ed. नभः for जगत्.
Ed. वैद्यस्य for वैद्यगदाधरस्य.

1828 वदनमदशनं श्लथा नखानां
पुष्पिताग्रा परिणतिरस्थिरघर्घरो निनादः ।
इति वहति दशापदं मृगेन्द्रे वत
कलभैरुपभुज्यते तटीयम् ॥३॥

तस्यैव ।

1829 यन्निद्रालसकण्ठनादकलिकां श्रुत्वैव दूरादितः
प्रत्येक स हि मूर्छया निपतितो गन्धद्विपानां गणः ।
शार्दूलविक्रीडित तस्यैवाद्य मृगाधिपस्य पुरतः प्रोन्मुक्तचण्डस्वना
निष्कम्पं विचरन्ति
दर्दुरवसापानोन्मदाः फेरवाः ॥४॥

गोसोकस्य ।

1830 आस्तां तावदसीमपौरुषजुषः संमानितात्यद्भुत-
शार्दूलविक्रीडित प्रारम्भाभ्यधिकक्रियस्य स खलु प्राच्यः प्रचारो हरेः।
जीर्णस्यापि च विन्ध्यकन्दरदरीद्वारावताराक्षमै-
रङ्गैरङ्गभृतो दलन्ति दरतो गन्धेन गन्धद्विपाः ॥५॥

वल्लणस्य ।

३९ गजः ।

Srk. 1072 1831 अकस्मादुन्मत्त प्रहरसि किमध्वक्षितिरुहं
शिखरिणी ह्रदं दन्ताघातैर्विदलसि किमुत्फुल्लसलिलम् ।'

1828 (b) Ed. उपभुज्यतेऽटवीयम् for उपभुज्यते तटीयम्.
1829 (a) I. O., S कणिकां for कलिकाम्.
(d) Sp., I. O., S विरटन्ति for विचरन्ति.. A फेरव for फेरवाः.
1830 (d) I O., S दरन्ति for दलन्ति.
I. O., S वल्लनस्य for वल्लणस्य.
1831 (a) Ed. उन्मत्त for उन्मत्त'.
(b) A दलयसि for विदलसि, नलिनम् (also Srk. and Sp.) for सलिलम्.

तदा जानीमस्ते करिवर मदोद्गारमसमं
सटां सुतस्यापि स्पृशसि यदि पञ्चाननशिशोः ॥१॥

नारायणस्य ।

1832 तापो नापगतस्तृषा न च कृशा धौता न धूली तनो-
र्न स्वच्छन्दमकारि कन्दकवलः का नाम केलीकथा । Spd. 923
दूरोन्मुक्तकरेण हन्त करिणा स्पृष्टा न वा पद्मिनी Smv. 23.10
प्रारब्धो मधुपैरकारणमहो झंकारकोलाहलः ॥२॥ शार्दूलविक्रीडित

आचार्यगोपीकस्य ।

1833 एणश्रेणिः शशकनिकरः शल्लकीनां कदम्बं
कोलव्यूहः स्पृशति सुखितां यत्र तत्रापि कुञ्जे ।
को नामास्मिन्बत हतवने पादपस्तादृगुच्चै-
र्यस्य च्छायामयमधिवसत्युष्णरुग्णो गजेन्द्रः ॥३॥ मन्दाक्रान्ता

कस्यचित् ।

1834 मध्येविन्ध्यवनं सलीलवसतिः स्वच्छन्दसत्पद्मिनी-
कन्दैर्यस्य सदाशितं भवविधिः क्रीडाकरिण्यः शतम् । शार्दूलविक्रीडित
तल्पं शैवलिनीदलानि मिलितो दैवान्मरूणां तटे
जिह्मस्ताम्यति संस्मरन्ननुदिनं
विन्ध्यं स गन्धद्विपः ॥४॥

नरसिंहस्य ।

1831 (c) A, Srk. बलोद्गारम् for मदोद्गारम्.

1832 (a) Ed., Spd., Smv. तृषापि न for तृषा न च.
(c) Ed. दूरान्मुक्त for दूरोन्मुक्त.
(d) Spd. अकारणमयो (Smv. अकारणमयं) for ०महो.
Spd. attributes it to लक्ष्मणसेन,
Smv. to उमापतिधर.

1833 (b) Ed. कोक for कोल.

1834 Ed. अमरसिंहस्य for नरसिंहस्य.

शिखरिणी

1835 जिघृक्षुर्वा मुक्तां दशनमथवा हन्ति करिणं
स चाण्डालव्याधो गणयति न लाभापचयिताम् ।
पुराणः प्रत्यग्रं फलमिह हि विक्रीय कतिचित्
स नागेन्द्रो जीवन्कति कति न लक्षाणि लभते ॥५॥

त्रिपुरारिपालस्य ।

४० वन्यगजः ।

शिखरिणी

1836 इह व्याधव्यूहः पटुघटितयन्त्रप्रहरणो
मृगेन्द्राणां बलात्प्रखरनखराणां कुलमिह ।
इहालङ्घ्यः शैलो बहलतरपङ्का सरिदिह
प्रदीप्तोऽग्निर्मध्येवनमहह कष्टं करिपतेः ॥१॥

कस्यचित् ।

शिखरिणी

1837 करिन्मा गर्जोच्चैर्मृगपतिरिहास्तेतिनिकटे
न दृष्टस्त्वं दैवादपसर सुदूरं द्रुतमितः ।
न किं पश्यस्यग्रे खरनखरनिर्दारितकरि-
प्रकीर्णास्थिश्रेणीधवलितमिमं शैलकटकम् ॥२॥

संग्रामचन्द्रस्य ।

शार्दूलविक्रीडित

1838 एतस्मिन्घनवद्धसपदि वनोत्सङ्गे नवाप्तोष्मभिः
स्वच्छन्दं गमितः सुखेन कतिभिः

कालो न दन्तावलैः ।

धिग्जातोसि तदात्र दग्धसमये दन्तिन्यदा नोदकं
नो वृक्षा न तृणानि केवलमयं दावानलः क्रीडति ॥३॥

वैद्यगदाधरस्य ।

1835 (a) Ed. करिणा for करिणं.

1837 (a) Ed. इहास्तेस्म (Sp. इहास्तेस्व) for इहास्तेति.
(d) Ed इदं for इमं.
The verse has been quoted by Aufrecht in ZDMG., 36, p. 528.

1838 (d) Ed. वृक्षो for वृक्षा, तृणार्तंन (contrary to metre) for तृणानि
Ed. वैद्यस्य for वैद्यगदाधरस्य.

1839 हे नागेन्द्र पुलिन्दपत्तनमितः पार्श्वे सुदूरे गिरि-
वल्मीकस्य न कस्यचित्तव पदारोपाच्च रूपान्तरम् । शार्दूलविक्रीडित
वन्यामग्नकरेणुकारुणिकतामास्थाय मास्थाः स्थली-
र्मा लुम्पन्ति पुरा पुराट्टविनटत्पूरोच्चया वीचयः ॥४॥
तैलपाटीयगाङ्गोकस्य

1840 मदसलिलकृतान्ध्यैः षट्पदैर्जातलील
व्रज गज वनमन्यच्चण्डशाखिप्रकाण्डम् । मालिनी
इह बहलपलाशोद्दामरम्ये तवासौ
न खलु कदलषण्डे गण्डकण्डूविनोदः ॥५॥
गुरोः ।

४१ मत्तगजः ।

1841 गले पाशस्तीव्रश्चरणयुगयुग्मे च निगडो
दृढः कक्षाबन्धः शिरसि सृणिघात खरतरः । Spd 931
नरः स्कन्धारूढो बत रमणयोग्येऽपि समये शिखरिणी
न जानीमो मूढ द्विरदवर कस्मात्तव मदः ॥१॥
लङ्गदत्तस्य ।

1842 अयं दूरभ्रान्तः पटुतरपिपासाकुलमनाः
कपोले ते मत्तद्विप निपतितः षट्पदयुवा ।
त्वमप्येतां पीणश्रवणदरदोलाव्यसनितां शिखरिणी
विमुञ्च स्वाच्छन्द्यादपनयतु तावत्तृषमिमाम् ॥२॥
सुरभेः ।

1839 (b) I. O , S पदारोपानुरूपभुव for पदा॰ रूपान्तरम्
Ed om तैलपाटीय in the name of the poet.

1841 (a) Spd युगले गाढ for युगयुग्मे च.
(b) Spd स्कन्धे for कक्षा, पातः for घात .
(c) Spl , I O S मरण for रमण Spd विषये for समये
(d) जानीमोऽस्यै for जानीमो मूढ, वद for बत.
Ed नङ्गदत्तस्य. Spd —anonymous.

1842 (c) Ed. दल for दर, I O , S दोल for दोला

Sv. 637
Spd. 918
Srk. 1689
शार्दूलविक्रीडित

1843 नीवारप्रसवाग्रमुष्टिकवलैर्यो वर्धितः शैशवे
पीतं येन सरोजिनीदलपुटे होमावशिष्टं पयः ।
तं दानावसरे तु मत्तमधुप व्यालोलगण्डं गजं
सानन्दं सभयं च पश्यति मुहुर्द्वारे स्थितस्तापस ॥३॥

मनोकस्य ।

शार्दूलविक्रीडित

1844 दानक्लिन्नकटस्य कुञ्जरपतेः स्वच्छन्दसंवर्धनैः
क्षीयन्ते यदि कोटयोप्यपचयः
किं तेन भूमीभुजाम् ।
येनैकेन रणाङ्गणप्रणयिना निर्जित्य शत्रोः पदं
दीयन्ते निजनायकाय वसुधाचक्राधिपत्यश्रिय. ॥४॥

वासुदेवसेनस्य ।

स्रग्धरा

1845 ग्राम्यामग्रे करेणुं स्वयमुपनयता येन बद्धोसि पाशै-
र्येन क्षुण्णं शिरस्ते
सृणिभिरमसृणैर्येन वाह्यः कृतोसि ।
तत्पादाङ्गुष्ठसंज्ञा परवशहृदयो द्रष्टुकामानमन्तू-
अन्तूनभ्येषि हन्तुं त्वमसि
गजपते सत्यमेको मदान्धः ॥५॥

उमापतिधरस्य ।

1843 (a) Srk. reads thus यो नीवारतृणाग्रमुष्टिकवलैः संवर्धित शैशवे
(b) Sv., Spd. सरोजपत्रपुटके for सरो...पुटे, ०शेषं for शिष्टं.
(c) Srk. तद्दानासवपान for तं...तु. Sv. तं दृष्ट्वा (Spd. पश्चात्) मदमन्थरालिवलयव्यालुप्त for दाना.. व्यालोल.
(d) Sv,, Spd., Srk, सोत्कण्ठं for सानन्द. Srk. शनैर्दूरे for मुहुर्द्वारे, A दूरे for द्वारे.

Sv. भट्टोः. Spd., Srk.—anonymous.

1844 (a) Ed. करस्य for कटस्य.
(c) Ed. परं for पदं.
Ed. वसुदेवसेनस्य for वासुदेवसेनस्य.

४२ पङ्कपतितगजः।

1846 दूरादेव करञ्जसर्जसरलप्रायान्विलोक्य द्रुमा-
न्क्षुत्क्षामो विकलः करी
क्षितिभृतः पादान्तिके प्रस्थितः। शार्दूलविक्रीडित
मोहादागत एव निर्भरदरीदुर्गे निरालम्बनो
निर्मग्नः किमयं करोति
भगवान्यस्य प्रतीपो विधिः ॥१॥
शङ्करदेवस्य।

1847 यल्लीलामदमेदुरा मधुलिहो यद्दन्तकान्तित्विषः
शीतांशोः श्रियमावहन्ति
गमनाद्भ्रश्यन्ति यस्याचलाः। शार्दूलविक्रीडित
जानीमः किमकाण्डचण्डिमगुणान्दैवस्य येन क्षणा-
न्मग्नः कासरकेलिपङ्किलतटोपान्ते स दन्तावलः ॥२॥
शालूकस्य।

1848 रटितमनुचितं ते कः करास्फालकालः
प्रचलितमतिमात्रं गात्रनिर्मज्जनाय। मालिनी
कथमपि पतितस्त्वं दुस्तरे पङ्कराशौ
कुरु करिवर धैर्यं दुर्जया दैवरीतिः ॥३॥
पाम्पाकस्य।

1849 करेणुर्नाहूता निजकवलभागप्रणयिनी
न चामृष्टः स्नेहात्करकिसलयेनापि कलभः। शिखरिणी
स येनासौ दर्पात्प्रतिगजजिगीषारभसतः
क्रुधा धावन्मग्नो ह्रदपयसि कष्टं करिपतिः ॥४॥
त्रिपुरारिपालस्य।

1848 (d) Ed. दुस्तरा for दुर्जया.

1850 न पश्यत्येवाशाः श्रयति न विषादं च मनसा
शिखरिणी समुद्धारे शक्त भुवि कमपि नान्य गणयति ।
स जम्बाले मग्नो निजगरिमगम्भीररभस-
स्फुरद्रोमोद्भेदः श्लथयति करी जीवनरसम् ॥५॥

तस्यैव ।

४३ बद्धगजः ।

1851 रे रेवातटकेलिलम्पटवपु शोक वृथा मा कृथाः
शार्दूलविक्रीडित कुम्भिन्कुम्भसमाहृतं पिब पयो
बन्ध्यैव विन्ध्यस्मृतिः ।
ताभिः काननकुञ्जरीभिरधुना दैवेन दूरीकृतो
वेल्लत्पल्लवशल्लकीवनलताकुञ्जेषु ते विभ्रमः ॥१॥

कङ्कणस्य ।

1852 घासग्रासं गृहाण त्यज गजकलभ प्रेमबन्धं करिण्यां
Sv. 640 Spd. 928 स्रग्धरा पाशग्रन्थिव्रणानामविरतमधुना देहि पङ्कानुलेपम् ।
दूरीभूतास्तवैते शबरवरवधूविभ्रमोद्भ्रान्तदृष्टा
रेवातीरोपकण्ठच्युतकुसुमरजोधूसरा

विन्ध्यपादाः २॥

भर्तृमेण्ठस्य ।

1851 (c) Ed. अभितो for अधुना.

1852 (a) Ed. करि for गज. Spd. प्रीति for प्रेम. Sv., Spd. करिण्याः for करिण्याम्.

(b) Before पाश Ed. reads पश्य Sv. अभिमतम् (Spd. अविरलम्) for अविरतम्.

(c) Sv. रम्या (Spd हृष्यत्) for दृष्टा.

(d) Sv. कूल for तीर, द्रुम for च्युत

Sv. हस्तिपकस्य for भर्तृमेण्ठस्य.

Spd.—anonymous.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 369.

1853 त्यक्तो विन्ध्यगिरिः पिता भगवती मातेव रेवानदी
ते ते स्नेहनिबन्धबन्धुरधियस्तुल्योदया दन्तिनः । शार्दूलविक्रीडित
त्वल्लोभान्ननु हस्तिनि स्वयमिदं बन्धाय दत्त वपु-
स्त्वं दूरे भ्रियसे लुठन्ति च
शिरःपीठे कठोराङ्कुशाः ॥३॥
तस्यैव ।

1854 नो मन्ये दृढबन्धनक्षतमिदं नैवाङ्कुशोद्घाटनं
स्कन्धारोहणताडनात्परिभवं नैवान्यदेशागमम् । Spd. 934
चिन्तां ये जनयन्ति चेतसि परं स्मृत्वा स्वयूथं वने शार्दूलविक्रीडित
सिंहत्रासितभीतभीरुकलभा
यास्यन्ति कस्यान्तिकम् ॥४॥
पाम्पाकस्य ।

1855 अयि क्षुद्रो माभून्मतिमहिमगर्वो मनसि वः
करी यातो बन्धं यदिह विनयस्तत्र विजयी । शिखरिणी
अयं क्रोधाध्मातस्त्यजति विनयं चेन्मदवशा-
त्तत. स्कन्धावारं न किमखिलमेवाकुलयति ॥५॥
त्रिपुरारिपालस्य ।

1853 Quoted by Aufrecht in ZDMG, 36, p. 369.

1854 (a) Spd. बन्धनात् for बन्धन I. O., A, S क्षय for क्षत.

(c) Spd. यथा for परं.

(d) Ed., A, Spd. कस्याश्रयम् for कस्यान्तिकम्.

Quoted by Aufrecht in ZDMG, 36, p. 377 with उद्घट्टन for उद्घाटनं, परिभव. for ०भवं, देशागमम् for ०गमं, मे for ये, यथा for परं, भीत fro भीरु, कस्याश्रयम् for कस्यान्तिकम्, under Vetālapañcaviṃśatikā.

1855 (a) Ed. अपि for अयि.

(b) Eb. विनयत्रस्त for विनयस्तत्र.

४४ मृगः ।

1856 शान्तेपि स्वयमेव दावशिखिनि क्रूरं किराताधिपे
शार्दूलविक्रीडित चापं संकलयत्यपि श्लथयति व्याधे च तां वागुराम् ।
सारङ्गस्य न पश्यतः सहचरीमुद्भिन्नबाष्पाम्भसो
निर्दग्धं वपुराहतानि परितो
मर्माणि रुग्णा गतिः ॥१॥

जलचन्द्रस्य ।

1857 नादत्से हरिताङ्कुरान्कचिदपि स्थैर्यं न यद्गाहसे
Srk. 756 यत्पर्याकुललोचनोसि करुणं कूजन्दिशः पश्यसि ।
शार्दूलविक्रीडित दैवेनान्तरितप्रियोसि हरिण क्षामोसि यत्प्रत्यहं
प्रत्यद्रि प्रतिकाननं प्रतिनदि प्रत्यूषरं धावसि ॥२॥

केशटस्य ।

1858 वन्यैः प्राणिति काननेषु हरिणस्तद्वात्रवैरी निज
शार्दूलविक्रीडित क्रूरोरण्यपतिस्तदत्र शरणं शान्तोस्त्यदूरे मुनिः ।
इत्यस्मिन्नुपसेदिवानयमसावस्यैव दुर्दैवतो
मा भैषीरिति भाषणेप्यकरुणो
जातोऽथ वाचंयमः ॥३॥

रत्नमालीयपुण्ड्रोकस्य ।

1859 नासन्नेपि ददाति शष्पविपिने क्षामे दृशौ न क्षिप-
शार्दूलविक्रीडित त्यच्छाच्छेषु च निर्झरेषु रसनानालीमुदन्यातुरः ।

1857 (c) Ed. क्षीणोसि (Srk. त्वं चापि) for क्षामोसि Srk. किं यच्चिरं for यत्प्रत्यहं
(d) Srk. कन्दरं for काननं, भ्राम्यसि for धावसि.
Srk —मुञ्जस्य.

1857 Sp. पुरण्ड्रोकस्य for रत्न··· · कस्य

1859 (a) Ed. पदानि for ददाति.

न स्वस्थो वत कौतुकादपि सुहृद्गोष्ठीषु तिष्ठासति
ध्यायन्मेकलकन्यकावनमविच्छिन्नाश्रुवेगो मृगः।४॥
भट्टशालीयपीताम्बरस्य।

1860 दुर्गारण्यदरीषु भूरुहघनच्छाये शयालुस्तृणा-
न्याखाद्योदरपूरमच्छसुलभैरम्भोभिराप्यायितः। शार्दूलविक्रीडित
एष प्रेङ्खदपाङ्गभङ्गिषु सहाधीती कुरङ्गीदृशां
क्रूरव्याधकुलेषु हन्त पिशितैः स्वैरिव वैरी मृगः॥५॥
धर्मयोगेश्वरस्य।

४५ व्याधोपहतमृगः।

1861 त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विश्रामस्थितिहेतवो न गणिता बन्धूपमाः पादपाः। Sv. 654
बालापत्यवियोगकातरमुखी त्यक्तार्धमार्गे मृगी शार्दूलविक्रीडित
मृग्यन्तः पदवीं तथाप्यकरुणा
व्याधा न मुञ्चन्ति माम्॥१॥
धर्मपालस्य।

1862 छित्त्वा पाशमपास्य कूटरचनां भित्त्वा बलाद्वागुरां Sv. 655
पर्यन्ताग्निकलापजालकुटिलान्निर्गत्य दूरं वनात्। Spd. 940

1859 Ed om भट्टशालीय in the poet's name.

1860 (a) Ed. भूधर for भूरुह.
(b) I. O., A, S उदक for उदर.

1861 (c) Sv. दुःखविधुरा नापेक्षिता सा for कातर...मार्गे.
(d) Sv. मार्गन्त· for मृग्यन्तः, अमी for माम्.
Sv. मुक्तापीडस्य.

1862 (a) Sv., Srk भंक्त्वा for छित्त्वा. Spd भंक्त्वा for भित्त्वा.
(b) Srk., Sv पर्यस्त for पर्यन्त, inserts शिखा (also Spd.) bet. अग्नि and कलाप, om. जाल (also Spd.), read जटिलात् (also Spd.) for कुटिलात्. I. O., S निर्गम्य (Srk., Spd. निःसृत्य) for निर्गत्य.

Srk 1493 व्याधानां शरगोचरादतिजवेनोत्प्लुत्य गच्छन्मृगः
शार्दूलविक्रीडित कूपान्तःपतितः करोतु विगुणे किं
वा विधौ पौरुषम् ॥२॥
कस्यचित् ॥२॥

1863 प्रियायां स्वैरायामतिकठिनगर्भालसतया
Srk. 1169 किराते चाकर्ण धृतधनुषि धावत्यनुपदम्।
शिखरिणी प्रियाप्रेमप्राणप्रतिभयवशाकूतविकलो
मृगः पश्चादालोकयति च मुहुर्याति च मुहु ॥३॥
कालिदासस्य।

1864 भुवो वन्या मग्नाः शिशुरयमदृष्टव्यतिकर.
शिखरिणी कुरङ्गो हन्तारः सविध इति सतापतरलः।
अये नौकारूढ प्रतिकृतिमतिस्त्वन्मुखमहो
मुहु पश्यन्मज्जत्यकरुण तथापि प्रहरसि ॥४॥
तिलचन्द्रस्य।

1865 यद्येतद्विपिनं विपन्नमहह क्षुण्णं किमेतत्सर-
शार्दूलविक्रीडित स्तच्चेत्किं पुनरग्रतो ननु धनुर्ध्वानः पटीयानयम्।
अद्य श्वो विजनिष्यमाणहरिणीसंचारचिन्ताचम-
त्कारक्रान्तमना मनागवनतग्रीवो मृगस्ताम्यति ॥५॥
तस्यैव।

1862 (c) Sv. अपि for अति Spd. उत्पत्य for उत्प्लुत्य Sv. धावन् for गच्छन्
(d) Spd. करोति for करोतु A, I O, S विपिने for विगुणे (Sv. विधुरे)
Sv. मुक्तापीडस्य. Spd.—anonymous.

1863 (b) Srk. चाकर्णं for चाकर्ण.
Srk.—anonymous.

1865 (c) Ed. गृहिणी for हरिणी.

४६ दावोपहतमृगः ।

1866 गर्भक्लान्तिभरालसां घनमरुद्व्यालोलदावानल-
ज्वालाजालसमाकुलां
सहचरीमालोक्य लोलेक्षणाम् ।
वेगाद्दूरविनिर्गतोपि सपदि व्यावृत्य धावन्मृगो
गच्छन्तीं स्मृतिशेषतामुपगतः
स्नेहस्य किं दुष्करम् ॥१॥
सुरभेः ।

शार्दूलविक्रीडित

1867 चिरयति हरिणी हरन्ति जीवं
शबरशरास्तरुवह्नयः स्फुरन्ति ।
इति बत हरिणः क्षणं वनान्त-
र्विशति विषीदति मूर्छति प्रयाति ॥२॥
जलचन्द्रस्य ।

पुष्पिताग्रा

1868 मृग विसृज विषाद दग्धवल्मीककूट-
स्फुटनकटुविगन्धो नश्वरोयं हुताशः ।
जलधरजलधारोत्कण्ठिसारङ्गतृष्णा-
च्छिदुरमुदिरमालामेदुरा द्यौरिदानीम् ॥३॥
धर्मयोगेश्वरस्य ।

मालिनी

1869 इतो दावज्वाला स्थलभुव इतो जालजटिला
इतो व्याधो धावत्ययमनुपदं चक्रितधनुः ।
इतोप्यग्रे तिष्ठत्ययमजगरो विस्तृतमुखः
क्व यायात्किं कुर्यान्मृगशिशुरयं दैववशगः ॥४॥
कस्यचित् ।

Srk. 1508
शिखरिणी

1866 (a) Ed , A धर्म for गर्भ.

1868 (c) A, I. O., S तृप्ता for तृष्णा.

1869 (a) Srk. ज्वालः for ज्वाला. I. O , A, S ज्वाल for जाल.
(b) Ed. transposes अयम् and अनुपदम्. Srk. वक्रित for चक्रित.

1870 व्योमार्धे ज्वलितो रविः कवलितं दावानलैः काननं
धूम्याभिर्न दिशः स्फुरन्ति
परितः पन्थाः शिलादन्तुरः ।
Smv. 26 8
शार्दूलविक्रीडित
इत्थं शोणितसिक्तसृक्कणि यथाप्राणं मृगे धावति
व्याधेनापि शरासने
करुणया नारोपिताः पत्रिणः ॥५॥
उमापतिधरस्य ।

४७ मृगी ।

1871 अनुगृहाण शिशूनभिलङ्घिता
द्रुतविलम्बित
शबरवारिविहारवनस्थली ।
विसृज कातरतामिदमग्रतो
हरिणि कारुणिकस्य तपोवनम् ॥१॥
कस्यचित् ।

1872 हरिणि भिल्लसमाजसमाकुलं
व्रज सरोथ किमत्र विलम्बसे ।
द्रुतविलम्बित
विशति पातुमपो न तपोवना-
दिदमभक्ष्यपला कपिलापि गौः ॥२॥
चपलदेवस्य ।

1873 हरिणि सानुनि मानुषवर्जिते
द्रुतविलम्बित
चर विसृज्य न निर्भरमर्भकान् ।
तव तरक्षुकुलक्षुभितोदरे
वसुमतीभृति निर्वृतिरेव का ॥३॥
तस्यैव ।

1870 (a) Smv. ज्वलितो for ज्वलित.
(c) Smv. लोहित for शोणित.

Smv.—anonymous..

1871 (a) Ed. अति for अभि.
1872 (b) A त्यज for व्रज.

1874 इह निभृतनिपातमूकपादं
वलयितकार्मुकवल्लयः किराता ।
भवदलसविलोकनानभिज्ञा — पुष्पिताग्रा
मृगगृहिणि प्रहरन्ति गच्छ दूरम् ॥४॥

मन्दोकस्य ।

1875 आदाय मांसमखिलं स्तनवर्जमङ्गे — Sv. 660
मां मुञ्च वागुरिक याहि कुरु प्रसादम् । — Spd. 4015
अद्यापि शष्पकवलग्रहणानभिज्ञा — Smv. 90.1
मद्वर्त्मचञ्चलदृशः शिशवो मदीयाः ॥५॥ — वसन्ततिलक

छित्तिपस्य ।

४८ नानापशवः ।

1876 अम्भो भजस्व चिरमस्य यथाभिलाष-
मेतन्न ताण्डवय सैरिभ काननं च । — वसन्ततिलक
दुश्चेष्टितेन यदनेन भृशं तवैव
ध्वस्ताशयो भवति निष्कलुषस्तडागः ॥१॥

वैद्यगदाधरस्य ।

1877 नाभीभिः प्रसवैः स्वयं निपतितैर्भूमौ विधत्ते धृतिं
नारोढुं परिपाकमेदुरफलाः शक्नोति शाखाशिखाः । — शार्दूलविक्रीडित

1875 (a) Ed. अङ्ग (Sv., Spd अङ्गात्) for अङ्गे.
(b) I. O., S. Spd. यामि for याहि.
(c) Spd. सीदन्ति for अद्यापि. Sv घास for शष्प, अभिज्ञो for अभिज्ञा.
(d) I. O., S निश्चल for चञ्चल. Sv. मन्मार्गवीक्षणपरस्तनयो (Spd., Smv. मन्मार्गवीक्षणपरा· शिशवो) for मद्वर्त्म ··शिशवो.
Ed. छित्तपस्य. Sv. Spd.—anonymous.
Smv. नरदेववर्मण..

1877 (a) Ed. भूमी for भूमौ.

अप्रज्ञातनिजप्रभावकुपितः कोकूयमानो रुषा
लिप्सुर्वानरसूनुरेष लवलीक्षोणीरुहं कर्षति ॥२॥
उमापतिधरस्य ।

1878 यच्चाण्डालगृहाङ्गणेषु वसतिः कौलेयकानां कुले
शार्दूलविक्रीडित जन्म स्वोदरपूरणं च विघसैर्नं स्पर्शयोग्यं वपुः ।
तन्मृष्टं सकलं त्वयाद्य शुनक क्षोणीपतेराज्ञया
यत्त्वं काञ्चनशृङ्खलावलयितः प्रासादमारोहसि ॥३॥
माधवसेनस्य ।

1879 पूतः श्रौतपरिष्क्रियाभिरवहीभावाय(?) यो दीक्षितः
शार्दूलविक्रीडित श्लाघ्या यस्य गयाशिरसहचरी तुल्योऽश्वमेधेन यः ।
नासावेधनतश्चिरेण कलितश्चक्रत्रिशूलाङ्कितो
धिक्कर्माणि तुरुष्कवेश्मनि सुराकाण्डालवाही
वृषः ॥४॥
साजोकस्य ।

1880 उच्छ्रायो जनभीतिहेतुरधिकं वैकृत्यमुद्ग्रीवता
शार्दूलविक्रीडित सर्वत्र प्रतिपर्वविक्रमभवः क्रूरो मरुजन्मभूः ।
यस्योच्चैः कटुकण्टकप्रणयिता धिक्कष्टमुष्ट्रे पशौ
तस्मिन्राजपरिग्रहः स च महाशब्दद्वयीभाजनम् ॥५॥
गोविन्दस्य ।

४९ तरुः ।

1881 शाखानामुपरि स्थितैः शकुनिभिर्दूराद् गृहीता दिशः
शार्दूलविक्रीडित सद्योमुक्तफलैर्विवृत्य कपिभिः पश्यद्भिरेव स्थितम् ।

1877 (d) Sp., A पङ्गु (Ed. कूर्दन्) for लिप्सुः.
1878 Ed. माधवस्य for माधवसेनस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 541, with उन्मृष्ट' for तन्मृष्ट'. (c)
1880 (b) I. O., S वक्रिम for विक्रम.

छायापास्तपरिश्रमैश्च पथिकैरात्मा परं रक्षितो
न क्षुद्रैर्निपतन्निशातपरशावात्मार्पितः शाखिनि ॥१॥

अभिनन्दस्य ।

1882 मूर्धारोपणसत्कृतैर्दिशि दिशि क्षुद्रैर्विहङ्गैर्द्रुतं
छायादाननिराकृतश्रमभरैर्नष्टं मृगैर्भीरुभिः । Srk 1024
हा कष्टं फललोलुपैरपसृतं शाखामृगैश्चञ्चलै-
रेकेनैव दवानलव्यतिकरः सोढः परं शाखिना ॥२॥

कस्यचित् ।

1883 सुच्छायं फलभारनम्रशिखरं सर्वार्तिशान्तिप्रदं
त्वामालोक्य सुभूरुह खलु वयं मार्गं विहायागताः । Srk. 1050
अन्तस्ते यदि कोटरोदरचलद्व्यालावलीविस्फुर- शार्दूलविक्रीडित
द्वक्त्रोद्भ्रान्तविषानलातिभयद

धन्यस्तदानीं भवान् ॥३॥

विद्यायाः ।

1884 व्याकुर्महे बहु किमस्य तरो सदैव
नैसर्गिको यदुपकाररसः परेषु ।
उन्मूलितोपि मरुता बत वारिदुर्गे Srk. 1090
मार्गे यदन्यजनसंक्रमतामुपेतः ॥४॥ वसन्ततिलक

कस्यचित् ।

1882 (a) Srk गतम् for द्रुतम्.
(d) Srk. महीरुहं for सुभूरुह , वयममी for खलु वयं
The verse has been quoted by Aufrecht in ZDMG, 36, p. 555.

1883 (b) Srk., I. O., S वन्द्य for धन्य°.

Srk.—anonymous.

1884 (d) Srk अयम for यद्.
(c) Srk. दुर्ग for दुर्गे.
(d) Srk. यदल for यदन्य

1885 सोढप्रौढहिमक्लमानि शनकैः पत्राण्यधः कुर्वते
Smv. 33.8 संभाव्यच्छदवाञ्छयैव तरवः केचित्कृतघ्नव्रताः।
Srk. 1042 नामन्यन्त तदातनीमपि निजच्छायाक्षितिं तैः पुन-
शार्दूलविक्रीडित स्तेषामेव तले कृतघ्नचरितैः शुष्यद्भिरप्यास्यते ॥५॥

अचलसिंहस्य।

५० कल्पतरु।

1886 सर्वार्थिनामभिमतानि फलन्नपि त्वं
वसन्ततिलक कल्पावनीरुह न मानवतामुपास्यः।
यस्मात्त्वया न विहितो विदुषां निःशेष-
स्तेषामकारि विफलः सकलः प्रयासः ॥१॥

नाकोकस्य।

1887 बालवामनवृद्धानां नत्वा यो न फलप्रदः।
अनुष्टुप् तस्मिन्कल्पतरौ स्तब्धे लब्धेनापि फलेन किम् ॥२॥

राजकुब्जदेवस्य।

1888 पत्राणि प्रथमं द्रुतानि विकुलैरुत्खातमूलः क्रमा-
शार्दूलविक्रीडित त्कीटैः कल्पमहीरुहः स पतितो भग्नाः शतं वल्लयः।
एकेभ्योपि पुनः प्ररोहति भृशं तस्याङ्कुरग्रामणीः
पूर्वाशाधिपतिः प्रसीदति
स चेद्देवो दयावान्हरिः ॥३॥

बलभद्रस्य।

1885 (b) Smv. हि for एव
(c) Smv., Sp. वृतिं for क्षितिं. Smv. एव for अपि.
Smv. बिल्हणस्य for अचलसिंहस्य
Srk.—anonymous.

1886 (d) Ed. सकलप्रयासः for सकलः प्रयासः
The verse has been quoted by Aufrecht in ZDMG, 36, p. 537.

1887 A, I. O. राजकुब्जद्रवस्य (Sp. राजकुब्जस्य) for राज.. देवस्य.
This verse has been quoted by Aufrecht in ZDMG, 86, d. 365.

1889 निष्पन्नाः कति नाम नामरपुरोपान्तेषु भूमीरुहः
श्लाघ्यस्तत्र स एव कल्पविटपो यत्रासतेमी गुणाः ।
संकल्पाः फलदोहदानि फलित रत्नानि वृत्तिर्जग- शार्दूलविक्रीडित
त्क्लेशच्छेदनिदानमुन्नतिरनुलङ्घ्या यशो दुर्जयम् ॥४॥

शरणस्य ।

1890 स्वर्णैः स्कन्धपरिग्रहो मरकतैरुन्मीलिताः पल्लवा
मुक्ताभिस्तबकश्रियो मधुलिहां वृन्दानि नीलोपलैः ।
संकल्पानुविधायि यस्य फलित कस्तस्य धत्ते तुलां Spd. 988
धिग्जातिं द्रुमसंकथासु यदसौ Smv 33.11
कल्पद्रुमापि द्रुमः ॥५॥ शार्दूलविक्रीडित

गदाधरनाथस्य ।

५१ चन्दनः+ ।

1891 श्रमच्छित्त्यै छायां भज पथिक हे चन्दनतरो-
रिह व्यालव्रातः पुनरिति भयं मा खलु कृथाः ।
इदानीमेतस्मिन्कृतवसतयः सन्ति शिखिनः शिखरिणी
स्वनैर्येषां रम्यैरपि हि फणिनः क्वाप्यपसृताः ॥१॥

अचलसिंहस्य ।

1892 आमोदैस्ते दिशि दिशि गतैर्दूरमाकृष्यमाणाः Spd. 998
साक्षाल्लक्ष्मीं तव मलयज द्रष्टुमभ्यागताः स्मः । Smv. 33.24

1890 (a) Spd , Smv. उल्लासिता for उन्मीलिता ।
(b) Spd. नीलोत्पलै· for नीलोपलैः.
(d) Spd., Ed., Smv. यद्य for यदसौ.
Smv., Spd. रल्हणस्य for गदाधरनाथस्य.

+ I. O , S चन्दनम्.

1891 (d) Ed. एषा for येषा

1892 (a) Spd तैः for ते
(b) Srk. लक्ष्म्या for लक्ष्मी. Ed. वन for तव

Srk 1078 पश्यामः किं सुभग भवतः क्रीडति क्रोड एव
मन्दाक्रान्ता व्यालस्तुभ्यं भवतु कुशलं मुञ्च नः साधु यामः ॥२॥

तस्यैव ।

1893 क्षिप्तश्चेन्मलयाचलेन्द्र भवतः पादोपजीवी निज-
शार्दूलविक्रीडित स्तैरुत्पाट्य निकुञ्जनिर्झरपयःपूरैः पटीरद्रुमः ।
तन्निर्यातु जहातु पन्नगकुलं तापं निहन्तु श्रियं
धत्तां विन्दतु वन्द्यतां त्रिजगतां
त्वत्कीर्तिमुन्मुद्रयन् ॥३॥

साज्ञानन्दिनः ।

1894 ककुभि ककुभि भ्रामं भ्रामं विलोक्य विलोकितं
Srk. 1082 मलयजसमो दृष्टोऽस्माभिर्न कोऽपि महीरुहः ।
हरिणी उपचितरसो दाहच्छेदैः शिलातलघर्षणै-
रधिकमधिकं यत्सौरभ्यं तनोति मनोहरम् ॥४।

भामहस्य ।

1895 क्व मलयतटी जन्मस्थानं क्व ते च वनेचराः
Srk. 1053 क्व खलु परशुच्छेदः क्वासौ दिगन्तरसंगतिः ।
हरिणी क्व च खरशिलापट्टे घृष्टि क्व पङ्कसरूपता
मलयज सखे मा गाः खेदं गुणास्तव वैरिणः । ५॥

मलयजस्य ।

1892 (c) Spd., Smv., Srk. transpose पश्यामः and किं
(d) Srk. व्याड for व्याल Smv., Ed. साधयाम for साधु याम .
Srk., Smv , Spd.—anonymous.

1893 Ed. साञ्झानन्दिनः (Sp. साञ्झनन्दिनः) for साज्ञानन्दिनः.

1894 (a) Srk. भ्रान्त्वा भ्रान्त्वा for भ्रामं भ्राम.
(c) Srk दाहेछेदे for दाह च्छेदैः Sp. छेदे for छेदै .
(c-d) A, Srk. घर्षणेऽप्यधिकम् for घर्षणैरधिकम्.
Srk.—तरणिनन्दिन

1895 (a) Ed. मलयजतटी for मलयतटी.
(d) Srk. दूषणम् for वैरिणः
Srk.—anonymous.

५२ अश्वत्थ ।

1896 छायामस्य निषेव्य पिप्पलतरोराकृष्य शाखाः शतं
भुक्त प्रागिति लज्जया गजपते किं नात्र विश्रम्यते ।| शार्दूलविक्रीडित
दैवेनेदृशयोग एव घटितो यत्त्वादृशां कोटिभि-
स्तादृक्तादृगयं कृतः पुनरभूदेतादृशः पल्लवैः ॥१॥

ईश्वरभद्रस्य ।

1897 सत्यं पिप्पलपादपोत्तम घनच्छायोन्नतेन त्वया
सन्मार्गोयमलङ्कृतः किमपरं त्वं मूर्तिभेदो हरेः । Srk 1061
किं चान्यत्फलभोगकृष्टमुखरास्त्वामाश्रिताः पत्रिणो शार्दूलविक्रीडित
यत्पुंस्कोकिलकूजितं विदधते तन्नानुरूपं परम् ॥२॥

शालिकनाथस्य ।

1898 नोन्मीलन्तु नितम्बिनीकरतलस्पर्धाभृतः पल्लवा
प्रत्युद्यान्तु न वैणनाभिमधुरा मोदाः प्रसूनश्रियः ।
नाभूवन्फलसंपदो मधुरसप्रस्यन्दभाजस्तथा- शार्दूलविक्रीडित
प्यश्वत्थस्य गतः सुखेन जगतां वन्द्यस्य जन्मग्रहः ॥३॥

उमापतिधरस्य ।

1899 साक्षान्नैष करोति कामपि मुदं नादत्य हन्त्यापदो
न प्रीणाति मनोषिणां श्रवणमप्याश्वासनासूक्तिभिः । शार्दूलविक्रीडित
तस्याम्भोधिसुतापतेर्भगवतोधिष्ठानमात्रादसौ
दुःखप्राग्विनिवेदितानपहरत्यश्वत्थभूमीरुहः ॥४॥

तस्यैव ।

1900 पत्राणि त्रुटितानि कीटपटलैरामूलमुन्मूलिताः
शाखा वन्यमतङ्गजैर्न करभैरास्वाद्य मुक्ता त्वचः । शार्दूलविक्रीडित

1896 (a) Ed. छाया यस्य for छायामस्य

1897 (d) Sp. फलम् for परम्

Srk —anonymous

1899 (a) Ed नाहत्य for नादत्य

1900 (a) I. O., A, S विटपै for पटलै

स्थाणुः केवलमस्ति पिप्पलतरोस्तत्रापि शीतातुरै-
र्ग्रामीणैः परितः कुठारपतनारम्भः परामृश्यते ॥५॥

तस्यैव ।

५३ चूत. ।

मन्दाक्रान्ता

1901 तैस्तैर्जन्मप्रभृति विदितैर्दोहदैः प्राक्प्रयत्ना-
त्सिक्त्वा सिक्त्वा कथमपि घटीयन्त्रमुक्तैः पयोभिः ।
नीत्वा चूतं फलसमुदयावाप्तियोग्यामवस्थां
तत्र स्नेहं त्यजसि किमिवोद्यानपाल क्षणेन ॥१॥

कस्यचित् ।

शार्दूलविक्रीडित

1902 दग्धाः केपि दवानलेन कतिचिद्वात्यारयान्दोलनै-
र्व्यापन्नाः कुलिशाभिघातरुजया केचिद्विसृष्टासव ।
एकः क्रान्तजनाश्रयो विजयसे चूत त्वमुर्वीरुहां
धिग्दैवं भवतोपि कीटपटलैरन्तः प्रवेशः कृतः ॥२॥

वैद्यगदाधरस्य ।

शार्दूलविक्रीडित

1903 हे चूतद्रुम किं मुधैव मधुपान्प्रीणासि किं कोकिला-
अल्पन्तो मधुराणि नित्यमलिना नैते चिरस्थायिनः ।
तानुल्लासय पल्लवाननुदिनं यैराहितामुन्नति
बिभ्राणः प्रतिपर्वनिर्भरफलैरुत्तुङ्गतां यास्यसि ॥३॥

वैद्यत्रिविक्रमस्य ।

Spd. 1019
Smv. 33 17

1904 यो दृष्टः स्फुटदस्थिसंपुटमुखान्निर्यत्प्रवालाङ्कुरो
लब्धः स द्विदलादिकक्रमवशादारूढशाखाशतः ।

1902 (a) I. O., A, S केन for केपि.

1903 (a) Ed. धिक् for किं.
(c) I. O , S यैराहितात्युन्नतिं for यै.. तामुन्नतिं
(d) Ed. यास्यति for यास्यसि.

1904 (a) Srk. यः पूर्वं for यो दृष्टः. Spd. वशात् (Srk. मुखे) for मुखात्.
(b) Spd., Smv. दैवात् स (Srk. प्रायः स) for लब्धः स Srk. आरब्ध for आरूढ.

स्निग्धं पल्लवितो घनं मुकुलितः स्फारच्छदं पुष्पितः
सोत्कर्षं फलितो भृशं च Srk. 1104
विनत कोप्येष चूतद्रुम ॥४॥ शार्दूलविक्रीडित
कस्यचित् ।

1905 सुगन्धि कोपि स्यात्कुसुमसमये कोपि विटपी
शलाटौ सामोदः फलपरिणतौ कापि सुरभिः । शिखरिणी
प्रसूनप्रारम्भात्प्रभृति फलपाकावधि पुन-
र्जगत्येकत्रैव स्फुरति सहकारे परिमलः ॥५॥
उमापतिधरस्य ।

५४ अशोकः ।

1906 छायातिसान्द्रशिशिरा नवपल्लवानि
स्निग्धानि मुग्धसुरभिः स्तवकप्रबन्धः । वसन्ततिलक
स्थित्वा फलानि सदृशानि विधेहि मा वा
दृष्ट्वैव ते मुखमशोक वयं विशोकाः ॥१॥
नाकोकस्य ।

1907 सन्तु स्वादुफलाः शतं परिमलश्लाघ्यप्रसूनावली-
संवाधाश्च शतं वसन्तसमये वैशेषिकाः शाखिनः । शार्दूलविक्रीडित
उत्फुल्लस्तबकस्रगुज्ज्वलनवप्रोत्खेलवल्लिर्यथा
कङ्केल्लिः श्रियमस्य पुष्यति तथा
कः प्रेक्षणीयोपरः ॥२॥
तस्यैव ।

1904 (c) I. O, S पुलकितः for मुकुलितः I. O, A, S, Srk. स्फारच्छटं for ०च्छदं.
(d) Spd. नमितः for विनत॰. Smv. विनमितः for च विनत .
Spd. attributes it to हेतुक and Smv to हर्ष

1906 Quoted by Aufrecht in ZDMG, 36, p. 536.

1907 Quoted by Aufrecht in ZDMG, 36, p. 537.

1908 कियन्तः सन्त्येते जगति तरव कोपि न पुनः
शिखरिणी प्रसूनार्थं नारीचरणपरिचर्यागतिरभूत् ।
प्रमोदादन्तश्चेद्वलति फलवाञ्छा तव तदा
वदाशोक श्लाघ्यो भवतु कतरो दोहदविधि ॥३॥

जलचन्द्रस्य ।

1909 केषांचित्कुसुमोदयादनु विना तेनापि केषांचन
शार्दूलविक्रीडित स्फायन्ते धरणीरुहामिह दिनैर्द्वित्रैः फलश्रेणयः ।
पुष्पश्रेणिषु पद्मरागपदवीपत्रेषु कान्ताकर
श्रीरित्येव फलाहते वत गतः कङ्केल्लिजन्मग्रहः ॥४॥

उमापतिधरस्य ।

1910 किं ते नम्रतया किमुन्नततया किं ते घनच्छायया
Spd. 1004 किं ते पल्लवलोलया किमनया चाशोक पुष्पश्रिया ।
Smv 33.32 यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः स्तुवन्नन्वह
Srk. 1038 न स्वादूनि मृदूनि खादति
शार्दूलविक्रीडित

फलान्याकण्ठमुत्कण्ठितः ॥५॥

कविराजश्रीनारायणस्य ।

५५ शाल्मलिः ।

1911 पुष्पं रक्षतु कण्टकैः परिमलेनानन्दयन्केतकीः
शार्दूलविक्रीडित किं चासौ पनसः सुधासहचरस्वादातिहृद्यं फलम् ।

1908 (c) Ed. वलसि for वलति , वद for तव
(d) Ed. वराशोक for वदाशोक
1909 (c) I. O., S पात्रेषु for पत्रेषु
1910 (b) Smv., Spd. वा for ते
(c) Ed. अन्वयं (Srk. अन्वहो) for अन्वहं.
Smv., Spd. attribute it to श्रीभोजदेव.
Srk.—anonymous
Ed. कविराजस्य for कविराजश्रीनारायणस्य.

नामोदः कुसुमे फलेषु न रसस्तत्किं मुधा शाल्मले
काण्डं निर्भरमावृणोषि विषमैरामूलतः कण्टकैः ॥१॥

नाकोकस्य ।

1912 मूलं कण्ठककर्परैरुपचितं निःसारमन्तर्वपु-
र्निर्गन्धं कुसुमं फलं क्षुधि मुधा पत्रैर्न हृद्यं क्वचित् ।
वृद्धिर्गृध्रपरिग्रहाय तदहो वक्तव्यमन्यत्परं
भ्रातः शाल्मलिवृक्ष नास्ति
भवतः किंचिन्महत्त्वोचितम् ॥२॥ शार्दूलविक्रीडित

कस्यचित् ।

1913 आहूतः परितो दिगन्तगतिभिः शाखाभराडम्बरैः
किं रे जाल्म जवेन
शाल्मलिफलप्रत्याशया धावसि । शार्दूलविक्रीडित
तस्मिन्नेकपदे भिदेलिमफलव्यालोलतूलोत्करै-
रध्वानोपि निमीलिताक्षमटता न प्रेक्षणीयाः पुरः ॥३॥

जलचन्द्रस्य ।

1914 प्रसारः शाखानां स्थगितगगनाभोगमहिमा
समृद्धिः शोणाम्भोरुहवनसमाना सुमनसाम् ।
प्रकाण्डश्रीर्वाचामपि न विषयः शाल्मलितरो- शिखरिणी
स्तथाप्यंशुश्रेणीमयमनुपभोग्यं बत फलम् ॥४॥

उमापतिधरस्य ।

1911 Quoted by Aufrecht in ZDMG, 36, p. 536.

1912 (b) A पत्रेण कृत्यं(?)मुधा (Ed. पत्रैर्न कृत्यं क्वचित्) for पत्र... क्वचित्

1913 (a) Ed. शाखाभिराडम्बरै for शाखाभराडम्बरै.

(d) A, I. O., S निमीलिताक्षि भवता for निमीलिताक्षमटता.

1914 (b) I O, S रम for वन

1915 एतस्मिन्कुसुमे स्वभावमहति प्रायो गरीयः फलं
Srk. 1063
शार्दूलविक्रीडित
रम्यं स्वादु सुगन्धिशीतलमलं प्राप्तव्यमित्याशया ।
शाल्मल्या परिपाककालकलनारोधेन कीरः स्थितो
यावत्तत्पुटसंधिनिर्गतपतत्तूलं फलात्पश्यति ॥५॥

शालिकनाथस्य ।

५८ मार्गतरुः ।

1916 यच्छायामतनुं तनोपि मधुरैः प्रीणासि यत्त्वं फलै-
शार्दूलविक्रीडित
र्यन्नम्रोसि यदुन्नतोसि चतुरे यद्वर्तसे वर्त्मनि ।
यत्पान्थैरपरैरपि प्रतिपथ प्रस्तूयसे प्रायश-
स्तन्नाथ क्षितिज त्वमेव
पथिकैर्विश्रान्तये चिन्त्यसे ॥१॥

कस्यचित्

1917 उपरि मिहिरः क्रूरः क्रूरास्तलेचलभूमयो
हरिणी
वहति पवनः पांशूत्कर्षी कृशाः सरसो रसः ।
अहह न जहत्येते प्राणांस्तदैव किमध्वगा
यदि न भवतः पत्रच्छन्ना विशन्ति महीरुहः ॥२॥

पुरुसेनस्य ।

1918 आसीद्यस्तव पुलकस्त्रिचतुरैः पत्राङ्कुरैरावृतो
शार्दूलविक्रीडित
मेघोन्मुक्तजलैकजीवनविधिः सन्मार्गलब्धास्पदः ।
सोयं संप्रति वासरैः कतिपयैरध्वन्यपुण्योच्चयैः
संपन्नः फलनम्रपल्लवततिच्छायोपलिप्तावनिः ॥३॥

सुरभेः ।

1915 (a) Srk. महीयः for गरीय.
(c) Srk. बोधेन for रोधेन I. O, S काक for कीर.
Sp.—anonymous.

1916 (d) Ed. स्तन्नाश्वाथ for स्तन्नाथ

1918 (d) I. O., S छायोपलिप्तावलि for ॰वनिः.

1919 ये पूर्वं परिपालिता फलदलच्छायादिभिः पत्रिणो
विश्रामद्रुम कथ्यतां तव विपत्काले क्व ते सांप्रतम् । Spd 985
एताः संनिधिमात्रदर्शितपुरस्कारास्तु धन्यास्त्वचो Srk 1099
यासां छेदनमन्तरेण पतितो नायं कुठारस्त्वयि ॥४॥ शार्दूलविक्रीडित

वित्तोकस्य ।

1920 किं जातोसि चतुष्पथे
यदि घनच्छायोसि किं छायया
युक्तश्चेत्फलितोसि किं फलभरैराढ्योसि कस्मान्नतः । Sk. IV. 93
हे सद्वृक्ष सहस्व संप्रति शिखाशाखाशताकर्षण- Spd. 971
क्षोभामोटनभञ्जनानि जनत स्वैरेव दुश्चेष्टितैः ॥५॥ Smv. 33 4
शार्दूलविक्रीडित

कस्यचित् ।

५७ मरुतरुः ।

1921 फणी मूलश्वभ्रे वपुरविरलं कीटपटलैः
शिरो गृध्रश्रेणीविधुरितमधः कण्टकचितम् । शिखरिणी
इतीदं जानीमश्चिरमपथभाजस्तव तरो
तथाप्यस्यामक्ष्मारुहि भुवि भवानेव शरणम् ॥१॥

वैद्यगदाधरस्य ।

1919 (a) Spd भर for दल, प्राणिनो for पत्रिणो.
(c) Spd. सगति for संनिधि , Spd , Srk. कल्पित for दर्शित.
Spd —anonymous.

1920 (a) Spd., Smv. घनतरं छन्नोसि for यदि. ...योसि.
(b) Sk संपन्न (Smv , Spd. छन्नश्चेत्) for युक्तश्चेत्, यदि फलैः पूर्णोऽसि किं संनत॰ for फल ..नत॰. Smv. Sp. किं सन्नत. for कस्मान्नतः.
(c) Spd , Smv. सखे शाखाशिखाकर्षण for शिखा · कर्षण.
(d) Sk. क्षोभोन्मोटन for क्षोभामोटन.
Smv., Spd. attribute the verse to भदन्तज्ञानवर्मा.

द्रुतविलम्बित

1922 प्रथममेव गुरु क मरुद्रुमे
नरणितापकृतापदि पल्लवम् ।
यदपि किं (क)विदुश्छिनमाशु तत्
कवलित करभैरनिभैरवैः ॥२॥

चपलदेवस्य ।

शार्दूलविक्रीडित

1923 आश्यानैर्गलितं दलैर्वत कथाशेषाः प्रसूनश्रियो
नोद्भेदोपि फलं प्रति प्रतिदिशं
याता निराशाः खगाः ।
आपातालविशुष्कमूलकुहरोन्मीलज्जटासतति-
स्तूर्णीमस्ति तथाप्यकालजलदं
ध्यायन्मरुक्ष्मारुहः ॥३॥

भट्टशालीयपीताम्बरस्य ।

शार्दूलविक्रीडित

1924 नासाग्रे पवनः परं नयनयोरापः क्रिया चेतसि
स्थैर्यं दाहभरेषु किं नु विदिता नैता मरुक्षोणयः ।
यत्राशाशतसंभ्रमेण पथिकैर्लब्धोपि भूमीरुह-
स्तेषामेव निदाघविन्दुनिचयैः
सेकस्थितिं वाञ्छति ॥४॥

सोढगोविन्दस्य ।

Spd. 1183
Smv. 33.6

1925 कल्याण नः किमधिकमतो वर्तनार्थं यदस्मा-
ल्लुत्वा वृक्षानहह दहसि भ्रातरङ्गारकार ।

1922 (a) I. O., A, S गुरु. for गुरु.

1923. (c) In Ed. this line is metrically defective having one syllable missing. क is possibly the lost syllable.
Ed om भट्टशालीय in the poet's name.

1924 (b) I. O., S कि न for किं नु Bet विदिता and नैता Ed. inserts चे.

1925 (a) I. O., S, Sp., Smv. इतो for अतो Sp., Smv , Srk. जीवनार्थं for वर्तनार्थं. Sp. पयस्त्वं (Smv. यदस्मान्) for यदस्मात्.
(b) Spd. छित्त्वा for लूत्वा.

किं त्वेतस्मिन्नशनिपिशुनैरातपैस्तापिताना- Srk. 1039
मध्वन्यानामपयसि मरुप्रान्तरे कोऽभ्युपायः ॥५॥ मन्दाक्रान्ता

गदाधरस्य ।

५८ नानातरवः ।

1926 न्यग्रोधे फलशालिनि स्फुटरसं किंचित्फलं पच्यते
बीजान्यङ्कुरगोचराणि कतिचित्सिध्यन्ति तत्रापि च । Srk. 1062
एकस्तत्र स कश्चिदङ्कुरवरो बध्नाति तामुन्नतिं शार्दूलविक्रीडित
यामध्यन्यजनः स्वमातरमिव
क्लान्तिच्छिदे धावति ॥१॥

शालिकनाथस्य ।

1927 केनात्र चम्पकतरो बत रोपितोऽसि
कुग्रामपामरजनान्तिकवाटिकायाम् । वसन्ततिलक
यत्र प्ररूढनवशाकविवृद्धलोभ-
गोभग्नवाटघटनोचितपल्लवोऽसि ॥२॥

वीरस्य ।

1928 फलानां संभारैरधरय तरूनुन्नततया
स्पृशाकाशं सर्वाः स्थगय परिणाहैरपि दिशः ।
तथापि ध्वाङ्क्षेभ्यो न पुनरितरः कोऽपि विहगः शिखरिणी
फलार्थी निम्ब त्वां प्रकृतिविरसं धावति मुदा ॥३॥

विश्वेश्वरस्य ।

1925 (c) Smv. ननु for किं तु. Smv., Spd., Srk. आकुलानाम् for तापितानाम्.

(d) Spd., Smv, Srk. अशरण for अपयसि.

Srk, Smv. Spd.—anonymous.

1926 (b) Srk तस्मिन्नपि for तत्रापि च.

(c) Srk. तेष्वपि for तत्र स.

Srk.—शालिकस्य

1929 पृथुत्वात्सौरभ्यान्मधुरतरभावाच्च पतितैः
शिखरिणी क्षुधोत्तप्तैः कुक्षिंभरिभिरिह सेवा तव कृता ।
तदात्वव्यामुग्धैरनुदिवसमस्वास्थ्यजननी
न दृष्टा तेस्माभिः पनस परिणामे विरसता ॥४॥

उमापतिधरस्य ।

1930 परार्थे यः पीडामनुभवति निर्व्याजमधुरो
Sv. 947 Spd. 1052 Smv. 35.5 शिखरिणी यदीयः सर्वेषामिह खलु विकारोप्यभिमत ।
न सम्प्राप्तो वृद्धिं सपदि हतदैवात्समुचितां
किमिक्षोर्दोषोयं स पुनरगुणाया मरुभुवः ॥५॥

वाक्पतेः ।

५९ मरुः ।

1931 शमीषण्डस्तावत्खदिरवनमस्माच्च परत-
स्ततो वब्बोलीनामपि गहनमुत्कोटविस्तृतम् ।
शिखरिणी इत कर्कन्धूनां वनमनु यवासस्थलमिद
क्व कल्याणः पन्थाः पथिक हतदेशो मरुरयम् ॥१॥

कस्यचित् ।

1932 हे धाराधर विश्वमेव भवता साधारणं सिञ्चता
शार्दूलविक्रीडित क्लृप्ताकस्मिकदुर्दिनेन समये को नाम नासादित ।
एतस्यैव मरोर्मरालललनालीलानभिज्ञैस्तटै-
रापातालविशुष्कसैकत
भुवस्तापोपि नापोहितः ॥२॥

कस्यचित् ।

1929 Ed. क्षुधातप्तै for क्षुधोत्तप्तै

1930 (a) Spd., Sv. Smv भङ्गेऽपि for निर्व्याज

(c) Spd., Sv., Smv. यदि स भृशमत्तोलपतित for सपदि ..समुचिता

(d) Spd., Sv., Smv. असौ for अयं Smv. न for स

Sv. यशसः (Spd. इन्दुराजस्य) for वाक्पतेः.

1932 (b) Ed. नामोदित for नासादितः.

1933 भ्रामं भ्राममनङ्गभूपरिसरे सारङ्ग निश्चापल
वास्तव्यो भव मा पुनर्मरुपथप्रस्थानवाञ्छां कृथाः ।
यत्नादुर्बलदोर्बलैर्गुणगणव्यासक्तपात्रान्तरै-
र्लभ्यन्ते पुरुषैः परं कतिपयैः शार्दूलविक्रीडित
कौपाः पयोविन्दवः ॥३॥
उमापतिधरस्य ।

1934 भ्रातः पान्थ मरीचिकामयमृषावाःपूरपूर्णामिमा-
मुद्दिश्य प्रबलप्रसृत्वरतृषाक्लेशान्ध किं धावसि ।
नन्वेते मरुमेदिनीपरिसरा यैरस्ति गोपायितं शार्दूलविक्रीडित
क्रूरैर्न स्वपरोपकारि सकलं पातालमूले पयः ॥४॥
तस्यैव ।

1935 पायं पायं पिब पिब पयः सिञ्च सिञ्चाङ्गमङ्गं
भूयो भूयः कुरु कुरु सखे मज्जनोन्मज्जनानि । Spd. 1151
एषां शेषश्रमशमपटुदुःखिताध्वन्यबन्धुः Smv 30 3
सिन्धुर्दूरीभवति पुरतो मारवः पान्थ पन्थाः ॥५॥ मन्दाक्रान्ता
धनपालस्य ।

६० मेघः ।

1936 अभ्युन्नतोसि सलिलैः परिपूरितोसि
त्वामर्थयन्ति विहगास्तृषितास्तथैते । वसन्ततिलक

1934 (a) Ed पूर्णानिमान् for पूर्णामिमाम्.

1935 (b) Ed, om. one कुरु contrary to metre.

(c) Smv , Spd. एषाशेष for एषा शेष Ed. शतचटु for शमपटु
Spd. पटुर्दु खिता० for पटुदु खिता०

(d) Spd., Smv. भवतो for पुरतो.
This verse has been quoted by Aufrecht in ZDMG, 36, p. 534 with एषा for एषा, पटु for पटु.
Smv., Spd ,—anonymous.

कालः पयोधर परोपकृतेस्तवायं
चण्डानिलव्यतिकरे क्व भवान्क ते वा ॥१॥

वाञ्छाकस्य ।

1937 अये पाथोवाह स्थगय ककुभोन्यास्तत इत-
स्त्यजैतां सीमानं वसति मुनिरस्यां कलशभूः ।
शिखरिणी
उदञ्चत्कोपेस्मिन्सजलजलधिरपि स्थास्यति न ते
यतः पायं पायं सलिलमिह शौर्यं प्रथयसि ॥२॥

वैद्यगदाधरस्य ।

1938 आकल्प यदि वर्षसि प्रतिदिनं धारासहस्रैस्तथा-
प्यम्भोधौ कलयत्यगाधजठरे कस्तावकीन श्रमम् ।
शार्दूलविक्रीडित
अम्भोद क्षणमात्रमुज्झसि पयः पृष्ठे यदि क्ष्माभृतां
तत्किं न प्रसरन्ति निर्झरसरिद्व्याजेन ते कीर्तयः ॥३॥

वासुदेवस्य ।

1939 एते ते पुरतो मरुस्थलभुवः प्रोच्चण्डदावानल-
ज्वालालीढकठोरसूरकिरणप्लुष्टच्छदाः शाखिनः ।
शार्दूलविक्रीडित
तानेतानवधीर्य खिन्नवपुषो दुःशीलझञ्झानिल-
क्रीडाभिर्न पयोद गन्तुमुचितं वेलाभिषिक्तद्रुमान् ॥४॥

योगेश्वरस्य ।

1940 अये पश्चावस्थामकरुणसमीरव्यतिकर-
Srk. 1029
स्फुरद्दावज्वालावलिजटिलमूर्तेर्विटपिनः ।
शिखरिणी
अमुं कालक्षेप त्यज जलद गम्भीरमधुरैः
किमेभिर्निर्घोषैः सृज झटिति झात्कारि सलिलम् ।५॥

अचलसिंहस्य ।

1936 Quoted by Aufrecht in ZDMG, 36, p. 524
1937 (b) I. O., S त्यजैनं for त्यजैतां
Ed. वैद्यस्य for वैद्यगदाधरस्य
1939 (c) A, I. O. अवतीर्य for अवधीर्य.
Ed. योगोकस्य for योगेश्वरस्य
1940 Srk. changes the order of lines as c d a b.
Srk.—anonymous.

६१ जलदश्लाघा।

1941 आश्वास्य पर्वतकुलं तपनोष्मतप्तं
निर्वाप्य दावविधुराणि च काननानि।
नानानदीनदशतानि च पूरयित्वा
रिक्तोसि यज्जलद सैव तवोन्नता श्रीः ॥१॥

Spd 778
Srk 1098
वसन्ततिलक

कस्यचित्।

1942 क्रूराः शैलभुवो निरभ्रपरुषः पूषा ललाटंतपः
पांशुः पादनखंपचः प्रतिदिशं वात्या करीषंकषा।
एतस्यां मरुसीम्नि जाङ्गलतटीनिष्ठ्यूतदावानल-
क्लान्तपान्थकुलान्यकालजलद त्वं त्रातुमेकः क्षमः ॥२॥

शार्दूलविक्रीडित

धर्मयोगेश्वरस्य।

1943 उपैति क्षाराब्धिं वहति बहुवातव्यतिकरं
पुरो नाना भङ्गा ननु भवति पश्यैष जलदः।
कथंचिल्लब्धानि प्रवितरति तोयानि जगते
गुणं वा दोषं वा न गणयति दानव्यसनिता ॥३॥

Srk. 1379
शिखरिणी

वल्लणस्य।

1944 स चेन्मूर्छन्मत्स्यावलिरपि निपीतः पतिरपां
ततो वान्तः किं तद्व्यवसितमगस्त्येन तपसा।
घनः श्लाघ्यः पीत्वा कियदपि पयस्तस्य हि वम-
न्विभर्त्येतद्विश्वं तमपि किल रत्नाकरयति ॥४॥

शिखरिणी

सान्धानन्दिनः।

1941 (b) Spd दुर्दाववह्नि for निर्वाप्य दाव
(d) Spd उत्तमा for उन्नता Srk तवोन्नतश्रीः for ०न्नता श्री॰.
1942 (d) Ed., A क्लाम्यत् for क्लान्त
1943 (a) I. O., S सहति for वहति
I. O., S वल्लनस्य for वल्लणस्य.

1945 धिग्धिकानुदधीस्तुमन्स्तु जलदं येभ्यः समभ्यर्थितैः
पाथोभिः पदवीं निदाघविकलां यः प्लावयन्वर्षति ।
शार्दूलविक्रीडित यद्यस्याप्युदरे भवेदगणितस्तावन्मणीनां गण-
स्तत्किं नैष करोति रत्नकरकासारैः समृद्धं जगत् ॥५॥
कविपण्डितश्रीहर्षस्य ।

६२ मेघनिन्दा ।

1946 निपीता श्वेतांशो जलद जगदाह्लादनकरी
मरीचिर्येद्येषा वहसि किमु खद्योतनिवहान् ।
शिखरिणी किमेते कर्तारः कुमुदवनमुन्निद्रमुदधेः
किमानन्दं मन्दीकृततिमिरवृन्दाः किमु दिशः ॥१॥
जलचन्द्रस्य ।

1947 दूरोत्सारितराजहंस जलद प्राप्योन्नतिं नूतनां
कोटिं कामपि सांप्रतं मलिनिमा
नीतस्त्वया यन्निजः ।
शार्दूलविक्रीडित यत्संभूय बकैरमीभिरहह त्वं भूपणोत्प्रोक्षणा-
दात्मानं बहुमन्यमानगगनं गर्जारवैरश्नुषे ॥२॥
हरेः ।

1948 आशाः खर्वय गर्वयातिमुखरानुन्नादिनो बर्हिणः
सर्वांस्त्रासय गर्जितैः कलगिरो हंसान्समुत्सारय ।
शार्दूलविक्रीडित द्रागास्कन्दय मित्रमण्डलमलं सद्वर्त्म सदूषय
श्रीमन्नब्द नयत्ययं न पवनो यावद्दशां कामपि ॥३॥
सरसीरुहस्य ।

1945 (b) A पृथिवी' for पदवी'.
(c) A मुनीनां for मणीनां.
Sp. om. कविपण्डित in the poet's name.
1946 (a) Ed. निपीता for निपीता.
(b) Fd. मद्योषा for यद्येषा.
1948 (d) Ed. भ्राम्यन् for श्रीमन्, नयत्यये for नयत्ययं.

1949 तडित्तेजःपुञ्जैर्जनयसि दृशोः कामपि रुजं
गरीयोगर्जाभिः प्रकटयसि कर्णद्वयभिदाम् ।
यदम्भोबिन्दूनां प्रणयपरिपाको यमखिल- शिखरिणी
स्तदस्यैवाम्भोधेर्जलधर न धैर्यं कलयसि ॥४॥

अभिनन्दस्य ।

1950 एतेषु रे तरुणमारुतधूयमान-
दावावलीकवलितेषु महीरुहेषु ।
अम्भो न चेज्जलद मुञ्चसि मा विमुञ्च वसन्ततिलक
वज्रं पुनः क्षिपसि निर्दय कस्य हेतोः ॥५॥

विश्वेश्वरस्य ।

६३ चातकः ।

1951 तृषार्तैः सारङ्गैः प्रतिजलधरं भूरि विरुतं
घनैर्मुक्ता धारा सपदि पयसस्तान्प्रतिमुहुः । Spd. 1205
Srk. 1362
खगानां के मेघाः क इह विहगा वा जलमुचा- शिखरिणी
मयाच्यो नार्तानामनुपकरणीयो न महताम् ॥१॥

भर्तृहरेः ।

1952 नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन । Bp. verse 208
Smv. 13.2
जलधरजलधारा दूरतस्तावदास्तां Srk 1080
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥२॥ मालिनी

अचलसिंहस्य ।

1950 (a) Ed. धूममान for धूयमान.

1951 (d) Ed. अनुपहरणीयो for अनुपकरणीयो.

Spd.—anonymous. Srk. अमरसिंहस्य

1952 (b) Smv निषण्णो (Srk. निसृष्टो, Bp विसृष्टो) for निविष्टो

Smv.—anonymous

1953 अभिपतति घनं शृणोति गर्जाः
सहति शिलाः सहते तडित्तरङ्गान् ।
Srk. 1083
पुष्पिताग्रा
विसहति मरुतं रुतं विधत्ते
जलपृपते कियतेपि चातकोयम् ॥३॥

तस्यैव ।

1954 अब्धिर्यद्यवधीरितो न तु तदा तस्मान्निपीयाम्बुदै-
र्वान्ताम्याचसि काकुभिर्जललवानुत्तानचञ्चूपुटः ।
शार्दूलविक्रीडित
तत्ते निस्त्रपनीचतैवमुचिता निर्वेक्तुमेतत्कथं
विघ्नः केन गुणेन मानिषु पुनः सारङ्ग संगीयते ॥४॥

तस्यैव ।

1955 चक्षुः कदर्थयितुमर्जयितुं च ताप-
मध्वश्रमेण परिशोषयितुं शरीरम् ।
वसन्ततिलक
अभ्युल्लसज्जलधरभ्रमसंभ्रमेण
धिग्धूमकूटमभिधावति चातकोयम् ॥५॥

तस्यैव ।

६४ दैवोपहतचातकः ।

1956 दृष्ट्वा तोयभरावनम्रनिविडप्रारम्भमम्भोधरं
शार्दूलविक्रीडित
तृष्णार्तः किल रौति यावदसकृत्तोयाशया चातकः ।
तावच्चञ्चलचञ्चुकोटरकुटीकोष्ठे लुठन्तः स्फुटं
दृश्यन्ते करकोत्कराः किमपरं
कोप्येष वामो विधिः ॥१॥

शरणस्य ।

1953 (c) Srk. विधुवति for विसहति.
Srk. ascribes the verse to अचल.

1954 Ed. पुरः. A., I. O., संगीयसे for संगीयते.

1955 Omitted in A, S, I. O.

1957 अस्योदये वहुमनोरथमन्थरेण
संचिन्तितं किमपि चेतसि चातकेन । Srk. 1101
हा कष्ट मिष्टफलदानविधानहेतो- वसन्ततिलक
रम्भोधरात्पतति संप्रति वज्रपातः ॥२॥

लडहचन्द्रस्य ।

1958 सिन्धोरेव कियज्जलं कलसभूर्यत्पाणिपात्रे दधौ
तत्पीतं कियदम्बुदैः कियदितो
वान्त कियद्वा स्थितम् । शार्दूलविक्रीडित
तत्पातु' व्यवसायदीनमनसो धावन्त्यमी संभ्रमा-
दावर्तैर्मरुतां तदप्यपहृतं
धिक्चातकान्धिग्विधिम् ॥३॥

लक्ष्मीधरस्य ।

1959 बीजैरङ्कुरितं लताभिरुदितं वल्लीभिरुज्जृम्भित
कन्दैः कन्दलित जनैश्च मुदितं धाराधरे वर्षति । Spd. 856
भ्रातश्चातक पातकं किमपि ते सम्यङ् न जानीमहे शार्दूलविक्रीडित
येनास्मिन्न पतन्ति चञ्चुपुटके
द्वित्राः पयोविन्दवः ॥४॥

वसुकल्पस्य ।

1960 अयि चातक चञ्चुपुटात् स्खलयति
जलदोदविन्दुमनिलश्चेत् । आर्या
द्विज एव भाग्यहीनो जीवनदाता कृती जलदः ॥५॥

शब्दार्णवस्य ।

1957 (a) Ed. अस्योदरे (Srk. यस्योदये) for अस्योदये.
(d) Ed. भवति for पतति.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 522.

1959 Spd. जटाभि for लताभि.
(b) Spd. जनैः समुदित for जनैश्च मुदितं
(d) Spd. तावन्मुखे for चञ्चुपुटके.

Spd.—anonymous.

९८१ अनन्यगतिकचातकः।

शार्दूलविक्रीडित

1961 विष्वक्प्लावयता जगन्ति जलद प्रीतस्त्वया वारिभिः
सारङ्गोपि यदि प्रसङ्गपनितः केयं विशेपज्ञता।
सानन्दाः स्तुमहे चिराय चरितं तस्यैव येन त्वयि
क्षीणोपि क्वचिदेव नाम्भसि
मनागारोपि चञ्चूपुटः ॥१॥

जलचन्द्रस्य।

Srk. 1054
मालिनी

1962 वदत विदितजम्बूद्वीपसंवृत्तवार्ताः
क्वचिदपि यदि दृष्टं वारिवाहं विहाय।
सरिति सरसि सिन्धौ चातकेनार्पितोसा-
वतिबहलपिपासापांशुलः कण्ठनालः ॥२॥

लक्ष्मीधरस्य।

Srk. 1088
वसन्ततिलक

1963 त्वं गर्ज नाम विसृजाम्बुद नाम्बु नाम
विद्युल्लताभिरभितर्जय नाम भूयः।
प्राचीनकर्मपरतन्त्रनिजप्रवृत्ते-
रेतस्य पश्य विहगस्य गतिस्त्वमेव ॥३॥

कस्यचित्।

Spd 772
शार्दूलविक्रीडित

1964 नीहाराकरसारसागरसरित्कासारनीरश्रियं
त्यक्त्वा तोयद चातकेन भवतः सेवा समालम्बिता।
तस्यैतत्फलितं यदुद्धतशिलासंताडनं मस्तके
गाढं गर्जसि वज्रमुज्झसि तडिल्लेखाभिरातर्जसि ॥४॥

कस्यचित्।

1961 (c) Ed. तेन.

1962 (a) I. O., S संभूत for संवृत्त. Sr.k. वार्ता for वार्ता.
(b) Srk. कथम् for क्वचित्.
(d) Srk. अपि for अति

1964 (a) Sp. नोराश्रयम् for नीरश्रियम्.
(b) Spd. महती for भवत..
(c) Spd. समुज्झसि for यदुद्धत.

1965 यन्मूर्धानमशिक्षितो नमयितुं निम्नेषु तेनोच्चकै-
रारूढः पदमादरेण जलद त्वां याचते चातकः। शार्दूलविक्रीडित
यद्यस्मै विमुखो भवानपि पयोधाराः करीतुं ततः
पक्ष्मारोपितचञ्चुरेष जरयत्वङ्गे पिपासारसम् ॥५॥
कस्यचित्।

६६ मनस्विचातकः।

1966 गङ्गा शम्भुशिरोजलं जलनिधिर्देवस्य लक्ष्मीपतेः
शय्याक्षालनवारि वारि सरसः क्लीवस्य निन्द्यं
सताम्। शार्दूलविक्रीडित
नद्यस्ताः शतशोन्ययोषित इति त्यक्तोपभोगो युवा
सारङ्गः सततोन्नतेन शिरसा धाराधरं याचते ॥१॥
कस्यचित्।

1967 किं नैव सन्ति भुवि तामरसावतंसा
हंसावलीवलयिनो जलसंनिवेशाः। Sv. 681
को दुर्ग्रहो ग्रहवत खलु चातकस्य वसन्ततिलक
पौरन्दरीं यदभिवाञ्छति वारिधाराम् ॥२॥
कस्यचित्।

1968 एक एव खगो मानी सुखं जीवति चातकः। Sv. 674
अर्थित्वं याति शक्रस्य न नीचमुपसर्पति ॥३॥ Spd. 852
कस्यचित्। अनुष्टुप्

1965 (d) I. O, S जरयत्वङ्गे for जरयत्वङ्ग.

1967 (a) Sv. नव for भुवि
(c) Sv. कोपि ग्रहो गुरुरय बत for को... ..खलु

1968 (a) Sv. वने वसति (Spd. चिर जीवतु) for सुखं जीवति.
(b) Sv., Spd. read the line thus—पिपासितो वा म्रियते याचते वा पुरन्दरम्.

Bet. a and b A reads पिपासया वा म्रियते याचते वा पुरन्दरम्.

1969 तृषार्तां शोचन्तीं न गणयति दीनां गृहवती
शिखरिणी न दीनः पक्षाभ्यां स्थगयति शिशूनालपति वा ।
कुटुम्बी सारङ्गः प्रसरति निदाघेष्वविकलः
कुलस्य स्वस्यायं पथि न पदमल्प श्लथयति ॥४॥

गोसोकस्य ।

1970 यदस्मादस्माभिश्चिरविहितसेवैरपि घना-
शिखरिणी दनाप्ताः सारङ्गै कतिपयपयःशीकरकणाः ।
द्विषन्तो वेशन्तं भृशमपलपन्तः पतिमपा-
मपार्थीकुर्वन्तः सरितमनुयामस्तदपि तम् ॥५॥

आवन्तिकद्रव्यस्य ।

६७ हंसः ।

1971 गतं तद्गाम्भीर्यं तटमुपगतं जालिकशतैः
Sv. 707 सखे हंसोत्तिष्ठ त्वरितममुतो गच्छ सरसः ।
Spd. 810 न यावत्पङ्काम्भःकलुषिततनुर्भूरि विरस-
Smv. 15.8 न्बकोटो वाचाटश्चरणयुगलं मूर्ध्नि कुरुते ॥१॥
शिखरिणी

डिम्बोकस्य ।

1970 Ed., A अवन्तिकद्रव्यस्य for आवन्तिकद्रव्यस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 510

1971 (a) Sv. जलमपि वृतं जालक (Spd. तटमपि चितं जालक, Smv. तटमपि वृतं जालिक) for तट जालिक.

(b) Smv., Sv. प्रथमम् for त्वरितम् Sv. दग्ध (Ed. याम, Smv. धाव) for गच्छ.

(c) Spd. पङ्काङ्कः for पङ्काम्भ . Sv., A वपु. for तनु॰. Sv. विलपन् (Spd. विलसन्) for विरसन् Smv. वपुर्भूरिति लपन् for तनु... विरसन्.

(d) Sv न काको (Smv. बकोऽसौ) for बकोटो.

Sv., Smv.—anonymous.

1972 प्रालेयांशुमरीचिनालधवलानास्वाद्य कन्दाङ्कुरा-
न्पीतं यैर्जलजन्मकेशरपरिष्वङ्गाधिवासं पयः ।
हंसास्तेपि सखे तडाग भवतः क्रीडासहस्राविणो
जाता पङ्किलवालवीरणदलद्रोणीजलग्राहिणः ॥२॥

शार्दूलविक्रीडित

जलचन्द्रस्य ।

1973 स्थित्वा चिरं नभसि निश्चलतारकेण
मातङ्गसङ्गकलुषां नलिनीं विलोक्य ।
उत्पन्नमन्युपरिघर्घरनिःस्वनेन
हंसेन साश्रु परिवृत्य गतं नु लीनम् ॥३॥

Sv. 699
वसन्ततिलक

कस्यचित् ।

1974 ककुभि ककुभि ध्वान्तक्षुब्धं वितत्य विधाय च
श्रुतिपुटभिदो गर्जाः श्रेयः कृतं परमम्बुदैः ।
कथमितरथा जातोद्वेगः समुज्झितपल्वलः
कनककमलोत्तंसे हंसः स नन्दति मानसे ॥४॥

हरिणी

अचलसिंहस्य ।

1975 तटमुपगतं पद्मे पद्मे निवेशितमाननं
प्रतिपुटकिनी पत्रच्छायं प्रतिक्षणमासितम् ।
नयनसलिलैरुष्णैरुष्णीकृता जलवीचयो
जलदमलिनां हंसे नाशां विलोक्य गमिष्यता ॥५॥

हरिणी

छित्तिपस्य ।

1973 (b) Sv निरीक्ष्य for विलोक्य.
(d) Sv., I. O., S, Sp. न for नु.

1974 (b) I. O., S पट for पुट.
Sp. अचलस्य for अचलसिंहस्य.

1975 (c) S, I. O उच्चै for उष्णै A कोष्णी for उष्णी.
Ed. छित्तपस्य for छित्तिपस्य.

६८ राजहंसः ।

1976 उद्भ्रान्तभेककुलकीर्णजले तडागे
वसन्ततिलक कोऽप्यस्ति नाम यदि नान्यगतिर्बकोटः ।
उत्फुल्लपद्मसुरभीणि सरांसि हित्वा
न स्थातुमर्हति भवानिह राजहंस ॥१॥

शंकरस्य ।

1977 गाङ्गमम्बु शुभमम्बु यामुनं
Kp. 559 Sd. under X. 118 कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता
रथोद्धता चीयते न च न चापचीयते ॥२॥

सुरभेः ।

1978 छायामाश्रयपुण्डरीकमिलितां मध्येसरःशीकरं
सानन्दी भव राजहंस भवतः स्यान्नाम पक्षोन्नतिः ।
शार्दूलविक्रीडित मञ्जीरेण तथापि च ध्वनिरयं निर्गीयते लीलया
योऽस्माकं परिचारिकाचरणयोः
खेलाभिरुत्कूजति ॥३॥

उमापतिधरस्य ।

1979

॥४॥

1980

॥५॥

६९ कोकिलः ।

1981 धिक्कुब्जाम्बुजवेत्रवेतसवनान्येतानि यत्ते पिक
शार्दूलविक्रीडित व्याहारैः प्रणयादमीषु मधुरैरेभिः किमुन्मुद्रितैः ।

1976 (b) Ed. विकोटः for बकोटः

1977 (a) Sd., Kp. सितम् for शुभम्.

1979-80 Missing.

1981 (a) A नेत्र for वेत्र. Ed. तत्ते for यत्ते.

नेह त्वत्सुहृदो रसालतरवः श्रुत्वा भवद्वापितं
येषामस्थिभिरप्युपात्तमुकुलैराविष्क्रियन्ते मुदः ॥१॥
हरेः ।

1982 उद्यानानि न सर्वदा परिभवत्रासादिवाध्यासते
भूमौ नोपविशन्ति ये खलु रजःसंपर्कतर्कादिव ।
तेषामप्यतिपूजनीयवपुषां नूनं पिकानामियं
धिक्कष्टं परपुष्टतेति किमपि प्राचां फलं कर्मणाम् ॥२॥
तस्यैव ।

शार्दूलविक्रीडित

1983 उद्यत्सौरभगर्भनिर्भरमिलद्वालाङ्कुरश्रीभृतो
माकन्दानवलोक्य यः प्रतिदिशं सानन्दमुत्कूजितः ।
तानेवाद्य फलाशया परिरटल्लुण्ठाककाकावली-
वाचालानुपलभ्य कोकिलयुवा
जातः स वाचंयमः ॥३॥
तस्यैव ।

शार्दूलविक्रीडित

1984 दात्यूहाः सरसं रसन्तु सुभगं गायन्तु केकाभृतः
कादम्बाः कलमालपन्तु मधुरं कूजन्तु कोयष्टयः ।
दैवाद्यावदसौ रसालविटपिच्छायामनासादय-
न्निर्विण्णः कुटजेषु कोकिलयुवा संजातमौनव्रतः ॥४॥
रामदासस्य ।

Spd. 850
Smv. 14.14
शार्दूलविक्रीडित

1985 परभृतशिशो तावन्मौनं विधेहि नभस्तलो-
त्पतनविधये पक्षौ स्यातां न यावदिमौ क्षमौ ।
ध्रुवमपरथा द्रष्टव्योसि स्वजातिविलक्षण-
ध्वनितकुपितध्वाङ्क्षत्रोटीपुटाहतिजर्जरः ॥५॥
अचलसिंहस्य ।

Smv. 14.9
Srk. 1051
हरिणी

1983 (b) I. O., S यत् for यः. A कूजितम् for कूजित .
1984 (a) Smv सरसं for सुभगं
Spd., Smv.—anonymous.
1985 (a) Smv., Srk. transpose तावत् and मौनं. Smv. स्थलो० for स्तलो०.
(c) Smv., Srk. इतरथा for अपरथा
Smv.—अचलस्य. Srk.—anonymous.

७० शुकः।

1986 प्रतिजागृहि दुस्त्यजं वपुः
शुक शोकं ननु मा वृथा कृथाः।
सुन्दरी
क्व वनं क्व च पञ्जरोदरं
नव दोषः स्फुटवादिता न चेत् ॥१॥

अचलसिंहस्य।

1987 अयि शाकुनिक कृतोऽञ्जलिरितरे
न कतीह जीवनोपायाः।
आर्या
हत्वा शुकान्किमेतद्विपिनमसारस्वतं कुरुषे ॥२॥

वैद्यगदाधरस्य।

1988 एकत्र प्रकृतेः साम्यमन्यत्र परतन्त्रता।
अनुष्टुप्
शुकस्य परितोषाय न वनं न च पत्तनम् ॥३॥

उमापतिधरस्य।

1989 अयि खलु बधिराधिराज कीरं
पुष्पिताग्रा
तुदसि शलाकनिपातनेन मोहात्।
अनिशमपि सुधानिधानवाणीं
रचयतु मौनमुखोऽस्तु वा समस्ते ॥४॥

गोपीकस्य।

1990 भ्रातः कीर किमत्र नीरसतरुस्कन्धे मधुस्यन्दिभि-
र्व्याहारैस्तव वस्तुवर्णितकथाबन्धैर्मुधायं श्रम।
शार्दूलविक्रीडित
नैते दाडिमशाखिनः परिणतैर्येषां फलैरन्तरं
निर्भिद्यापि गुणानुरक्तमशठैराविष्क्रियन्ते मुद॰ ॥५।

लौलिकस्य।

1987 Quoted by Aufrecht in ZDMG, 36, p. 544.
1989 Quoted by Aufrecht in ZDMG, 36, p. 532.
1990 (d) Ed. गुणान्प्रवक्तुमशठै for गुणानुरक्त॰. Sp. लोकिकस्य for लौलिकस्य।

७१ नानापक्षिणः ।

1991 स्वामिन्खञ्जन मुञ्च मुञ्च फनभृद्भोगाधिरोहग्रहं
तद्विश्राम्यतु नः फलं किमपि यद्बन्धेन देयं त्वया ।
दैवादेष यदि प्रदीप्तगरलस्त्वां दन्दशूको दशे-
द्विश्वालोककरी तदा शरदियं स्यादेव दृग्वञ्चिता ॥१॥ शार्दूलविक्रीडित
वैद्यगदाधरस्य ।

1992 आजन्मैव तमः सुहृत्कुटिलता वक्त्रे गिरां निर्गमो
ग्रामोत्सादकर. श्मशानविटपी प्रायेण यस्याश्रयः ।
धिग्धातः ससृजे स एव मलिनः क्रूरः कथं कौशिकः
सृष्टो वा किमकल्प्यतास्य भवता
कल्पान्तमायुः स्थिरम् ॥२॥ शार्दूलविक्रीडित
तस्यैव ।

1993 अयि चकोरकुटुम्बिनि कातरे
तिरय पक्षपुटेन कुटुम्बकम् ।
बहु गतं कियदप्यवशिष्यते
व्यपगतं तिमिरैरुदितः शशी ॥३॥ द्रुतविलम्बित
पापाकस्य ।

1994 क्रमगलितैः शिखिपुच्छैर्मण्डनमास्तां
वधेन किं शिखिनः । Smv. 16. 2 आर्या
कुतुकिनि पुनर्न लाभो विषधर-
विषमे वने भविता ॥४॥
कस्यचित् ।

1992 (b) Ed. यस्य प्रियः for यस्याश्रयः
(c) Ed. एष for एव.

1993 Ed. पाम्पाकस्य for पापाकस्य.

1994 (a) Ed., Smv. पिच्छै for पुच्छै. Ed. अभिमतम् for मण्डनम्.
(b) Ed. कुतुकिन्न पुनः for कुतुकिनि पुनर्न.
Ed., I. O., S, A विषमं वनं for विषमे वने.
Smv. गोयिधोयिकविराजयो. for कस्यचित्.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 551.

1995 भ्राम्यद्भ्योऽपि गृहे गृहे कटुतरामप्यालपद्भ्यो गिरं
शार्दूलविक्रीडित　गृध्नुभ्योऽपि बलादमेध्यमथवावज्ञां व्रजद्भ्योऽपि च ।
शय्योत्थायमुपासते वसतिमित्येतावतायं नृणां
काकेभ्यो बलिरस्ति कोकिलबलिः

केनापि नाकर्णितः ॥५॥

कस्यचित् ।

७२ उच्चावचम् ।

1996 भ्रातः पश्य निकृत्य चन्दनतरूञ्छाकोटको रोप्यते
शार्दूलविक्रीडित　सारासारविचारिणी मतिरिह ग्रामे जनानां कुतः ।
तद्यावद्व्ययमस्य सेकसलिलं वोढुं न मृष्यामहे
तावत्सत्वरमेव पामरजन ग्रामादितो गम्यताम् ॥१॥

कस्यचित् ।

1997 दन्तैरुत्पतितं स्फुरन्ति वलयो निष्कालिमानः कचाः
शार्दूलविक्रीडित　शीर्णं देहमपेतमेव करणग्रामेण लुप्ता मतिः ।
अस्मिन्नप्रतिकारदारुणजराव्याधौ दयार्द्रात्मना
भ्रातर्वैद्य विधीयते तव कियद्यावन्मया भेषजम् ॥२॥

उमापतिधरस्य ।

1995 (b) Ed., A गृह्णद्भ्यो for गृध्नुभ्यो. I. O., S अथवावज्ञा for अथचावज्ञा.

(c) ZDMG, I. O., S, एतावता यन्नृणा for एतावतायं नृणा ,
The verse has been quoted by Aufrecht in ZDMG, 36, p. 555

1996 (a) I. O., S चम्पक for चन्दन.
Ed. शाकोटकं for शाकोटको.
Ed. रोपते for रोप्यते.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 554, with शाखोटको for शाकोटको (a).

1997 (d) I. O., S त्वया for मया.

1998 पन्थाः प्रज्वलितः स्फुरन्ति पुरत क्रूराः कृशानुत्विषः
कान्तारद्रुमघर्मदीधितिरपि व्योमार्धमारोहति । शार्दूलविक्रीडित
अस्माभिः श्रमविह्वलैरिह तरुच्छायासमालम्बिभि-
र्न ज्ञाताः परितः किरातशिविरव्याप्ता वनश्रेणयः ॥३॥
तीरभुक्तीयसर्वेश्वरस्य ।

1999 तद्ब्रह्माण्डमिह क्वचित्क्वचिदपि क्षोणी क्वचिन्नीरदा-
स्ते द्वीपान्तरशालिनो जलधय क्वापि क्वचित्पर्वताः । Srk 1193 शार्दूलविक्रीडित
आश्चर्यं गगनस्य कोपि महिमा सर्वैरमीभि· स्थितै-
र्दूरे पूरणमस्य शून्यमिति
यन्नामापि नाच्छादितम् ॥४॥
केशरस्य ।

2000 समालम्ब्यान्योन्यं मसृणचरणाः कम्पनजुषो
न याताः के पारं सति जलधिबन्धे कपिभटाः । शिखरिणी
तदादेकोऽर्वाचश्चकितसुरसिद्धस्थितिसमु-
त्समुत्प्लुत्य प्रायात्परमपरपारं स हनुमान् ॥५॥
छित्तिपस्य ।

1998 (a) Ed., A परित. for पुरत..
(c) Ed , I O., S, A कर for तरु.
The verse has been quoted by Aufiecht in ZDMG, 36, p. 547.

1999 (b) I. O., S add च bet. लजधय· and क्वापि. Srk. भूभृतः for पर्वता·.
Sp. केशटस्य for केशरस्य.

2000 (c) I. O., S स्तुति for स्थिति.
(d) Sp. प्रापत् for प्रायात्.
Ed. छित्तपस्य for छित्तिपस्य.

श्रीधरदासकृतेऽस्मिन्सदुक्तिकर्णामृते चतुर्थोऽयम्।
सत्कर्मण्यपदेशप्रवाह उपदेशतां भजतु ॥
इति महामाण्डलिकश्रीधरदासकृतौ सदुक्तिकर्णामृते
अपदेशप्रवाहो नाम चतुर्थः ॥ वीचयः ७२ ॥
श्लोकाः ३६०[1] ॥

---

1 After this number S, A, I.O. add एतेन ग्रन्थ (:?) ६०० ।
नमः श्रीकृष्णाङ्घ्रिपङ्करुहाय.

उच्चावचप्रवाहवीचयः ।

मनुजस्तुरङ्गगावौ पशवः पारावतो वलाका च ।
नानाखगाश्च गिरयो वनस्रवन्त्यौ विशेषनदी ॥१॥

पद्माकरः प्रशस्तः सरसी चक्रश्च चक्रवाकी च ।
दिग्देशौ वीरधनुर्भङ्गौ हनूमत्प्रभृतिशौर्यम् ॥२॥

रावण एतस्य शिरश्छेदो दूतोनुवादसंवादः ।
कवयो नानाकवयः प्रत्येककविर्मनस्विकवयश्च ॥३॥

कविदानं गुणिगर्वौ वाणी काव्यं च काव्यमात्सर्यम् ।
काव्यमलिम्लुचसज्जनदुर्वृत्ताः सुजनदुर्जनौ मिलितौ ॥४॥

धन्य उदात्तो मानी कृपण सेवकमनस्विभजमानौ ।
दुरधीशसेवकश्च क्षुद्रोदयदुःखितोथ दारिद्र्यम् ॥५॥

तत्सचटु दरिद्रगृही तद्गृहिणी तद्गृह जरावृद्धः ।
अनुशयनिर्वेदावथ विचारविचिकित्सिते च शमविघ्नः ॥६॥

अर्धशमः कारुणिकः शान्त्याशंसा कृतार्थशान्तश्च ।
शान्तिगतो निष्क्रमनिःस्पृहवनगमनोत्सुकास्तपोविपिनम् ॥७॥

तापसबहुविषयशमौ ज्ञानी भवितव्यता च दैव च ।
कालपितृवनसमस्योच्चावचप्रतिराजसंस्तुतयः ॥८॥

इति षट्काधिकसप्ततिवीचिभिरिह सरसकोमलैरेभिः ।
उच्चावचप्रवाहं श्रीधरदासः कृती कृतवान् ॥९॥

---

१ मनुष्यः ।

2001 अङ्गुष्ठाग्रिमवक्रिताङ्गुलिरसौ पादार्धनीरुद्धभूः
Pv. 262 पार्श्वोद्वेगकृतो निहत्य कफणिद्वन्द्वेन दंशान्मुहुः ।
Srk 1157 न्यग्जानुद्वययन्त्रयन्त्रितघटीवक्त्रान्तरालस्खल-
Smv. 96.14 द्धाराध्वानमनोहरं सखि पयो
शार्दूलविक्रीडित
गां दोग्धि गोपालकः ॥१॥

कस्यचित् ।

2002 तैस्तैर्जीवोपहारैर्गिरिकुहरशिलासंश्रयामर्चयित्वा
देवीं कान्तारदुर्गां रुधिरमुपतरुक्षेत्रपालाय दत्त्वा ।
Srk 1191 तुम्बीवीणाविनोदव्यवहितसरकामह्नि जीर्णे पुराणीं
स्रग्धरा हालां मालूरकोषैर्युवतिसहचरा
बर्बराः शीलयन्ति ॥२॥

कस्यचित् ।

2003 एताश्चन्द्रोदयेस्मिन्नविरलमुशलोत्क्षेपदोलायमान-
स्रग्धरा स्निग्धश्यामाग्रपीनस्तनकलसनमत्कण्ठनालाग्ररम्याः।

2001 (a) Srk. अङ्गुष्ठाक्रम for अङ्गुष्ठाग्रिम. Pv. यन्त्रित for वक्रित. Srk. अध॰ for असौ.

(b) Pv. reads आर्द्रीकृत्य पयोधराञ्चलमलं सद्यः पयोविन्दुभि..

(c) Pv मध्य for यन्त्र. Ed. वक्त्रान्तरोध.

(d) Smv. मनोरमं for मनोहरं, पथि for सखि. Pv. दामोदर. for गोपालकः.

Srk. उपाध्यायदामोदरस्य

Smv. जोयिकस्य. Pv. शरणस्य.

2002 (a) Srk. इह for गिरि.

Srk. योगेश्वरस्य.

उद्वेल्लद्बाहुवल्लीप्रचलितवलयश्रेणयः पांमराणां
गेहिन्यो दीर्घगीतिध्वनिजनित-
सुखास्तण्डुलान्कण्डयन्ति ॥३॥
शरणस्य ।

2004 रज्जुक्षेपरयोन्नमद्भुजलताव्यक्तैकपार्श्वैस्तनी
सूत्रच्छेदविलोलशङ्खवलयश्रेणीक्‍वणत्कारिणी । Srk 1152
तिर्यग्विस्तृतपीवरोरुयुगला पृष्ठानतिव्याकृता- शार्दूलविक्रीडित
भोगश्रोणिरुदस्यति प्रतिमुहुः कूपादपः पामरी ॥४॥
तस्यैव ।

2005 एतास्ता दिवसान्तभास्करदृशो धावन्ति पौराङ्गना
स्कन्धप्रस्खलदंशुकाञ्चलधृतिव्यासङ्गबद्धादराः ।
प्रातर्यातकृषीवलागमभिया प्रोत्प्लुत्य वर्त्मच्छिदो शार्दूलविक्रीडित
हट्टक्रीतपदार्थमूल्यकलनव्यग्राङ्गुलिग्रन्थयः ॥५॥
तस्यैव ।

२ तुरङ्ग ।

2006 पश्चात्खुरद्वितयखण्डितभूमिभाग-
मूर्ध्वीकृताग्रचरणद्वयमुग्रहेषम् । वसन्ततिलक
मूर्धावगाहनविहस्तनिजाश्ववार-
भाराज्जनः परिजहार खलं तुरङ्गम् ॥१॥
धोयीकस्य ।

2007 कृतशीकरवृष्टिकेशरै-
रसकृत्स्कन्धमबन्धुरं धुवन् । सुन्दरी
अपिबच्चरणाग्रताडितं
तुरगः पङ्किलमापगापयः ॥२॥
तस्यैव ।

2004 Srk —anonymous.

2005 (a) Sp. गौराङ्गनाः for पौराङ्गनाः.

(d) Ed क्रय्य for क्रीत

2008 आघ्रातक्षोणिपीठः खुरशिखरसमाकृष्टरेणुस्तुरङ्गः

Srk. 1167 पुञ्जीकृत्याखिलाङ्गीन्क्रमवशविनमज्जानुकं मुक्तकायः ।

स्रग्धरा पृष्ठान्तःगात्रकण्डूव्यपनयनवशाद् द्विस्त्रिरुद्वर्तिताङ्गः

प्रोत्थाय द्राङ निरीहः क्षणमथ

वपुरास्यानुपूर्वं धुनोति ॥३॥

विक्रमादित्यस्य ।

2009 पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-

Hc. III. 5 रासज्याभुग्नकण्ठं क्षणमुपरिसटां धूलिधूम्रां विधूय ।

Sv. 2420 घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो

Smv. 1024 मन्दं शब्दायमानो विलिखति

Srk 1166

स्रग्धरा शयनादुत्थितः क्ष्मां खुरेण ॥४॥

भट्टवाणस्य ।

2010 कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कन्धरामातिरश्चीं

Hc III 6

स्रग्धरा लोलेनाहन्यमानां तुहिनकणमुचा चञ्चता केशरेण ।

2008 (b) Srk. जानुरुन्मुक्त for जानुकं मुक्त.

(c) Srk रसात् for वशात्.

(d) Srk पूर्व्या for पुर्वं.

Srk —anonymous.

2009 (a) Sv., Hc अंघ्रि for अंघ्री

(b) Srk., Smv., Sv, Hc. कण्ठो for कण्ठं, मुखमुरसि सटा (Srk., Hc. सटा) for क्षण सटा A नम्रा for धूम्रा (Sv. धूम्रा). Smv. विधाय for विधूय.

(c) Ed. तुङ्ग for तुरङ्ग.

Ed and MSS ascribe it to विक्रमादित्य Srk.—anonymous

2010 (a) Ed. विकट for निकट.

(b) Hc. ॰मानं for माना

Hc. लग्न for मग्न.

निद्राकण्डूकषाय कषति निबिडितश्रोत्रशुक्तिस्तुरङ्ग-
स्त्यङ्गत्पक्ष्माग्रलग्नप्रतनुबुसकणं कोणमक्ष्णः क्षुरेण ॥५॥

तस्यैव ।

३ गौः ।

2011 व्यक्तस्नायुवृतास्थिपञ्जरभरो रोमन्थनिद्रालसः
प्रातर्गोमयलिप्तपुच्छचरणोऽप्युत्थातुकामः स्वयम् । शार्दूलविक्रीडित
पूर्वव्यूढिविभावनपरिवृढैरुत्तोलितः स्पन्दते
वृद्धोक्षस्त्रिकभङ्गलब्धरुधिरात्काकाङ्घ्रिया विद्रुतः ॥१॥

कस्यचित् ।

2012 अग्रे विनत्य चरणौ विनमय्य कण्ठ-
मुत्थाप्य वक्त्रमभिहत्य मुहुश्च वत्साः । Srk 1168
मात्राविवर्तितमुखं मुखलिह्यमान- वसन्ततिलक
पश्चार्धसुस्थमनसः स्तनमुत्पिबन्ति ॥२॥

चक्रपाणेः ।

2013 तिर्यक्तीक्ष्णविषाणयुग्मचलनव्यानम्रकण्ठाननः
किंचित्कुञ्चितलोचनः खुरपुटैराघोटयन्भूतलम् ।
निःश्वासैरतिमन्ततैर्बुसकणाजालं खले विक्षिप- Srk 1186
न्नुक्षा गोष्ठतटेषु लब्धविजयो गोवृन्दमास्कन्दति ॥३॥ शार्दूलविक्रीडित

योगेश्वरस्य ।

2010 (d) Ed drops the portion of the text from त्यङ्गत् to लग्न, but supplies it in the Errata

2012 (a) Srk आदौ for अग्रे.

(c) Srk प्रवर्तित for विवर्तित

(d) I. O, S स्वस्थ for सुस्थ

Srk —anonymous.

2013 (a) Ed ग्रीवाननः for कण्ठानन.

(b) Srk. पुटेन for पुटै.

(c) Ed जर्जरै for सन्ततै

Srk.—अचलस्य.

मालिनी

2014 उपनिहितहलीषासार्गलद्वारमारा-
त्परिचकितपुरन्ध्रीसारिताभ्यर्णभाण्डम् ।
पवनरयनिरश्चीर्वारिधाराः प्रतीच्छ-
न्विशति वलितशृङ्गः पामरागारमुक्षा ॥४॥

कस्यचित् ।

स्रग्धरा

2015 कर्णाभ्यर्णारिशृङ्गक्षतिरुधिररसास्वादनाबद्धगर्ध-
ध्वाङ्क्षच्छायात्तभीतिप्रतिहतधवलीवर्गसंवर्धनेच्छः ।
शीलत्याकुद्धगोपीलगुडहतिनमत्पृष्ठवंशः कथंचि-
त्पातः केदारनीरं कलमदलभिया कूणिताक्षो महोक्ष ॥५॥

कस्यचित् ।

४ नानापशवः ।

Srk. 1655
V., p. 49
शार्दूलविक्रीडित

2016 पश्योदश्चदवाश्चदञ्चितवपु पूर्वार्धपश्चार्धभाक्
स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नार्धलाङ्गूलभृत् ।
दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन्सटामुत्करा-
मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केशरी ॥१॥

सुबन्धोः ।

स्रग्धरा

2017 उच्छ्रश्रुव्यात्तवक्त्रः प्रविततरसनापल्लवालीढसृक्का-
पिङ्गोग्रभ्रान्तनेत्रः पुलकिततरलोत्तानलाङ्गूलनालः ।
कुत्राप्यक्रान्तिगामी क्वचिदतिपिहितः क्वापि तुङ्गाग्रमात्र-
श्चित्रव्याघ्रोयमाप्तुं प्रमदवनमृगीतर्णकांस्तूर्णमेति ॥२॥

योगेश्वरस्य ।

2016 (a) Ed., Srk. transpose पूर्वार्ध and पश्चार्ध
(b) Srk. अग्र for अर्ध.
(c) Sp., Srk. उत्कटाम् for उत्कराम्.
Srk.—anonymous.

2017 (d) Ed. अत्तुं for आप्तुं.

2018 आकुञ्जीकृतपृष्ठमुन्नतचलद्वक्राग्रपुच्छं भया-
दन्तर्वेश्मनिवेशितैकनयनं निष्कम्पकर्णद्वयम् । Srk 1163
लालाकीर्णविदीर्णसृक्कविकसद्दंष्ट्राकरालाननः शार्दूलविक्रीडित
श्वा निःश्वासनिरोधपीवरगलं
मार्जारमास्कन्दति ॥३॥
तस्यैव ।

2019 दुर्वारकेलिकलडिम्भभयाद्विद्रानीं
व्यालम्बिलोलकुचकम्बलभारमन्दा । वसन्ततिलक
संदश्य विश्लथमुदश्रयता मुखेन
शावं शुनी नयति शालिपलालकूटम् ॥४॥
शुभाङ्कस्य ।

2020 विलेभ्यो निष्क्रान्तं प्रतिनवहरिद्रारसनिभं
प्रियापृष्ठाश्लेषप्रणयि कृतसंपन्नवजले । शिखरिणी
स्वरान्सानुस्वारान्विविधतदवस्थाविघटित
कुलं मण्डूकानामुदयगलगण्डं विकुरुते ॥५॥
तस्यैव ।

५ पारावत ।

2021 असौ गिरेः शीतलकन्दरस्थः
पारावतो मन्मथचाटुदक्षः । उपजाति
घर्मालसाङ्गीं मधुराणि कूजन्
संवीजते पक्षपुटेन कान्ताम् ॥१॥
पाणिनेः ।

2018 (c) Srk. विकचत् for विकसत्
(d) Srk. गलो for गलं
Srk.—anonymous.

2019 I. O., S शुभाङ्कस्य for शुभाङ्गस्य.

2021 Quoted by Aufrecht in ZDMG, 36, p. 366.

शार्दूलविक्रीडित

2022 किंचित्कुञ्चितचञ्चुचुम्बनसुखस्फारीभवल्लोचनं
स्वप्रेमोचितचाटुचाटुकरणैश्चेतो धयन्ती मुहुः ।
कूजन्ती विनतैकपक्षतिपुटेनालिङ्ग्य लीलालसं
धन्यं कान्तमुपान्तवर्तिनमियं पारावती सेवते ॥२॥

मतिराजस्य ।

Spd. 570
अनुष्टुप्

2023 कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम् ॥३॥

दण्डिनः ।

Srk 1154
शार्दूलविक्रीडित

2024 प्रातर्वारविलासिनीजनरणन्मञ्जीरमञ्जुस्वनै-
रुद्बुद्धः परिधूय पक्षतिपुटं पारावतः सस्पृहम् ।
किंचित्कुञ्चितलोचनां सहचरीं संचुम्ब्य चञ्च्वा चिरं
मन्दान्दोलितकण्ठकुण्ठितगलं

सोत्कण्ठमुत्कूजति ॥४॥

विक्रमादित्यस्य ।

Srk. 1153
शार्दूलविक्रीडित

2025 पक्षाभ्यां सहितौ प्रसार्य चरणावेकैकशः पार्श्वयो-
रेकीकृत्य शिरोधरोपरि शनैः पाण्डूदरे पक्षती ।
निद्राशेषविशेषरक्तनयनो निर्याय नीडोदरा-
दाक्रान्तविदारिताननपुटः पारावतो जृम्भते ॥५॥

शृङ्गारस्य ।

६ बकः ।

वसन्ततिलक

2026 गत्वा पुरः कतिचिदेव पदानि वेगा-
दाकुञ्चितैकचरणो निभृतीकृताक्षः ।

2022 Ed. मातङ्गराजस्य for मतिराजस्य

2023 (b) Spd. परावृत्य for परिभ्रम्य.

2024 Srk.—विक्रमादित्यतपस्विनो .

2025 Srk.—भृङ्गारस्य for शृङ्गारस्य.

स्वैरं विदूरविततीकृतकन्धरोयं
मीन सरंःस्भसि निभालयते बलाकः ॥१॥

कामदेवस्य ।

2027 बलाकाः पान्थानां शिशिरसरसीसीम्नि सरता- Srk. 1185
ममी नेत्रानन्द ददति चरणाचोटितमुखाः । शिखरिणी
धुनाना मूर्धानं गलविलविशत्स्फारशफर-
स्फुरत्पुच्छानच्छद्युतिशवलवाष्पारुणदृशः ॥२॥

मधुकण्ठस्य ।

2028 हरति पुरत· पार्श्वे पश्चाद्वलन्तमनारतं
शफरमपरित्राणं गृह्णन्बकस्तटिनीतटे । हरिणी
प्रविचलगरुत्पालिर्दत्तापरापरसत्वर-
त्रिचतुरखरत्रोटीकोटिप्रहार इतस्ततः ॥३॥

पियाकस्य ।

2029 उद्ग्रीवस्तिमितेक्षणस्तत इतः पश्यन्निलीय स्थितं
पादोद्धृष्टिपरस्परप्रतिभयभ्रान्तं चलत्पक्षतिः । शार्दूलविक्रीडित
द्राक्त्रोटीचुरकोटिकुण्ठितरय प्राक्तियंगूर्ध्वीकृतं
गर्भान्तःप्रणयीचकार शफरं कासारचारी बकः ॥४॥

कस्यचित् ।

2030 पयसि सरसः स्वच्छे मत्स्याञ्जिघृक्षुरितस्ततो Srk. 1164
वलितनयनं मन्दं मन्दं पदं निदधद्वकः । हरिणी

2026 Quoted by Aufrecht in ZDMG, 36, p. 531.

2027 (a) Srk वकोटाः for बलाका .

(c) Srk गलत् for विशत्

(d) Srk व्यतिकरसबाष्पाकुलदृश· for द्युति···दृश .

Srk —anonymous

2029 (d) S, I. O कुम्भान्तः for गर्भान्त

2030 (a) Ed सरसे for सरस .

(b) Srk. नयनो for नयन

Srk.—anonymous.

वियति विधृतैकाङ्घ्रिस्तिर्यग्विवर्तितकन्धरो
दलमपि चलत्सप्रत्याशं मुहुर्मुहुरीक्षते ॥५॥

योगेश्वरस्य ।

७ नानापक्षिणः ।

2031 उत्प्लुत्य दूरं परिधूय पक्षा-
Srk. 1155 वधो निरीक्ष्य क्षणबद्धलक्ष्यः ।
उपजाति मध्येजलं चञ्चति दत्तझम्पः
समत्स्य उत्सर्पति मत्स्यरङ्कः ॥१॥

कस्यचित् ।

2032 नीडादपक्रम्य विधूय पक्षौ
Srk. 1156 वृक्षाग्रमारुह्य ततः क्रमेण ।
उपजाति उद्ग्रीवमुत्पुच्छमुदेकपाद-
मुच्चूडमुत्कूजति ताम्रचूडः ॥२॥

मधोः ।

2033 इह सरसि सलीलं चारुपत्रे विधुन्व-
मालिनी न्दरतरलिततिर्यक्चञ्चुकण्डूयिताङ्गः ।
अनुसरति सरागः प्रेयसीमग्रयाता-
मनुपदसमुदञ्चत्कण्ठनालो मरालः ॥३॥

शिशोकस्य ।

2031 (c) Srk. बुड्डति for चञ्चति.
(d) Srk. समत्स्यम् for समत्स्य.
Srk.—वाक्पतिराजस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 551.

2032 Srk.—anonymous.

2033 Quoted by Aufrecht in ZDMG, 36, p. 527.

2034 चञ्चच्चञ्चलचञ्चुवाञ्छितचलच्चूडाग्रमुग्रं पत-
च्चक्राकारकरालकेशरशटास्फारस्फुरत्कन्धरम् । Spd. 572
वारंवारमुदङ्घ्रिलङ्घनघनप्रेङ्खन्नखक्षुण्णयोः Srk. 1171
कामं कुक्कुटयोर्द्वयं द्रुतपदं क्रूरक्रम युध्यते ॥४॥ शार्दूलविक्रीडित

कस्यचित् ।

2035 उत्पुच्छः प्रमदोल्लसद्वपुरधो विस्रंसिपक्षद्वयः
स्वैरालोकगतिक्रमेण परितो भ्रान्त्वा सलील मुहुः । Srk. 1183
उत्कण्ठालसकूजितः कलरुतां भूयो रिरंसारस- शार्दूलविक्रीडित
न्यग्भूतां चटक प्रियामनुसरत्युद्वेपमानः स्वयम् ॥५॥

सोल्लोकस्य ।

८ गिरयः ।

2036 माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
पादालक्तमौक्तिकशिलः सिद्धाङ्गनानां गतैः । Nn. I 9
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः शार्दूलविक्रीडित
सेव्योयं मलयाचलः किमपि
मे चेत. करोत्युत्सुकम् ॥१॥

श्रीहर्षस्य ।

2034 (a) Spd. चुम्बन for वाञ्छित.
(c) Spd चञ्चल for लङ्घन, भ्रश्यन् for प्रेङ्खन्.
(d) Srk. पद for पदं. Spd. दृष्टा for कामं, द्वयो· for द्वयं, स्थितिरिति for क्रूरक्रमं. Ed , Srk. युध्यति (Spd. युध्यतोः) for युध्यते.
Spd. वररुचेः.

2035 (a) Srk. उच्छ्वसत् for उल्लसत्
(b) Srk. स्वैरोत्काल for स्वैरालोक.
(d) Srk. त्वराम् for स्वयम्.
I O., S, Sp. शोल्लोकस्य.
Srk.—सोन्नोकस्य.

2036 (b) and (c) transposed in Nn.

2037 एताः स्थानपरिग्रहेण शिवयोरत्यन्तकान्तश्रियः
Srk. 1593 प्रालेयाचलमेखलावनभुवः पुष्णन्ति नेत्रोत्सवम् ।
शार्दूलविक्रीडित व्यावल्गद्गुलवैरिवारणवरप्रत्यग्रदन्ताहति-
श्वभ्रप्रस्रवदभ्रसिन्धुसदनप्रस्निग्धदेवद्रुमाः ॥२॥

कस्यचित् ।

2038 छन्नोपान्ता निकुञ्जैस्तरुणशुककुलश्यामलैः कीचकानां
शैलेयप्रस्तराभिः सुभगपरिसराः पीवरीभिः शिलाभिः ।
स्रग्धरा एते ते रुद्धरेवारयमुखरतया यौवनोद्दामकाम-
व्यापारोत्तालकेलीचतुरवनचरीबन्धवो विन्ध्यपादाः ॥३॥

योगेश्वरस्य ।

2039 इमास्ता विन्ध्याद्रेः शुकहरितवंशीवनघना-
S. k. III. 9 भुवः क्रीडालोलद्विरदरदनारुणतरवः ।
Srk. 1588 लताकुञ्जे यासामुपनदि रतक्लान्ततरुणी-
शिखरिणी कपोलस्वेदाम्भःपरिचयनुदो वान्ति मरुतः ॥४॥

तस्यैव ।

2037 (c) Srk. व्यावल्गत् for व्यावल्गत्.
2038 (a) Ed., A फल for कुल.
(c) I. O., S बद्ध for रुद्ध.
(d) I. O., S व्यापारोत्तार for व्यापारोत्ताल
2039 (b) Srk. दशन for रदन, आभुग्न for आरुग्ण
(c) S. k., Srk. शबरी for तरुणी.
(d) I. O., S कपोले for कपोल. Srk कण for परि

Srk.—दक्षस्य.

2040 करिकवलनशिष्टैः शाखिशाखाग्रपत्रै- S k. II. 30
रुणसरणयोमी सर्वतो भीषयन्ते । Smv 103.14
चलितशबरसेनादत्तगोश्रृङ्गचण्ड- Srk. 1587
ध्वनिचकितवराहव्याकुला विन्ध्यपादाः ॥५॥ मालिनी

कमलायुधस्य ।

९ अटवी ।

2041 प्रत्यासन्नसरांसि कोकिलवधूलीलासुहृन्दि च्छद-
च्छायालिप्तककुम्भि कोरकहसद्वीरुन्धि विन्ध्याटवी । शार्दूलविक्रीडित
अन्तर्दत्तमनोजरुञ्जि रुचिरक्ष्मारुहि भृङ्गाकुल-
त्वङ्गन्नद्धाम्पि लतागृहाणि
दधती कांचिन्मुदं यच्छति ॥१॥

मधोः ।

2042 मिथः क्रीडत्क्रोडावलिविलसितोत्खाततटिनी-
तटी क्षुभ्योद्धर्जद्गजगहनगर्भेयमटवी । शिखरिणी
गुहाभिर्व्याघ्राणां जरदजगरग्राससरुपां
घटत्कारं घोरं प्रतिरववहाभिर्द्रढयति ॥२॥

कस्यचित् ।

2043 सर्पश्वासमरुत्तरङ्गतरलाः क्वापि क्वचिच्छ्वापद-
स्फारोद्गीर्णगिरो निरन्तरतमस्तारुण्यमग्नाः क्वचित् । शार्दूलविक्रीडित
क्वापि क्रूरकृशानुदुर्मुखकथाशेषीकृतक्ष्मारुह-
श्वेतः संप्रति कम्पयन्ति
परितो गम्भीरभीमा भुवः ॥३॥

जलचन्द्रस्य ।

2040 (a) Srk. कवलितमृष्टै for कवलनशिष्टै. Ed. शाक for शाखि.
(b) After भीषयन्ते Srk. reads अभ्रकुञ्जै.
Smv.—कमलाकरस्य.

शार्दूलविक्रीडित

2044 क्षुण्णक्ष्मारुहवीथयो विदलितग्रावोपलग्रन्थयः
सिंहस्वीकृतमत्तवारणवधूबद्धार्तकोलाहलाः ।
एताः पल्लवयन्ति चेतसि भयं भल्लूकहिक्कारवै-
रातङ्कात्पतयालुबालहरिणीगर्भाविला भूमयः ॥४॥

तस्यैव ।

Ar. v 20
मालिनी

2045 इह महिषविषाणव्यस्तपाषाणपीठ-
स्खलनसुलभरोहिद्गर्भिणीभ्रूणहत्याः ।
कुहरविहरमाणप्रौढभल्लूकहिक्का-
चयचकितकिरातस्रस्तशस्त्रा वनान्ताः ॥५॥

मुरारेः ।

१० नदी ।

स्रग्धरा

2046 भ्रान्त्येताः शैवलिन्यो वनमहिषखुरक्षुण्णपाठीनपृष्ठ-
ग्रासव्यग्रोद्रवृन्दप्रविरलचरणन्यासमुद्राङ्कपङ्काः ।
निःशङ्कोद्भ्रान्तकङ्कत्रसदुरगवधूसंभ्रमोत्फालमूर्छ-
द्भेकार्तस्वानदीर्घीकृतरवविरसत्कीचकग्रन्थिरन्ध्राः ॥१॥

कस्यचित् ।

Srk. 281
शार्दूलविक्रीडित

2047 व्यक्तव्याघ्रपदाङ्कपङ्क्तिनिचितोन्मुद्रार्द्रपङ्कोदरा-
स्तोयोत्तीर्णनिवृत्तनक्रजठरक्षुण्णस्थलीवालुकाः ।
सान्द्रस्थूलनलोपरोधविषमाः शङ्कावतारा: पुरः
संत्रासं जनयन्ति कुञ्जसरितः काचाभनीलोदकाः ॥२॥

कस्यचित् ।

2045 (d) Ed. न्यस्त for स्रस्त.

2046 (b) I. O., A मुद्राङ्कि for मुद्राङ्क

(d) I. O., A भेकार्ति for भेकार्त. Ed. बन्धाः for रन्ध्राः.

2047 (b) I. O., S वल्लिकाः for वालुकाः

(a) and (c) transposed in Srk.

2048 अन्तर्मग्नकरेणवः कलभकव्यारुग्णकन्दाङ्कुरैः
सामोदाः परितः प्रमत्तमहिषश्वासोल्लसद्वीचयः ।
सम्मोदं जनयन्ति शैलसरितः सुच्छायकच्छस्थली
सीमान्तो जलसेकशीतलशिलानिद्राणरोहिद्गणाः ॥३॥ शार्दूलविक्रीडित

जलचन्द्रस्य ।

2049 जलरयदलत्कूलोत्सङ्गाः प्रलम्बिलतागृह-
स्तिमितगतिभिर्वेणीबन्धैर्विशृङ्खलवीचयः ।
स्थपुटितशिलासोपानेषु प्रकामतरङ्गिताः
शिखरिसरितो नेत्रानन्दं किरन्ति समन्ततः ॥४॥ हरिणी

तस्यैव ।

2050 वीचीसक्रमदन्तुराः कलरवैर्वाचालिताः सारसै-
रानन्दं जनयन्ति पूरगरिमोत्तानीभवद्वालुकाः ।
भ्रान्तागन्तुकराजहंसपरिषत्पादाङ्कमुद्राभृतः
प्रस्थक्ष्मारुहतल्पसुप्तकुररा स्रोतस्वतीभूमयः ॥५॥ शार्दूलविक्रीडित

कस्यचित् ।

११ विशेषनदी ।

2051 कूजद्भिर्वनकुक्कुभैर्मदकलं वाचालतीरद्रुमा
बिभ्राणा विकचाब्जकेशररज पिङ्गास्तरङ्गावलीः ।
स्रोतःक्षामविपाण्डुसैकतसुखासीना रसत्सारसा
धन्येयं तमसानदी हरति मे दृष्टापि मार्गश्रमम् ॥१॥ शार्दूलविक्रीडित

कस्यचित् ।

2052 एते मेकलकन्यकाप्रणयिणः पातालमूलस्पृशः Srk. 1656
संत्रासं जनयन्ति विन्ध्यभिदुरा वारां प्रवाहाः पुर. । शार्दूलविक्रीडित

2048 (a) Ed. अन्तर्भग्न for अन्तर्मग्न.
(d) Ed. निद्रालु for निद्राण. A लोहितकुलाः for रोहिद्गणा°.

2051 (a) A, I. O., S जल for वन.

हेलोन्मूलितमर्दितप्रतिहतव्यावर्तितप्रेरित-
त्यक्तस्वीकृतनिह्नुतप्रकटितप्रोद्भूततीरद्रुमाः ॥२॥

कस्यापि ।

2053 मज्जन्मातङ्गहस्तच्युतमदमदिरामोदमत्तालिजालं
स्रग्धरा स्नानैः सिद्धाङ्गनानां कुचयुगविलसत्कुङ्कुमासङ्गपिङ्गम् ।
सायं प्रातर्मुनीनां कुशकुसुमचयच्छन्नतीरस्थलीकं
पायाद्वो नर्मदाम्भः करिकरमकराक्रान्तरंहस्तरङ्गम् ॥३॥

छित्तपस्य ।

2054 इयं सा कालिन्दी कुवलयदलस्निग्धमधुरा
Pv. 313 शिखरिणी मदान्धव्याकूजत्तरुणजलरंकुप्रणयिनी ।
पुरा यस्यास्तीरे सरभसतृष्ण मुरभिदो
गताः प्रायो गोपीनिधुवनविनोदेन दिवसाः ॥४॥

शरणस्य ।

2055 इदं तत्कालिन्दीतटमिह हि कंसासुरभिदो
Pv. 345 शिखरिणी यशः शृण्वद्वक्त्रं स्खलितकवलं गोकुलमभूत् ।
भ्रमाद्वेणुक्वाणप्रणयमसृणोत्तारमधुर-
स्वराभिर्गोपीभिर्दिशि दिशि समुद्गीर्णमनिशम् ॥५॥

केशटस्य ।

2052 (c) Srk. लीला for हेला, नर्तित for मर्दित.
(d) A, I. O, S प्रोद्भूत (Srk. प्रचलित) for प्रोद्धूत.

2053 (a) A कुम्भ for हस्त, मालम् for जालम्.
(b) A विगलत् for विलसत्.

2054 Pv., A, Sp दशरथस्य for शरणस्य

2055 (a) Pv. पुलिनम् for तटम्, om हि
(b) Pv. वक्त्रस्खलित for वक्त्रं स्खलित.
(c) Pv. श्रवण for प्रणय
(d) Pv घूर्णम् for गीर्णम्.
Pv. मोटकस्य for केशटस्य.

१२ तडागः ।

2056 अविरतमधुपानागारमिन्दिन्दिराणा-
मभिसरणनिकुञ्जं राजहंसीकुलस्य ।
प्रविततबहुशालं सद्म पद्मालयाया मालिनी
वितरति रतिमक्ष्णोरेप लीलातडागः ॥१॥
श्रीमल्लक्ष्मणसेनदेवस्य ।

2057 वीचीसमीरधुतकाञ्चनपुण्डरीक-
पर्यस्तकेशरपरागपिशङ्गिताम्भः ।
अच्छोदमैक्षत स देवपुरंध्रिपाद- वसन्ततिलक
लाक्षारुणीकृतशिलातलतीरलेखम् ॥२॥
रत्नाकरस्य ।

2058 मदतरलमरालप्रेयसीचञ्चुकोटि-
क्रकचविदलितानि व्यक्तमिन्दीवराणि ।
निविडयति तडागे यत्र लीलावतीनां मालिनी
कुवलयदलदामश्यामलो दृष्टिपातः ॥३॥
जलचन्द्रस्य ।

2059 लुठद्वीचीमौलिः परिपतति पूर्वं चरणयो-
रथोरू गृह्णाति स्पृशति जघनाभोगमभितः । शिखरिणी
करौ धत्ते मध्यं कलयति समाश्लिष्यति कुचा
कचानप्यादत्ते प्रिय इव तडागो मृगदृशाम् ॥४॥
गोवर्धनस्य ।

2056 (a) Ed. मधुपातागार for °पाना°.
Ed लक्ष्मणसेनस्य for श्रीमत् . देवस्य.

2057 Omitted in A.
Quoted by Aufrecht in ZDMG., 36, p 374.

2059 (c) Ed मध्ये for मध्यं

2060 एतन्मानिनि मानसं सुरसरो निर्लूनहेमाम्बुजं
Br. X. 35 पार्वत्या प्रियपूजनार्थममुतो गङ्गासरिन्निर्गता ।
शार्दूलविक्रीडित अस्माच्चित्रशिखण्डिभिश्च परमे ब्रह्मण्युपादीयते
स्नानोत्तीर्णवृषाङ्कभस्मरजसां
सङ्गात्पवित्रं पयः ॥५॥
राजशेखरस्य ।

१३ प्रशस्ततडागाः ।

2061 भ्राम्यद्भृङ्गालिदोलाविदलितकुमुदामोदमेदस्विवातो-
द्वेल्लत्कल्लोलमालाचलकमलकराकूतहूताध्वनीनाः ।
स्रग्धरा पाथोनाथोपहासोल्लसितरदाकारविस्फारफेना-
स्तेनाखन्यन्त दन्तद्युतिविशदयशो-
हंसनीडास्तडागाः ॥१॥
भट्टनारायणस्य ।

2062 तेनाखानि जलावगाहनरसव्यासक्तपौराङ्गना-
Sv. 106.1 पर्यस्यत्कवरीविकीर्णकुसुमस्मेरोर्मिमालं सरः ।
शार्दूलविक्रीडित यस्मिन्नच्छतया निधाय नयने मर्त्यैः सकौतूहलं
लक्ष्यन्ते भुजगाधिराजनगरी-
वामभ्रुवां विभ्रमाः ॥२॥
उमापतिधरस्य ।

2060 (a) I. O., S निर्मूल for निर्लून.
(b) Ed. पति for प्रिय.
(c) Br. पर्वणि for ब्रह्मणि.
(d) Ed. वृषाङ्ग for वृषाङ्क.
2061 (b) I. O., S मूलो for माला. Ed. कटा for करा.
2062 (d) I. O., S भुजगारि (?) for भुजगाधि.

2063 उन्मीलल्लोलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुरुमरुदास्फालवाचालवीचिः ।
पतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथ-
पथिकदृशां दत्तरागस्तडागः ॥३॥
कविपण्डितश्रीहर्षस्य ।

Nc. XII. 101
Smv. 106.3
स्रग्धरा

2064 तडागास्ते नानानिलचपलपद्माकरलस-
द्रसक्षोदामोदाकुलमधुकरालीकवलिताः ।
कृतास्तोयक्रीडाकुलकुवलयाक्षीकुचतट-
त्रुटद्वीचीवेल्लत्कुररकुलकोलाहलजुष ॥४॥
विश्वेश्वरस्य ।

शिखरिणी

2065 अथायतनसंनिधौ भगवतो भवानीपते-
र्मनोहरमचीखनद्भुवनभूषणं भूपतिः ।
विगाहनकुतूहलोत्तरलपौरसीमन्तिनी-
पयोधरभरत्रुटद्विकटवीचिमुद्रं सरः ॥५॥
वसुकल्पस्य ।

पृथ्वी

१४ चक्रवाक ।

2066 तीरात्तीरमुपैति रौति करुणं चिन्तां समालम्बते
कान्तां ध्यायति निश्चलेन मनसा योगीव युक्तेक्षणः ।

Spd. 3597
शार्दूलविक्रीडित

2063 (b) Nc., Smv. उदितमरुत्स्फाल for उरुमरुदास्फाल.
Sp. om. कविपण्डित in the poet's name.

2064 (d) Ed पुष· for जुषः

2066 (b) Spd. किंचित् for कान्ता.

स्वच्छायामवलोक्य कूजति पुनः कान्तेति हृष्टः खगो
धन्यास्ते खलु ये विमुक्तविषयाः
कष्टं परं सङ्गिनाम् ॥१॥
कस्यचित् ।

2067 लीलाम्भोरुहकाननेन विशति ध्वान्तोत्कराशङ्कया
स्वक्रीडोच्छलिताश्च
शार्दूलविक्रीडित वारिकणिकास्ताराभ्रमात्पश्यति ।
सत्रासं मुहुरीक्षते च चकितो हंसं हिमांशुभ्रमा-
न्न स्वास्थ्यं भजते दिवापि
विरहाशङ्की रथाङ्गाह्वयः ॥२॥
धर्मपालस्य ।

2068 मित्रे क्वापि गते सरोरुहवने बद्धानने क्लाम्यति
Sv. 3483 क्रन्दत्सु भ्रमरेषु वीक्ष्य
Spd. 3599 दयिताश्लिष्टान्पुरः सारसान् ।
Smv. 68.14 चक्राह्वेण वियोगिना बिसलता
शार्दूलविक्रीडित नोत्खण्डिता नोज्झिता
वक्त्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥३॥
युवसेनस्य ।

2066 (c) Spd. स्वा for स्व. Spd. मुग्ध. for हृष्ट.
(d) Spd. भुवि for खलु, निवृत्तमदना for विमुक्तविषया, धिग्दुःखितान् कामिनः for कष्टं. सङ्गिनाम.

2068 (a) Sv. तिष्ठति (Smv. ताम्यति) for क्लाम्यति.
(b) Sv. आसन्नां (Smv. अश्लिष्टा) for आश्लिष्टान्, सारसीम् (also Smv.) for सारसान् Spd. श्लिष्टं पुर. सारसम् for श्लिष्टान्... सारसान्.
(c) Smv., Spd. चक्राङ्गेण for चक्राह्वेण Sv., Spd., Smv. नास्वादिता for नोत्खण्डिता.

Smv.—भट्टवामनस्य.
Sv., Spd.—anonymous.

2069 एह्यालिङ्ग त्वरयति मनो दुर्बला वासरश्री-
राश्लिष्टासि क्षपय रजनीमेकिका चक्रवाकि ।
नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा मन्दाक्रान्ता
दैवाधीनः सपदि भवतीमस्वनन्त्रस्त्यजसि ॥४॥

भानोः ।

2070 भंक्त्वा भीतो न भुंक्ते कुटिलबिसलताकोटि-
मिन्दोर्वितर्का-
त्ताराकारास्तृषार्तो न पिबति पयसां
विप्रुषः पत्रसंस्थाः । स्रग्धरा
छायाम्भोरुहाणामलिकुलशवलां
वेत्ति सन्ध्यामसन्ध्यां
कान्ताविच्छेदभीरुर्दिनमपि रजनीं
मन्यते चक्रवाकः ॥५॥

रजकसरस्वत्याः ।

१५ चक्रवाकी ।

2071 आवेपते भ्रमति सर्पति मोहमेति
कान्तं विलोकयति कूजति दीनदीनम् । Sv. 1914
अस्त हि भानुमति गच्छति चक्रवाका वसन्ततिलक
हा जीवितेपि मरणं प्रियविप्रयोगः ॥१॥

कस्यचित् ।

2072 न कुरु काकुरुतैर्विकलं शुचो
जहिहि पालय बालकुटुम्बकम् । द्रुतविलम्बित
सखि रथाङ्गकुटुम्बिनि तद्विधे
व्यतिकरे किमिद परिभाव्यते ॥२॥

गोसोकस्य ।

2069 Quoted by Aufrecht in ZDMG, 36, p. 518.
2071 (a) Sv रोदिति for सर्पति
(d) Ed. जीवतोपि for जीवितेपि
2072 (b) Ed. कुटुम्बिनम् for कुटुम्बकम्

2073 पक्षावुत्क्षिपति क्षितौ निपतति क्रोडं नखैरुल्लिख-
त्युद्बाष्पेण च चक्षुषा सहचर ध्यात्वा मुहुर्वीक्षते ।
Sv. 1921 शार्दूलविक्रीडित चक्राह्वा दिवसावसानसमये तत्तत्करोत्याकुला
येनालोहितमण्डलोपि कृपया
यात्येष नास्तं रविः ॥३॥

साहसाङ्कस्य ।

2074 एकेनार्कं हुतवहशिखापाटलेनास्तसंस्थं
पश्यत्यक्ष्णा सजलललितेनापरेण स्वकान्तम् ।
Sk. V. 495 Dr. under IV. 34 मन्दाक्रान्ता अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥४॥

मधोः ।

2075 सूर्ये चास्तमुपागते कमलिनीषण्डे च निद्रालसे
चक्री कान्तवियोगदुःसहशिखिज्वालावलीताडिता ।
शार्दूलविक्रीडित प्रत्युत्कूजति मूर्छति श्वसिति च व्याघूर्णते ताम्यति
भ्राम्यत्युद्भ्रमति क्षमामिव
निजप्राणान्मुहुर्निन्दति ॥५॥

धर्मपालस्य ।

2073 (b) Sv. सहचरी for चरं, ध्यायन् for ध्यात्वा I O, S मुहुरीक्षते for ०वीक्षते.

(c) Ed. चक्राङ्गी (Sv. चक्राह्वो) for चक्राह्वा Sv. उन्मना for आकुला.

(d) Sv. नास्तं रविर्गच्छति for यात्येष...रवि .

Sv. प्रियाविरहस्य for साहसाङ्कस्य.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 374, with ईक्षते for वीक्षते.

2074 (a) Sk. प्रविततरुषा for हुतवहशिखा. Dr. reads the line thus—एकेनाक्ष्णा प्रविततरुषा वीक्षते व्योमसंस्थम्.

(b) Sk. तरलेनापरेणात्मकान्तम् for ललिते···कान्तम्.

Dr. reads the line thus—भानोर्बिम्बं सजललुलितेनापरेणात्मकान्तम्.

१६ दिशः ।

2076 अमरयुवतिगीतीद्ग्रीवसारङ्गशृङ्गो-
ल्लिखितशशिसुधाम्भःशाद्वलारामरम्याम् ।
सुरपतिगजगण्डस्रंसिदानाम्बुधारा-
प्रसवसुरभिमाशां वासवीयां नमामि ॥१॥ मालिनी

उमापतिधरस्य ।

2077 सेयं मेकलमेखलानिलदलद्वीचीनदन्नर्मदा
केषां नाम न लोचनश्रवणयोर्दिग्दक्षिणा प्रीणनम् ।
काञ्चीपत्तनकामिनीनयनयोरावर्जिना विभ्रमै-
रन्यस्याः क इवापरे मुनिरतोऽगस्त्योपि नावर्तते ॥२॥ शार्दूलविक्रीडित

आचार्यगोपीकस्य ।

2078 वेलाशैलशयालुमांसलशिलाशालूकमज्जत्पयो-
वाहव्यूहवराहविभ्रमवतो प्रीणाति दिग्वारुणी ।
अस्यां कुड्मलयन्करान्परिहरन्नाशास्त्यजन्पद्मिनी-
र्विभ्रत्काञ्चनरागमम्बरमणिः सर्वात्मना लीयते ॥३॥ शार्दूलविक्रीडित

तस्यैव ।

2079 अस्तु स्वस्त्ययनाय दिग्धनपते कैलासशैलाश्रय-
श्रीकण्ठाभरणेन्दुविभ्रमदिवानक्तंभ्रमत्कौमुदी ।
यत्रालं नलकूवराभिसरणारम्भाय रम्भास्फुर-
त्पाण्डिम्नैव तनोस्तनोति विरहव्यग्रापि
वेशग्रहम् ॥४॥ शार्दूलविक्रीडित

जयदेवस्य ।

2080 प्राचीमभ्रेभकुम्भस्तनकलसलसन्मौलिकामिन्द्रपत्नीं
श्रीखण्डक्षोदलेखा दरखचितमुखीं
कालकान्तामवाचीम् । स्रग्धरा

2076 (b) S, I. O सुधान्त for सुधाम्भ .

2079 (c) Ed. स्फुटत् for स्फुरत्

(d) Ed. पाण्डिम्नेव for पाण्डिम्नैव.

सन्ध्यासिन्दूरमुग्धामुदकपरिवृढप्रेयसीं च प्रतीचीं
वन्दे यक्षेन्द्रजायां तरलसुरसरित्तार-
हारामुदीचीम् ॥५॥
जलचन्द्रस्य ।

१८ देशः ।

Br. X. 67
शार्दूलविक्रीडित

2081 पर्णं नागरखण्डमार्द्रसुभगं पूगीफलं फालयः
कर्पूरस्य च यत्र कोपि चतुरस्ताम्बूलयोगक्रमः ।
देशः केरल एष केलिसदनं देवस्य शृङ्गारिण-
स्तं दृष्ट्वा कुरु कोमलाङ्गि सफले
द्राघीयसी लोचने ॥१॥
राजशेखरस्य ।

Br. X. 70
शार्दूलविक्रीडित

2082 वाक्सत्त्वाङ्गसमुद्भवैरभिनयैर्नित्यं रसोल्लासतो
वामाङ्ग्यः प्रणयन्ति यत्र मदनक्रीडामहानाटकम् ।
अत्रान्ध्रास्तव दक्षिणेन त इमे गोदावरीस्रोतसां
सप्तानामपि वार्निधिप्रणयिनां
द्वीपान्तराणि श्रिताः ॥२॥
तस्यैव ।

Br. X. 74
शार्दूलविक्रीडित

2083 यत्क्षेमं त्रिदिवाय वर्त्म निगमस्याङ्गं च यत्सप्तमं
स्वादिष्ठं च यदैक्षवादपि रसाच्चक्षुश्च यद्वाङ्मयम् ।
तद्यस्मिन्मधुरं प्रसादि रसवत्कान्तं च काव्यामृतं
सोऽयं सुभ्रु पुरोविदर्भविषयः सारस्वतीजन्मभूः ॥३॥
तस्यैव ।

2081 (a) Br. पूगीफलैलास्तथा for पूगी·· फालय·.
(d) Br. तत् for तं.
2082 (c) Ed. अन्धा for अन्ध्रा.
2083 Ed. om. the ascription (तस्यैव).

2084 एतन्मालवमण्डलं विजयते सौजन्यरत्नाङ्कुरैः
संपद्विभ्रमधामभिः किमपरं शृङ्गारसारैर्जनैः ।
यत्रारुह्य विचित्रचित्रवलभीर्लीलाशिलासद्मनां — Br X 84
नीयन्ते जलदोदयेषु दिवसाः — शार्दूलविक्रीडित
कान्तासखैः कामिभिः ॥४॥

तस्यैव ।

2085 क्रीडत्किन्नरकामिनीविहसितज्योत्स्नावलक्षीकृता
कस्तूरीमददुर्दिनार्द्रसुरभी. प्राग्ज्योतिषीया भुवः । — शार्दूलविक्रीडित
नीहारस्थलसंचरिष्णुचमरीलाङ्गूलसंमार्जनी-
हेलोन्मृष्टनमेरुपुष्परजसो द्रष्टुं समीहामहे ॥५॥

वसुकल्पस्य ।

१८ वीरः ।

2086 याते कार्मुकविद्यया परिभवं सार्धं गणानां गणैः
षड्वक्त्रे समयं विलङ्घ्य
जयिनीमुद्दिश्य शक्तिं स्थिते । — शार्दूलविक्रीडित
हस्तोदस्तपरश्वधः स्वशपथैर्यः स्तम्भितः शम्भुना
विश्वे पश्यत कौतुकं भृगुपतेस्तस्यैव रामोऽङ्कुशः ॥१॥

शिह्लणस्य ।

2087 धात्रीमेकातपत्रां समिति कृतवता चण्डदोर्दण्डदर्पा-
दास्थाने पादनम्रप्रतिभटमुकुटादर्शबिम्बोदरेषु ।
उत्क्षिप्तच्छत्रचिह्नं प्रतिफलितमपि — स्रग्धरा
स्वं वपुर्वीक्ष्य किंचित्
सासूयं येन दृष्टाः
क्षितितलविलसन्मौलयो भूमिपालाः ॥२॥

जयदेवस्य ।

2084 (a) I. O. रत्नाकरै. for रत्नाङ्कुरै.
(c) Br. नाना for शिला.

2088 साधु म्लेच्छनरेन्द्र साधु भवतो मातैव वीरप्रसू-
शार्दूलविक्रीडित नीचेनापि भवद्विधेन वसुधा सुक्षत्रिया वर्तते ।
देवे कुप्यति यस्य वैरिपरिषन्माराङ्कमल्ले पुरः
शस्त्रं शस्त्रमिति स्फुरन्ति
रसनापत्रान्तराले गिरः ॥३॥
उमापतिधरस्य ।

2089 आ लङ्कानाथनारीस्तनतरलपयोवीचिमुद्रात्समुद्रा-
स्रग्धरा दास्वर्गङ्गातरङ्गावलिविरलशिलादुत्तरादुत्तराद्रेः ।
आ प्राक्शैलासुरस्त्रीसुरतगतिविदो
मग्नभास्वन्मृगाङ्का-
दा च प्राचेतसाब्धेर्भवतु
मम पुरः कोपि यद्यस्ति वीरः ॥४॥
तस्यैव ।

2090 इह विजयिनि वंशे कीर्तिधाराकलाप-
स्नपितसकललोकः श्रीयशोविग्रहोभूत् ।
मालिनी जलघट इव युद्धोत्तालभूपालदर्प-
ज्वलनशमनलीलाकोविदः कोपि वीरः ॥५॥
विश्वेश्वरस्य ।

१९ धनुर्भङ्ग ।

2091 रामे रुद्रशरासनं तुलयति स्मित्वा स्थितं पार्थिवैः
Srk. 1550 शिञ्जासञ्जनतत्परे च हसितं दत्त्वा मिथस्तालिकाः ।
शार्दूलविक्रीडित आरोप्य प्रचलाङ्गुलीकिसलये म्लानं गुणास्फालने
स्फाराकर्षणभग्नपर्वणि पुनः सिंहासने मूर्छितम् ॥१॥
राजशेखरस्य ।

2086 (d) I. O., S वामाङ्कुश· for रामोङ्कुश .
2089 (c) Sp. शैलात्सुर for शैलासुर.
2090 (c) Sp. जलधर for ०घट.
2091 (b) Srk. तत्परेऽव for तत्परे च Ed. तालिकाम् for तालिकाः.

2092 रुन्धन्नष्टविधेः श्रुतीर्मुखरयन्नष्टौ दिशः क्रोडय-
न्मूर्तीरष्ट महेश्वरस्य दलयन्नष्टौ कुलक्ष्माभृतः । Ar. III 54
तान्यक्ष्णा बधिराणि पन्नगकुलान्यष्टौ च संपादय- शार्दूलविक्रीडित
न्नुन्मीलत्ययमार्यदोर्बलचलत्कोदण्डकोलाहलः ॥२॥

मुरारेः ।

2093 दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत- Mc I 54
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः । Dr. under
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर- IV. 79
भ्राम्यत्पिण्डितचण्डिमा Sd. under III. 227
कथमहो नाद्यापि विश्राम्यति ॥३॥ Smv 95.3
शार्दूलविक्रीडित

भवभूतेः ।

2094 यद्ब्रह्मान्तःकठोरं, त्रिपुरविघटनाख्यातिविख्यातवीर्यं
छिन्दद्दर्पं भुजानां दशमुखजयिनः कार्तवीर्यार्जुनस्य ।
जीवाकृष्टेरिवार्तैर्मृडमृडनिनदैरिष्टदेवं स्मरत्- स्रग्धरा
द्रामेणोदारधाम्ना धनुरमितबलं
भग्नमर्धेन्दुमौलेः ॥४॥

सरसीरुहस्य ।

2095 उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्धं मुखैर्नामितं
भूपानां जनकस्य संशयधिया
साकं समास्फालितम् । शार्दूलविक्रीडित
वैदेहीमनसा समं च सहसाकृष्टं ततो भार्गव-
प्रौढाहंकृतिकन्दलेन सदृशं तद्भग्नमैशं धनुः ॥५॥

गदाधरनाथस्य ।

2093 (a) Mc. दोर्लीला for दोर्दण्ड Smv. उद्भव for उद्यत.
(b) Smv. पण्डित. for डिण्डिमः
(c) Mc. पर्याप्त for पर्यस्त. Smv. भाण्डोदरे for ०दर.
(d) Dr. असौ for अहो.

2094 (b) A वृन्दं for दर्पं.

2095 (a) A, S, I. O. तुल्यं for सार्धं.
(d) Ed. सहितं for सदृशं.

२० हनूमदादिशौर्यम् ।

2096 वक्तीति वानरबलानि हसन्हनूमा-
Br. VII. 27 न्मद्रोमवल्लिषु दृढं कुरु तवावलम्बम् ।
वसन्ततिलक येनैव सागरमहं लघु लङ्घयामि
किं सेतुना समरकर्मणि वो नयामि ॥१॥

राजशेखरस्य ।

2097 नीलेन सैन्यपतिना प्रभुताडनान्ते
Br. VII. 21 मुक्तस्तथा किलकिलाध्वनिरेप रौद्रः ।
वसन्ततिलक स्रष्टापि वाञ्छति सरोजभवः श्रवांसि
शङ्के यथा करयुगेन मुधा पिधातुम् ॥२॥

तस्यैव ।

2098 कियानेष क्षाराम्बुधिरयममुष्याम्बुनिवहो
शिखरिणी न कुम्भेनाप्यस्यात्मजकरपुटेनैव तुलितः ।
भवद्भिः सप्तैते ननु कपिचमूचक्रपतय.
सहेलं पीयन्तां चुलुकचुलुकैरम्बुनिधयः ॥३॥

गोसोकस्य ।

2099 भुजस्तम्भैरेभिः परिघगुरुभिर्लुण्ठनहठा-
शिखरिणी द्यशांसि स्वच्छन्द रणविपणिपण्यानि कपयः ।
असाध्यं स्यादेतद्यदि च तदमीषामकृपणाः
क्रये सन्त्येवामी लिखितपठितामूल्यमसव ॥४॥

तस्यैव ।

2096 (a) Br. वक्तीव for वक्तीति.
(b) I. O., S दृढीकुरु for दृढं कुरु
(c) Br. येनैप for येनैव.
(d) Br. reads श्यामाचरैश्च समरं सह योजयामि.

2097 (a) Br. भुज for प्रभु.
(c) Br. श्रष्टापि(?) for स्रष्टापि. विरिञ्चिरसौ for सरोजभुव .

2100 मूर्ध्ना जाम्बवतोभिवाद्य चरणावापृच्छ्य सेनापती-
नाश्वास्याश्रुमुखान्मुहुः
प्रियसखान्प्रेष्यान्समादिश्य च । Sk. V. 20
आरम्भं जगृहे महेन्द्रशिखरादम्भोनिधेर्लङ्घने शार्दूलविक्रीडित
रंहस्वी रघुनाथपादरजसामुच्चैः स्मरन्मारुतिः ॥५॥
अभिनन्दस्य ।

२१ रावणः ।

2101 दोर्दण्डास्त इमे त्रिलोचनगिरेरुत्तम्भसंभाविता-
स्तान्येतानि दशाननानि दशभिर्दिग्भिर्यदाज्ञा कृता । शार्दूलविक्रीडित
यस्याद्यापि स एव वीर्यमहिमा तस्मिन्नरस्तापस
शोच्यः सोपि रिपुः स चैव कुपितस्तस्यापि
दूतः कपिः ॥१॥
कस्यचित् ।

2102 धन्यः श्रीदशकन्धरः परमय रक्षोगणग्रामणी-
रेका सा निकषा परं तनयसूर्यस्याः सुतो रावणः । शार्दूलविक्रीडित
द्वारे निर्जरशेखरार्चितपदद्वन्द्वश्चिरं वृत्रहा
यस्यास्थानविलम्बकारणकथातारल्यम्मना-
स्तिष्ठति ॥२॥
कस्यचित् ।

2103 रुद्रादेस्तुलनं स्वकण्ठविपिनच्छेदो हरेर्वासनं Srk. 1548
कारावेश्मनि पुष्करस्य च जयो यस्येदृशाः केलयः । Br. I. 51

2101 (b) Ed. suggests within brackets मुखाम्बुजानि in place of दशाननानि

2102 (b) Ed., A एषा for एका.

(c) A द्वन्द्वश्चलत् for द्वन्द्वश्चिरं

(d) Ed., A यस्य for यस्या.

2103 (b) Srk. पुष्पकस्य for पुष्करस्य Br. पुष्पकापहरणं for पुष्करस्य च जयो Ed. यस्येदृश. for यस्येदृशाः.

शार्दूलविक्रीडित

सोऽहं दुर्दमबाहुदण्डसचिवो लङ्केश्वरस्तस्य मे
का श्लाघा घुणजर्जरेण धनुषा कृष्टेन भग्नेन वा ॥३॥

कस्यचित् ।

शार्दूलविक्रीडित

2104 भग्नं भग्नमुमापतेरजगवं बाली क्षतश्च क्षत-
स्तालाः सप्त हता हताश्च जलधिर्बद्धश्च बद्धश्च सः
आः किं तेन सशैलसागरधराधारोरगेन्द्रास्पदं
साद्रिं रुद्रमुदस्यतो निजभुजाज्ञानात्ययं रावणः ॥४॥

कस्यचित् ।

Sd. under I. 2
शार्दूलविक्रीडित

2105 न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसभटान् जीवत्यहो रावणः ।
धिक्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥५॥

कस्यचित् ।

२२ रावणशिरश्छेदः ।

शार्दूलविक्रीडित

2106 कण्ठच्छेदविशीर्यमाणरुधिरप्राग्भारभग्नद्युते-
र्येन स्मेरमुखेन होमशिखिनः संधुक्षणाकांक्षिणा ।
भ्रूभङ्गः शितिकण्ठकण्ठफणिने फूत्कारहेतोः कृतः
शौटीर्यव्रततुष्टधूर्जटिरसौ किं वर्ण्यते रावण· ॥१॥

कस्यचित् ।

शिखरिणी

2107 स्वसत्त्वस्योद्रेकादपि दश शिरांसि स्वयमयं
सकृच्छित्त्वा छित्वा भुजपरिघमृष्टासृगभित ।

2103 (c) Ed. दुर्गम (Br. दुर्मद) for दुर्दम
(d) Ed. गुण for घुण.
2104 (c) Ed., A धराधारोरगेन्द्रास्पदम् for धरा · न्द्राकुलम्.
(d) Ed. असौ for अयं.
2105 (b) Ed., A, Sd. कुलं for भटान्

मुखानां स्मेराक्ष्णां सरभसविकाशांदुदयिनां
किमद्राक्षील्लक्ष्मीं पतितपतितानां निपतताम् ॥२॥

कस्यचित् ।

2108 निस्त्रिंशप्रतिबिम्बितेपि यदुरःकम्पो न वीरव्रत-
प्रौढिः सेति न चन्द्रहासमधुनोत्कण्ठच्छिदा पर्वणि । शार्दूलविक्रीडित
जुहुवुः स्वशिरांसि शंकरपुरोहाकारवैरेण यः
स्वाहाकारमुदाहरन्न स दशग्रीवो गिरां गोचरः ॥३॥

कस्यचित् ।

2109 श्रीकण्ठस्य पुर परस्परबलाधिक्षेपकक्षावतां
बाहूनां दशकद्वयं दशशिरश्छेदे विवादाकुलम् । शार्दूलविक्रीडित
प्रत्येकं शमयत्यसावभिमतव्याक्षेपसापत्नप-
श्छिन्धि त्वं जुहुधि
त्वमित्युपदिशन्नेकः परं रावणः ॥४॥

कस्यचित् ।

2110 लूने पञ्च ततश्चतुष्टयमिति स्नस्तनिवेशैः शिरः-
पद्मैरन्यतमावलोकनमितैरुच्छोणितैरर्चित । शार्दूलविक्रीडित
हस्तस्पर्शवशेन मूर्ध्नि दशमं मूर्धानमध्यासय-
ञ्शम्भोरुद्धतसाहसैकरसिक कैर्न स्तुतो रावणः ॥५॥

छित्तिपस्य ।

२३ दूतः ।

2111 एकस्मिन्नवपातितेपि शिरसि क्रोधोपशान्ति कुत
स्याद्वा किं नु तया स्वमूर्धपतनं दृष्टं न यत्नारिणा । शार्दूलविक्रीडित

2107 (d) S, I. O., A निपतितव्यं निपतिनाम् for पतिताना निपतताम्.
2110 (b) Ed. उच्छ्वानितै for उच्छोणितै.
(d) I. O., S केना for कैर्न.
Ed. छित्तपस्य.
2111 (b) Ed. drops स्याद्वा किं नु त.

एतन्मूर्धबहुत्वतः फलमिदं त्वत्तो मया लप्स्यते
छिन्नं छिन्नमवेक्ष्य राक्षसपते
यस्माद्वसूंस्त्यक्ष्यसि ॥१॥
कस्यचित् ।

2112 अज्ञानाद्यदि वाधिपत्यरभसादस्मत्परोक्षे हृता
शार्दूलविक्रीडित सीतेयं प्रतिमुच्यतां शठ मरुत्पुत्रस्य हस्ते द्रुतम् ।
नो चेल्लक्ष्मणमुक्तमार्गणच्छेदोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥२॥
कस्यचित् ।

2113 रेवाम्भोगर्भमज्जद्विविधवरवधूहस्तयन्त्रोत्थिताभिः
क्रीडन्स्वच्छन्दमद्भिः सरसि
Br. II 38 यदकरोदर्जुनः कार्तवीर्यः ।
स्रग्धरा तद्दोष्णां यच्च रामो रणभुवि विदधे वेगवल्गत्कुठारः
प्रायः पौलस्त्य सा ते श्रवणपरिगता
किं न वार्तेति विद्मः ॥३॥
कस्यचित् ।

2114 कुले पौलस्त्यानां न निजममलं जन्म कलितं
शिखरिणी वहोः कालान्नालोचितमतुलमुच्चैः स्वमयशः ।

2111 (c) S, I. O., नाप्यते for लप्स्यते.
(d) Sp. असून् for वसून्.
2112 (c) S, I O , हस्त for मुक्त.
(d) I. O., S छला for छल.
2113 (a) Br. यन्त्रोज्झिताभिः for यन्त्रोत्थिताभिः.
(b) Br. वारा लताभिः for स्वच्छन्दमद्भिः.
(c) Br तु for यत् A वन for रण
(d) Br परिणतिं नो गता किंवदन्ती for परि .....विद्मः.
2114 (a) I. O., S क्व ते (A कृते (?) for कुले.

प्रसूनं पुष्पेषोः शरमसहता किं च भवता
स पत्नी सौमित्रेरशनिसहधर्मा न गणितः ॥४॥

गोसोकस्य ।

2115 शिरोभिर्मा देवीः शिव इव न ते दास्यति पुन-
र्दृशं दद्याः सेतावधिजलधि कैलाससुभटः । शिखरिणी
हितं तद्ब्रूमस्त्वां मम जनकदोर्दण्डविजय-
स्फुरत्कीर्तिस्तम्भ त्यज कमलबन्धोः कुलवधूम् ॥५॥

गदाधरनाथस्य ।

२४ संवादानुवाद ।

2116 द्यामालोकयतां कलाः कलयतां छायाः समाचिन्वतां
क्लेशः केवलमङ्गुलीर्दलयतां मौहूर्तिकानामयम् । Srk. 1649
धन्या सा रजनी तदेव सुदिनं धन्यः स एव क्षणो शार्दूलविक्रीडित
यत्राज्ञातचरश्चिरान्नयनयोः सीमानमेति प्रियः ॥१॥

वसुधरस्य ।

2117 तेषां त्वं निधिरागसामसहना मानोन्नता साप्यतो
गन्तव्यं भवता न तद्गृहमिति Spd. 1650
त्वं वार्यसे यासि चेत् । शार्दूलविक्रीडित
गाढं मेखलया बलान्नियमितः कर्णोत्पलेनाहत
क्षिप्तः पादतले तदेकशरणो मन्ये चिरं स्थास्यसि ॥२॥

छित्तिपस्य ।

2115 (a) I O., S शिर (?) for शिव.
(b) I. O. भृशं for दृश, सुभटा for सुभट
Ed. गदाधरस्य for गदाधरनाथस्य.

2116 (d) Ed., Srk. चर for वर.
Srk.—anonymous

2117 (c) Srk. कर्णोत्पलैस्ताडितः for कर्णो हत
(d) Ed. स्थास्यति for स्थास्यसि
Ed. छित्तपस्य for छित्तिपस्य
Srk.—anonymous.

2118 जाने साऽसहना तथाहमसकृन्मय्यङ्गणस्थे पुन-
Sik. 1651 स्तस्याः संभविता स
शार्दूलविक्रीडित साध्वसरसः कोपि प्रकोपापहः ।
येनोद्यत्पुलकप्रकम्पविकलैरङ्गैः क्व कर्णोत्पलं
कुत्रात्मा क्व च मेखलेति
गलितः प्राय स मानग्रहः ॥३॥
वसुन्धरस्य ।

2119 अन्या साधिगता त्वया क्व युवती
यस्या स मानग्रहो
शार्दूलविक्रीडित याते लोचनगोचरं प्रियतमे सप्रत्यपक्रामति ।
अस्माकं पुनरुग्रपूरुषशताश्लेषप्रगल्भात्मना-
मेतादृश्यनभिज्ञपूरुषपरिष्वङ्गे कुतः साध्वसम् ॥४॥
छित्तिपस्य ।

2120 अस्माभिः कलितं पुरा न भवती भुक्ता नृभिः कैरपि
शार्दूलविक्रीडित प्रौढा मानवशालिनीति चलितं चेतः सकामं त्वयि ।
धिक् त्वां संप्रति सद्भुजङ्गजनतासंश्लेषमातन्वती
गम्या सर्वजनस्य वारवनितेवोत्क्षेपणीयासि नः ॥५॥
वसुन्धरस्य ।

2118 (a) Srk. स च for तथा, अपकृत् for असकृत्.
(b) Srk. भर॰ for रस.
(c) Srk. पुलकैः॰ for पुलक. I. O., S कर्णोपलम् for कर्णोत्पलम्.
(d) Srk. गलति for गलितः.
Srk. तुरुष्कभोजदेवयोः.

2119 Ed. छित्तपस्य for छित्तिपस्य.

2120 (c) I. O., S drop the portion bet. संप्रति and आतन्वती.
(d) I. O., S हास्या for गम्या.

२५ कविः ।

2121 त्रैलोक्यमुदरे विष्णोस्तादृगेव व्यवस्थितम् । अनुष्टुप्
ताहगन्यादृगप्यस्ति हृदये तु महाकवेः ॥१॥

वसुकल्पस्य ।

2122 यन्नेत्रैस्त्रिभिरीक्षते न गिरिशो नाष्टाभिरप्यब्जभूः
स्कन्दो द्वादशभिस्तथा न मघवा चक्षुःसहस्रेण यत् ।
संभूयापि जगत्त्रयस्य नयनैर्द्रष्टु न यत्पार्यते Srk. 1249
प्रत्याहृत्य दृशौ समाहितधियः शार्दूलविक्रीडित
पश्यन्ति तत्पण्डिताः ॥२॥

शालिकनाथस्य ।

2123 उदन्वच्छन्ना भूः स च निधिरपां योजनशतं Br. I 8
सदा पान्थः पूषा गगनपरिमाणं कलयति । Sv 322
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः Sd under VII. 4 (First line only)
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥३॥ Srk. 1223

राजशेखरस्य । शिखरिणी

2124 निधानं विद्यानां कुलगृहमपारस्य यशसः
कला संपद्वल्लीव्रततिविटपानां सुरतरुः । शिखरिणी

2122 (b) Srk. न वा for तथा, वा for यत् .
(c) Srk. शक्यते for पार्यते.
(d) I. O., S प्रत्याहृत्य. (A प्रत्याहृते, Srk प्रत्यादिश्य) for प्रत्याहृत्य.
I. O , S धिया for धियः

Srk —anonymous.

2123 (a) Sv., Sd., Srk उदन्वच्छिन्ना for उ…न्ना.
Ed , Sd. पति for निधि
(b) Sv. कथयति (Br गणयति) for कलयति.

2124 (a) Ed. निदानं for निधानं.

शुचि क्षौणीन्द्राणां सुचरितकथादर्पणतल
प्रकृत्या गम्भीरः कविरिति हि शब्दो विजयते ॥४॥

कस्यचित् ।

2125

॥५॥

२६ नानाकवयः ।

2126 बाणः सृष्टिमपूर्ववस्तुविषयामेकोत्र निर्व्यूढवा-
Srk. 1699 न्निष्णातः कविकुञ्जरेन्द्रचरिते मार्गे गिरां वा गुरुः ।
शार्दूलविक्रीडित वेधा विन्ध्यपुलिन्दपामरवधूभूगोलझञ्झानिल-
प्रायैर्थैं र्वचनानि पल्लवयितुं जानाति योगेश्वरः ॥१॥

भवानन्दस्य ।

2127 अस्तंगतभारविरवि काल-
Srk. 1706 वशात्कालिदासविधु विधुरम् ।
आर्या निर्वाणबाणदीप जगदिदमद्योति रत्नेन ॥२॥

भोजदेवस्य ।

2128 बाणः प्राणिति केशटः स्फुटमसौ जागर्ति योगेश्वरः
शार्दूलविक्रीडित प्रत्युज्जीवति राजशेखरगिरां सौरभ्यमुन्मीलति ।
येनाथ कलिकालपुष्पधनुषो देवस्य शिक्षावशा-
दाकल्प वसुकल्प एव वचसि प्रागल्भ्यमभ्यस्यति ॥३॥

वसुकल्पस्य ।

2125 Missing.

2126 (a) Srk. तातः for बाण
(b) Srk वागुरः for वा गुरुः
(c) Srk. रेवा for वेधा, पुलीन्द्र for पुलिन्द, झञ्झानिलप्रेषित for भू.... . निल

Srk —अभिनन्दस्य.

2127 Srk.—anonymous.

2129 उन्नीतो भवभूतिना प्रतिपदं बाणे गतं यः पुरा
यश्चीर्णः कमलायुधेन सुचिरं येनागमत्केशटः ।
यः श्रीवाक्पतिराजपादरजसां संपर्कपूतश्चिर
दिष्ट्या श्लाघ्यगुणस्य कस्यचिदसौ
मार्गः समुन्मीलति ॥४॥

Srk 1733
शार्दूलविक्रीडित

अभिनन्दस्य ।

2130 सुवन्धौ भक्तिर्नः क इह रघुकारे न रमते
धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोपि हृदयम् ।
विशुद्धोक्तिः शूरः प्रकृतिमधुरा भारविगिर-
स्तथाप्यन्तर्मोदं कमपि भवभूतिर्वितनुते ॥५॥

Srk 1698
शिखरिणी

कस्यचित् ।

२७ प्रत्येककविः ।

2131 विकचकुमुदक्रोडक्रोडन्मधुव्रतझांकृते-
र्मदकलकुहूकण्ठोत्कण्ठाविपञ्चितपञ्चमात् ।
अभिनववधूप्रेमालापादपि श्रुतिसंमद
विदधति कवेर्दङ्कस्यैताः सुधामधुरा गिरः ॥१॥

हरिणी

दङ्कस्य ।

2129 (a) Srk दिन for पद.
(b) Ed. सतत for सुचिरं
(c) Ed. भूति for पूत.
Srk योगेश्वरस्य.

2130 (a) I O., S वसुकल्पे for रघुकारे.
(c) Srk सुभगा for मधुरा.
This has been quoted by Aufrecht, under Pāṇini, in ZDMG, 36, p. 366.

2131 (a) Ed. झाकृति for झाकृते
(c) I. O., S drops the portion bet. अभि......दपि.
Ed. टङ्कस्य for दङ्कस्य.

2132 प्रयोगव्युत्पत्तौ प्रतिपदविशेषार्थकथने
प्रसत्तौ गाम्भीर्ये रसवति च काव्यार्थरचने ।
Srk. 1724 शिखरिणी अगम्यायामन्यैर्दिशि परिणतैरर्थवचसो-
र्मतं चेदस्माकं कविरमरसिंहो विजयते ॥२॥

शालिकनाथस्य ।

2133 पातु कर्णरसायनं रचयितुं वाचः सतां संमता
Br. I. 17 व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।
Vsb. I 7 भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
Srk. 1700 तद्भ्रातः शृणु राजशेखरकवेः
शार्दूलविक्रीडित सूक्तीः सुधास्यन्दिनीः ॥३॥

शङ्करवर्मणः ।

2134 धिग्धिक् तान्समयान्परिश्रमरुजो वक्तुं गिरो नीरसा
यत्रामूर्निपतन्ति वल्लणगुणोत्खातामृतप्रीतयः ।
Srk. 1703 शार्दूलविक्रीडित रोम्णां नृत्यभुवो विलोचनपयःपूराब्धिचन्द्रोदयाः
साहित्यप्रतिगण्डगर्वगलनं ग्लानिक्रियाहेतव. ॥४॥

वल्लणस्य ।

2132 (b) A प्रसक्तौ for प्रसत्तौ. Srk. वाक्यार्थ for काव्यार्थ I, O, S, Srk. घटने for रचने,

(c) Ed. परिणते for ०णतै॰. Srk. परिणतेष्वार्थ for ०णतैरर्थ

Srk.—शालिकस्य.

This verse has been quoted by Aufrecht who assigns it to अमरसिंह in ZDMG, 36, p. 361.

2133 (a) Vsb., Br. श्रोत्र for कर्ण. Srk. संमता for समता.

Ed. शङ्कार्णवस्य (Sp. शङ्कावर्मणः) for शङ्करवर्मण॰. The verse occurs in Vsb.

2134 (a) Srk. धिक्ता for वक्तुं, निष्फला for नीरसा.

(b) Srk. भवन्ति for पतन्ति.

(d) Srk. गलन् for गलनं.

2135 देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः । Kuval p 58 Srk. 1701
आब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ॥५॥ शार्दूलविक्रीडित

मुरारेः ।

२८ मनस्विकविः ।

2136 विन्यस्ता विकचप्रसूनघटनाचार्येण कण्ठोचिता
मालेयं भुजगभ्रमेण भवता जन्मान्ध किं धूयते । शार्दूलविक्रीडित
एतस्याः क्षतिरस्तु नाम कियती संवीतहासोद्गमा-
स्त्वामन्योन्यकरार्पणप्रणयिन
पश्यन्ति विश्वे जनाः ॥१॥

जलचन्द्रस्य ।

2137 अवधेहि क्षणमेहि भ्रातर्भावज्ञ भावय गिरं नः ।
चरमे चकास्ति चेतसि मूकस्वप्नोपमो भावः ॥२॥ आर्या

गोसोकस्य ।

2138 स्तम्भावधेहि निमिषं पठामि
सूक्तीः स्वचित्तनिर्वृतये । आर्या
मा बुध्यस्व न तावद्वागुल्काभिः कदर्थयसि ॥३॥

वल्लणस्य ।

2139 श्रीमद्भिर्द्रविणव्ययव्यतिकरक्लेशादवज्ञायसे
द्वेषान्धःपरिपूर्णकर्णकुहरैर्नाकर्ण्यसे सूरिभिः । शार्दूलविक्रीडित
इत्थं व्यर्थितवाञ्छितेषु हि मुधैवास्मासु किं खिद्यसे
मातः काव्यसुधे कथं क भवतीमुन्मुद्रयामो वयम् ॥४॥

तस्यैव ।

2135 (d) Srk विलग्न for निमग्न
A, Srk वपु for तनु
2136 (a) Ed कराठाचिता for कराठोचिता
2139 (d) I O, S drop मात ..सुधे.

शार्दूलविक्रीडित

2140 अर्वाचीनवचःप्रपञ्चसुखिनां दुःशिक्षितानां पुरो
गम्भीरं कविपुङ्गवस्य किमहो सर्वस्वमुद्घाट्यते ।
व्यर्थं कर्दमगन्धगौरवहृतग्रामीणगोष्ठीमुखे
कोयं नाम सचेतनोस्ति य इह
प्रस्तौति कस्तूरिकाम् ॥५॥

तस्यैव ।

२९ कविदानम् ।

शार्दूलविक्रीडित

2141 निष्पन्ने सति चन्द्रचूडचरिते तत्तन्नृपप्रक्रिया-
जातैः सार्धमरातिराजकशिरोरत्नाञ्जलीनां त्रयम् ।
सप्तस्वर्णशतानि विंशतिशतीरूप्यस्य लक्षत्रय
ग्रामाणां शतमन्तरङ्गकवये चाणक्यचन्द्रो ददौ ॥१॥

उमापतिधरस्य ।

Pdu. 101
मन्दाक्रान्ता

2142 दन्तिव्यूहं कनककलितं चामरे हेमदण्डं
यो गौडेन्द्रादलभत कविक्ष्माभृतां चक्रवर्ती ।
ख्यातो यश्च श्रुतिधरतया विक्रमादित्यगोष्ठी-
विद्याभर्तुः खलु वररुचेरास़साद प्रतिष्ठाम् ॥२॥

धोयीकस्य ।

द्रुतविलम्बित

2143 कनककुण्डलमण्डितभाषिणे
शकरिपुर्विषयान्दश विद्विषः ।

2140 (c) A रथ्या for व्यर्थं.

2141 (b) Ed. रत्नावलीना for रत्नाञ्जलीना
(c) Ed. तप्त for सप्त
Ed. उमापतेः for उमापतिधरस्य

2142 (a) Pdu. लतिका for कलितं, चामरं for चामरे.
Ed. हेमदण्डे for ०दण्डम्.

मगधकेकयकेरलकोशला-
न्करिशतं च मदालसलोचनम् ॥३॥
अमरोः ।

2144 अमुष्मै चौराय स्वरसहृतमृत्युप्रतिभिये
प्रभुः प्रीतः प्रादादुपहृतवसादद्वयकृते । शिखरिणी
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरी-
न्करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिहः ॥४॥
तस्यैव ।

2145 श्लोकोयं हरिपाभिधानकविना देवस्य तस्याग्रतो
यावद्यावदुदीरितः शकवधूवैधव्यदीक्षागुरोः । शार्दूलविक्रीडित
तावत्तावदुपोढसान्द्रपुलकस्तस्मै स देवो ददौ
लक्षं लक्षमखण्डित मधुकरव्यालोलगण्डं गजम् ॥५॥
तस्यैव ।

३० गुणिगर्वः ।

2146 षट् तर्कानपि शब्दशासनमपि स्थानैः स्थित पञ्चभि-
र्मीमांसाद्वयमप्यनन्यसदृशीं साहित्यविद्यामपि । शार्दूलविक्रीडित
विद्मः किं च महाविकल्पवहलज्वालावलीतापिते-
ष्वास्माकेषु न जल्पवह्निषु पुनः
कैः कैः पतङ्गायितम् ॥१॥
तपस्विनः ।

(c-d) Pdu. reads श्रीधारीक सकलरसिकप्रीतिहेतोर्मनस्वी
काव्य सारस्वतमिव महामन्त्रमेतज्जगाद ॥

2145 (d) Ed गण्डान् गजान् for गण्डं गजम्.
This verse is missing in S

2146 (a) Ed. स्थाने for स्थानै॰.
(c) Ed बहुल for बहल
This verse has been quoted by Aufrecht in ZDMG, 36, p. 513.

2147 तावत्तार्किकचक्रवर्तिपदवी तावत्कवीनां गिर-
शार्दूलविक्रीडित स्तावच्चाप्रतिमल्लतामदभरः साहित्यपाण्डित्ययोः ।
यावन्न प्रतिपर्वनिर्भररसुधानिर्व्याजबीजं क्षणा-
द्वाग्वल्लयो विलसन्ति कर्णकुहरे श्रीदेवबोधेरिताः ॥२॥

देवबोधस्य ।

2148 विन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता शिरोविन्दुकं
शार्दूलविक्रीडित कर्मेत्यन्वयकल्पनां विदधते ये केपि तेभ्यो नमः ।
ये तु ग्रन्थसहस्रशाणकपणत्रुट्यत्कलङ्कैर्गिरा-
मुल्लासैः कवयन्ति वल्लणकविस्तेष्वेव संनह्यते ॥३॥

वल्लणस्य ।

2149 यथा यूनस्तद्वत्परमरमणीयापि रमणी
Nc XXII. 152 कुमाराणामन्तःकरणहरणं कैव कुरुते ।
शिखरिणी मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः ॥४॥

कविपण्डितश्रीहर्षस्य ।

2150 सर्वस्वं गृहवर्ति कुन्तलपतिर्गृह्णातु तन्मे पुन-
र्भाण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम् ।
शार्दूलविक्रीडित भोः क्षुद्रास्त्यजत प्रमोदमचिरादेष्यन्ति मन्मन्दिरं
हेलान्दोलितकर्णतालकरटिस्कन्धाधिरूढाः श्रियः ॥५॥

सिह्लणस्य ।

३१ वाणी ।

Sik. 1716 2151 सुवर्णालङ्कारा प्रकटितरसाश्लेषनिपुणा
शिखरिणी स्फुरद्भिर्दर्भौक्तिकैर्ललितपदबन्धक्रमगति ।

2147 Quoted by Aufrecht in ZDMG, 36, p. 515.

2149 (b) Nc. नैव for कैव

Ed. om. कविपण्डित in the poet's name.

2150 Ed. बिह्लणस्य for सिह्लणस्य

लसद्भूयो भावा मृदुरपि विमर्दोचितनतुः
कवीन्द्र त्वद्वाणी हरति हरिणाक्षीव हृदयम् ॥१॥
साकोकस्य ।

2152 घनरसमयी गभीरा
वक्रिमसुभगोपजीविता कविभिः । आर्या
अवगाढा च पुनीते गङ्गा वङ्गालवाणी च ॥२॥
वङ्गालस्य ।

2153 वाणि व्रज सुरलोक त्रिशरणपालोपि देवि नत्रैव ।
संप्रति काव्यपरिश्रमवधिरैरवधीरणां यासि ॥३॥ आर्या
त्रिपुरारिपालस्य ।

2154 पिपासुः पीयूष त्वमसि सरसस्वादुमधुरं
श्रुतिभ्यामश्रान्तः पिब मधुरमृद्वीः कविगिरः । शिखरिणी
अथैताः सतोष विदधति न चेच्चेतसि तत
सुधापि स्यान्मन्ये पृथुवमथुलाभाय भवतः ॥४॥
धञ्जोकस्य ।

2155 इयं गौरुद्दामा तव निविडवन्धापि हि कथ
न वैदर्भादन्यच्चरति सुलभत्वेपि हि कथम् । Srk. 1725
अबन्ध्या च ख्याता भुवि कथमगस्त्या कविवृषैः शिखरिणी
कथ वा पीयूषं स्रवति बहु दुग्धापि बहुभिः ॥५॥
शब्दार्णवस्य ।

2151 I. O, S सोकोकस्य for साकोकस्य.
Srk —anonymous.

2153 (a) Ed वाणी वज्रसुरलोकं त्रिशरणयालो for वाणी .....०पालो.

2154 (a) Ed मधुरा for मधुरम्.
The verse has been quoted by Aufrecht in ZDMG, 36, p 516, and attributed to धञ्जोक

2155 (b) Srk. स्पृशति for चरति.
(d) Ed. कविभिः for बहुभि

३२ काव्यम्।

2156 यदेतद्वागर्थव्यतिकरमयं किंचिदमृतं
Smv. 434 तदानन्दस्यन्दैः सहृदयमनांसि स्नपयति।
Srk. 1715 इदं काव्यं तत्त्व स्फुरति तु यदत्रानुपरम
शिखरिणी तदन्तर्बुद्धीनां स्फुटमथ च वाचामविषयः॥१॥

हृषीकेशस्य।

2157 कवलयति न चेतस्तस्य दारिद्र्यदुःखं
मालिनी न च पिशुनजनोक्तिः कर्णकण्डूं करोति।
वरकविकृतगोष्ठीबन्धगन्धोपभोगे
य इह मधु वमन्तीं काव्यचिन्तां करोति॥२॥

व्याडेः।

2158 एतत्कवीन्द्रमुखचन्द्रमसः कदाचि-
वसन्ततिलक त्काव्याभिधानममृत यदि नागलिष्यत्।
ससारिणां विविधदुःखसहस्रभाजां
चेतोविनोदसदनं किमिहाभविष्यत्॥३॥

सुरभेः।

2159 ते वर्णाः सपदक्रमास्तदभिधावैदग्ध्यमव्याहत
शार्दूलविक्रीडित गुम्फः कोपि सपङ्क्तिमः
सहृदयास्वाद्यो रस कोऽप्यसौ।

2156 (b) Smv., Srk प्रमोदप्रस्यन्दै for तदानन्दस्यन्दै
(c) Smv. श्राव्यं for तत्त्वं Smv, Srk यदत्राणु for ०त्रानु
Srk., Smv —anonymous.
Quoted by Aufrecht in ZDMG, 36, p. 378.
2158 (b) A नागमिष्यत् for नागलिष्यत्.
2159 (a) Ed. समद for सपद. I. O., A., S ०स्तदविधा for ०स्तदभिधा.

हे सभ्याः परिभाव्य मादृशकृतीर्ब्रूत कचिन्निष्कृतं
किं तत्रास्त्यपरं पुरातनकवेर्यैनैष कोलाहलः ॥४॥

गोसोकस्य ।

2160 अनुद्घुष्टः शब्दैरथ च घटनात्प्रस्फुटरसः
पदानामर्थात्मा रमयति ननूत्तानितरसः । Srk 1705
यथा किंचिद्दृश्यः पवनचलचीनांशुकतया शिखरिणी
स्तनाभोगः स्त्रीणां हरति न तथोन्मुद्रितवपुः ॥५॥

धर्माशोकस्य ।

२३ काव्यमात्सर्यम् ।

2161 वायूद्वारगतिस्ततः परिणतिः सृष्टेरहो कौशलं
वायुः श्लोक इहैव सन्ति सकलाः
काव्यस्य ते ते गुणाः । शार्दूलविक्रीडित
कस्यायं मम हुं तवैव शृणुमः सम्यक् पुनः पठ्यतां
जानामि स्फुटतात्र नास्ति भणितं
चान्यैः पुराणं पठ ॥१॥

कस्यचित् ।

2162 द्राक्षापाकविडम्बिनीमपि गिरं मात्सर्यदाहज्वरा-
न्नाचामन्ति मनागरोचकपराधीनाः कियन्तो जनाः । शार्दूलविक्रीडित

(b) S, A, I. O , क्वापसौ for काव्यमा
2160 (a) I. O , S घूर्ण for घुष्ट , Srk घटनात स्फुटरस॰ for घटनात्...रस॰
(c) Srk किंचित् for दृश्य
(d) Srk तनु for वपु
Srk. ascribes the verse to वल्लण
2161 (a) S, I. O., वायूद्वार for वायूद्वार.
(b) Ed वायुश्लोक for वायुः श्लोक, नैते for ते ते.
(c) S, I. O हूँ for हुं
(d) Ed. स्फुटता च for स्फुटतात्र.

आकण्ठ परिपीय सत्कविगवीपीयूषमन्ये पुन-
र्नो माद्यन्ति यशःशरीरपिशितग्रासाय बद्धस्पृहाः ॥२॥

जलचन्द्रस्य ।

2163 भ्राम्यन्ती कुतुकावलम्बितमना सारस्वतानाश्रमा-
शार्दूलविक्रीडित नस्मै वाणि विधेहि दुर्जनमरुस्थानाय दूरे नमः ।
न प्राणन्ति यदर्पणादिह गुणाः कामं यशोवल्लयः
खिद्यन्ते सरसापि सत्कविरसस्रोतस्वती सीदति ॥३॥

तस्यैव ।

2164 क्व रसिक रसदा रसालवल्ली
क्व च रसकण्टकसङ्कटोयमध्वा ।
पुष्पिताग्रा रचयसि रुचिराणि वाणि मोहा-
दिह सुकुमारपदानि हा हतासि ॥४॥

रामदासस्य ।

2165 ईषन्नासानिकोचः स्वरमुखरसुखप्रेक्षणं हासलेशः
स्वावोधादप्रसादध्वननमसदवद्योक्तिहेलावहेला ।
स्रग्धरा मौनव्यासङ्गवार्तान्तरपररुचिरश्लोकपाठादयस्ते
सोढव्याः के कियन्तः शिव शिव
कवि ते कुच्छला मत्सराणाम् ॥५॥

कविपण्डितश्रीहर्षस्य ।

2162 (d) S, I, O. त्रासाय for ग्रासाय

2163 (b) S, I. O. मद for मरु.

(d) S, I O सरलापि for सरसापि, सत्कवि (Ed सत्यवि) रसादातन्वती for सत्कवि · स्वती

2164 A वामदेवस्य for रामदासस्य

2165 (a) I. O., S निकोचं for निकोचः.

(d) Sp. commences the line with ते and drops के.

Sp. कविना for कवि ते, हृच्छरा for कुच्छला.

Sp. om. कविपण्डित in the poet's name.

३४ काव्यचौर ।

2166 धन्यास्ते भुवनं पुनन्ति कवयो येषामजस्रं गवा-
मुद्दामध्वनिपल्लवेन परितः पूता दिशां भित्तयः । शार्दूलविक्रीडित
धिक्तान्नि खविलासिनः कविखलांल्लोकद्वयद्रोहिणो
नित्याकम्पितचेतसः परगवीदोहेन जीवन्ति ये ॥१॥
जलचन्द्रस्य ।

2167 बद्धो लम्बितचूडमञ्जलिरयं वाणि क्षमस्वामृतं
न ब्रूमस्त्वयि देवभावसुलभं न द्योतते तन्महः ।
स्याच्चेदीपदपि प्रसह्य रसनाटङ्कैः कथं खण्डश- शार्दूलविक्रीडित
श्छिन्दन्तो भवतीं कवीन्द्रघटितां
जीवन्त्यमी दस्यवः ॥२॥
वैद्यगदाधरस्य ।

2168 निःशङ्कं हर काञ्चनान्यनिभृतं दारान्गुरोः शीलय
स्वच्छन्दं पिब वारुणीं जहि निरातङ्कं द्विजानां कुलम् ।
तैस्तैः पातकिभि समं वस सुखं मा सत्कवीनां कृथाः शार्दूलविक्रीडित
स्तेयं सूक्तिनिधानसद्मनि दुरुच्छेदं
हि तत्किल्बिषम् ॥३॥
तस्यैव ।

2169 इयं गौरेका नः क्वचिदपि न संयोजनविधा-
वमुष्याः पश्यामो रसभरमुचः कांचिदपराम् । शिखरिणी
गले बद्धा दध्मो यदि न धृतिरुद्दामविधृतौ
भयं गोचोरेभ्यस्तदिह क उपायः प्रभवतु ॥४॥
सेल्हूकस्य ।

2167 Ed. वैद्यस्य for वैद्यगदाधरस्य.

2169 (b) Ed. मुचः for मुचं.

(d) Ed. गोचारेभ्य. for गोचोरेभ्यः.

2170 हृत्कण्ठश्रुतिभूषणानि बहुशो भ्रातः सुवर्णान्यपि
शार्दूलविक्रीडित स्वान्यस्माभिरुपाहृतानि विपणिस्थानेषु
दैन्यान्न किम्।
धिक्कर्माणि तुलैव नास्ति न कषग्रावा न मानक्रमो
न क्रेता न परीक्षकः परमभूदुच्चैर्भयं दुर्जनात्॥५॥
जितारेः।

३५ सज्जनः।

Srk. 1232
Spd. 199
अनुष्टुप्

2171 अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम्।
अहो सुमनसां वृत्तिर्वामदक्षिणयोः समा॥१॥
गोभटस्य।

Srk. 1241
अनुष्टुप्

2172 अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥२॥
केशटस्य।

Sv. 241
Spd. 237
Smv. 6 12
आर्या

2173 सुजनो न याति वैरं परहितबुद्धिर्विनाशकालेपि।
छेदेपि चन्दनतरु सुरभयति मुखं कुठारस्य॥३॥
श्रीव्यासपादानाम्।

2170 (b) Ed. उदाहृतानि for उपाहृतानि.
(c) Ed. निकष for न कष , मानक्रमौ for मानक्रमो
The verse has been quoted by Aufrecht in ZDMG, 36, p. 513.

2171 (b) Spd. प्रीति for वृत्ति .

2172 Srk.—anonymous. This verse is sometimes attributed to Bhartrhari (Vide *Sataka-trayādi-subhāṣita-samgaaha*, p 141.)

2173 (a) Smv., विकृति for वैर. Sv., Spd., Smv. निरती for बुद्धि.
(b) A, I. O., S वासयति for सुरभयति.
Spd., Sv., Smv.. रविगुप्तस्य.

2174 असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः
प्रियावृत्तिर्न्याय्या चरितमसुभङ्गेप्यमलिनम् । Srk 1213
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां Sv 280
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥४॥ शिखरिणी

धर्मकीर्तेः ।

2175 ये दीनेषु दयालवः स्पृशति यानल्पोपि न श्रीमदो Spd 228
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिता । Smv 6.30
स्वस्थाः सत्यपि यौवनोदयमहाव्याधिप्रकोपेपि ये Srk. 1238
ते भूमण्डलमण्डनैकतिलकाः शार्दूलविक्रीडित

सन्तः कियन्तो जनाः ॥५॥

शब्दार्णवस्य ।

३६ दुर्जनः ।

2176 एते स्नेहमया इति मा मा क्षुद्रेषु यात विश्वासम् ।
सिद्धार्थानामेषां स्नेहोप्यश्रूणि पातयति ॥१॥ Srk 1296

गोभटस्य । आर्या

2174 (a) Sv ह्यसन्तो for असन्तो, याच्यो कृश for याच्यस्तनु
(b) Sv transposes वृत्तिः and न्याय्या, reads मलिनमसुभङ्गेप्यसुकरं for चरित · मलिनम्.
(d) Ed. केनादिष्टं for केनोद्दिष्ट
A मित for व्रत.
Note Sv. transposes the lines (a) and (b).

2175 (a) Srk कृपालव· for दयालवः
(b) Srk श्रान्ता for व्यग्रा.
(c) Ed सुस्थाः for स्वस्था Smv., Spd सन्ति च for सत्यपि, यौवनोन्मद for यौवनोदय, Smv व्याधे for व्याधि.
(d) Ed लतिका· for तिलका Spd, Smv read तै स्तम्भैरिव सुस्थितैः (Smv. सुस्थिरैः) कलिभरक्रान्ता (Smv. क्रान्ता) धराधार्यते

Srk., Smv, Spd.—anonymous

2176 (a) Srk स्निग्धतमा for स्नेहमया, कुरुत for यात

Srk —anonymous.

Quoted by Aufrecht in ZDMG, 36, p. 378

2177 कोर्थान्प्राप्य न गर्वितो

भुवि नरः कस्यापदोस्तं गताः

Sv. 3470
Spd. 1534
शार्दूलविक्रीडित

स्त्रीभिः कस्य न खण्डितं भुवि

मनः को नाम राज्ञां प्रियः ।

कः कालस्य न गोचरान्तरगतः कोर्थी गतो गौरवं

को वा दुर्जनवागुरासु पतितः

क्षेमेण यातः पुमान् ॥२॥

कस्यचित् ।

2178 दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो

Sv. 342
शार्दूलविक्रीडित

गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तोत्तरः ।

अन्तर्गूढविषो बहिर्मधुमयश्चातीव मायापटुः

को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥३॥

विन्दुशर्मणः ।

2179 गुणोत्कर्षद्वेषात्प्रकृतिमहतामप्यसदृशं

Srk. 1256
शिखरिणी

खलः किंचिद्वाक्यं रचयति च विस्तारयति च ।

2177 (a) Ed. जनः for नर Spd. विषयिणः for भुवि नरः.

(b) Sv बत for भुवि.

(c) Sv गोचरो धनकृते for गो .... त .

(d) Sv., Spd. निपतित for ०सु पतित , गृहं for पुमान्

Sv. पञ्चतन्त्रे for कस्यचित्.

2178 (b) A बद्धादरः (Sv. सक्तोत्तर) for दत्तोत्तर .

(c) Sv ०मयः for ०पटुः.

The verse occurs in the *Hitopodeśa* (II. 150), ed. Peterson, Bombay, 1887, with the following variants.—

प्रोच्छ्वासित for प्रोत्सारित (a), बद्धादरः for दत्तोत्तरः (b).

Sv. quotes the verse anonymously.

2179 (b) A, I. O., वाच्यं for वाक्यं.

नचेदेषां तादृक्कमलकलिकार्धप्रतिनिधौ
मुनेर्गण्डूषेऽब्धिः स्थित इति कुतोयं कलकल ॥४॥

संघमित्रस्य ।

2180 शशी दिवसधूसरो गलितयौवना कामिनी Ns. 10
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः । Sv. 3458
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो Sd. under X 110
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥५॥ Spd. 1530
पृथ्वी

शिल्हणस्य ।

३७ सुजनदुर्जनौ ।

2181 जीवन्तु साधुतरवः सुकृताम्बुसिक्ता वसन्ततिलक
नश्यन्तु पङ्कपतिताः खलपांशवोपि ।
ये धारयन्त्यनुगतोपकृतिव्रतानि
यैः सन्निधौ परगुणा मलिनीक्रियन्ते ॥१॥

संकेतस्य ।

2182 सत्सङ्गाद्भवति हि साधुता खलानां प्रहर्षिणी
साधूनां न तु खलसङ्गमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न तु कुसुमानि धारयन्ति ॥२॥

प्रभाकरमित्रस्य ।

2179 (c) A, I. O , Sp एवं for एषा.
I. O., S संघश्रीमित्रस्य for संघमित्रस्य.
Srk.—anonymous.

2180 I. O., S सिल्हणस्य for शिल्हणस्य.
Sv. भट्टवृद्धेः (Spd. भर्तृहरेः) for शिल्हणस्य.

2181 I. O , S माङ्कडस्य for सकेतस्य.
Quoted by Aufrecht in ZDMG., 36, p. 378, with उपगत for अनुगत.

2183 ये कारुण्यपरिग्रहादगणितस्वार्थाः परार्थं प्रति
Srk 1499 प्राणैरप्युपकुर्वते व्यसनिनस्ते साधवो दूरतः ।
शार्दूलविक्रीडित विद्वेषानुगमादनूर्जितकृपो रूक्षो जनो वर्तते
चक्षुः संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥३॥
श्रीहर्षस्य ॥

2184 शिशुत्वव्यामोहात्कलयसि न चेत्तत्त्वमनयो-
शिखरिणी स्तदा स्तोकं ब्रूमः परिचिनु वचस्त्वं सदसतोः ।
सतां स्वान्त यत्तन्मधुमधुरमन्तः कटु वहि-
र्बहिः स्वादु स्वच्छं विषविपममन्तस्तदसताम् ॥४॥
जियोकस्य ।

2185 आरम्भगुर्वी क्षयिणी क्रमेण
Srk 1277 लघ्वी पुरा वृद्धिमती च पश्चात् ।
उपजाति दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलु सज्जनानाम् ॥५॥
वाचस्पतेः ।

३८ धन्यः ।

2186 भ्राम्यद्व्यालिशकीरपक्षहरितच्छायां वहिर्बिभ्रती-
शार्दूलविक्रीडित मन्तर्दन्तुरपारिभद्रकलिकागर्भप्रभातस्करीम् ।

2183 (a) Srk. अपगणित for अगणित, परार्थान् for परार्थं
(b) S, I.O. व्यमनिनं ते for व्यसनिनस्ते
(c) Srk अनर्जित for अनूर्जित
(d) I O., S वन्द्यस्य for रुद्यते
Ed. om. poet's name Srk.—मातृगुप्तस्य
2184 (d) Ed. स्वादुः for स्वादु.
Quoted by Aufrecht in ZDMG, 36, p. 379
2185 Srk.—anonymous.

शुक्तिर्मारकतीव कुड्मलसज्जम्वालपूर्णोदरा
वासालीसुकृतात्मनां प्रणयिनी चेलं मुखं चुम्बति ॥१॥

सेन्दूकस्य ।

2187 विषयपतिरलुब्धो धेनुभिर्धाम पूतं
कतिचिदभिमतायां सीम्नि सीरा वहन्ति । मालिनी
शिथिलयति च भार्या नातिथेयीं सपर्या-
मिति सुकृतमनेन व्यञ्जितं नः फलेन ॥२॥

शुभाङ्कस्य ।

2188 धारानिपातरवबोधितपञ्जरस्थ-
दात्यूहडम्बरकरम्बितकण्ठकूजाः । Srk 224
अट्टेषु काण्डपटवारितशीकरेषु वसन्ततिलक
धन्याः पिबन्ति मुखतामरसं वधूनाम् ॥३॥

श्रीहनूमतः ।

2189 शिलापट्टोद्घृष्टा मलयजरसालेपसुभगाः
स्फुरद्धूमामोदा दरदलितकर्पूरसुहृदः ।
इतः कम्बुच्छेदच्छविभिरहिवल्लीकिसलयै- शिखरिणी
र्निषेवन्ते केपि क्रमुकफलफाणीः सुकृतिन ॥४॥

राजशेखरस्य ।

2190 शिशुत्व तारुण्यं तदनु च दधानाः परिणति
गताः पांशुक्रीडाविषयपरिपाटीरूपशमम् । Srk 1621
लुठन्तोङ्के मातुः कुवलयदृशां पुण्यसरितां शिखरिणी
पिबन्ति स्वच्छन्दं स्तनमधरमम्भः सुकृतिन ॥५॥

श्रीहनूमतः ।

2187 I O, S शुभाङ्गस्य for शुभाङ्कस्य.

2189 (d) Ed. फाली for फाणी

2190 (b) Srk. क्रीडा for क्रीडा परिपाटीम् for ०पाटी.

(d) I. O., S अन्त for अम्भ.

Srk.—anonymous.

३९ उदात्त॰।

2191 विमलमतिभि कैरप्येतज्जगज्जनितं पुरा
Ss. II. 14 विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा।
हरिणी इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वर ॥१॥

भर्तृहरेः।

2192 केनेन्दुः कुमुदेषु केन तरणिः पद्मेषु केनाम्बुदः
शार्दूलविक्रीडित सारङ्गेष्वथ केन शाखिषु मधुर्दाक्षिण्यमध्यापितः।
तत्तुङ्गाननुभूतसौरभपरीवारोपकारं प्रति
श्मश्रूद्वेजितकर्णजाहमनुजः कः प्रेरयत्वीश्वरान् ॥२॥

शुङ्गोकस्य।

2193 भवन्ति नम्रास्तरवः फलागमै-
वंशस्थविल
Śak. V. 12 र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
Ns. 63 अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥३॥

कालिदासस्य।

2194 यदालोकं कुर्वन्भ्रमति रविरश्रान्ततुरगः
सदालोकान्धत्ते यदगणितबाधा वसुमती।
शिखरिणी न सम्बन्धः किं तु प्रकृतिरियमेवं हि महतां
यदेते लोकानां परहितसुखैकान्तरसिकाः ॥४॥

मेधारुद्रस्य।

2191 (c) Ss. वीरा for धीरा.

2193 (a) Śak., Ns. फलोद्गमैः for फलागमैः.

(b) Ns. भूरि for दूर.

Ed. adds श्री before the poet's name.

2194 Quoted by Aufrecht in ZDMG, 36, p. 379.

2195 धात्रीं धातुं वहति फणिनामग्रणीः कस्य शिक्षां
को वा ब्रूते तिमिरपटलप्लोपमह्नः प्रणेतुः। मन्दाक्रान्ता
अद्रिश्रेणीमवति जलधिः केन दत्ताभ्यनुज्ञः
कर्म प्रायो भवति महतां स्वानुरूपं महिम्नः ॥५॥

भगीरथस्य।

४० मनस्वी।

2196 मा खेदं भज हे विधुंतुद मुदं धेहि स्तुहि त्वं हरे-
स्तच्चक्रं विनिकृत्य दग्धमुदरं येनोत्तमाङ्गीकृतः। शार्दूलविक्रीडित
पश्यास्मानुदरंभरीनिह पराभूतान्निरस्तान्हता-
न्विध्वस्तानववारितानधरितानेतान्धनाहंयुभिः ॥१॥

वटेश्वरस्य।

2197 यदेते साधूनामुपरि मुखरा एव धनिनो Srk. 1468 Ss III. 23
न सावज्ञैरेषामपि च निजवित्तव्ययभयम्। शिखरिणी
न वा क्लेशोऽमुष्मिन्नपरमनुकम्पैव भवति
स्वमांसत्रस्तेभ्यः क इह हरिणेभ्यः परिभवः ॥२॥

भर्तृहरेः।

2198 शतं वा लक्षं वा नियुतमथ वा कोटिमथ वा
तृणायाहं मन्ये समयविपरीतं यदि भवेत्। शिखरिणी

2195 (b) I.O., S प्रोषम् for प्लोषम्.
Quoted by Aufrecht in ZGMG, 36, p. 379.

2196 (c) Ed. निरस्ताहतान् for निरस्तान्हतान्.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 522.

2197 (a) Srk , Ss. विमुखा for मुखरा. Ss. सन्ति for एव
(b) Srk., Ss. चैषावज्ञैषामपि for सावज्ञैरेषामपि, तु for च.
(c) Srk , Ss. अत. खेदो नास्मिन् for न वा क्लेशोऽमुष्मिन्.
Srk.—anonymous.

शतं तल्लक्षं तन्नियुतमपि तत्कोटिरपि न-
द्यदात्तं सम्मानादपि तृणमनम्र ण शिरसा ॥३॥

तस्यैव ।

2199 मा गाः प्रत्युपकारकातरतया वैवर्ण्यमाकर्णय
शार्दूलविक्रीडित श्रीकर्णाटवसुन्धराधिप सुधासिक्तानि सूक्तानि नः ।
वर्ण्यन्ते कति नाम नार्णवनदीभूगोलविन्ध्याटवी-
झञ्झामारुतचन्द्रमःप्रभृतयस्तेभ्यः
किमात्तं मया ॥४॥

सिल्हनस्य ।

2200 राजा त्वं वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
Srk. 1222 इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं
शार्दूलविक्रीडित यद्यस्मासु पराङ्मुखोसि
वयमप्येकान्ततो निःस्पृहाः ॥५॥

वल्लणस्य ।

४१ कृपणः ।

2201 वरं मृतो न तु क्षुद्रस्तथापि महदन्तरम् ।
Srk. 1323 एकस्य बन्धुर्नादत्ते नामान्यस्याखिलो जनः ॥१॥
पथ्यावक्त्र

शब्दार्णवस्य ।

2202 जीवतापि शवेनेव कृपणेन न दीयते ।
Srk. 1325 मांसं वर्धयतानेन काकस्योपकृतिः कृता ॥२॥
अनुष्टुप्

कविराजस्य ।

2198 Quoted by Aufrecht in ZDMG, 36 p 380.

2199 (a) I. O., S कातरधिया for ०तया.
(b) Sp. कार्णाट for कर्णाट.
Ed. बिल्हणस्य for सिल्हनस्य.

2200 Ed.—no poet's name. Srk.—भर्तृहरेः.

2201 (a) Ed. तथापि for तथाहि.

2202 Quoted by Aufrecht in ZDMG, 36, p. 510.

2203 दृढतरनिबद्धमुष्टेः कोषनिषण्णस्य सहजमलिनस्य । Smv. 9 13
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥३॥ Srk. 1327
आर्या
गोभटस्य ।

2204 असंभोगेन सामान्य कृपणस्य धनं परैः । Smv 9.1
अस्येदमिति संबन्धो हानौ दुःखेन गम्यते ॥४॥ अनुष्टुप्
श्रीव्यासपादानाम् ।

2205 कृपणस्यास्तु दारिद्र्यं कार्पण्यावृतिकारकम् । Srk. 1324
विभवस्तस्य तद्दोषघोषणापटुडिण्डिमः ॥५॥ अनुष्टुप्
तेषामेव ।

४२ सेवकः ।

2206 मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः । Ns. 35
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः मन्दाक्रान्ता
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥१॥
कस्यचित् ।

2207 गात्रैर्गिरा च विकलश्चटुमीश्वराणां Ar. III 1
कुर्वन्नयं प्रहसनस्य नटः कृतोऽसि । Srk. 1526

2203 (a) I. O, S गाढ for दृढ.
Smv. adds सूचि before गोभटस्य.
Srk. गोभट्टस्य.

2205 Srk.—व्यासस्य.

2206 (a) Ed., Ns मूकः for मूर्खः. Sp., A, S, I. O. वातुलश्चाल्पको for वातुलो जल्पको Ns. वातलो for वातुलो.
(b) Ns भवति च तथा दूरतोऽप्यप्रगल्भ for वसति...प्रगल्भ.
(c) Ed. शान्त्या for क्षान्त्या.

2207 (b) A, S, I. O. अहं for अयं. Ar., Srk. असि for असि.

वसन्ततिलक

न त्वां पुनः पलितवर्णकभाजमेत-
न्नाट्येन केन नटयिष्यति दीर्घमायुः ॥२॥

मुरारेः ।

Srk. 1602
Ss. I. 14
शार्दूलविक्रीडित

2208 यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटुं मृषा
नैषां गर्वगिरः शृणोषि न पुनः प्रत्याशया धावसि ।
काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥३॥

सिल्हणस्य ।

Sd. under
X. 93
आर्या

2209 प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥४॥

कस्यचित् ।

Sv. 3232
हरिणी

2210 हसति हसति स्वामिन्युच्चै रुदत्यपि रोदिति
गुणसमुदितं प्रेष्याकारं प्रणिन्दति निन्दति ।
द्रविणकणिकाक्रीतं यन्त्रं प्रणृत्यति नृत्यति
प्रचलदसिभृद्दोर्दण्डारिं प्रधावति धावति ॥५॥

कस्यचित् ।

2207 (c) Ar. तत्त्वा for न त्वाम्. Srk. नो वेद्मि मा for न...पुन॰. Ar. एनम् for एतम्.

Srk —anonymous

2208 (a) Ed. चाटून् for चाटुं

(b) Ed. वचः for गिर..

Srk.—anonymous.

2209 (a) Ed., Sd. जीवित for जीवन

2210 (b) Ed. प्रेष्य. स्वैरं for प्रेष्याकार.

(d) Ed. om. the line.

(b-d) Sv. reads these lines thus :—

कृतपरिकर. स्वेदोद्गारं प्रधावति धावति ।
गुणसमुदितं दोषापेतं प्रणिन्दति निन्दति
धनलवपरिक्रीतो भृत्य॰ प्रनृत्यति नृत्यति ॥

Sv. धर्मकीर्तेः for कस्यचित्.

For (d) Ed. reads पठति वितथस्तोत्रं भर्तुः प्रहृष्यति हृष्यति. (See Errata). In the Ed. (c) appears to be the last line of the verse.

४३ मनस्विसेवकः ।

2211 सोढ द्वाःस्थितदुर्वचः कटु ततो दृष्टो दुरीशश्चिरा-
दुद्गीर्णा स्वगुणाश्च याचितमथ श्रोत्रे कृता नेति गीः ।
अस्मिन्पातकपञ्चके सति महत्यां ब्रह्महत्यादिकं
यत्पापं महदूचिरे मनुमुखाः कोन्वेष तेषां भ्रमः ॥१॥ शार्दूलविक्रीडित

धर्मपालस्य ।

2212 लज्जे लज्जे निमज्ज क्वचिदपि निभृत
तिष्ठ तिष्ठ प्रतिष्ठे
गच्छ द्रोणीं हिमाद्रेः पुनरपि तपसे
भारति स्वस्ति तुभ्यम् । स्रग्धरा
सोऽहं पुण्यक्षयेण प्रचुरपरिभवातङ्किनि प्रौढतापे
सेवापङ्के पतामि द्रविणकणधिया
निष्कृपाणां नृपाणाम् ॥२॥

कस्यचित् ।

2213 अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् । Srk. 1467
यदीशानामग्रे द्रविणमदमोहान्धमनसां Ss. I 19
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥३॥ शिखरिणी

धर्मकीर्तेः ।

2214 कामं वनेषु हरिणास्तृणेन जीवन्त्ययत्नसुलभेन । Ss. I. 15
विदधति धनिषु न दैन्यं ते किल Spd. 261
Smv. 26.1
पशवो वयं सुधियः ॥४॥ Srk. 1494

सिल्हणस्य । आर्या

2211 Quoted by Aufrecht in ZDMG, 36, p. 380.

2212 (c) A, S, I. O पण्यक्रमेण for पुण्यक्षयेण

2213 (c) Ss. कण for मद.
Srk —anonymous.

2214 (b) Spd., Smv. read विदधति bet. दैन्यं and ते , खलु (also Ss.) for किल.
Srk., Smv., Spd.—anonymous.

2215 वयमनिपुणाः कर्णप्रान्ते निवेशयितुं मुखं
Srk. 1470
हरिणी
कृतकमधुरं भर्तुर्भावं न भावयितु क्षमाः ।
प्रियमपि वचो मिथ्या वक्तुं जनैर्न च शिक्षिताः
क इह स गुणो येन स्याम क्षितीश्वरवल्लभाः ॥५॥

भर्तृहरेः ।

४४ दुरीश्वरसेवकः ।

2216 प्रालेयादपि शीतलो हुतवहः पीयूषगर्भादपि
शार्दूलविक्रीडित
स्वादीयो गरलं भवेदपि मृदुर्दम्भोलिरम्भोजतः ।
व्याहारादपि सुभ्रुवां खलवचः कर्णद्वयीदोहदं
न त्वेता दुरधीश्वरस्य कुटिलक्रूराः कटाक्षोर्मयः ॥१॥

शङ्खधरस्य ।

2217 स्नात मारवरोचिरम्भसि कृतः स्नेहग्रहः सैकते
शार्दूलविक्रीडित
पाषाणे जनितोऽङ्कुरः स्वकुसुमैः सृष्ट शिरःशेखरः ।
वन्ध्याया विहिता सुतेन सखिता कूर्माङ्गनाया पयः
पीतं येन निषेव्य मुग्धधनिनः सपादिताः संपदः ॥२॥

पण्डितशशिनः ।

Kuval. p. 59
Sv. 448
2218 अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।

2215 (a) Srk. अकुशलाः for अनिपुणाः, कर्णोपान्ते for कर्णप्रान्ते.
(b) Srk. चरितैर्भर्तुश्चेतो न वञ्चयितुं for मधुरं ·· भावयितुं.
(d) Srk. reads क इव हि गुणो योऽस्मान् कुर्यान्नरेश्वरवल्लभान्.
Srk.—anonymous.
Quoted by Aufrecht in ZDMG, 36, p. 380.

2216 Ed. शङ्करधरस्य for शङ्खधरस्य.
Quoted by Aufrecht in ZDMG, 36, p. 381.

2217 Quoted by Aufrecht in ZDMG, 36, p. 381.

श्वपुच्छमवनामितं बधिरकर्णजापः कृतः पृथ्वी
कृतान्धमुकुरक्रिया यदबुधो जनः सेवितः ॥३॥
सिल्हणस्य ।

2219 तोयं निर्मथितं घृताय मधुने निष्पीडितः प्रस्तरः
पानार्थं मृगतृष्णिकोर्मितरला भूमिः समालोकिता । Srk. 1515 शार्दूलविक्रीडित
दुग्धा सेयमचेतनेन जरती दुग्धाशया शूकरी
कष्टं यत्खलु दीर्घया धनतृपा नीचो जनः सेवितः ॥४॥
अमरसिंहस्य ।

2220 स्तब्धस्तिष्ठसि पश्यदन्धपुरतः किं दर्शनाकाङ्क्षया
जल्पन्मूकमुखादित. प्रतिवचः किं श्रोतुमाकाङ्क्षसि । शार्दूलविक्रीडित
यः शृण्वद्बधिरः शृणोति स कथं विज्ञप्तिकां तावकीं
प्राणप्रेतमुपासमाननपठन्मूर्खस्त्वदन्यो जनः ॥५॥
वल्लणस्य ।

४५ क्षुद्रोदयदुःखितः ।

2221 सुखं जीवन्ति जातान्धाः पर्वताः सरितोऽपि च ।
क्षुद्राभ्युदयसाक्षिभ्यामक्षिभ्यां हा हता वयम् ॥१॥ अनुष्टुप्
कस्यचित् ।

2218 (d) Kuval. धृतोऽन्धमुखदर्पणो (Sv. कृतान्धमुखमण्डना) for कृता ...क्रिया.

Sv. भर्तृहरे for सिल्हणस्य.

2219 (b) Srk. स्नानार्थं for पानार्थं. Ed. आलोडिता for आलोकिता.

(c) Srk. दुग्धस्यता for दुग्धाशया. Ed., Srk. गर्दभी for शूकरी.

Srk. जोयीकस्य.

This verse has been quoted by Aufrecht in ZDMG, 36, p. 363, with दुग्धाशयात्सूकरी for दुग्धाशया शूकरी.

2220 Quoted by Aufrecht in ZDMG, 36, P. 381.

2221 Quoted by Aufrecht in ZDMG, 36, p. 382.

2222 धन्याः खलु नीचानां तृष्णातापार्तिविधुरमनसोपि ।
आर्या भ्रुकुटीतरङ्गकुटिलां न दृष्टिसरितं विगाहन्ते ॥२॥

शङ्करधरस्य ।

2223 अलङ्घ्यं सर्वेषामिह खलु फलं कर्मजनितं
विपत्कर्मप्रैष्या व्यथयति न जातासि हृदयम् ।
शिखरिणी यदज्ञाः कुर्वन्ति प्रसभमुपहासं घनमदा-
दिदं त्वन्तर्गाढं परमपरितापं जनयति ॥३॥

धर्माकरस्य ।

2224 हे लोचनद्वय चलज्जलबुद्बुदाभ
किं न प्रयासि कटकामणिवद्विलीय ।
वसन्ततिलक यद्दैवलब्धवसुमूर्खमुखावलेप-
मुद्रामुदीक्षितुमयं तव जन्मलाभः ॥४॥

वाक्कोकस्य ।

2225 विद्यावानपि जन्मवानपि तथा युक्तोऽपि तैस्तैर्गुणै-
Srk. 1482 र्यन्नाप्नोति मनः समीहितफलं दैवस्य सा वाच्यता ।
शार्दूलविक्रीडित एतावत्तु हृदि व्यथां वितनुते यत्प्राक्तनैः कर्मभि-
र्लक्ष्मीं प्राप्य जडोऽप्यसाधुरपि
च स्वां योग्यतां मन्यते ॥५॥

कस्यचित् ।

2222 A शङ्करस्य (Sp. शङ्खधरस्य) for शङ्करधरस्य.

2223 (b) Ed. प्रेष्या for प्रैष्या , जातापि for जानासि.

(d) Ed. प्रथम for परम.

Ed.—anonymous.

The verse has been quoted by Aufrecht in ZDMG, 36, p. 516.

2224 (d) Ed. मुद्रासु दीक्षितुम् for मुद्रामुदीक्षितुं.
Quoted by Aufrecht in ZDMG, 36, p. 382.

2225 (a) Srk. चान्यै for तैस्तै.
Quoted by Aufrecht in ZDMG, 36, p. 382.

४६ दारिद्र्यम् ।

2226 लग्नः शृङ्गयुगे गृही सतनयो वृद्धौ गुरू पार्श्वयोः
पुच्छाग्रे गृहिणी खुरेषु शिशवो लग्ना वधूः कम्बले । Srk. 1317
एकः शीर्णजरद्गवो विधिवशात्सर्वस्वभूतो गृहे शार्दूलविक्रीडित
सर्वेणैव कुटुम्बकेन रुदता सुप्तः समुत्थाप्यते ॥१॥
कस्यचित् ।

2227 प्रायो दरिद्रशिशवः परमन्दिराणां
द्वारेषु दत्तकरपल्लवलीनदेहाः ।
लज्जानिगूढवचसो बहुभोक्तुकामा Srk. 1320
भोक्तारमर्धनयनेन विलोकयन्ति ॥२॥ वसन्ततिलक
कस्यचित् ।

2228 हलमगु वलस्यैकोऽनड्वान्हरस्य न लाङ्गलं
पदपरिमिता भूमिर्विष्णोर्न गौर्न च लाङ्गलम् ।
प्रभवति कृषिर्नैवाद्यापि द्वितीयगवं विना हरिणी
जगति सकले नेदृग्दृष्टं दरिद्रकुटुम्बकम् ॥३॥
कस्यचित् ।

2229 मद्गेहे मुषलीव मूषकवधूर्मूषीव मार्जारिका
मार्जारीव शुनी शुनीव गृहिणी
वाच्यः किमन्यो जनः । Sv. 3197
किं च क्षुत्क्रमघूर्णमाननयनैरुच्छिद्रमुर्वीं गतैः शार्दूलविक्रीडित
कर्तुं वाग्व्ययमक्षमैः स्वजननी बालैः समालोक्यते ॥४॥
दुर्गतस्य ।

2227 (c) S, I. O नम्रा for लज्जा Srk. बत for बहु.
2228 (a) S, I. O. हलस्यैको for वलस्यैको.
(c) A नौं मेऽद्यापि for नैवाद्यापि.
2229 (a) Sv. मशकीव for मुषलीव.
(c-d) Sv. reads इत्यापन्नशिशूनसून् विजहत सप्रेक्ष्य झिल्लीरवं-
लूतातन्तुवितानसंवृतमुखी चुल्ली चिरं रोदिति ॥
Sv. कस्यापि for दुर्गतस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 514.

Srk. 1313 2230 जरदम्बरसवरणग्रन्थविधौ ग्रन्थकार एकोऽहम् ।
आर्या परिमितकदन्नवण्टनविद्यापारं गता गृहिणी ॥५॥
भानोः ।

४७ सचाटुदारिद्र्यम् ।

2231 अम्बा तुष्यति न मया न स्नुषया
S k. IV. 194 सापि नाम्बया न मया ।
Sv. 3185
Spd 411 अहमपि न तया न तया वद
आर्या राजन्कस्य दोषोऽयम् ॥१॥
कस्यचित् ।

2232 आजन्मनः सहजतुल्यविवर्तमान-
वसन्ततिलक दौर्गत्यतोऽस्ति परमो न सुहृन्ममान्यः ।
येनात्मनोऽपरिगणय्य विनाशमाशु
देव त्वदाश्रयणपुण्यधनः कृतोस्मि ॥२॥
दक्षस्य

2233 दुर्गतिरेका वनिता ममापि पितुरियं पितामहस्यापि ।
आर्या तत्कुरु नाथ यथायं जनपरिवादः प्रशान्तिमभ्येति ॥३॥
कस्यचित् ।

2230 (a) Srk. ग्रन्थि for ग्रन्थ.
Srk.—वीरस्य.
The verse has been quoted by Aufrecht in ZDMG, 36, p 519.

2231 (b) Sv. अस्ति for अयम्.
Sv. भट्टकपर्दिनः for कस्यचित्.

2232 (a) A विवर्धमान for विवर्तमान

2233 (a) Ed. पितुरपि for पितुरियं.
(b) A, I. O. तवायं for यथायं. I, O., S प्रवादः for परिवादः.

2234 दारिद्र्यगृध्रपरिभुक्तसमस्तमांस
स्नायूपरुद्धसकलास्थिचयावशेषम् ।
पीयूषवृष्टिमिव नाथ निधेहि दृष्टिं — वसन्ततिलक
कङ्कालजालमिदमङ्कुरमातनोति ॥४॥

कस्यचित् ।

2235 दारिद्र्यं नृपतिः स नो निजपतिर्यस्य प्रसादादभू-
द्याच्ञा जीवितमंशुकं दश दिशः सद्मानि देवालयाः ।
मद्विद्वेषिणि लब्धसंनिधिरिति त्वय्याश्रये कुप्यता — शार्दूलविक्रीडित
मद्भर्त्यैव पुरस्कृतास्त्वदरयस्तेनाधुना का गति ॥५॥

विश्वपालस्य ।

४८ दरिद्रगृही ।

2236 शीलं शातयति श्रुतं शमयति प्रज्ञां निहन्त्यादरा-
दैन्यं दीपयति क्षमां क्षपयति व्रीडामपि व्यस्यति । — शार्दूलविक्रीडित
चेतो जर्जरयत्यपास्यति धृतिं विस्तारयत्यर्थितां
पुंसः क्षीणधनस्य किं न कुरुते वैरी कुटुम्बग्रह ॥१॥

दामोदरस्य ।

2237 उत्तिष्ठ क्षणमात्रमुद्वह सखे दारिद्र्यभार मम
श्रान्तस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखम् । — Sv 3195
इत्युक्तो धनवर्जितेन वहुधा गत्वा श्मशानं शवो — शार्दूलविक्रीडित
दारिद्र्यान्मरणं वरं सुखमिति
ध्यात्वेव तूष्णीं स्थितः ॥२॥

वसुकल्पस्य ।

2234 (b) A, S, I. O., स्नायूपबद्ध for ०रुद्ध
2237 (a) Sv. क्षणमेकम् for क्षणमात्रम् , गुरुं for मम
(b) Sv चिरं for चिरात्
(c) Ed., इत्युक्त for इत्युक्तः, शवम् for शव Sv विदुषा for वहुधा
(d) Sv. परं for वर S, I. O , ध्यात्वैव (Sv. ज्ञात्वा स) for ध्यात्वेव. Ed स्थितम् for स्थितः.
S, I. O., वन्धकम्पस्य for वसुकल्पस्य. Sv. does not give the poet's name.

2238 क्षुत्क्षामाः शिशवः शवा इव तनुर्मन्दादरो बान्धवो
Srk. 1307 लिप्ता जर्जरकर्करीजललवैर्नो मां तथा बाधते ।
शार्दूलविक्रीडित गेहिन्याः स्फुटितांशुकं घटयितुं कृत्वा सकाकुस्मितं
कुप्यन्ती प्रतिवेशिनी प्रतिमुहुः
सूचीं यथा याचिता ॥३॥
कस्यचित् ।

2239 तस्मिन्नेव गृहोदरे रसवती तत्रैव सा कण्डनी
तत्रोपस्करणानि तत्र शिशवस्तत्रैव वासः स्वयम् ।
Srk. 1310 सर्वं सोढवतोपि दुःस्थगृहिण. किं ब्रूमहे तां दशा-
शार्दूलविक्रीडित मद्य श्वो विजनिष्यमाणगृहिणी
तत्रैव यत्कुन्थति ॥४॥
वैनतेयस्य ।

2240 आस्तां किं बहुभिः परोपकृतय संसारसारं फलं
सिद्धं तत्प्रतिकूलवर्तिनि विधौ न स्तोकमप्यत्र नः ।
शार्दूलविक्रीडित एते स्मः किल मानुषा वयमपि व्यर्थं व्यपेतायुषो
येषां स्वोदरपूर्तिरेव हि किमप्यष्टौ महासिद्धयः ॥५॥
कस्यचित् ।

४९ दरिद्रगृहिणी ।

Srk 1311 2241 अद्याशनं शिशुजनस्य बलेन जातं
वसन्ततिलक श्वो वा कथं नु भवितेति विचिन्तयन्ती ।

2238 (c) A स्थितम् for स्मितम्.
(d) Srk. दिनं for मुहुः.
2239 (c) Srk. एतत् for सर्वं, दुर्दशां for ता दशाम्.
Srk.—anonymous.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 526.
2240 (b) Ed. तर्किनि for वर्तिनि.

अत्यश्रुपातमलिनीकृतगण्डदेशा
नेच्छेद्दरिद्रगृहिणी रजनीविरामम् ॥१॥

कस्यचित् ।

2242 यावद्दुःस्थकुटुम्बिनीकरतलस्पर्शात्समालोकते
तत्तत्क्षुद्रकणादिरक्षणधिया घोरं घने वर्षति । शार्दूलविक्रीडित
तावज्जीर्णकुटीरकोटरविशत्सौदामिनीदीपितं
दृष्ट्वा तूलकजालमाविलजलाकीर्णं मुहुर्मूर्छति ॥२॥

योगेश्वरस्य ।

2243 कुम्भीसंचिततण्डुलाः प्रतिदिनं नीताः क्षयं मूषिकै-
र्वास्तुष्वेव पिशङ्गितोदरतलाः शीर्यन्ति वार्ताकवः । शार्दूलविक्रीडित
जीर्णं जालकमारनालपिठरीगर्भे च काकारवं
दीनायाः पथिकस्त्रिया
प्रियतमप्रत्यागमाकांक्षया ॥३॥

नीलस्य ।

2244 वैराग्यैकसमुन्नता तनुतनुः शीर्णाम्बरं बिभ्रती
क्षुत्क्षामेक्षणकुक्षिभिश्च शिशुभिर्भोक्तुं समभ्यर्थिता । शार्दूलविक्रीडित
दीना दुःस्थकुटुम्बिनी प्रविगलद्बाष्पाम्बुधौतानना-
प्येकं तण्डुलमानकं दिन-
शतं नेतुं समाकांक्षति ॥४॥

वीरस्य ।

2245 सक्रूञ्शोचति सप्लुतान्प्रतिकरोत्याक्रन्दतो बालकान्
प्रत्युत्सिञ्चति कर्परेण सलिलं शय्यातृणं रक्षति । Sv. 3201

2241 (c) Sik इत्यश्रु for अत्यश्रु. Ed. कलुषी for मलिनी.
(d) Ed. न्वैच्छत् for नेच्छेत्.

2242 (d) Ed जालमुद्गत for °माविल.

2243 (c) A I. O. कर्का for काका.

2244 (c) Ed. परिगलद् for प्रविगलद्.

2245 (a) Sv शोषयति for शोचति, omits सं in सप्लुतान्.
(b) Sv. प्रत्यासिञ्चति for प्रत्युत्सिञ्चति.

Srk. 1312 शार्दूलविक्रीडित

दत्त्वा मूर्ध्नि विशीर्णशूर्पशकलं जीर्णे गृहे व्याकुला
किं तद्यन्न करोति दुःस्थगृहिणी देवे भृशं वर्षति ॥५॥

लङ्गदत्तस्य ।

५० दरिद्रगृहम् ।

अनुष्टुप्

2246 चलत्काष्ठं गलत्कुड्यमुत्तानतृणसंचयम् ।
गण्डूपदार्थिमण्डूककीर्णं जीर्णं गृहं मम ॥१॥

कस्यचित् ।

शार्दूलविक्रीडित

2247 हस्तप्राप्यतृणोज्झिताः प्रतिपयोवृत्तिस्खलद्भित्तयो
दूरालम्बितदारुदन्तुरमुखाः पर्यन्तवल्लीवृताः ।
वस्त्राभावविलीनसत्रपवधूदत्तार्गला निर्गिर-
स्त्यज्यन्ते चिरशून्यविभ्रमभृतो
भिक्षाचरैर्मद्गृहाः ॥२॥

कस्यचित् ।

Sd. under VII 14
Smv. 127.4
Srk 1644
आर्या

2248 पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं नाथ ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥३॥

कस्यचित् ।

वसन्ततिलक

2249 धूमेन रिक्तमपि निर्भरबाष्पकारि
दूरीकृतानलमपि प्रतिपन्नतापम् ।
दैन्यातिशून्यमपि भूषितबन्धुवर्ग-
माश्चर्यमेव खलु खेदकरं गृहं नः ॥४॥

जलचन्द्रस्य ।

2245 (c) Sv. धृत्वा for दत्त्वा, पुराण for विशीर्ण, शून्ये for जीर्णे
Srk. मूर्धनि शीर्ण for मूर्ध्नि विशीर्ण.
(d) Sv. दुर्गतवधू for दुःस्थगृहिणी
Srk —योगेश्वरस्य.

2248 (a) S. D., Ed., Smv. देव for नाथ
(b) Ed. समभावयो॰ for ॰मावयो..
(d) Srk. भवनम् for सदनम्.

2250 उत्सन्नच्छदिरुच्छ्रुसद्दति गलद्भित्ति स्खलन्मण्डलि
भ्राम्यत्कुण्डलि हिण्डदाखु खुरलिप्रक्रीडिभेकावलि ।
चञ्चच्चर्मचटौघपक्षतिपुटप्रारब्धभांभांकृति
श्रीमत्सेनकुलावतंस भवतः शत्रोरिवास्मद्गृहम् ॥५॥ शार्दूलविक्रीडित
सोन्होकस्य ।

५१ जरा ।

2251 एकगर्भोषिताः स्निग्धा मूर्ध्ना सत्कृत्य धारिताः ।
केशा अपि विरज्यन्ते जरसा किमुताङ्गनाः ॥१॥ अनुष्टुप्
श्रीव्यासपादानाम् । Srk. 1525

2252 केशाः पाकमुपागताः शिथिलतामङ्गेष्यनङ्गो गतः
सर्वाङ्गं वलिवेष्टितं प्रियतमा सभ्यं जनत्वं गता ।
ये वान्ये गुणशालिनोऽपि
सुहृदस्ते चापि याता दिवं
तन्मां मुञ्च घनागमं व्रज वनं चेतः कुतः स्थीयते ॥२॥ शार्दूलविक्रीडित
तरणिकस्य ।

2253 केशा काशनिभाः कपालफलके त्वग्भिस्तरङ्गायितं
काचेनोचिततारकेण खचिते पर्यश्रुणी लोचने । शार्दूलविक्रीडित

2250 (a) Sp उच्छन्न for उत्सन्न S, I. O ०रुच्छमद् for रुच्छ्रुसद.
(c) Ed प्राबद्ध for प्रारब्ध.
Ed. सोल्होकस्य for सोन्होकस्य.

2251 A drops श्री in the poet's name Srk.—anonymous

2252 (b) Ed drops. सर्वाङ्गं वलिवेष्टितम्, and suggests in the Errata वार्धक्याद् वलिभङ्गिनी.
(c) Ed. चान्ये for वान्ये
Ed. तरलिकस्य for तरणिकस्य.

2253 (a) Ed., A कपोल for कपाल

अङ्गानामवसादितापि च गिरां कम्पस्तथाप्येष मे
मोहः स्नेहमयो न मुञ्चति
मनः कस्मै समावेद्यताम् ॥३॥
सुव्रतस्य ।

2254 शौर्याभिमानवनदावशिखे सुवद्ध-
प्रस्थानवृत्तिमतिविभ्रममूलबन्धो ।
मृत्योः पुरःसरवलध्वजवैजयन्ति
मातर्जरे सततमस्तु नमो भवत्यै ॥४॥
धर्मपालस्य ।

वसन्ततिलक

2255 दिग्विभ्रमं दशनखण्डनमङ्गभङ्ग
केशग्रह रतिविधौ मदनादरं च ।
श्वासप्रकम्पजडभावसुघूर्णितानि
धत्ते जरा प्रणयिनीव मयोपगूढा ॥५॥
कस्यचित् ।

वसन्ततिलक

५२ वृद्धः ।

2256 स्वस्ति सुखेभ्यः संप्रति सलिलाञ्जलिरेष
मन्मथकथायाः ।
ता अपि मामतिवयसं तरलदृशः सरलमीक्षन्ते ॥१॥
शतानन्दस्य ।

Sv. 3395
Srk 1522
आर्या

2257 आक्रान्तं वलिभिः प्रसह्य पलितैरत्यन्तमास्कन्दितं
वार्धक्यं श्लथसन्धिबन्धनतया निःस्थाम निर्धाम च ।

शार्दूलविक्रीडित

2254 (c) S, I. O सुर for सर.

2256 (a) Sv एव for एष S, I. O. कथायै for कथाया..

(b) S, I O., तद्यदि for ता अपि. Sv, om. अपि, inserts बत bet. वयसं and तरल.

Sv. स्खलितम् for सरलम्.

Srk., Sv.—anonymous.

2257 (b) Ed. वर्धक्य for वार्धक्यं.

एतन्मे वपुरस्थिकेवलजरत्कङ्कालमालोकय
स्थूलशिराकरालपरुषत्वङ्मात्रपात्रीकृतम् ॥२॥

दङ्कस्य ।

2258 गलितं यौवनमधुना वनमधुना सेवनीयमस्माकम् ।
स्फुरदुरुहारमणीनां हारमणीनां गतः कालः ॥३॥ आर्या

कस्यचित् ।

2259 स्थूलप्रावरणोऽतिवृत्तकथनः कासाश्रुलालाविलो
भुग्नाङ्घ्रित्रिकपृष्ठजानुजघनो मुग्धोऽतिथीन्वारयन् ।
शृण्वन्धृष्टवधूवचांसि धनुषा संत्रासयन्वायसा- Ss. II. 29
नाशापाशनिबद्धजीवविहगो वृद्धो शार्दूलविक्रीडित
गृहे ग्लायति ॥४॥

कस्यचित् ।

2260 विकासयति लोचने स्पृशति पाणिना कुञ्चिते
विदूरमवलोकयत्यतिसमीपसंस्थं पुनः । Srk. 1179
वहिर्व्रजति सातपे स्मरति नैव वृत्तेः पुरा पृथ्वी
जराप्रमुखसंस्थित समवलोकयन्पुस्तकम् ॥५॥

कस्यचित् ।

2257 (d) Ed. कपाल for कराल , मन्नीकृतम् for पात्री॰
A दत्तस्य for दङ्कस्य.
2258 Quoted by Aufrecht in ZDMG, 36, p 552
2259 (a) Ss अतिपूर्वकथक॰ for अतिवृत्तकथन.. Ed प्राणगणो for प्रावरणो.
(b) A, S, I. O., भग्न for भुग्न. Ss. भग्नोरःकटिपृष्ठजानुदशनो for
भुग्ना ॰जघनो Ss मुग्धे for मुग्धो
(d) Ss. विभवो for विहगो.
2260 (c) Srk वर्तें॰ for वृत्तेः, पुमान् for पुरा.
Srk —वराहस्य.

५२ अनुशयः ।

Ss. I 9
Sv 3178
Spd 4153
Srk 1632
शार्दूलविक्रीडित

2261 क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं न च पुनर्विष्णोः पदं शाश्वतं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः
फलैर्वञ्चितम् ॥१॥
भर्तृहरेः ।

Ss. I. 11
शार्दूलविक्रीडित

2262 नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥२॥
तस्यैव ।

शिखरिणी

2263 उपस्यैव भ्रान्तं हतजठरहेतोस्तत इत
स्वयं च स्व बिभ्रद्विचरति कुटुम्बं दिशि दिशि ।
वतास्माभिः काकैरिव कवलमात्रैकमुदितै-
र्न चायुर्दुर्गत्योरवधिरिह लब्धः कथमपि ॥३॥
वेशोकस्य ।

2261 (b) Ed. सोढः for सोढा, क्लेश· for क्लेशा.
(c) Spd., Sv. नियमितप्राणैर्न शम्भोः पदं (Srk न च पुनस्तत्त्वान्तर) for न च . शाश्वतम्.
(d) Sv. उज्झितम् for वञ्चितम् (Spd. वञ्चिता·)
Srk.—anonymous.

2262 (c) Ed. पुरुषाधिपं for पुरुषाधमं

2263 (c) A निरतै for मुदितै.
The verse has been quoted by Aufrecht in ZDMG, 36, p. 525.

2264 कौशल्या ननु रोधना जनकभूर्दूरीकृता किं तु न
प्राप्ता पञ्चवटी न वानरपतेरासादितं सौहृदम् ।
सामर्षेण न वारिराशिरचिरादुल्लङ्घितः केवलं — शार्दूलविक्रीडित
काकुत्स्थेन मया दशाननतिरस्कारास्पदीभूयते ॥४॥

हरेः ।

2265 जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्व कुशलवसुता नत्वधिगता ॥५॥

शूलपाणेः । — Sv 3264, Sd. under IV. 17, Smv. 127.5, Srk 1472, शिखरिणी

८४ निर्वेदः ।

2266 पित्रोर्नोपकृतं हिमांशुधवलं नोपार्जितं वा यशो
मित्राणामुपकारिता न विहिता दत्तं न च स्वेच्छया । — शार्दूलविक्रीडित
गाढालिङ्गनलालसाऽपि दयिता नालिङ्गिता केवलं
कालोऽभ्येति चलं च जीवितमिति
क्षुण्णं मनश्चिन्तया ॥१॥

कस्यचित् ।

2264 (a) Ed रोधिना for रोधना Sp. जनकजा for ०भूः.
(b) A वाचा for वचो.
(d) A ममाप्तं for मयाप्तं, नत्वाधिकृता for ०गता.

2265 (a) Srk. अन्वित for अन्धित.
(b) Srk. दिशम् for पदम्
Smv. attributes it to भट्टवाचस्पति Sv.—Anonymous.
Srk अभिनन्दस्य
The verse has been quoted by Aufrecht in ZDMG, 36, p. 528.

2266 (d) Ed. अत्येति for अभ्येति.

शार्दूलविक्रीडित

2267 नो खड्गप्रविदारिता करिघटा नोद्वेजिता वैरिण-
स्तन्वङ्ग्या विपुले नितम्बफलके न क्रीडितं लीलया ।
नो जुष्टं गिरिराजनिर्झरचलज्झांकारि गाङ्ग पयः
कालोयं परपिण्डलोलुपतया काकैरिव प्रेरितः ॥२॥

कस्यचित् ।

Sv. 3400
शार्दूलविक्रीडित

2268 न प्राप्ता भुवि वारिवृन्ददमनी विद्या विनोदोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नैवानुनीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥३॥

कस्यचित् ।

Sik. 1498
शार्दूलविक्रीडित

2269 नो मेघायितमर्थवारिविरहक्लिष्टेर्थिशस्ये मया
नोद्वृत्तप्रतिपक्षपर्वतकुले निर्घातवातायितम् ।
नो वा वामविलोचनामलमुखाम्भोजेषु भृङ्गायितं
मातु केवलमेव यौवनवनच्छेदे कुठारायितम् ॥४॥

भर्तृहरेः ।

शार्दूलविक्रीडित

2270 नाक्रान्ताम्बुधिमेखला वसुमती लक्ष्मीः समावेशिता
नो विद्वद्भवनेषु पक्ष्मलदृशां नाश्रावि सूक्तामृतम् ।
जन्म व्यर्थफलोदयं वत परं गृह्णद्भिरस्मादृशै-
र्व्याप्तं व्योम कियद्भुजङ्गमपतेर्भारः कियानर्पितः ॥५॥

साञ्चाधरस्य ।

2268 (a) Sv. वादिदन्ति for वारिवृन्द, विनीत for विनोद.
(b) Sv. यूथकुम्भ for कुम्भपीठ, नाक न नीतं for नैवानुनीतं.
(d) Sv. निष्फलतया for निष्फलमहो.

2269 (a) Ed क्लिष्टार्थि for क्लिष्टेर्थि
(d) For कुठारायितम् the reading कुठारा वयम् is also found. (See *Sataka-trayādi subhāsia-samgraha*, ed. Kosambi, p. 171.

2270 (a) Ed. नाक्रान्ता मणि for नाक्रान्ताम्बुधि.

५५ विचार ।

2271 ददति तावदमी विषयाः सुखं
स्फुरति यावदियं हृदि वासना ।
मनसि तत्त्वविदां च विवेचके
क्व विषयाः क्व सुखं क्व परिग्रहः ॥१॥

Srk 1607
द्रुतविलम्बित

कस्यचित् ।

2272 आयुर्वासरमासवत्सरगणे गच्छत्यदूरं पथै-
राक्रामन्ति कृतान्तकासरखुरक्षुण्णा रजोराजयः ।
ईषल्लङ्घितशैशवा इति वयःसंधिं दधाना इति
व्यक्ता वर्जितयौवना इति
तथा नन्दन्ति तन्द्रालवः ॥२॥

शार्दूलविक्रीडित

जलचन्द्रस्य ।

2273 तन्मित्रं यदयन्त्रण स विभवो य साधुसाधारण-
स्तस्यां योषिति भावयेदभिरतिं भावानुरक्तैव या ।
तां चिन्तां मनसोद्वहेत सततं यस्या फलं भुज्यते
तानीहेत फलानि यान्यविधुराण्याशा-
महोजन्मनः ॥३॥

शार्दूलविक्रीडित

कस्यचित् ।

2274 तत्पाण्डित्यं न पतति पुनर्येन संसारबन्धे
तत्सौहार्दं न चलति पुनर्यत्सुखे वासुखे वा ।

मन्दाक्रान्ता

2271 (b) Srk. मूढता for वासना
(c) A, Srk तु for च
2272 (a) Ed गणेः for गणे.
(b) A आक्रामन्ते for आक्रामन्ति
2273 (b) Ed. अपि रतं for अभिरति
2274 (a) A मध्ये for बन्धे.
(b) Ed. सौहार्दं तन्न for तत्..... न

सम्भोगास्ते यतिषु विदुषां ये न वाच्या परेषां
तच्चैश्वर्यं जगति महतां यत्परेषां सुखाय ॥४॥

कस्यचित् ।

Sk. IV 71
शार्दूलविक्रीडित

2275 सद्विद्या यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः
सन्तश्चेदमृतेन किं यदि खलास्तत्कालकूटेन किम् ।
किं कर्पूरशलाकया यदि दृशः पन्थानमेति प्रिया
संसारेपि सतीन्द्रजालघटनं
यद्यस्ति तेनापि किम् । ५॥

कस्यचित् ।

५६ विचिकित्सितम् ।+

Ss. I. 20
Srk. 1610
शार्दूलविक्रीडित

2276 बीभत्सा विषया जुगुप्सिततमः कायो वयो गत्वरं
प्रायो बन्धुभिरध्वनीव पथिकैर्योगो वियोगावहः ।
हातव्योऽयमसार एव विरसः संसार इत्यादिकं
सर्वस्यैव हि वाचि चेतसि
पुनः कस्यापि पुण्यात्मनः ॥१॥

सिल्हणस्य ।

2275 (a) Sk. दातारो for सद्विद्या.
(b) A, I. O., खल for खला.
(c) Sk. दृशो॰ for दृश .
(d) Sk. मपरं for घटनम्.
\+ S, I. O , अथ विचिकित्सितवीचि॰ ।

2276 (b) Ed., A अध्वनीन for अध्वनीव Srk. सगो for योगो.
(c) Srk. असत्तवाय for असार एव, विसर for विरस Ss. एष for एव.
(d) A transposes कस्यापि and पुण्यात्मन . For this portion S, I. O., Srk. read पुण्यात्मन कस्यचित्
Srk.—भर्तृहरेः Ed बिल्हणस्य.

